तुण्डसदृशेषु शब्देषु उतः उकारस्य ओकारः स्यात् । तोंडं, तुण्डम् । पोक्खरो, पुष्करः । ष्कस्कक्षां ख इति ष्कस्य खः । तस्य द्वित्वे वर्गे युजः पूर्व इति कः । मोत्थं, मुस्तम् । स्तस्य थ इति थः । तस्य आदेशत्वाद् द्वित्वे वर्गे युजः पूर्व इति तः । पोत्थअं, पुस्तकम् । स्तस्य थकारादिकं पूर्ववत् । मोग्गरो, मुद्गरः । उपरि लोप इत्यादिना दस्य लोपः । शेषस्य गस्य द्वित्वम् । लोद्धओ, लुब्धकः । सर्वत्र लवरामिति वलोपः । शेषस्य धस्य द्वित्वे वर्गे युजः पूर्व इति दः । कगचादिना कलोपः । सोमालो, सुकुमारः । कगचादिना कलोपः । ततः सन्धावचामित्यादिना उकारस्य लोपः । हरीद्रादीनां रो ल इति रेफस्य लः ।

तुण्डः पुष्करशब्दश्च मुस्तपुस्तकमुद्गराः ।
लुब्धकः सुकुमारश्च तुण्डतुल्याः स्युरीदृशाः ॥२१॥

सुबोधिनी

तुण्डतुल्येषु शब्देषु उकारस्य ओत्त्वं स्यात् ।

तुण्डः पुष्करशब्दश्च मुस्तपुस्तकमुद्गराः ।
लुब्धकः सुकुमारश्च तुण्डतुल्याः स्युरीदृशाः ॥

तोंडं । पोक्खरो । मोत्थं । पोत्थअं । मोग्गरो । लोद्धओ । सोमालो ॥२१॥

(२२) उलूखले ल्वा वा ॥२२॥

सञ्जीवनी

उलूखलशब्दे ल्वा लूकारेण सह आदेः उकारस्य ओत्त्वं वा भवति । ओहलं, उलूहलं । खघथादिना खस्य हः ॥२२॥

सुबोधिनी

उलूखलशब्दे ल्वा लूकारेण सह उकारस्य ओत्त्वं वा स्यात् ।ओहलं, ऊलूहलं ॥२२॥

(२३) अन्मुकुटादिषु ॥ २३ ॥

सञ्जीवनी

मुकुटादिषु शब्देषु आदेरुकारस्य अत् अकारादेशः स्यात् । मउडं, मुकुटम् । कगचादिना कलोपः । टो ड इति टस्य डः । मउलं, मुकुलम् । सोअमल्लं, सौकुमार्यम् । कगचादिना कलोपः । औत ओदिति ओत्त्वम् । अदातो यथादिषु वेति आकारस्य अकारः । पर्यस्तपर्याणसौकुमार्येषु ल्लः इति र्यस्य ल्लः । तस्य आदेशत्वाद् द्वित्वम् । अवरि, उपरि । पो व इति पस्य वः । गरुअं, गुरुकम् । 'बाहुशब्देऽप्युकारस्य विकल्पादत्त्वमिष्यते' । बाहा, बाहू ।

मुकुटं मुकुलं चैव सौकुमार्यं तथोपरि ।
शब्दज्ञा गुरुबाह्वादीन् मुकुटादीन् प्रचक्षते ॥ २३ ॥

सुबोधिनी

एष्वादेरुतोऽकारादेशः स्यात् ।

मुकुटं मुकुलं चैव सौकुमार्यं तथोपरि ।
शब्दज्ञा गुरुबाह्वादीन् मुकुटादीन् प्रचक्षते ॥ २३ ॥

मउडं । मउलं । सोअमल्लं । अवरि । गरुअं । 'बाहुशब्देऽप्युकारस्य विकल्पादत्त्वमिष्यते' । बाहा, बाहू ॥ २३ ॥

(२४) इत् पुरुषे रोः ॥२४॥

सञ्जीवनी

अत्र पुरुषशब्दे रुकारे उकारस्य इत् इकारः स्यात् । पुरिसो, पुरुषः । शषो सः इति षस्य सः ॥२४॥

सुबोधिनी

अत्र रुकारे उकारस्य इत्त्वं स्यात् । पुरिसो ॥२४॥

(२५) उदूतो मधूकादिषु ॥ २५ ॥

सञ्जीवनी

एषु शब्देषु ऊतः ऊकारस्य उत् उकारः स्यात् । महुओ, मधूकः । खघथादिना धस्य हः । कस्य कगचादिना लोपः । मुक्खो, मूर्खः । सर्वत्र लवरामिति रेफस्य लोपः । खस्य शेषस्य द्वित्वम् । तस्य वर्गे युजः पूर्व इति कः । कुम्हण्डं कूष्माण्डम् ।

ष्मपक्ष्मविस्मयेषु म्हः इति ष्मस्य म्हः। अदातो यथादिषु वेति आकारस्य अकारः। सुद्दो, शूद्रः। सर्वत्र लवरामिति रेफलोपः। शेषस्य दस्य शेषादेशादिना द्वित्वम्। शषोः स इति शस्य सः। उद्धं, ऊर्ध्वं। सर्वत्र लवरामिति रेफवकारयोर्लोपः। ततो धस्य द्वित्वे वर्गे युजः पूर्व इति दः। पुत्तो, पूर्तः। रेफलोपः शेषद्वित्वं प्राग्वत्। मुत्ती, मूर्तिः। सर्वत्र लवरामिति रेफलोपः। शेषस्य तस्य द्वित्वम्। सुभिस्सुप्सु दीर्घ इति इकारस्य दीर्घः। अन्त्यस्य हल इति सुलोपः। भुज्जं भूर्जं। रेफलोपादिकं पूर्ववत्। सुण्णं, शून्यम्। अधो मनयामिति यलोपः। नो णः इति नस्य णः। ततः शेषादेशादिना द्वित्वम्। उम्मओ, ऊर्म्मयः। सर्वत्र लवरामिति रेफलोपः। ततो जसो वेति जसः ओत्वम्। चुण्णं, चूर्णम्। रेफलोपादिकं पूर्ववत्। उण्णा, ऊर्णा।

मधूकमूर्खकूष्माण्डशूद्रोर्ध्वपूर्तमूर्तयः ।
भूर्जशून्योर्मिचूर्णोर्णा मधूकादय ईदृशाः॥
मूल्यताम्बूलयोस्त्वोत्त्वमूकारस्येष्यते बुधैः।

मोल्लं, मूल्यं। अधो मनयामिति यलोपः। ततः शेषस्य लस्य द्वित्वम्। तंबोलं, ताम्बूलम्। मस्यानुस्वारे अदातो यथादिषु वेति आकारस्य अकारः॥२५॥

सुबोधिनी

एषु ऊकारस्य उकारः स्यात्।

मधूकमूर्खकूष्माण्डशूद्रोर्ध्वपूर्तमूर्तयः ।
भूर्जशून्योर्मिचूर्णोर्णा मधूकादय ईदृशाः॥

महुओ। मुक्खो। कुम्हण्डं। सुद्दो। उद्धं। पुत्तो। मुत्ती। भुज्जं। सुण्णं। उम्मओ। चुण्णं। उण्णा। 'मूल्यताम्बूलयोस्त्वोत्त्वमूकारस्येष्यते बुधैः' मोल्लं। तंबोल्लं॥२५॥

(२६) अद् दुकूले वा लस्य द्वित्वम्॥२६॥

सञ्जीवनी

दुकूलशब्दे ऊकारस्य अकारो लस्य द्वित्वं च युगपद् विकल्पेन भवति। दुअल्लं। पक्षे कगचादिना कलोपे दुकूलमिति॥२६॥

सुबोधिनी

दुकूलशब्दे ऊकारस्य अकारो लस्य च द्वित्त्वं युगपद्वा भवति। दुअल्लं, दुऊलं॥२६॥

(२७) एन्नूपुरे ॥२७॥

सञ्जीवनी

नूपुरशब्दे ऊकारस्य एत्त्वं स्यात्। णेउरं, नूपुरम्। नो ण इति नस्य णः। कगचादिना पकारस्य लोपः ॥२७॥

सुबोधिनी

ऊकारस्य एत्वं स्यात्। णेऊरं ॥२७॥

(२८) ओत उद्वा प्रकोष्ठे कस्य वः ॥२८॥

सञ्जीवनी

प्रकोष्ठशब्दे ओकारस्य उत्त्वं ककारस्य वकारश्च युगपद्वा भवति। पवुट्ठो, पओट्ठो, प्रकोष्ठः। सर्वत्र लवरामिति रेफलोपः। ष्टस्य ठ इति ठः। तस्य द्वित्वे वर्गे युजः पूर्व इति टः। पक्षे कगचादिना कलोपः ॥२८॥

सुबोधिनी

ओकारस्य उत्त्वं ककारस्य वकारश्च युगपद्वा भवेत्। पवुट्ठो, पओट्ठो ॥२८॥

(२९) ऋतोऽत् ॥२९॥

सञ्जीवनी

ऋकारस्य अत्त्वं स्यात्। तण्हा, तृष्णा। ह्नस्नष्णक्ष्णश्नां ण्ह इति ण्हः ॥२९॥

सुबोधिनी

ऋकारस्य अत्त्वं स्यात्। तण्हा, तृष्णा ॥२९॥

(३०) इदृष्यादिषु वा ॥३०॥

सञ्जीवनी

ऋष्यादिषु शब्देषु ऋकारस्य इत्त्वं स्याद् वा। इसी, ऋषिः। शषोः स इति षस्य सः। सुभिस्सुप्सु दीर्घ इति इकारस्य दीर्घत्वम्। ततः अन्त्यस्य हल इति सुलोपः। व्यवस्थितविकल्पोऽयम्, तेन इत्त्वाभावपक्षेऽपि ऋषिशब्दे इत्त्वमेव, अन्यत्र सर्वत्र अत्त्वम्। मसिणं, मसृणम्। पक्षे मसणं। ऋतोऽदिति अत्त्वम्। एवं धिट्ठो, धट्ठो, धृष्टः। ष्टस्य ठः इति ठः, तस्य द्वित्वे वर्गे युजः पूर्व इति टः। विसहो, वसहो; पिहुलं, पहुलं। वृषभपृथुलयोः। खघथादिना थभयोर्हत्वम्। दिढो, दढो, दृढः। मिओ,

मओ, मृगः । गिट्ठी, गट्ठी, गृष्टिः । पूर्ववत् षत्वं द्वित्वं च, किअं, कअं, कृतम् । कगचादिना तलोपः । गिद्धो, गद्धो, गृध्रः । सर्वत्र लवरामिति रेफलोपः । शेषस्य धस्य द्वित्वे वर्गे युजः पूर्व इति दः ।

ऋषिर्मसृणधृष्टौ च वृषभः पृथुलो दृढः ।

मृगो गृष्टिः कृतं गृध्र ऋष्याद्या एवमादयः ॥

भृङ्गभृङ्गारशृङ्गाराः कृपाणः कृपणः कृपा ।

शृगालहृदये वृष्टिदृष्टी इत्येषु नित्यमित् ॥

भिंगो, भृङ्गः । नङोर्हलीति ङस्य बिन्दुः । तस्य कपि तद्वर्ग्यान्त इति वा ङत्वम् । भिङ्गारो, भृङ्गारः । सिङ्गारो, शृङ्गारः । किवाणो, किवणो, कृपाणकृपणयोः । किवा कृपा । पो व इति वः । सिआलो, शृगालः । हिअअं, हृदयम् । कगचादिना दयोर्लोपः । विट्ठी, दिट्ठी वृष्टिदृष्ट्योः । ष्टस्य ठः, तस्य द्वित्वे वर्गे युजः पूर्व इति ठः ॥३०॥

सुबोधिनी

एषु ऋत इत्त्वं स्याद्वा,

ऋषिर्मसृणधृष्टौ च वृषभः पृथुलो दृढः ।

मृगो गृष्टिः कृतो गृद्ध ऋष्याद्या एवमादयः ॥

इसी । मसिणं । धिट्ठो । विसहो । पिहुलं । दिढो । मिओ । गिट्ठी । किअं । गिद्धो । इत्वाभावपक्षे ऋषिशब्दे रित्वम्, अन्यत्र अत्वमेव । व्यवस्थितविकल्पोऽयम्, तेन—

भृङ्गभृङ्गारशृङ्गाराः कृपाणकृपणकृपाः ।

शृगालहृदये वृष्टिदृष्टी इत्येषु नित्यमित् ॥

भिंगो । भिंगालो । सिंगालो । किवाणो । किवणो । किवा । सिआलो । हिअअं । विट्ठि । दिट्ठी ॥३०॥

(३१) उदृत्वादिषु ॥३१॥

सञ्जीवनी

ऋतुशब्दसदृशा ऋत्वादयः । तेषु ऋत्वादिषु शब्देषु ऋकारस्य उकारादेशः स्यात् । उदू, ऋतुः । ऋत्वादिषु तो द इति दः । सुभिस्सुप्सु दीर्घ इति दीर्घः । पउत्ती, प्रवृत्तिः । सर्वत्र लवरामिति रेफलोपः । पूर्ववदन्यत् । वुत्तन्तो, वृत्तान्तः । अदातो यथादिषु वेत्यत्त्वम् । मुणालं, मृणालम् । पुहवी, पृथिवी । अत् पथिहरिद्रापृथिवीष्वितीकारस्य

अत्त्वम् । खघथादिना थस्य हः । मुओ, मृतः । पाउसो, प्रावृट् । दिक्प्रावृषोः स इति सः । वसन्तप्रावृट्शरदः पुंसीति पुंस्त्वम् । अत ओत् सोरित्योत्त्वम् । परहुओ, परभृतः । भाउओ, जामाउओ । भ्रातृजामातृशब्दयोः । स्वार्थे को वेति कप्रत्ययः ।। ३१ ।।

ऋतुप्रवृत्तिवृत्तान्तमृणालपृथिवीमृताः ।

प्रावृट् परभृतो भ्राता जामातर्त्वादयः स्मृताः ॥

सुबोधिनी

ऋत उत्त्वं स्यात् ।

ऋतुप्रवृत्तिवृत्तान्तमृणालपृथिवीमृताः ।

प्रावृट्परभृतभ्रातृजामातर्त्वादयः स्मृताः ॥

उदू । पउत्ती । वुत्तंतो । मुणालं । पुहवी । मुओ । पाउसो । परहुओ । भाउओ । जमाउओ ।। ३१ ।।

(३२) युक्तस्यापि रिः ।। ३२ ।।

सञ्जीवनी

युक्तस्यापि वर्णान्तरेण संयुक्तस्य ऋकारस्य रिरित्ययमादेशो भवति । अपिः समुच्चये । जारिसो, यादृशः । आदेर्यो ज इति जः । तारिसो, तादृशः । एरिसो, केरिसो । ईदृशकीदृशयोः । एन्नीडापीडकीदृशेदृशेष्विति ईकारस्य एत्त्वम् । सर्वत्र शषोः स इति शस्य सः ।।३२ ।।

सुबोधिनी

अयुक्तस्य रिः ॥ ३२ क ॥

वर्णान्तरेणासंयुक्तस्य ऋतो रिकारः स्यात् । रिणं, ऋणम् ।

युक्तस्याऽपि मध्ये ॥३२ ख ॥

सुसंस्कृताद्यवर्णमध्यस्थितस्य ऋतो युक्तस्यापि रिकारादेशः स्यात् । यारिसो, यादृशः; तारिसो, तादृशः ।। ३२ ।।

(३३) वृक्षे वेन रुर्वा ।। ३३ ।।

सञ्जीवनी

वृक्षशब्दे वेन वकारेण सह ऋकारस्य रुः स्याद्वा । रुक्खो वृक्षः । ष्कस्कक्षां खः इति क्षस्य खः । तस्य द्वित्वे वर्गे युजः पूर्व इति कः । पक्षे वच्छो, वृक्षः । क्ष्मावृक्षक्षणेषु छः, द्वित्वं च पूर्ववत् ।

आत्त्वमित्त्वं तथा चोत्त्वं रित्त्वं रुत्वमृतोऽत्र यत्।
एषां लक्ष्यवशात् कार्यो निश्चयो न तु सूत्रतः॥१३॥

सुबोधिनी

अत्र वेन वकारेण सह ऋतो रुत्वं वा स्यात्। रुक्खो, वृक्षः।

अत्त्वमित्त्वं तथा चोत्त्वं रित्त्वं रुत्वमृतोऽत्र यत्।
एषां लक्ष्यवशात् कार्यो निश्चयो न तु सूत्रतः॥

ऋत इति निवृत्तम्॥३३॥

(३४) लृत इलिः॥३४॥

सञ्जीवनी

लृतो लृकारस्य इलिरादेशः स्यात्। किलित्तं, क्लृप्तम्। वेति वर्तते। सा च व्यवस्थितविभाषा। तेनेह न भवति। लिआलो, लृकारः। लृकारऋकारयोः सावर्ण्याद् अयुक्तस्यापि लृकारस्य रिः। तस्य हरिद्रादीनां रो ल इति लत्वम्॥३४॥

सुबोधिनी

लृकारस्य इलिरादेशः स्यात्। किलित्तं, क्लृप्तम्। वेत्यनुवर्त्तते। स च व्यवस्थितविकल्पार्थः। तेनेह न भवति। लिआरो, लृकारः॥३४॥

(३५) एत इद्वा वेदनादेवरयोः॥३५॥

सञ्जीवनी

एतयोः शब्दयोः एत एकारस्य इकारादेशो भवति वा। तकारोऽसन्देहार्थः। विअणा, वेअणा, वेदना। कगचादिना दलोपः। नो ण इति णः। दिअरो, देअरो, देवरः। अत ओत् सोरित्योत्त्वम्। पूर्ववदन्यत्। 'एकारस्य भवेदित्त्वं केसरेऽपि विभाषया'। किसरो, केसरो, केशरः॥३५॥

सुबोधिनी

एतयोरेकारस्य इत्त्वं स्यात्। विअणा, वेअणा। दिअरो, देअरो॥३५॥

(३६) ऐत एत्॥३६॥

सञ्जीवनी

ऐत ऐकारस्य स्थाने एत्त्वं भवति। सेलो, शैलः। **शषोः स इति** शस्य सः। केलासो, कैलाशः। वेसअणो, वैश्रवणः। सर्वत्र **लवरामिति** रलोपः। सेण्णं, सैन्यम्।

अधो मनयामिति यलोपः। नो ण इति णः। शेषादेशादिना द्वित्वम्। वेरं, वैरम्। तेल्लं, तैलम्। नीडादिषु इति लस्य द्वित्वम्॥३६॥

सुबोधिनी

ऐत ऐकारस्य स्थाने एत्त्वं भवति। सेलो, शैलः॥३६॥

(३७) दैत्यादिषु अइत्॥३७॥

सञ्जीवनी

ऐत इत्यनुवर्तते औत ओदित्यतः प्राक्। दैत्यादिषु शब्देषु ऐकारस्य अइत् स्यात्। पूर्वेण एत्त्वं प्राप्तम्। दइच्चो, दैत्यः। त्यथ्यद्यां चछजा इति त्यस्य चत्वम्। तस्य शेषादेशेत्यादिना द्वित्वम्। कइअवं, कैतवम्। कगचादिना तलोपः। वलोपो न भवति, प्रायोग्रहणात्। वइसाहो, वैशाखः। शषोः स इति शस्य सः। खघथादिना खस्य हः। सइरं, स्वैरम्। पूर्वोक्तपरोक्तयोः परोक्तो विधिर्बलवानिति उपरि लोप इत्यादिना प्राप्तं सलोपं बाधित्वा सर्वत्र लवरामिति वलोपः। कइरवं, कैरवम्; भइरवं, भैरवम्। वइसंपाअणो, वैशम्पायनः। पो व इति वत्वं न भवति, तत्र प्रायोग्रहणानुवृत्तेः। वइदेही, वैदेही।

दैत्यकैतववैशाखस्वैरकैरवभैरवाः ।
वैशम्पायनवैदेह्यौ दैत्याद्या एवमादयः॥

सिंहावलोकनन्यायेन उत्तरत्र वेति वर्तते। तेन 'ऐतो लक्ष्यवशात् स्याता-मइदेतौ क्वचित्तु वा'। सइरं, सैरं, स्वैरम्। चइत्तो, चेत्तो, चैत्रः। वइज्जो, वेज्जो, वैद्यः। त्यथ्यद्यां चछजा इति त्यस्य चत्वम्। भइरवो भेरवो भैरवः। इह न भवति दइच्चो दैत्यः॥३७॥

सुबोधिनी

एषु एकारस्य अइ इत्यादिश्यते।

दैत्यकैतववैशाखस्वैरकैरवभैरवाः ।
वैशम्पायनवैदेह्यौ दैत्याद्या एवमादयः॥

दइच्चो कइअवं वइसाहो सइरं कइरवं वइसंपाअणो वइदेही। सिंहालोकित-न्यायादुत्तरसूत्राद्वेति वर्त्तते। तेन 'ऐतो लक्ष्यवशात् स्याताम् अइदेतौ क्वचित्तु वा'। सइरं सेरं स्वैरम्। चइत्तो चेत्तो चैत्रः। वइज्जो वेज्जो वैद्यः। भइरवो भेरवो भैरवः। इह तु न भवति। दइच्चो। दैत्यः॥३७॥

(३८) दैवे वा ॥३८॥

सञ्जीवनी

दैवशब्दे ऐकारस्य अइत् स्याद् वा। दइवं देव्वं दैवम्। एकारादेशपक्षे सेवादिष्विति वस्य द्वित्वम् ॥३८॥

सुबोधिनी

अइत्वं वा स्यात्। दइवं पक्षे। एत्त्वमेव देव्वं ॥३८॥

(३९) इत् सैन्धवे ॥३९॥

सञ्जीवनी

सैन्धवशब्दे ऐकारस्य इकारादेशः स्यात्। एत्त्वापवादः।सिंधवं सैन्धवम् ॥३९॥

सुबोधिनी

इत्त्वं स्यात्। एत्त्वापवादः। सिंधवं ॥३९॥

(४०) ईत् धैर्ये ॥४०॥

सञ्जीवनी

धैर्यशब्दे ऐकारस्य ईत् स्यात्। धीरम्। तूर्यधैर्यादिना रः ॥ ४०॥

सुबोधिनी

इत्त्वं स्यात्। धीरं। ऐत इति निवृत्तम् ॥४०॥

(४१) औत ओत् ॥४१॥

सञ्जीवनी

औत औकारस्य ओकारदेशः स्यात्। तकारोऽसन्देहार्थः। सोहग्गं दोहग्गं। सौभाग्य-दौर्भाग्ययोः।खघथादिना भस्य हः।अधो मनयामिति यलोपः।शेषादेशादिना गस्य द्वित्वम्।हकारस्य न भवति। न रहोरिति निषेधात्। जोव्वणं यौवनम्। आदेर्यो ज इति यस्य जः। नीडादिष्विति वस्य द्वित्वम्। कोसंवी कौशाम्बी। अदातो यथादिषु वेत्ययम्। कोत्थहो कौस्तुभः। स्तस्य थ इति थः। तस्य द्वित्वे वर्गे युजः पूर्व इति तः। सोमित्ती सौमित्रिः। कोमुई कौमुदी ॥४१॥

सुबोधिनी

औकारस्य ओत्त्वं स्यात्। जोव्वणं यौवनम् ॥४१॥

(४२) पौरादिषु अउत् ॥४२॥

सञ्जीवनी

औत इत्यनुवर्तते उत्सौन्दर्यादिष्विति यावत्। पौर इत्यादिषु शब्देषु आदेरौकारस्य अउत् स्यात्। ओत्त्वबाधः। पउरो पौरः। पउरिसं पौरुषम्। इत् पुरुषे रोरिति रुकार उकारस्य इत्त्वम्। मउणं मउली मौनमौलिशब्दयोः। रउरवो रौरवः। कउरवा कौरवाः। जसूप्रत्ययस्य जश्शसोर्लोप इति लोपः। जश्शसूङस्यांसु दीर्घ इति दीर्घः। गउडा गौडाः। कउसलं कौशलम्। सउहं सौधम्।

पौरपौरुषमौनानि मौलिरौरवकौरवाः।

गौडकौशलसौधानि पौराद्या एवमादयः॥४२॥

सुबोधिनी

एषु औतो अउत् इत्यादिश्यते।

पौरपौरवमौनानि मौलिरौरवकौरवाः।

गोडकौशलसौधानि पौराद्या एवमादयः॥

पउरं पउरिसं मउणं मउली रउरवो। कउरवो गउडो। कउसलं सउहं॥४२॥

(४३) आच्च गौरवे ॥४३॥

सञ्जीवनी

अउदित्यनुवर्तते। गौरवशब्दे औकारस्य आकारादेशो भवति अउच्च। गारवम् गउरवं गौरवम्॥४३॥

सुबोधिनी

औत आत्त्वम्, चकारात् अउदित्यपि। गारवं गउरवं॥४३॥

(४४) उत् सौन्दर्यादिषु ॥४४॥

सञ्जीवनी

सौन्दर्यसदृशेषु शब्देषु औकारस्य उत्त्वं स्यात्। सुन्देरं सौन्दर्यम्। शय्यादिषु इत्येत्त्वम्। तूर्यधैर्यादिना र्यस्य रः। सुण्डो शौण्डः। शषोः स इति शस्य सः। पुलोमी पौलोमी। उवविट्ठअं औपविष्टकम्। पो व इति वः। ष्टस्य ठ इति ठः। तस्य द्वित्वे वर्गे युजः पूर्व इति टः। कगचादिना कलोपः। एवं मुट्ठिओ, मौष्टिकम्। दुआरिओ दौवारिकः।

सौन्दर्यशौण्डौ पौलोमी औपविष्टकमौष्टिकौ।
दौवारिकस्तथेत्याद्याः सौन्दर्याद्याः प्रकीर्तिताः॥४४॥

॥ इति श्रीवसन्तराजविरचितायां प्राकृतसञ्जीवन्यां प्रथमोऽज्विधिपरिच्छेदः ॥

सुबोधिनी

औत उत्त्वं स्यात्।

सौन्दर्यशौण्डौ पौलोमी औपरिष्टकमौष्टिकौ।
दौवारिकश्चैवमाद्याः सौन्दर्याद्याः प्रकीर्तिताः।
सुंदेरं सुंडो पुलोमी उपरिट्ठिअं मुट्ठिओ दुआरिओ॥४४॥

वृत्तौ प्राकृतसूत्राणां सदानन्दस्य निर्मितौ।
परिच्छेदः सुबोधिन्यामज्विधिः प्रथमो गतः॥१॥

॥ द्वितीयः परिच्छेदः ॥

अथायुक्तविधिरुच्यते

(४५) अयुक्तस्यानादौ ॥१॥

सञ्जीवनी

अधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्यामस्तदयुक्तस्यासंयोगवतः अनादौ मध्ये स्थितस्य हलो भवतीति वेदितव्यम् । अयुक्तस्येति शषोः स (सूत्र २।३९) इत्यतः प्रागयमधिकारः। अनादावित्यस्य तु आदेर्यो ज (सूत्र २।२८) इत्यतः प्राक् ॥१।

सुबोधिनी

अतः परं यत्कार्यं तदयुक्तस्य हलन्तरासंयुक्तस्याऽनादौ मध्ये वर्णयोः स्थितस्य वेदितव्यम् । अधिकारसूत्रमिदम् ॥१॥

(४६) कगचजतदपयवां प्रायो लोपः ॥२॥

सञ्जीवनी

कगचादीनां व्यञ्जनमात्रं प्रत्येकं निर्दिश्यते । अकारस्त्वेषामुच्चारणार्थः । ततो द्वन्द्वः । एषां कादीनां नवानामयुक्तानामसंयोगवतामनादौ मध्ये स्थितानां प्रायो बाहुल्येन लोपः। कस्य–बउलो वराई बकुलवराक्योः। गस्य–साअरो णअरं सागरनगरयोः। चस्य–रअणा सुइरं रचनासुचिरयोः। जस्य–सुअणो रअणी सुजनरजन्योः। तस्य–असई सुरअं असतीसुरतयोः। दस्य–मअणं सअणं मदनसदनयोः। पस्य–रूअं भूओ रूपभूपयोः। यस्य–आउहं सरऊ आयुधसरय्वोः। वस्य–कई कविः। सुभिस्सुप्सु दीर्घः। देअरो देवरः। अयुक्तस्येति किं ? कङ्कणो कङ्कणः। गङ्गा गङ्गेव। अञ्चलं अञ्चलमेव चञ्चलो चञ्चल इत्येवमादयः। 'प्रायःशब्दः कगादीनां लोपातिव्याप्तिबाधकः' । अकोवणो अकोपनः। पो वः इति वः। सगअं स्वगतं। सर्वत्र लवरामिति वलोपः। चूचुअं चूचुकं। सदअं सदयमित्यादयः। 'ईषत्स्पृष्टः प्रयोज्यो यः क्वचिल्लुप्तेषु कादिषु'। कणयं कनकं चणया चणकाः। जश्शसोर्लोप इति जसो लोपः। जश्शसुङस्यांसु

दीर्घ इति दीर्घः। गयणं गगनं। वयणं वदनं। मयणो मदन इत्यादौ। 'गत्वं मदकले कस्य तथा मरकतेऽपि च'। मयगलो मदकलः। मरगयं मरकतं तदयोर्लोपे कृते ईषत्स्पृष्टयकारः ॥२॥

सुबोधिनी

कादीनां व्यञ्जनमात्राणां लोपविधौ ग्रहणम्, अकारस्त्वेषामुच्चारणमात्रार्थम्। यथा तस्माच्छसो नः पुंसीत्यादौ नकाराद्युत्तरमकारः। कादीनामसंयुक्तानामनादौ स्थितानां लोपः स्यात्। वउलो वकुलः। साअरो सागरः रअणा रचना रअणी रजनी सुरअं सुरतं मअणो मदनः रूअं रूपं आउहं आयुधं कई कविः। अयुक्तस्येति किम्? अनादाविति किम्? कंकणो कङ्कणः। गंगा गङ्गेत्यादयः। 'प्रायःशब्दः कगादीनां लोपातिव्यातिबाधकः'। तेन अकोवणो अकोपनः सगअं स्वगतं चूचुअं चूचुकं सदअं सदयमित्यादयः सिध्यन्ति। 'ईषत्स्पष्टः प्रयोज्यो यः क्वचिल्लुप्तेषु कादिषु'। कणयं कनकं चणया चणकाः। गयणं गगनं वयणं वदनं मयणो मदनः इत्यादौ ॥२॥

(४७) यमुनायां मस्य ॥ ३ ॥

सञ्जीवनी

लोप इत्यनुवर्तते। यमुनाशब्दे मस्य लोपो भवति। जउणा। आदेर्यो ज इति जः ॥३॥

सुबोधिनी

मकारस्य लोपः स्यात्। जउणा ॥३॥

(४८) स्फटिकनिकषचिकुरसीकरेषु को हः ॥४॥

सञ्जीवनी

क इत्यक्षरं षष्ठ्यन्तम्। एषु चतुर्षु शब्देषु कस्य हत्वं स्यात्। पूर्वेण लोपः प्राप्तः। उत्तरसूत्रेषु च आदेशस्याकार उच्चारणार्थः। एवमादिपरिच्छेदपरिसमाप्तेः। फलिहो स्फटिकः। उपरि लोप इति सलोपः। स्फटिके ल इति टस्य लः। णिहसो निकषः। चिहुरो चिकुरः। सीहरो शीकरः ॥४॥

सुबोधिनी

एषु ककारस्य हकारः स्यात्। फलिहो निहसो चिहुरो सीहरो ॥४॥

(४९) चन्द्रिकायां मः ॥५॥

सञ्जीवनी

क इत्यनुवर्तते। चन्द्रिकाशब्दे कस्य मत्वं भवति। चंदिमा। द्रे रो वेति रलोपः ॥५॥

सुबोधिनी

ककारस्य मकारः स्यात्। चंदिमा ॥५॥

(५०) ऋत्वादिषु तो दः ॥६॥

सञ्जीवनी

त इत्यक्षरं षष्ठ्यन्तम्। ऋतुतुल्येषु शब्देषु तकारस्य दकारादेशो भवति। उदू ऋतुः। उदृत्वादिषु इति ऋकारस्य उत्त्वम्। सुभिस्सुप्सु दीर्घ इति दीर्घः। आआदो आयातः। सुदं श्रुतम्। सर्वत्र लवरामिति रलोपः। शषो स इति शस्य सः। नपुंसके सोर्बिन्दुरिति बिन्दुः। खादी ख्यातिः। अधो मनयामिति यलोपः। पूर्ववद् दीर्घः। अन्त्यस्य हल इति सलोपः। तदो ततः। सम्पदं साम्प्रतं। अदातो यथादिषु वेत्यत्त्वम्। सर्वत्र लवरामिति रलोपः। 'बिन्द्वादीदूत्परस्येह द्वित्वं शेषस्य नेष्यते' इति पस्य द्वित्वं न भवति। णिव्वुदो निर्वृतः। उदृत्वादिषु ऋकारस्य उत्त्वम्। रलोपे कृते शेषादेशादिना वस्य द्वित्वम्। नो ण इति णः। पदारिदो प्रतारितः। रदी पीदी रतिप्रीत्योः।

ऋत्वागतश्रुतिख्यातितसाम्प्रतनिर्वृताः।
प्रतारितरतिप्रीत्य ऋत्वाद्या एवमादयः॥

अयं दकारादेशः प्रायेण सौरसेनीमागध्योर्द्रष्टव्यः। इह तु कगचादिना तलोपः ॥६॥

सुबोधिनी

एषु तकारस्य दकारः स्यात्।

ऋत्वागतश्रुतिख्यातिततःसाम्प्रतनिर्वृताः।
प्रतारितरतिप्रीत्य ऋत्वाद्या एवमादयः॥

उदू आअदो सुदं खादी तदो सम्पदः णिव्वुदो पदारिदो रीदि पीदी। अयं दकारादेशः प्रायेण सौरसेनीमागध्योर्द्रष्टव्यः। महाराष्ट्र्यां तकारलोप एव ॥६॥

(५१) प्रतिवेतसपताकासु डः ॥७॥

सञ्जीवनी

त इत्यनुवर्तते ऐरावते वेति यावत्। एषु शब्देषु तकारस्य डत्वं स्यात्। पडिहअं प्रतिहतं। पडिवअणं प्रतिवचनम्। कगचादिना चलोपः। 'प्रतिशब्दे तकारस्य रेफलोपावपि क्वचित्'। परिट्ठिअं प्रतिष्ठितम्। उपरि लोप इत्यादिना षलोपः। पूर्ववदन्यत्। एवं पइण्णा प्रतिज्ञा। म्नज्ञपञ्चाशत्पञ्चदशसु ण इति ज्ञ इत्यस्य णः। तस्य शेषादेशादिना द्वित्वम्। वेडिसो वेतसः। इदीषदित्यादिना इत्त्वम्। पडाआ पताका।

'तस्य डत्वं हरीतक्यां प्राभृते मृतके तथा'। हरडई हरीतकी। डस्य (?) वशादीकारस्य अत्त्वम्। पाहुडं प्राभृतम्। सर्वत्र लवरामिति रलोपः। खघथादिना हत्वं भस्य। उदृत्वादिष्वित्युत्त्वम्। मडओ मृतकः। ऋतोऽदित्त्यत्त्वम् ॥७॥

सुबोधिनी

एषु डः स्यात् तस्य। पडिवअणं प्रतिवचनम्। वेडिसो।

पडाआ। 'प्रतिशब्दे तकारस्य रेफलोपावपि क्वचित्'। परिट्ठिअं प्रतिष्ठितम्। परिट्ठानं प्रतिष्ठानम्। पइण्णा प्रतिज्ञा। 'तस्य डत्वं हरीतक्यां प्राभृते मृतके तथा'। हरडई पाहुडं मडओ ॥७॥

(५२) वसतिभरतयोर्हः ॥८॥

सञ्जीवनी

एतयोः शब्दयोस्तकारस्य हत्वं स्यात्। वसही भरहो ॥८॥

सुबोधिनी

वसही भरहो ॥८॥

(५३) गर्भिते णः ॥९॥

सञ्जीवनी

गर्भितशब्दे तकारस्य णकारादेशो भवति। गब्भिणो। सर्वत्र लवरामिति रलोपः। शेषस्य भस्य द्वित्वे वर्गे युजः पूर्व इति बः ॥९॥

सुबोधिनी

तस्य णः स्यात्। गब्भिणो ॥९॥

(५४) ऐरावते वा ॥१०॥

सञ्जीवनी

ण इत्यनुवर्तते। ऐरावतशब्दे तकारस्य णकारादेशो भवति वा। एरावणो। पक्षे एरावओ। 'ऐत एत्' इति एत्त्वम्। पक्षे कगचादिना तलोपः ॥१०॥

सुबोधिनी

तस्य णो वा स्यात्। एरावणो एरावओ ॥१०॥

(५५) प्रदीप्तकदम्बदोहदेषु दो लः ॥११॥

सञ्जीवनी

द इत्यक्षरं षष्ठ्यन्तम्। एषु दकारस्य लत्वं स्यात्। पलित्तं। इदीतः पानीयादिषु इति इत्त्वम्। उपरि लोप इत्यादिना पलोपः। शेषस्य द्वित्वम्। णिजन्तेऽपि इष्यते। पलाविअं प्रदीपितम्। कलम्बो कदम्बः। दोहलो दोहदः। यावत् सान्तवद् विधिरिति द्वितीयस्याऽपि लत्वं न भवति। अनादावधिकारात् ॥११॥

सुबोधिनी

एषु दस्य लः स्यात्। पलित्तं णिजन्तेऽपीष्यते पलाविअम्। कलंबो दोहलो ॥११॥

(५६) गद्गदे रः ॥१२॥

सञ्जीवनी

द इत्यनुवर्तते अयुक्तस्येति च। गद्गदशब्दे अयुक्तस्य दस्य रेफादेशो भवति। गग्गरं। उपरि लोप इत्यादिना दलोपः। शेषादेशादिना गस्य द्वित्वम्। नपुंसके सोर्बिन्दुरिति बिन्दुः ॥१२॥

सुबोधिनी

दस्याऽयुक्तस्य रः स्यात्। गग्गरो ॥१२॥

(५७) संख्यायाश्च ॥१३॥

सञ्जीवनी

द इत्यनुवर्तते। र इति च। अयुक्तस्यानादाविति च। संख्यावाचिनि शब्दे अयुक्तस्यानादौ स्थितस्य दस्य रेफादेशः स्यात्। एआरह एकादश। कगचादिना कलोपः। दशादिषु ह इति शस्य हः। अन्त्यस्य हल इति नलोपः। बारह तेरह द्वादश

त्रयोदश । 'लोपः साचो यकारस्य क्वचिन्नित्यं क्वचिन्न वा' इति यलोपः । सन्धान्-चामित्यादिना अकारविसर्गयोरेत्त्वम् । पण्णरह पञ्चदश । म्नज्ञादिना ञ्चस्य णः । सत्तरह सप्तदश । उपरि लोप इत्यादिना पलोपः । अट्ठारह अष्टादश । ष्टस्य ठ इति ठत्वम् । ष्णान्तां संख्यां विना भवेदिति जश्शसृङस्यांसु दीर्घ इति प्राप्तस्य दीर्घस्याभावः । अयुक्तस्येति किम् ? चउद्दह चतुर्दश । अनादाविति किम् ? दह दश ।।१३।।

सुबोधिनी

संख्याशब्दे अयुक्तस्यानादौ स्थितस्य दस्यः रः स्यात् । एआरह एकादश । अयुक्तस्येति किम् ? चउद्दह चतुर्दश ।।१३।।

(५८) पो वः ।।१४।।

सञ्जीवनी

प इत्यक्षरं षष्ठ्यन्तम् । अयुक्तस्यानादौ स्थितस्य पकारस्य वकारादेशो भवति । कवालो उल्लावो कपालोल्लापयोः । कवोलो उवमा कपोलोपमयोः । अयुक्तस्येति किम् ? विप्पो सप्पुरिसो । विप्रसत्पुरुषयोः । ननु रेफतकारयोर्लोपे कृते यावद् द्वित्वं न प्रवर्त्तते, तावत् पस्य वत्वं कथं न स्यादित्युच्यते । कृताऽकृत-प्रसङ्गित्वाद् द्वित्वस्यैव प्रवृत्तेः । अनादाविति किम् ? पई पंडिओ पतिपण्डितयोः । पलोपं प्रति कगचादिसूत्रस्याविषयविभागो लक्ष्यवशात् । 'सुभगाया भवत्यत्र दुर्भगायाश्च गस्य वः' । सूहवा सुभगा दूहवा दुर्भगा । 'ईदूताविदुतोः स्थाने स्यातां लक्ष्यानुरोधतः' इति ऊत्वम् । खघथादिना भस्य हः । दुहवेत्यत्र ऊदुत इत्यादिना ऊत्वम् ।।१४।।

सुबोधिनी

अयुक्तस्यानादिस्थितस्य पस्य वः स्यात् । कवालो कपालः । अनादाविति किम् ? पई पतिः । अयुक्तस्येति किम् ? विप्पो विप्रः । ननु रेफलोपे कृते यावद् द्वित्त्वं न भवति तावदेव वत्वं कथं न स्यादित्युच्यते – कृताकृतप्रसङ्गित्त्वाद् द्वित्वस्यैव प्रवृत्तेः ।

पस्य लोपस्तथा वत्वं ज्ञेये लक्ष्याऽनुसारतः ।

सुभगाया भवत्यत्र दुर्भगायाश्च गस्य वः ।।१४।।

(५९) आपीडे मः ॥१५॥

सञ्जीवनी

प इत्यनुवर्तते । आपीडशब्दे पस्य मत्वं स्यात् । वत्वं प्राप्तम् । आमेलो आपीडः । एन्नीडापीडेत्यादिना ईकारस्य एत्त्वम् । डस्य चेति डस्य लः ॥१५॥

सुबोधिनी

अत्र मः स्यात् । आमेलो ॥१५॥

(६०) उत्तरीयानीययोर्योज्जो वा ॥१६॥

सञ्जीवनी

य इत्यक्षरं षष्ठ्यन्तम् । उत्तरीयशब्दे अनीयप्रत्यये च यकारस्य द्वित्वापन्नो ज्ज इत्यादेशो भवति वा । उत्तरिज्जं उत्तरीअं उत्तरीयम् । यत्र पक्षे ज्ज इत्यादेशः, तत्र इदीतः पानीयादिषु इति इत्त्वम् । रमणिज्जं रमणीअं रमणीयम् । करणिज्जं करणीअं करणीयम् । ननु शेषादेशयोर्द्वित्वमनादाविति द्वित्वे सिद्धे किमर्थो द्विजकारक आदेशः ? असदेतत्, तत्र युक्तस्येत्यधिकाराद् युक्तवर्णादेशानां तत्र विधिः । अत्र तु युक्तानां वर्णानामादेश इति कथमेषां द्वित्वं स्यात् ॥१६॥

सुबोधिनी

उत्तरीयशब्दस्यानीयस्य च सम्बन्धी यो यकारस्तस्य ज्ज इत्यादिश्यते । उत्तरिज्जं रमणिज्जं उत्तरीअं रमणीअं ॥१६॥

(६१) छायायां हः ॥१७॥

सञ्जीवनी

य इत्यनुवर्तते । वेति च । छायाशब्दे यकारस्य हकारादेशः स्याद् वा । छाही छाहा छाआ छायैव । हत्वपक्षे एकत्र आदीतो बहुलमिति ईप्रत्ययः । आतपाभाव इति वक्तव्यम् । तेन कणअछाअं अंगं । पउमछाअं मुहं इत्यादौ न भवति ॥१७॥

सुबोधिनी

अत्र यस्य हः स्याद् वा । छाही छाहा छाआ । आतपाऽभाव इति वक्तव्यम् । तेन कणअछाअमित्यादौ कांतिवाचित्वाद् न भवति ॥१७॥

(६२) टो डः ॥१८॥

सञ्जीवनी

ट इत्यक्षरं षष्ठ्यन्तम् । अयुक्तस्य अनादौ स्थितस्य टस्य डकारादेशो भवति । रडिअं फुडं कुक्कुडो । रटितस्फुटकुक्कुटेषु । अयुक्तस्येति किम् ? भट्टो घण्टा । अनादाविति किम् ? टंकारो टङ्कारः । 'अदातो यथादिषु वा' इत्याकारस्य न अत्त्वम् ॥१८॥

सुबोधिनी

अयुक्तस्यानादिस्थितस्य टस्य डः स्यात् । फुडं । अयुक्तस्येति किम् ? घण्टा । अनादाविति किम् ? टंकारो ॥१८॥

(६३) सटाशकटकैटभेषु ढः ॥१९॥

सञ्जीवनी

ट इत्यनुवर्तते उत्तरत्र च । एतेषु टस्य ढकारः स्यात् । डत्वस्यापवादः । सढाओ सटाः । 'जसो वा' इति ओत्वम् । सअढं शकटम् । 'शषोः सः' इति शस्य सः । केढवो कैटभः । 'ऐत एत्' इति एत्त्वम् । 'कैटभे वः' इति भस्य वः । 'अत ओत् सोः' इति ओत्त्वम् ॥१९॥

सुबोधिनी

एषु ढः स्यात् । डत्वापवादः । सढा सअढं केढवो ॥१९॥

(६४) स्फटिके लः ॥२०॥

सञ्जीवनी

स्फटिकशब्दे टस्य लादेशो भवति । फलिहो स्फटिकः । स्फटिकादिना कस्य हः ॥२०॥

सुबोधिनी

टस्य लः स्यात् । फलिहो ॥२०॥

(६५) डस्य च ॥२१॥

सञ्जीवनी

ल इत्यनुवर्तते । अयुक्तस्यानादौ स्थितस्य डस्य ल आदेशः स्यात् । तलाओ णिअलम् तडागनिगडयोः । कगचादिना गलोपः । सोलह षोडश । 'शषो सः' इति षस्य

सः । 'दशादिषु हः' इति शस्य हः । 'अन्त्यस्य हलः' इति नलोपः । 'जश्शसोर्लोपः' इति जसो लोपः । अयुक्तस्येति किम् ? उड्डीणो मण्डवो उड्डीनमण्डपयोः । अनादाविति किम् ? डाइणी डक्कारो डाकिनी–डकारयोः । व्यवस्थितविभाषया क्वचिद्वा उस्य लादेशः । गुलो गुडो गुडः । दालिमं दाडिममेव । आपीलिअं आपीडिअं आपीडितमित्यादिषु क्वचिन्नैव लः । लउडो णिविडो लगुडनिविडयोः । इत्यादिषु ॥२१॥

सुबोधिनी

डस्य च लः स्याद् अनादिस्थितस्यायुक्तस्य । तलाओ तडागः । अयुक्तस्येति किम् ? उड्डीणो । अनादाविति किम् ? डाइणी डाकिनी ।

'क्वचिद्वा डस्य लादेशः क्वचिद्वा नेष्यते बुधैः' । गुलो गुडो गुडः । दालिमं दाडिमं पीडिअं पीलिअं पीडितं । लउडो लगुडः । निविलो निविडः, इत्यादौ ॥२१॥

(६६) ठो ढः ॥२२॥

सञ्जीवनी

ठ इत्यक्षरं षष्ठ्यन्तम् । अयुक्तस्यानादौ स्थितस्य ठकारस्य ढकारादेशः स्यात् । पढिअं कढिणो पठितकठिनयोः । लुढिओ कमढो लुठितकमठयोः । अयुक्तस्येति किम् ? कण्ठो णिट्ठो । अनादाविति किम् ? ठक्कुरो ठआरो ॥२२॥

सुबोधिनी

अयुक्तस्याऽनादौ स्थितस्य ठस्य ढः स्यात् । कढिणो कठिनः । अयुक्तस्येति किम् ? कण्ठो । अनादाविति किम् ? ठक्कुरो ॥२२॥

(६७) अंकोठे ल्लः ॥२३॥

सञ्जीवनी

अंकोठशब्दे ठस्य द्वित्वमापन्नो ल्ल आदेशः स्यात् । अंकोल्लो ॥२३॥

सुबोधिनी

अत्र ठस्य ल्लः स्यात् । अंकोल्लो ॥२३॥

(६८) खघथधफभां हः ॥२४॥

सञ्जीवनी

एषां खादीनाम् अयुक्तानामनादौ स्थितानां हादेशः स्यात् । खस्य तावत्–मुहला मेहला मुखरामेखलयोः । घस्य–अमोहो मेहो अमोघमेघयोः । थस्य – पहिओ महिओ

पथिकमथिकयोः। धस्य – अहरो बहिरो अधरबधिरयोः। फस्य – सुहला सेहालिआ सुफलासेफालिकयोः। भस्य – वल्लहो करहो वल्लभकरभयोः। अयुक्तस्येति किम् ? सङ्खो णिग्घोसो पत्थरो बन्धणो णिप्फलो णिब्भरो। अनादाविति किम् ? खलो घणो थिरो धीरो फणा भीसणो।

'न हत्वं खघथादीनां परेषां बिन्दुतो भवेत्'। संखो लंघणं मंथरा बंधुरो किंफलो कुंभो। क्वचित् तद्वर्गान्त इति तद्वर्गादन्यत्रायं निषेधः। तद्वर्गान्ते तु अयुक्तस्येति तत्राधिकाराद् हत्वाभावः। 'प्रायःशब्दानुवृत्त्यापि हत्त्वाभावः क्वचिद् भवेत्'। अखंडो णिग्घणो थिरो अधमो बहुफलो अभजो इत्यादयः। 'ककुदे तु दकारस्य हकारादेश इष्यते'। कउहं ॥२४॥

सुबोधिनी

एषामनुक्तानामनादिस्थितानां हः स्यात्। मेहला मेखला। मेहो मेघः पहिओ पथिकः अहरो अधरः सेहालिआ शेफालिका वल्लहो वल्लभः। अयुक्तस्येति किम् ? सङ्खो णिग्घोसो इत्यादि। अनादौ किम् ? खलो घणो इत्यादि।

'न हत्वं खघथादीनां परेषां बिंदुतो भवेत्'। संखो लंघनमित्यादौ। 'प्रायःशब्दानुवृत्त्याऽपि हत्वाऽभावः क्वचिद्भवेत्'। अखण्डो णवघणो अधमो बहुफलो अभओ 'ककुदे तु दकारस्य हकारः परिदृश्यते' कउहं ॥२४॥

(६९) प्रथमशिथिलनिषधेषु ढः ॥२५॥

सञ्जीवनी

एषां थकारस्य धस्य च ढादेशः स्यात्। पढमो। प्रथमः। सिढिलो निसढो शिथिलनिषधयोः। 'शषोः सः' इति सः ॥२५॥

सुबोधिनी

एषु थधयोर्ढः स्यात्। पढमो सिढिलो निसढो ॥२५॥

(७०) कैटभे वः ॥२६॥

सञ्जीवनी

कैटभशब्दे भस्य वादेशः स्यात्। हत्वस्य बाधकः। केढवो सटाशकटादिना टस्य ढः। 'ऐत एत्' इति एत्त्वम् ॥२६॥

सुबोधिनी

अत्र भस्य वः स्यात्। केढवो ॥२६॥

(७१) हरिद्रादीनां रो लः ॥२७॥

सञ्जीवनी

र इत्यक्षरं षष्ठ्यन्तम् । हरिद्रासदृशेषु शब्देषु रेफस्य लादेशः स्यात् । हलद्दी हरिद्रा । अत् पथिहरिद्रापृथिवीष्विति इकारस्य अत्त्वम् । द्रे रो वा इति रलोपः । शेषादिना दस्य द्वित्वम् । अन्त्यस्य हल इति सुलोपः । मुहलो मुखरः । खघथादिना खस्य हः । इंगालो अङ्गारः । इदीषदित्यादिना अकारस्य इत्त्वम् । सोमालो सुकुमारः । उत ओत् तुण्डरूपेषु इति अतः ओत्त्वम् । कगचादिना कलोपः । सन्धावचामित्यादिना उलोपः । जुहिट्ठिलो युधिष्ठिरः । आदर्यो ज इति जः । खघथादिना धस्य हत्वम् । उपरि लोप इत्यादिना षलोपः । चिलाओ किरातः । 'किराते च' इति कस्य चः । कगचादिना तलोपः । फलिहो परिघः । पुरुषपरिघादिना पस्य फः । खघथादिना खस्य हः ।

हरिद्रामुखराङ्गारसुकुमारयुधिष्ठिराः ।
किरातपरिघौ चैवं हरिद्रादीन् प्रकल्पयेत् ॥२७॥

सुबोधिनी

एषां रस्य लः स्यात् ।

हरिद्रामुखराङ्गारसुकुमारयुधिष्ठिरान् ।
किरातपरिघौ चैव हरिद्रादीन् प्रचक्षते ॥

हलिद्दा मुहलो इंगालो सोमालो जुहिट्ठिलो किलाओ फलिहो । अनादावित्यधिकारो निवृत्तः ॥२७॥

(७२) आदेर्यो जः ॥२८॥

सञ्जीवनी

य इत्यक्षरं षष्ठ्यन्तम् । आदिभूतस्य यकारस्य जादेशो भवति । जोव्वणं यौवनम् । औत ओत् इति ओत्त्वम् । 'नीडादिषु' इति वस्य द्वित्वम् । नो ण इति णः । जुअई युवतिः । कगचादिना तवयोर्लोपः । सुभि सुप्सु दीर्घः इति दीर्घः । जामिनी यामिनी । आदेरिति किम् ? अवअवो अवयवः । अअणं अयनम् । 'भूतपूर्वादिकस्यापि यस्य जादेश इष्यते' । गाढजोव्वणा । बालजुअई बालयुवतिः । सजामिणी सयामिनी । संजमो अजोग्गो संयमायोग्ययोः ॥२८॥

सुबोधिनी

पदादिस्थितस्य यस्य जः स्यात् । जुअई युवतिः । आदेरिति किम् ? णअणं । 'प्रक्षिप्तपूर्वकस्यापि यस्य जादेश इष्यते' । गाढजोव्वणा ॥२८॥

(७३) यष्ट्यां लः ॥२९॥

सञ्जीवनी

यष्टिशब्दे अकारस्य लादेशः स्यात् । लट्ठी यष्टिः । ष्टस्य ठ इति ठः । तस्य द्वित्वे वर्गे युजः पूर्व इति टः । सुभिःसुप्सु दीर्घ इति दीर्घः । अन्त्यस्य हल इति सुलोपः । तदन्तोऽपि । खग्गलट्ठी महुलट्ठी खड्गयष्टिमधुयष्ट्ययोः ॥२९॥

सुबोधिनी

अत्र यस्य लः स्यात् । लट्ठी खग्गलट्ठी ॥२९॥

(७४) किराते चः ॥३०॥

सञ्जीवनी

आदेरित्यनुवर्तते नो ण इत्यतः प्राक् । किरातशब्दस्यादेर्वर्णस्य चादेशः स्यात् । चिलाओ । हरिद्रादित्वात् लः । कगचादिना तलोपः । 'म्लेच्छवाच्ये लचादेशौ न हरे कामरूपिणि । तेन किराओ हरः ॥३०॥

सुबोधिनी

अत्रादिवर्णस्य चः स्यात् । चिलाओ ।

'म्लेच्छे वाच्ये लचादेशौ न हरे कामरूपिणि' । हरकिराओ ॥३०॥

(७५) कुब्जे खः ॥३१॥

सञ्जीवनी

कुब्जशब्दे आदेर्वर्णस्य खादेशो भवति । खुज्जो । सर्वत्र लवरामिति वलोपः । शेषादेशादिना द्वित्वम् । 'खादेशो नम्रदेहत्वे न कुब्जे पुष्पवाचिनि' । फुल्लइ कुब्जं वसंतम्मि ॥३१॥

सुबोधिनी

अत्रादेः खः स्यात् । खुज्जो । खादेशो नम्रदेहत्वे, न कुब्जे पुष्पवाचिनि । फुल्लइ कुब्जं वसंतम्मि ॥३१॥

(७६) दोलादण्डदशनेषु डः ॥३२॥

सञ्जीवनी

एषु शब्देषु आदेर्वर्णस्य डकारादेशो भवति। डोला डंडो डसणो। दशनशब्दे जस्शसोर्लोपः। जस्शस्ङस्यांसु दीर्घ इति दीर्घः ॥३२॥

सुबोधिनी

एष्वादेर्डः स्यात्। डोला डंडो डसणो ॥३२॥

(७७) परुषपरिघपरिखासु फः ॥ ३३॥

सञ्जीवनी

एषु शब्देषु आदेर्वर्णस्य फः स्यात्। फरुसं परुषम्, फलिहो फलिहा परिघपरिखयोः। हरिद्रादीनां रो ल इति लः। खघथादिना खघयोर्हत्वम्। 'पनसेऽपि पकारस्य फकारादेश इष्यते'। फणसो ॥३३॥

सुबोधिनी

एष्वादेः फः स्यात् फरुसं फलिहो फलिहा। 'पनसेऽपि पकारस्य फकारादेश इष्यते'। फणसं ॥३३॥

(७८) बिसिन्यां भः ॥ ३४॥

सञ्जीवनी

बिसिनीशब्दे आदेर्वर्णस्य भः स्यात्। भिसिणी। 'प्राधन्याद् बिसशब्दस्य स्याद् भादेशोऽस्त्रियां तु वा'। भिसं बिसं बिसमेव ॥३४॥

सुबोधिनी

अत्रादेर्भः स्यात्। भिसिणी। 'प्राधान्याद् बिसशब्दस्य स्याद् भादेशोऽस्त्रियां तु वा'। भिसं बिसं ॥३४॥

(७९) मन्मथे वः ॥ ३५॥

सञ्जीवनी

मन्मथशब्दे आदेर्वर्णस्य वादेशः स्यात्। वम्महो। न्मो म इति मः। तस्य शेषादेशादिना द्वित्वे खघथादिना थस्य हः ॥३५॥

सुबोधिनी

अत्रादेर्वः स्यात्। वम्महो ॥३५॥

(८०) लाहललाङ्गललाङ्गूलेषु वा णः ॥३६॥

सञ्जीवनी

एषु शब्देषु आदेर्वर्णस्य णकारादेशो भवति वा। णहलो लाहलो लाहलमेव। णांगलं लांगलं। णांगूलं लांगूलं। अदातो यथादिषु वा इत्यत्त्वम्। नपुंसके सोर्बिन्दुः इति बिन्दुः॥३६॥

सुबोधिनी

एष्वादेर्णः स्यात्। णाहलो लाहलो। णंगणं लंगलं णंगूलं लंगूलं॥३६॥

(८१) षट्शावसप्तपर्णेषु छः॥३७॥

सञ्जीवनी

एष्वादेर्वर्णस्य छः स्यात्। छट्ठी षष्ठी। उपरि लोप इत्यादिना षलोपः। शेषस्य द्वित्वे वर्गे युजः पूर्व इति टः। छप्पओ छम्मुहो षट्पदषण्मुखयोः। 'उपर्यपि च वक्तव्यो लोपो वर्णान्तरस्य च' इति टणयोर्लोपः। शेषादेशादिना द्वित्वम्। छाओ शावः। छत्तवण्णो सप्तपर्णः। उपरि लोप इत्यादिना सर्वत्र लवरामिति परेफयोर्लोपः। शेषादेशादिना तणयोर्द्वित्वम्। पो व इति वः॥३७॥

सुबोधिनी

एष्वादेः छः स्यात्। छट्ठी षष्ठी। छाओ छत्तवण्णो। आदेरिति नाऽनुवर्त्तते॥३७॥

(८२) नो णः॥३८॥

सञ्जीवनी

अयुक्तस्येत्येव। न इत्यक्षरं षष्ठ्यन्तम्। अयुक्तस्य वर्णान्तरेणायुक्तस्य नकारस्य णकारादेशो भवति। घणत्थणी घनस्तनी। स्तस्य थ इति थः। तस्य द्वित्वे वर्गे युजः पूर्व इति तः। णअणं वअणं। अयुक्तस्येति किम्? अन्तरा अन्तरा। कन्दरा कन्दरा। बन्धुरा बन्धुरा। कथं तर्हि उण्णअं पण्णअं इत्यादौ णत्वम्। वर्णान्तरेण युक्तमिति विशेषयितव्यम्। तेन यत्रान्येन वर्णेन सह नकारस्य योगः, तत्रायुक्तस्येत्यनेन विशेषः। 'आदौ क्वापि नकारस्य णत्वभावोऽपि दृश्यते'। णूणं नूनम्॥३८॥

सुबोधिनी

अयुक्तस्य नस्य णः स्यात्। घणत्थणी। अयुक्तस्येति किम्? अन्तरं। अत्राऽयुक्तत्वं स्वभिन्नहलन्तरेण सम्बोध्यं बोद्धव्यम्। तेन उण्णअपओहरेत्यादौ नकारेणैव युक्तस्य स्यादेव। अयुक्तस्येति अधिकारो निवृत्तः ॥३८॥

(८३) शषोः सः ॥३९॥

सञ्जीवनी

अयुक्तस्येति निवृत्तम्। शषयोः सकारादेशः स्यात्। ससओ सोहिओ शशकशोभितयोः। अस्सो अस्समो अश्वाश्रमयोः। सर्वत्र लवरामिति वरयोर्लोपः। शेषादेशादिना सस्य द्वित्वम्। अदातो यथादिषु वा, इति अत्त्वम्। महिसो वसहो महिषवृषभयोः। सेसो मेसो शेषमेषयोः ॥३९॥

सुबोधिनी

एतयोः सः स्यात्। सेसोः शेषः। अस्सोः अश्वः ॥३९॥

(८४) दशादिषु हः ॥४०॥

सञ्जीवनी

श इत्यनुवर्तते। दश आदिर्येषां ते दशादयः। तेषु दशादिषु अष्टादशपर्यन्तेषु शस्य हादेशः स्यात्। दह दश। एआरह एकादश। कगचादिना कलोपः। बारह। उपरि लोप इत्यादिना दलोपः। तेरह। 'लोपः साचो यकारस्य क्वचिन्नित्यः क्वचिन्न वा' इति साचो यस्य लोपः। सन्धावचामित्यादिना अकारविसर्गयोरेत्त्वम्। चउद्दह। कगचादिना सर्वत्र लवरामिति तरयोर्लोपः। शेषस्य द्वित्वम्। पण्णरह। म्नज्ञादिना ञ्चस्य णः। शेषादेशादिना द्वित्वम्। सोलह। डस्य चेति लः। सत्तरह। उपरि लोप इत्यादिना पलोपः। शेषादेशादिना द्वित्वम्। अट्ठारह। ष्टस्य ठः। पूर्ववद् द्वित्वम्। सर्वत्र अनेन सस्य हः। संख्यायां चेति दस्य रः। अन्त्यस्य हल इति नलोपः। जश्शसोर्लोपः। 'जसि दीर्घः शसि त्वेत्त्वं ष्णान्तां संख्यां विना भवेत्' इति जश्शसुङस्यांसु दीर्घ इति प्राप्तस्य दीर्घस्याभावः। 'संख्यावाची दशेत्यत्र व्याख्यानादवगम्यते'। तेनेह न भवति। दसाओ दशाः। जशो वा इति जस ओत्त्वम्।

अदशं वीरम् । अविद्यमाना दशा यस्य तं अदशम् । इह कस्मान्न भवति दसमी अवत्था दससु दिसासु ? उच्यते – उत्तरसूत्रात् सिंहावलोकितन्यायेन वेत्यनुवर्तनेन क्वापि न भवति । 'पाषाणेऽपि षकारस्य हत्वं निर्दिश्यते बुधैः' । पाहाणो । अस्य कथं समावेशः ? तस्य शषोर्मध्यात् शकार एव स्थितत्वेऽप्यनुदीर्यमाणोऽनुवर्तते, न षकारः । ब्रूमः– दशादिषु षकारस्य सम्भवात् । तर्हि एवं स्थिते षोडश-अष्टादशशब्दयोर्षकारस्य हत्वं स्यात्, सत्यम्, किञ्च, मण्डूकप्लुतिन्यायेन अनादावित्यत्र सम्बध्यते । तेन षोडशशब्दे न भवति । अष्टादशशब्दे प्रतिपदोक्तत्वेन ष्टस्य ठ इति ठकारेण प्रवृत्ते षस्य हत्वाभावः ॥४०॥

सुबोधिनी

दशादिष्वष्टादशान्तेषु शस्य हः स्यात् । दह इत्यादि । उत्तरसूत्रात्सिंहावलोकितन्यायेन वेत्यनुवर्त्तते । तेन दशसु दिशासु इत्यादौ न हत्वम् । 'पाषाणेऽपि षकारस्य हत्वं निर्दिश्यते बुधैः' पाहाणो । अत्र शषोरेकसमासस्थयोर्मध्यात् शकार एव कथमनुवर्त्तते ? न च दशादिषु षकाराभावात्तदनुवृत्तिरिति युक्तं षोडशाष्टादश-शब्दयोः षकारसत्त्वात् । यद्यप्येवम्, तथापि मण्डूकप्लुतिन्यायेनानादावित्यत्रापि संबुध्यते, तेन षोडशशब्दे न भवति । अष्टादशशब्देऽपि ठकारविधेर्बलवत्त्वाद्धत्त्वाऽभावः ॥४०॥

(८५) संज्ञायां वा ॥४१॥

सञ्जीवनी

दशेत्यनुवर्तते । ह इति च । संज्ञायां नाम्नि दशन्शब्दे शस्य हत्वं वा स्यात् । दहमुहो दसमुहो । दहरहो दसरहो दशमुखदशरथयोः । खघथादिना खथयोर्हः । अत्र एकादशादयो नानुवर्तन्ते । तेषां संज्ञायामसम्भवात् ॥४१॥

सुबोधिनी

नाम्नि दशशब्दे शस्य हः स्याद्वा । दहमुहो दसमुहो दशमुखः ॥४१॥

(८६) दिवसे सस्य ॥४२॥

सञ्जीवनी

ह इत्यनुवर्तते वेति च । दिवसे सकारादेशः स्याद्वा । दिअहो दिअसो ॥४२॥

सुबोधिनी

दिवसे सस्य हः स्याद्वा । दिअहो दिअसो ॥४२॥

(८७) स्नुषायां ह्नः ॥४३॥

सञ्जीवनी

मण्डूकप्लुतिन्यायेन षस्येत्यनुवर्तते, नान्यत्। स्नुषाशब्दे षस्य ण्हादेशः स्यात्। सोण्हा। उत ओत् तुण्डरूपेषु इति ओत्त्वम्। अधो मनयामिति नलोपः॥४३॥

॥ इति प्राकृतसञ्जीवन्यामयुक्तविधि-

द्वितीयः परिच्छेदः॥

सुबोधिनी

मण्डूकप्लुतिन्यायेन षस्येत्यनुवर्त्तते, नान्यत्। स्नुषाशब्दे षस्य ण्ह इति आदिश्यते। सोण्हा।

वृत्तौ प्राकृतसूत्राणां सदानन्दस्य निर्मितौ।
परिच्छेदः सुबोधिन्यां द्वितीयोऽगादयं विधिः॥२॥

॥ तृतीयः परिच्छेदः ॥

❀❀❀

युक्तविधिरुच्यते

(८८) उपरि लोपः कगडतदपषसशाम् ॥१॥

सञ्जीवनी

कादीनां व्यञ्जनमात्रमत्र निर्दिश्यते। अकारस्तु उच्चारणार्थः। ततो द्वन्द्वः। एवं उत्तरसूत्रयोरपि। एषां कादीनामष्टानां व्यञ्जनमात्राणां वर्णान्तरोपरि स्थितानां लोपो भवति। कस्य – भत्तम्, भुत्तं भक्तभुक्तयोः। गस्य – दुद्धं मुद्धं दुग्धमुग्धयोः। डस्य– खग्गो छग्गुणो खड्गषड्गुणयोः। खड्गादिना षस्य छः। तस्य– उप्फुल्लं उप्पलं उत्फुल्लोत्पलयोः। दस्य – मुग्गरो मुग्गलो मुद्गरमुद्गलयोः। पस्य – गुत्तं लुत्तं गुप्तलुप्तयोः। षस्य – कुट्ठं गोट्ठं कुष्ठगोष्ठयोः। सस्य – खलिअं अप्फालिअं स्खलितास्फालितयोः। अदातो यथा– दिषु वेति अत्त्वम्। सर्वत्र उपरि लोपे कृते शेषस्य शेषादेशादिना द्वित्वम्। 'उपरि स्थितोऽपि वक्तव्यो लोपो वर्णान्तरस्य च'। छप्पओ छम्मुहो षट्पदषण्मुखयोः। टकारणकारयोर्लोपे कृते शेषयोः पमयोर्द्वित्वम्। खड्गादिना सस्य छः। णिच्चलो निश्चलः। पूर्ववद् द्वित्वम्। हरिअंदो हरिश्चन्द्रः। अत्रापि सलोपः। कगचादिना चलोपः। द्रे रो वेति रलोपः॥१॥

सुबोधिनी

कादीनां व्यञ्जनमात्राणां व्यञ्जनोपरिस्थितानां लोपः स्यात्। भत्ती भक्तिः। मुद्धं मुग्धं। खग्गो खड्गः। उप्पलं उत्पलं। मोग्गरो मुद्गरः। सुत्तं सुप्तं। जुट्ठं जुष्टं। खलिअं स्खलितं। 'उपरि क्वापि वक्तव्यो लोपो वर्णान्तरस्य च'। छप्पओ षट्पदः। छम्मुहो षण्मुखः। निच्चलो निश्चलः। हरिअंदो हरिश्चन्द्रः॥१॥

(८९) अधो मनयाम् ॥२॥

सञ्जीवनी

लोप इत्यनुवर्तते श्मश्रुश्मशानयोरिति यावत्। मनयामित्येतेषां वर्गान्तरस्याधःस्थितानां लोपो भवति। मस्य–रस्सओ। जस ओ वा इति जसः स्थाने वा ओत्त्वम्। मलोपे शषोः स इति शस्य सः। शेषादेशादिना द्वित्त्वम्। नस्य–लग्गो लग्नः। यस्य – अण्णा सामा रस्सा अन्याश्यामारस्यासु। 'रेफस्याधो हकारेऽपि लोपो भवति कुत्रचित्'। दासारो दाशार्हः ॥२॥

सुबोधिनी

मनय इत्येतेषां वर्णान्तरस्याधःस्थितानां लोपः स्यात्। रस्सओ रश्मयः। लग्गो लग्नः। सामा श्यामा। 'रेफस्याधो हकारेऽपि लोपो भवति कुत्रचित्'। दासारो दाशार्हः ॥२॥

(९०) सर्वत्र लवराम् ॥३॥

सञ्जीवनी

लवर इत्येतेषां वर्णान्तरस्योपरि अधःस्थितानां लोपो भवति। उपरि तावत्–सेम्मली शाल्मलिः। अदातो यथादिषु वेति अत्त्वम्। तस्य ए च शय्यादिषु इत्येत्वम्। ललोपे कृते शेषादेशादिना द्वित्वम्। सुभिस्सुप्सु दीर्घः। न तु प्रथममेव अधो मनयामिति यलोपः कस्मान्न भवतीति उच्यते, सत्यम्, 'पूर्वोक्तात् परोक्तो विधिर्बलवान्' इति वचनात्। वक्कलं वल्कलम्। लस्याधः – सण्हं श्लक्ष्णम्। 'ह्नस्नष्णक्ष्णश्नां ण्हः' इति क्ष्णस्य ण्हः। विक्कओ विक्लवः। वस्योपरि – लद्धो सद्दो लब्धशब्दयोः। वस्याधः–उज्जलो ईसरो उज्ज्वलेश्वरयोः। रस्योपरि – धम्मा धम्मो धर्मा-धर्मयोः। रस्याधः–मित्तं कलत्तं मित्रकलत्रयोः ॥३॥

सुबोधिनी

लवर इत्येतेषां वर्णान्तरस्याध उपरि वा स्थितानां सर्वत्र लोपो भवति। सण्हं क्ष्णम्। सेम्मली शाल्मलिः। अत्र पूर्वापरयोः परो विधिर्बलवानिति लस्यैव लोपः, न तु मस्य। ईसरो ईश्वरः। सद्दो शब्दः। मित्तं मित्रम्। धम्मो धर्मः ॥३॥

(९१) द्रे रो वा ॥४॥

सञ्जीवनी

र इत्यक्षरं षष्ठ्यन्तम्। द्रकारे स्थितस्य रेफस्य लोपो भवति वा। पूर्वेण नित्यं

प्राप्तः। इंदो इन्द्रो चंदो चन्द्रो इन्द्रचन्द्रयोः। रुद्दो रुद्रो समुद्दो सुमुद्रो रुद्रसमुद्रयोः। अत्र रेफलोपभावपक्षे प्रयोगाः पीडितसंयोगा घटनीयाः। तथा चोक्तम्—

व्यञ्जनस्य हरेफाभ्यां योगे पूर्वो लघुर्मतः।
इति प्राकृतभाषायां संस्कृतादतिरिच्यते॥४॥

सुबोधिनी

द्रशब्दे वा रस्य लोपः स्यात्। रुद्दो रुद्रः। अत्र—

व्यञ्जनस्य हरेफाभ्यां योगे पूर्वो लघुर्मतः।
इति प्राकृतभाषायां संस्कृतादतिरिच्यते॥४॥

(९२) सर्वज्ञतुल्येषु ञः ॥५॥

सञ्जीवनी

रस्य वेति नानुवर्तते अनयोः अनपेक्षितत्वात्। सर्वज्ञशब्देन तुल्याः सर्वज्ञतुल्याः। तेषु सर्वज्ञतुल्येषु शब्देषु ञकारस्य लोपो भवति। म्रज्ञादिना प्राप्तणत्वस्य बाधः। सव्वज्जो सर्वज्ञः। सर्वत्र लवरामिति रलोपः। शेषादेशादिना जवयोर्द्वित्वम्। अप्पज्जो आत्मज्ञः। अदातो यथादिषु वेति अत्त्वम्। 'आत्मनि पः' इति त्मस्य पः। पूर्ववदन्यत्। देवज्जो दैवज्ञः। 'दैवे च' इति ऐकारस्य एत्त्वम्। मणोज्जो विज्जो मनोज्ञविज्ञयोः।

सर्वज्ञात्मज्ञदैवज्ञा मनोज्ञो विज्ञ ईदृशाः।
येषां ज्ञस्य जलोपोऽस्ति ते सर्वज्ञसमा मताः॥५॥

सुबोधिनी

सर्वज्ञसमशब्देषु ञस्य लोपः स्यात्।

सर्वज्ञात्मज्ञदैवज्ञा मनोज्ञो विज्ञ ईदृशाः।
येषां ज्ञस्य ञलोपः स्यात् ते सर्वज्ञसमा मताः॥

सव्वज्जो अप्पज्जो देवज्जो विज्जो मणोज्जो ॥५॥

(९३) मध्याह्ने हस्य॥६॥

सञ्जीवनी

मध्याह्नशब्दे हकारस्य लोपो भवति। 'ह्नस्नष्णक्ष्णश्नां ण्हः' इति प्राप्तस्य ण्हस्य बाधः। मज्झण्णो। अदातो यथादिषु वेति अत्त्वम्। 'ध्यह्ययोर्झः' इति झः। शेषादेशादिना झणयोर्द्वित्वम्॥६॥

सुबोधिनी

अत्र हस्य लोपः स्यात्। मज्झण्णो॥६॥

(१४) श्मश्रुश्मशानयोरादेः ॥७॥

सञ्जीवनी

श्मश्रुश्मशानयोरादेर्वर्णस्य लोपो भवति। अधो मनयामिति मलोपः प्राप्तः। मस्सू। सर्वत्र लवरामिति रलोपः। शेषस्य द्वित्वम्। सुभिस्सुप्सु दीर्घ इति दीर्घः। मसाणं। 'शषोः सः' इति सः। नो ण इति णः ॥७॥

सुबोधिनी

अनयोरादेर्वर्णस्य लोपः स्यात्। मस्सू मसाणं । लोप इति निवृत्तम् ॥७॥

(१५) ह्नह्लह्मेषु नलमां स्थितिरूर्ध्वम् ॥८॥

सञ्जीवनी

लोप इति निवृत्तम्। एषु संयोगेषु अधःस्थितानां नलमानित्येतेषां वर्णानां हकारस्य स्थितिरूर्ध्वं भवति। संयोगवर्णयोः परिवृत्तिर्भवतीत्यर्थः। सर्वत्र लवरामिति अधो मनयामित्यनयोर्बाधः। ह्नस्य–पुव्वण्हो पूर्वाह्णः। उदूतो मधूकादिषु इत्युत्त्वम्। अवरण्हो अपराह्णः। ह्लस्य – कल्हारं आल्हारो कह्लाराह्लादयोः। ह्मस्य – जिम्हो बम्हणो जिह्मब्राह्मणयोः ॥८॥

सुबोधिनी

एषु संयोगेषु हस्याधःस्थितानां लादीनां तदुपरि स्थितिः स्यात्। पुव्वण्हो पूर्वाह्णः। कल्हारं कह्लारम्। जिम्हो जिह्मः ॥८॥

(१६) युक्तस्य ॥९॥

सञ्जीवनी

अधिकारोऽयम्। अत ऊर्ध्वं यदनुक्रमिष्यामः। युक्तस्य सकलस्य तद्भवतीति वेदितव्यम्। पूर्वं युक्तैकदेशस्य विधिरासीत् । आपरिच्छेदसमाप्तेरयमधिकारः ॥९॥

सुबोधिनी

अधिकारसूत्रमिदम्। अतः परं यत्कार्यं तद्युक्तस्य संपूर्णस्यैव युक्ताक्षरस्य वेदितव्यम्, न तु पूर्ववद्युक्तैकदेशस्य ॥९॥

(९७) ष्टस्य ठः ॥१०॥

सञ्जीवनी

ष्ट इत्येतस्य ठ आदेशः स्यात् । दिट्ठी दृष्टिः । मुट्ठी मुष्टिः । दिट्ठीत्यत्र इदृष्यादिषु इति ऋकारस्य इत्त्वम् । सुभिस्सुप्सु दीर्घ इति दीर्घः । अन्त्यस्य हल इति सुलोपः । णट्ठं दट्ठं नष्टदृष्टयोः । सर्वत्र ठादेशस्य द्वित्वे वर्गे युजः पूर्व इति टः । 'इष्ठायामप्रियायां तु ठादेशो नैव दृश्यते' । इट्टा मृन्मयविशेषः । अप्रियायामिति किम् ? इट्ठा अभिमता । 'उष्ट्रशब्दे विकल्पेन ष्टस्य ठादेश इष्यते' । उट्ठो उट्टो उष्ट्रः । सर्वत्र लवरामिति रलोपः । ठादेशाभावपक्षे उपरि लोप इत्यादिना षलोपः ॥१०॥

सुबोधिनी

ष्ट इत्यस्य ठकारः स्यात् । दिट्ठी दृष्टिः । 'इष्टायामप्रियार्थायां ष्टस्य ठत्वं न दृश्यते' । इट्टा ईंट इति प्रसिद्धः । अप्रियार्थायामिति किम् ? इट्ठा इति प्रेयसीवाचिनि मा भून्निषेधः । 'ष्ट इत्यस्य ठकारः स्यादुष्ट्रशब्दे विभाषया' । उट्ठो उट्टो ॥१०॥

(९८) अस्थनि ॥११॥

सञ्जीवनी

ठ इत्यनुवर्तते । अस्थिशब्दे युक्तस्य वर्णस्य ठः स्यात् । अट्ठी । ठादेशस्य द्वित्वे वर्गे युजः पूर्व इति टः । 'एवं लिङ्गविपर्यासो ज्ञेयः शब्दान्तरेष्वपि' इति नपुंसकस्यापि स्त्रीत्वे सति सुभिस्सुप्सु दीर्घ इति दीर्घः । 'अन्यत्रापि क्वचित् ठत्वं स्थकारस्येष्यते बुधैः' । विसंठुलं विसंष्ठुलम् । 'आदेशस्य भवेद् द्वित्वं नानुस्वारपरस्य च' इति ठस्य द्वित्वाभावः । क्वचिद्ग्रहणादिह न भवति । सुत्थिओ दुत्थिओ सुस्थितदुःस्थितयोः । थूलं थलं स्थूलस्थलयोः ॥११॥

सुबोधिनी

अत्र युक्तस्य ठः स्यात् । अट्ठी अस्थि । 'अन्यत्रापि क्वचित् ठत्वं स्थकारस्येष्यते बुधैः' । विसंठुलं विसंष्ठुलम् । विसंपूर्वस्य स्थाधातोरिदं रूपम् । क्वचिदित्यनेन लक्ष्यानुसारितामाहुः ॥११॥

(९९) स्तस्य थः ॥१२॥

सञ्जीवनी

स्त इत्यस्य थः स्यात् । उपरि लोपबाधः । कोत्थुहो कौस्तुभः । औत ओदिति

ओत्त्वम् । खघथादिना भस्य हः। थादेशस्य द्वित्वे वर्गे युजः पूर्व इति तः। थुई थवओ स्तुतिस्तवकयोः ॥१२॥

सुबोधिनी

स्त इत्यस्य थकारः स्यात् । कोत्थुहो कौस्तुभः ॥१२॥

(१००) तः स्तंबे ॥१३॥

सञ्जीवनी

स्तस्येत्यनुवर्तते । स्तंबशब्दे स्तस्य तादेशः स्यात् । थबाधः तंबो स्तंबः ॥१३॥

सुबोधिनी

अत्र स्तस्य तः स्यात् । तंबो ॥१३॥

(१०१) स्तम्भे खः ॥१४॥

सञ्जीवनी

स्तम्भशब्दे खादेशः स्यात् । खंभो । 'स्थूणार्थस्य च खः स्तम्भे तस्य बाधोऽन्य-वाचके' । उरुत्थंभो । थंविअं बिसं । अग्गित्थंभो ॥१४॥

सुबोधिनी

स्तंभशब्दे स्तस्य खः स्यात् । 'स्थूणार्थे स्तस्य खः स्तंभे न त्वन्यस्मिन् कदाचन' । ऊरुत्थंभो ॥१४॥

(१०२) स्थाणावहरे ॥१५॥

सञ्जीवनी

ख इत्यनुवर्तते । अहरे अमहेश्वरप्रतिपादके स्थाणुशब्दे युक्तस्य वर्णस्य खः स्यात् । खण्णुओ अदातो यथादिषु वा इति अत्त्वम् । नीडादिषु इति णस्य द्वित्वम् । स्वार्थे को वेति कः । तस्य कगचादिना लोपः । अत ओत् सोः इति ओत्त्वम् । क्वचिदपि लोप इति अलोपः । अहरे इति किम् ? अच्चिओ थाणू ॥१५॥

सुबोधिनी

अहरे महेश्वरभिन्ने वर्त्तमाने स्थाणुशब्दे युक्तवर्णस्य खः स्यात् । खणुओ । अहर इति किम् ? थाणू ॥१५॥

(१०३) क्षेटके च॥१६॥

सञ्जीवनी

ख इत्यनुवर्तते। क्षेटकशब्दे युक्तवर्णस्य खः स्यात्। खेडओ। टो ड इति टस्य डः। कगचादिना कलोपः ॥१६॥

सुबोधिनी

अत्र युक्तस्य खः स्यात्। खेडओ ॥१६॥

(१०४) र्यशय्याभिमन्युषु जः॥१७॥

सञ्जीवनी

र्यस्य शय्याभिमन्यु इत्येतयोश्च यो युक्तो वर्णस्तस्य जः स्यात्। सर्वत्र लवराम्, अधो मनयामित्यनयोर्बाधः। कज्जं पज्जंतं कार्यपर्यन्तयोः। अदातो यथादिषु वेति अत्त्वम्। सेज्जा शय्या। ए च शय्यादिषु इत्येत्त्वम्। अभिमज्जू अभिमन्युः। 'अभियुक्तस्य निर्देशाज्जत्वं मन्यौ न केवले'। मण्णू। अधो मनयामिति यलोपः। सुभिस्सुप्सु दीर्घ इति दीर्घः। 'रलोपोऽपीष्यते र्यस्य क्वापि प्राकृतकोविदैः'। अय्यो अय्यउत्तो आर्यार्यपुत्रयोः। एवंप्रायाश्च शब्दाः शौरसेन्यादिषु भाषासु प्रयुक्ता दृश्यन्ते। क्वचिदिति किम्? शुद्धे प्राकृते न भवति। अज्जो ॥१७॥

सुबोधिनी

कार्यशय्याभिमन्युषु जः॥१७ क॥

कार्यशब्दे शय्याभिमन्युशब्दयोर्यो युक्तस्तस्य जः स्यात्। कज्जं सेज्जा अहिमज्जू। 'अभियुक्तस्य निर्देशाज्जत्वं मन्यौ न केवले'। मण्णू। 'रलोपोऽपीष्यते क्वापि र्यस्य प्राकृतकोविदैः। अय्यो आर्यः। एवंप्रायाः प्रयोगाः शौरसेन्यादौ दृश्यन्ते, अत एवाह— क्वापीति। शुद्धप्राकृते तु न भवति। अज्जो ॥१७क॥

(१०५) तूर्यधैर्यसौन्दर्याश्चर्यपर्यन्तेषु रः॥१८॥

सञ्जीवनी

र्यस्येति अपेक्षते र्तस्य ट इत्यतः प्राक्। एषु पञ्चसु शब्देषु रेफादेशः स्यात्, जादेशस्य बाधः। तूरं तूर्यम्। धीरं धैर्यम्। ईत् धैर्ये इति ऐकारस्य ईत्त्वम्। सुन्देरं सौन्दर्यम्। उत्सौन्दर्यादिषु इति औकारस्य उकारः। ए च शय्यादिषु इति एत्वम्।

अच्छेरं आश्चर्यम् । अदातो यथादिषु वेति अत्त्वम् । श्चत्सप्सां छ इति श्चस्य छत्वम् । पेरन्तो पर्यन्तः । पूर्ववदेत्त्वम् । 'शौंडीर्येऽपि र्यशब्दस्य र इत्यादेश इष्यते' । सोंडीरम् । टो ड इति डः । सर्वत्र रेफादेशस्य न द्वित्त्वम्, न रहोः इति निषेधात् ॥१८॥

सुबोधिनी

एषु र्यस्य रः स्यात् । तूरं धीरं सुंदेरं अच्छेरं पेरंतो । 'शौंडीर्येऽपि र्यशब्दस्य र इत्यादेश इष्यते' । सोंडीरं ॥१८॥

(१०६) सूर्ये वा ॥१९॥

सञ्जीवनी

र इत्यनुवर्तते । सूर्यशब्दे र्यस्य वा रः स्यात् । सूरो सुज्जो । रेफादेशाभावपक्षे र्यशय्याभिमन्युषु ज इति र्यस्य जः । उदूतो मधुकादिषु इति उत्त्वम् ॥१९॥

सुबोधिनी

अत्र र्यस्य रो वा स्यात् । सूरो सुज्जो ॥१९॥

(१०७) चौर्यसमेषु रिअः ॥२०॥

सञ्जीवनी

चौर्यसदृशेषु शब्देषु रिअ आदेशः स्यात् । चोरिअं चौर्यम् । औत ओदिति ओत्त्वम् । महुरिअं माधुर्यम् । अदातो यथादिषु वेति अत्त्वम् । खघथादिना धस्य हः । अच्छरिअं आश्चर्यम् । अत्रापि पूर्ववदत्त्वम् । श्चत्सप्सामिति श्चस्य छः । सोरिअं शौर्यम् । औत ओदित्योत्त्वम् । थेरिअं स्थैर्यम् । ऐत एदित्येत्त्वम् । उपरि लोप इत्यादिना सलोपः । सर्वत्र नपुंसके सोर्बिन्दुरिति बिन्दुः । धोरिओ धुर्यः । उत ओत् तुण्डरूपेषु इत्योत्त्वम् । अत ओत् सोः इति सोरोत्त्वम् । क्वचिदपि लोप इत्यलोपः । अरियो आर्यः । भरिआ भार्या । आआरिओ आचार्यः । कगचादिना चलोपः । ईषत्स्पृष्टप्रयोगः । 'ईषत्स्पृष्टो रिआदेशे याकारोऽकार एव वा' । भरिया भार्या ।

चौर्यमाधुर्यमाश्चर्यशौर्यस्थैर्यसमन्विताः ।
धुर्यार्यभार्याचार्याश्च चौर्यतुल्याः स्युरीदृशाः ॥ २०॥

सुबोधिनी

चौर्यतुल्यशब्देषु र्यस्य रिअ इत्यादिश्यते ।

चौर्य्यं माधुर्य्यमाश्चर्य्यं शौर्य्यस्थैर्य्यसमन्वितम् ॥
आचार्य्यधुर्य्यभार्य्यार्याः चौर्य्यतुल्याः स्युरीदृशाः ।

'ईषत्स्पृष्टो रिआदेशे यकारोऽकार एव वा'। चोरिअं, चोरियं । महुरिअं, महुरियं। अच्छरिअं, अच्छरियं। सोरिअं, सोरियं। थेरिअं, थेरियं। आचारिओ, आचारियो। धुरिओ, धुरियो। भारिआ, भारिया। अरिओ, अरियो ॥२०॥

(१०८) पर्यस्तपर्याणसौकुमार्येषु लः ॥२१॥

सञ्जीवनी

एषु र्यस्य लादेशः स्यात्। पल्लत्थं। स्तस्य थ इति थः। अस्य द्वित्वे वर्गे युजः पूर्व इति तः। पल्लाणं, सोअमल्लं; पर्याणसौकुमार्ययोः। औत ओदिति ओत्त्वम्। कगचादिना कलोपः। अन्मुकुटादिषु इत्युकारस्यात्त्वम्। अदातो यथादिषु वेत्यत्त्वम्। पर्यस्तशब्दे निष्ठालादेशो न प्रधानम्, तेन अन्यत्रापि प्रत्यये र्यस्य लत्वम्। पल्लट्टंति, पर्यस्यन्ति। र्यस्य लत्वम्। 'स्यस्तयोरपि वा टत्वं क्रियते क्वापि शाब्दिकैः' इति टः। तस्य द्वित्वम्। सेवादिषु वेति लस्य द्वित्वविकल्पः। 'पर्यङ्केऽपि भवेल्लत्वं पल्यंके तु किमुच्यते'। पल्लंको। र्यस्य लत्वं द्वित्वं च। पल्यङ्कशब्दे तु अधो मनयामिति यलोपसिद्धत्वाद् नापूर्वोऽयं विधिः। 'आर्द्रशब्दे र्द्रकारस्य लादेशो वेष्यते बुधैः'। ओल्लं, अल्लं; ओद्दं, अद्दं। 'ओत्त्वमादेर्विकल्पेन स्यादार्द्रार्पितशब्दयोः'। ओत्त्वाभावपक्षे अदातो यथादिषु वेत्यत्त्वम्। द्रे रो वेति रलोपः। यत्र पक्षे र्द्रस्य लत्वं नास्ति, तत्र सर्वत्र लवरामिति रलोपः। दलयोर्द्वित्वम्। ननूपरि लोप इत्यादिना दलोपे कृते हरिद्रादीनां रो ल इति दलोपावशिष्टस्य रस्य लत्वे शेषत्वाद् द्वित्वे कृते प्रयोगाणां सिद्धत्वाद् अनर्थोऽयम्, नातः पूर्वोक्तपरिभाषया दलोपं बाधित्वा सर्वत्र लवरामिति रलोपः प्रयुक्तः ॥२१॥

सुबोधिनी

एषु र्यस्य ल स्यात्। पल्लत्थं, पल्लाणं, सोअमल्लं। पर्यस्तशब्दे निष्ठा नाद्रियते। तेनान्यत्रापि भवति। पल्लट्टंति, पर्यस्यंति, । 'पर्यङ्केऽपि भवेल्लत्वं पल्यंके तु किमुच्यते'। पल्लंको। पल्यंकशब्दे सूत्रादेव पल्लंकमिति रूपं सिध्यतीति नायमपूर्वो विधिः। 'आर्द्रशब्दे र्द्रकारस्य लादेशो वेष्यते बुधैः'। ओल्लं, अल्लं। ओद्दं, अद्दं ॥२१॥

(१०९) र्तस्य टः ॥२२॥

सञ्जीवनी

र्त इत्यस्य टादेशो भवति। रलोपबाधाय आदेशः प्रवर्तते। पअट्टइ, प्रवर्तते। सर्वत्र लवरामिति रेफलोपः, कगचादिना वलोपः। ततिपोरिदेताविति प्रत्ययस्येत्त्वम्।

केवट्टो, कैवर्तः। वट्टी, वर्तिः। वट्टा, वर्त्म। अधो मनयामिति मलोपः। लिङ्गविपर्यासात् स्त्रीत्वम्। तेन स्त्रियाम् आदीतौ इति आत्त्वम्। अट्टो, णट्टओ। सर्वत्र टादेशस्य द्वित्वम्। कथं तर्हि णच्चणं ? चो व्रजनृत्योरिति चविधानात्। 'स्यस्तयोरपि वा टत्वं क्रियते क्वापि शाब्दिकैः'। पल्लट्टन्तो, पर्यस्यन्। पर्यस्तपर्याणादिना र्यस्य लः। अनेन स्यस्य टः। शेषादेशादिना टलयोर्द्वित्वम्। न्तमाणौ शतृशानचोरिति न्त आदेशः। विणशमाणो, विन्यस्यन्। व्यवस्थितविभाषया स्यादिह स्यस्य टत्वाभावः। पल्लट्टो, पल्लत्थो, पर्यस्तः। पर्यस्तपर्याणादिना र्यस्य लः। एकत्रानेन स्तस्य टः। अन्यत्र च स्तस्य थ इति थः। लटथादेशानां द्वित्वम् ॥२२॥

सुबोधिनी

र्तस्य टः स्यात्। पअट्टइ, णट्टओ। प्रवर्तते नर्तकः। 'स्तस्योरपि वा टत्वं क्रियते क्वापि शाब्दिकैः'। पल्लट्टंतो, पर्यस्यन्। पल्लट्टो, पल्लत्थो, पर्यस्तः। क्वापीत्यनेन व्यवस्थितविभाषयाऽभिप्रैति, तेनेह न भवति। विणस्सन्तो, विन्यस्यन्। वेत्यनेन क्वचिदव्यवस्थितविभाषामप्यभिप्रैति, उदाहृतम् ॥२२॥

(११०) मृत्तिकापत्तनयोश्च ॥२३॥

सञ्जीवनी

ट इत्यनुवर्तते। एतयोर्युक्तस्य टः स्यात्। मट्टिआ, मृत्तिका। ऋतोऽदित्यत्त्वम्। कगचादिना कलोपः। पट्टणं, पत्तनम् ॥२३॥

सुबोधिनी

एतयोर्युक्तस्य टः स्यात्। मट्टिआ। पट्टणं ॥२३॥

(१११) न धूर्तादिषु ॥२४॥

सञ्जीवनी

र्तस्य ट इति वर्तते। धूर्त इत्यनेन सदृशा धूर्तादयः। तेषु धूर्तादिषु शब्देषु र्तस्य टकारादेशो न भवति। धुत्तो, धूर्तः। मुहुत्तं, मुहूर्तम्। मुत्तं , मूर्तम्। उदूतो मधूकादिषु इति उत्त्वम्। कत्तरी, कर्तरी। आवत्तो, आवर्तः। कित्ती, कीर्तिः। पानीयादिषु इति इत्त्वम्। वत्ता, वार्ता। अत्तो, आर्तः। अदातो यथादिषु वेत्यत्त्वम्। भत्तारो, कत्तारो, भर्तृकर्तृशब्दयोः। ऋत आर सुपीति आरादेशः। अत ओत् सोः इति ओत्त्वम्।

धूर्तमूर्तमुहूर्तानि कर्तर्य्यावर्त्तकीर्तयः।
वार्तार्तभर्तृकर्त्राख्या धूर्ताद्या एवमादयः॥२४॥

सुबोधिनी

धूर्तादिषु शब्देषु र्तस्य टो न भवति।

धूर्त्तमूर्त्तमुहूर्त्तानि कर्त्तर्य्यावर्त्तकीर्त्तयः।
वार्त्तार्त्तभर्तृकर्त्तारो धूर्त्ताद्या एवमादयः॥

धुत्तो, मुत्तं, मुहुत्तं, कत्तरी, आवत्तो, कित्ती, वत्ता, अत्तो, भत्तारो, कत्तारो ॥२४॥

(११२) गर्ते च डः ॥२५॥

सञ्जीवनी

र्त इत्यनुवर्तते। गर्तशब्दे र्तस्य डादेशो भवति। गड्डा, गर्तः। 'एवं लिङ्गविपर्यासो ज्ञेयः शब्दान्तरेष्वपि' इति स्त्रीत्वे आदीतौ बहुलमिति आप्रत्ययः॥२५॥

सुबोधिनी

र्तस्य डः स्यात् । गड्डो ॥२५॥

(११३) गर्दभसंमर्दवितर्दिविच्छर्दिषु र्दस्य ॥२६॥

सञ्जीवनी

ड इत्यनुवर्तते। एषु शब्देषु र्दस्य डादेशो भवति। रलोपबाधः। गड्डहो, गर्दभः। खघथादिना भस्य हः। सम्मड्डो, संमर्दः। विअड्डी वितर्दिः। कगचादिना तलोपः। सुभिस्सुप्सु दीर्घ इति दीर्घः। विच्छड्डी, विच्छर्दिः। सर्वत्र डादेशस्य द्वित्वम्। सूर्ये वेत्यतो मण्डूकप्लुत्या वेत्यत्र सम्बद्ध्यते। तेन पक्षे रलोपोऽपि यथाप्राप्तो भवति। गद्दहो, सम्मद्दो, विअद्दी, विच्छद्दी ॥२६॥

सुबोधिनी

एतेषु र्दस्य डः स्यात्। गड्डहो, सम्मड्डो, विअड्डी, विच्छड्डी। मण्डूकप्लुतिन्यायेन वेत्यनुवर्त्तते। गद्दहो, सम्मद्दो, विअद्दी, विच्छद्दी ॥२६॥

(११४) त्यथ्यद्यां चछजाः॥२७॥

सञ्जीवनी

त्यथ्यद्यामित्येषां यथासंख्यं चछजा इत्यादेशा भवन्ति। अधो मनयामित्यस्य बाधः। त्यस्य तावत्–पच्चक्खो, मच्चलोओ; प्रत्यक्षमर्त्यलोकयोः। सर्वत्र लवरामिति रलोपः। ष्कस्कक्षां ख इति क्षस्य खः। सच्चं, णिच्चं; सत्यनित्ययोः। थ्यस्य छः–

रच्छा, मिच्छा; रथ्यामिथ्ययोः। पच्छो, णेपच्छो; पथ्यनेपथ्ययोः। द्यस्य जः – अज्ज, विज्जा; अद्यविद्ययोः। जूअं, मज्जं; द्यूतमद्ययोः। पडिवज्जइ, प्रतिपद्यते। पद गतौ प्रतिपूर्वः। प्रतिवेतसपताकासु ड इति डः। ततिपोरिदेतौ इति प्रत्ययस्येत्त्वम्। 'यथाप्राप्तो यलोपोऽपि त्यथ्यद्यां क्वापि दृश्यते। अत्तओ, वत्तासो; अत्ययव्यत्यासयोः। सामत्थं, आइत्थं; सामर्थ्यातिथ्ययोः। गद्दं, अवद्दं; गद्यावद्ययोः ॥२७॥

सुबोधिनी

एषां यथासंख्यं चछज आदय आदिश्यन्ते। पच्चक्खं, नेवच्छो, मज्जं; प्रत्यक्षं नेपथ्यं, मद्यम्। 'यकारप्राप्तलोपोऽपि त्यथ्यद्यां क्वापि दृश्यते'। अत्तओ, अत्ययः; सामत्थं, सामर्थ्यम्; गद्दं, गद्यम् ॥२७॥

(११५) ध्यह्ययोर्झः ॥२८॥

सञ्जीवनी

ध्यह्ययोर्झादेशः स्यात्। ध्यस्त – संझा, वंझा; सन्ध्यावन्ध्ययोः। 'आदेशस्य भवेद् द्वित्वं नानुस्वारपरस्य च' इति झस्य द्वित्वाभावः। ह्यस्य – सज्झं, गुज्झं; सह्यगुह्ययोः। संणज्झइ संनह्यते। संपूर्वे नह बन्धने तप्रत्ययस्य ततिपोरिदताविति इत्त्वम्। मुज्झइ, मुह्यति, मुह वैचित्ते। पूर्ववत् तिप इत्वम्। उभयत्रापि ह्यस्य झः। सर्वत्र झादेशस्य द्वित्वे, वर्गे युजः पूर्व इति पूर्वस्य जः। 'साध्वसे ध्वस्य झादेशः झादेशस्तु विभाषया'। सज्झसं। अदातो यथादिषु वेत्यत्त्वम् ॥२८॥

सुबोधिनी

अनयोर्झः स्यात्। संझा, संध्या; गुझं, गुह्यं। 'वक्तव्यः साध्वसे ध्वस्य झादेशोऽपि विभाषया'। सज्झसं, साध्वसम् ॥२८॥

(११६) ष्कस्कक्षां खः ॥२९॥

सञ्जीवनी

ष्कस्कक्ष इत्येतेषां खादेशः स्यात्। उपरि लोपापवादः। 'स्कष्कयोरत्र खादेशो व्यवस्थितविभाषया' क्वचित् खस्य बाधः। सुक्खं, सुक्कं; पोक्खरं, पोक्करं; शुष्कपुष्करयोः। खादेशो वा। पक्षे यथाप्राप्त उपरि लोप इत्यादिना षलोपः। उत ओत् तुण्डरूपेष्विति पुष्करशब्दे ओत्त्वम्। एवं णिक्खओ, णिक्कओ; निष्क्रयः। सर्वत्र लवरामिति रलोपः। क्वचिन्नैव खः। दुक्करं, णिक्कवो। ष्कस्य क्वचिद् बाधः। खंधो स्कन्धः। क्वचिन्नैव खः। सक्कअं संस्कृतं। मांसादिषु वेति बिन्दुलोपः। ऋतोऽदिति अत्त्वम्। कगचादिना तलोपः।

एवं संकारो संस्कारः। णमक्कारो नमस्कारः। तक्करो तस्करः। क्षस्य – जक्खो यक्षः। आदेर्यो ज इति जः। रक्खसो राक्षसः। अदातो यथादिषु वेत्यत्त्वम् ॥२९॥

सुबोधिनी

एषां खः स्यात्। 'स्कष्कयोरत्र खादेशो व्यवस्थितविभाषया' तेन न खंधो स्कंध :। पोक्खरं, वोक्करं; पुष्करमित्यादौ विकल्पेन। दुक्करं दुष्करं, णिक्कंपं निष्कम्पम्। सक्कअं संस्कृतम्। संकारो संस्कारो, णमक्कारो नमस्कारः। तक्करः तस्करः। दुष्करादिषु न इत्येषु न भवत्येव । जक्खो यक्षः ॥२९॥

(११७) अक्ष्यादिषु छः॥३०॥

सञ्जीवनी

अक्षिशब्दसदृशा अक्ष्यादयः। तेषु अक्ष्यादिषु क्षस्य छकारादेशः स्यात्। पूर्वेण खादेशः प्राप्तः। अच्छीइ अक्षीणि । द्विवचनस्य बहुवचनम् इति जस्प्रत्यये कृते इ जश्शसोर्दीर्घ इति इ आदेशः। पूर्वस्य च दीर्घः। छादेशस्य द्वित्वं च। छीरं क्षीरम्। छुरो क्षुरः। छेत्तं क्षेत्रम्। छारं क्षारं। कुच्छी कुक्षिः। उच्छू इक्षुः। उदिक्षुवृश्चिकयोरिति इकारस्योत्त्वम्। सुभिस्सुप्सु दीर्घ इति दीर्घः। मच्छिआ मक्षिका। रिच्छो ऋक्षः। अयुक्तस्य रिः। लच्छी लक्ष्मीः। अधो मनयामिति मलोपः। छुहा क्षुधा। खघथादिना धस्य हः। दच्छो दक्षः।

अक्षिक्षीरक्षुरक्षेत्रक्षारकुक्षीक्षुमक्षिकाः।
ऋक्षलक्ष्मीक्षुधादक्षा अक्ष्याद्यास्ते स्युरीदृशाः॥३०॥

सुबोधिनी

एषु छः स्यात्।

अक्षिक्षीरक्षुरक्षेत्रक्षारकुक्षीक्षुमक्षिकाः।
ऋक्षलक्ष्मीक्षुधादक्षा अक्ष्याद्या एवमादयः॥

अच्छीइ, छीरं, छुरं, छेत्तं, छारं, कुच्छी, उच्छू, मच्छिआ, रिच्छो, लच्छी, छुहा, दच्छो ॥३०॥

(११८) क्ष्मावृक्षक्षणेषु वा ॥३१॥

सञ्जीवनी

एषु शब्देषु छकारादेशो वा भवति। ष्कस्कक्षां ख इति नित्यं खप्राप्तः। छमा, खमा, क्ष्मा। क्ष्माशब्दे अः क्ष्माश्लाघयोरिति क्षकारमकारयोर्विप्रकर्षः। मध्ये च

अकारागमः। छत्वविकल्पे ष्कस्कक्षां ख इति खः। क्षमेति केचित् पठन्ति। तेषामपि इदमेव रूपद्वयम्। बच्छो, रुक्खो वृक्षः। एकत्र ऋतोऽत् इत्यत्त्वम्। अन्यत्र वृक्षे वेन रुर्वा इति वृकारस्य रुः। खछादेशयोर्द्वित्वम्। छणो, खणो क्षणः।

यत्रात्त्वं तत्र वृक्षे छः खत्वं तत्र तु यत्र रुः।
उत्सवार्थे क्षणे छत्वं मुहूर्तार्थे तु खो भवेत्॥३१॥

सुबोधिनी

एषु क्षस्य छो वा स्यात्। छमा खमा। क्षमेति क्वचित्सूत्रं दृश्यते। तत्राप्युत्तरमेव रूपम्। वच्छो रुक्खो। छणो खणो।

यत्रात्त्वं तत्र वृक्षे छः खत्वं तत्र तु यत्र रुः।
उत्सवार्थे क्षणे छत्वं मुहूर्तार्थे तु खो भवेत्॥३१॥

(११९) ष्मपक्ष्मविस्मयेषु म्हः॥३२॥

सञ्जीवनी

ष्मस्य पक्ष्मविस्मयशब्दयोश्च युक्तवर्णस्य म्हादेशः स्यात्। ष्मविस्मयशब्दयोः ऊर्ध्वलोपः प्राप्तः। पक्ष्मशब्दे अधो लोपे कृते ष्कस्कक्षां ख इति खादेशः प्राप्तः। ष्मस्य–गिम्हो ग्रीष्मः। सर्वत्र लवरामिति रलोपः। इदीतः पानीयादिषु इति इत्त्वम्। उम्हा ऊष्मा। उदूतो मधूकादिषु इति उत्त्वम्। 'एवं लिङ्गविपर्यासो ज्ञेयः शब्दान्तरेष्वपि' इति स्त्रीत्वे 'स्त्रियामात्' इति तस्यात्त्वम्। अन्त्यस्य हल इति सुलोपः। पम्हो पक्ष्मा। पूर्ववत् सुलोपः। विम्हओ विस्मयः॥३२॥

सुबोधिनी

ष्म इत्यस्य पक्ष्मविस्मयोश्च संयुक्तस्य म्ह इति स्यात्। गिम्हो, पम्हओ, विम्हओ॥३२॥

(१२०) ह्नस्नष्णक्ष्णश्नां ण्हः॥३३॥

सञ्जीवनी

एषां ण्हः स्यात्। ह्नस्य – जण्हू जह्नुः। अधो मनयामिति नलोपे सत्ययमादेशः। स्नस्य– ण्हानं स्नानम्। ष्णस्य– विण्हू, जिण्हू विष्णुजिष्णवोः। क्ष्णस्य– तिण्हं 'तीक्ष्णम्। तीव्रार्थे तीक्ष्णशब्दे ण्हो निशितार्थे भवेत्तु खः' । लण्हं श्लक्ष्णं। 'उपरि क्वापि वक्तव्यो लोपो वर्णान्तरस्य वा' इति शलोपः। श्नस्य– पण्हा प्रश्नः। पृष्टाक्षिप्रश्नाः स्त्रियां वेति स्त्रीत्वम्। आदीतौ बहुलमिति आप्रत्ययः। अण्हन्तो अश्नन्। अश भोजने न्तमाणौ शतृशानचोरिति न्तः॥३३॥

सुबोधिनी

एषां ण्हः स्यात्। जण्हवी जाह्नवी। जोण्हा ज्योत्स्ना। विण्हू विष्णुः। तिहं तीक्ष्णम्। 'तीव्रार्थे तीक्ष्णशब्दे ण्हो निशितार्थे तु खो भवेत्'। तिक्खं। पण्हो प्रश्नः ॥३३॥

(१२१) चिह्ने न्धः ॥३४॥

सञ्जीवनी

चिह्न इत्येतस्य न्धादेशः स्यात्। चिन्धं ॥३४॥

सुबोधिनी

अत्र ह्न इत्यस्य न्धः स्यात्। चिन्धं ॥३४॥

(१२२) ष्पस्य फः ॥३५॥

सञ्जीवनी

ष्प इत्येतस्य फः स्यात्। उपरि लोपबाधः। उत्तरत्र च। पुप्फं, सप्फं पुष्पशष्पयोः। णिप्फाओ, निप्फण्णं निष्पापनिष्पन्नयोः। सर्वत्र फादेशस्य द्वित्वे वर्गे युजः पूर्व इति पः। 'श्लेष्मशब्दे तु फादेशः ष्म इत्यस्य प्रचक्षते'। सेप्फो श्लेष्मा। सर्वत्र लवरामिति ललोपः। शषोः स इति शस्य सः। अन्त्यस्य हल इति नलोपः। अत् ओत् सोः इत्योत्त्वम् ॥३५॥

सुबोधिनी

अस्य फः स्यात्। पुप्फं पुष्पं। 'शेष्मशब्दे तु फादेशः ष्म इत्यस्य प्रचक्षते'। सेप्फो ॥३५॥

(१२३) स्पस्य ॥३६॥

सञ्जीवनी

फ इत्यनुवर्तते। स्पस्य फादेशः स्यात्। फंसो स्पर्शः। वक्रादिषु इति बिन्द्वागमः। सर्वत्र लवरामिति लोपे कृते 'बिन्द्वादीदूत्परस्येह द्वित्वं शेषस्य नेष्यते' इति सस्य न द्वित्वम्। फिहइ स्पृहयति। स्पृह ईप्सायाम्। ततिपोरिदेतौ इति तिप इत्त्वम्। अडादेशा बहुलमिति ऋकारस्य इत्त्वम्। 'लोपः साचो यकारस्य क्वचिन्नित्यं क्वचिन्न वा' इति यलोपः। 'छादेशोऽपि स्पशब्दस्य पण्डितैरिष्यते क्वचित्'। छिहा स्पृहा। इदृष्यादिषु वेति ऋकारस्य इत्त्वम् ॥३६॥

सुबोधिनी

स्पस्य फः स्यात् । फसो स्पर्शः । 'क्वचित्सस्य क्वचित्पस्य लोपः स्पाक्षर इष्यते' परोप्परं परस्परं । वनस्सई वनस्पतिः । सिहई स्पृहयति । 'छादेशोऽपि स्पशब्दस्य क्रियते क्वापि पण्डितैः' । छिहा स्पृहा ॥३६॥

(१२४) वाष्पेऽश्रुणि हः ॥३७॥

सञ्जीवनी

वाष्पशब्दे अश्रुणि अर्थे ष्प इत्यस्य हादेशः स्यात् । वाहो वाष्पः । अश्रुणि इति किम् ? बप्फो । 'अज्ज कस्य पुरदो बप्फमोक्खं करइस्सं' इत्यत्र अश्रुण्यर्थे कथं फादेश इति ? ब्रूमः– अश्रुणि ह इत्यत्र योगव्यावृत्तौ फादेशस्य बाध एव स्यात् । 'क्वचिद् दक्षिणशब्दस्य क्षस्य हादेश इष्यते' । दाहिणो दक्षिणः । आ समृद्ध्यादिषु वा इत्यात्त्वम् । क्वचिद् ग्रहणात् सर्वत्र न भवति । दक्खिणो । ष्कस्कक्षां ख इति खः । दक्खिण्णं दाक्षिण्यम् । अदातो यथादिषु वेत्यत्त्वम् । अधो मनयामिति यलोपः । क्षस्य पूर्ववत् खः ॥३७॥

सुबोधिनी

अश्रुणि वर्त्तमाने वाष्पशब्दे ष्प इत्यस्य हः स्यात् । वाहो । अश्रुणीति किम् ? मण्डूकप्लुतिन्यायाद् इति सम्बध्यते । तेन अज्ज कस्स पुरदो वप्फमोक्खं करइस्सं इत्यादावश्रुण्यपि फादेशः । 'क्वचिद्दक्षिणशब्देऽपि क्षस्य हादेश इष्यते' । दाहिणो दक्षिणः ॥३७॥

(१२५) कार्षापणे ॥३८॥

सञ्जीवनी

ह इत्यनुवर्तते । कार्षापणशब्दे युक्तवर्णस्य हादेशः स्यात् । रलोपः प्राप्तः । कहावणो, कार्षापणः । अदातो यथादिषु वेत्यत्त्वम् । पो व इति वः ॥३८॥

सुबोधिनी

अत्र युक्तस्य हः स्यात् । कहावणो ॥३८॥

(१२६) श्चत्सप्सां छः ॥३९॥

सञ्जीवनी

इत्येतेषां छ आदेशः स्यात् । उपरि लोप इत्यादिना लोपः प्राप्तः । श्चस्य – णिच्छओ, पच्छिमो निश्चयपश्चिमयोः । त्सस्य – वच्छो, उच्छाहो वत्सोत्साहयोः । प्सस्य – लिच्छा जुउच्छा, लिप्साजुगुप्सयोः । 'श्चत्सयोः क्वापि छादेशो न मन्यन्ते मनीषिणः' ।

णिच्चलो निश्चलः। छादेशे निषिद्धे 'उपरि क्वापि वक्तव्यो लोपो वर्णान्तरस्य च' इति शलोपः। इह तु वा। ऊसित्तो उत्सिक्तः। ईदूताविदुतोः स्थाने स्यातां लक्ष्यानुरोधतः' इत्यूत्त्वम्। उपरि लोप इत्यादिना तकयोर्लोपः, तस्य द्वित्वम्। सस्य न भवति। 'बिन्द्वादीदूत्परस्येह द्वित्वं शेषस्य नेष्यते' इति निषेधात्। पक्षे उच्छित्तो। सादृश्येऽपि श्यशब्दस्य छत्वमिच्छन्ति'। सारिच्छं। युक्तस्यापि मध्य इति ऋकारस्य इत्त्वम्॥३९॥

सुबोधिनी

एषां छः स्यात्। णिच्छओ निश्चयः। उच्छाहो उत्साहः। जुउच्छा जुगुप्सा। 'छादेशः श्चत्सयोः क्वापि न मन्यन्ते मनीषिणः'। णिच्चलो निश्चलः। ऊसित्तो उच्छित्तो उत्सिक्तः॥३९॥

(१२७) वृश्चिके ञ्छः॥४०॥

सञ्जीवनी

वृश्चिकशब्दे श्चस्य ञ्च आदेशः स्यात्। पूर्वेण छादेशः प्राप्तः। विञ्छुओ। उदिक्षुवृश्चिकयोरिति इकारस्य उत्त्वम्। इद् ऋष्यादिषु इति ऋकारस्य इत्त्वम्॥४०॥

सुबोधिनी

अस्य ञ्छः स्यात्। विञ्छुओ॥४०॥

(१२८) नोत्सुकोत्सवयोः॥४१॥

सञ्जीवनी

उत्सुकोत्सवयोः त्सस्य छादेशो न भवति। श्चत्सप्सामिति छः प्राप्तः। ऊसुओ उत्सुकः। ऊसओ उत्सवः। 'ईदूताविदुतोः स्थाने स्यातां लक्ष्यानुरोधतः' इत्यूत्त्वम्। उपरि लोप इत्यादिना तलोपे कृते 'बिन्द्वादीदूत्परस्येह द्वित्वं शेषस्य नेष्यते' इति सस्य द्वित्वं न भवति॥४१॥

सुबोधिनी

एतयोः त्सस्य छो न स्यात्। ऊसुओ ऊसओ॥४१॥

(१२९) न्मो मः॥४२॥

सञ्जीवनी

न्म इत्यक्षरं षष्ठ्यन्तम्। न्मशब्दस्य मः स्यात्। अधोलोपबाधः। वम्महो मन्मथः। मन्मथे व इति मस्य वः। खघथादिना थस्य हः। उम्माओ उन्मादः। कगचादिना दलोपः। सम्मग्गो सन्मार्गः। अदातो यथादिषु वा इति अत्त्वम्। सर्वत्र लवरामिति

रलोपः । गस्य द्वित्वम् । जम्मो जन्म । अन्त्यस्य हल इति नलोपः । नसन्तप्रावृट्शरदः पुंसीति पुंस्त्वे अत ओत् सोरिति ओत्त्वम् । क्वचिदपि लोप इत्यलोपः । सर्वत्र आदेशस्य द्वित्वम् ॥४२॥

सुबोधिनी

अस्य मः स्यात् । उम्माओ उन्मादः ॥४२॥

(१३०) म्नज्ञपञ्चाशत्-पञ्चदशसु णः ॥४३॥

सञ्जीवनी

म्नज्ञयो पञ्चाशत् पञ्चदश इत्येतयोश्च युक्तवर्णस्य णः स्यात् । म्नस्य अधो मनयामिति मलोपः प्राप्तः । ज्ञस्य तु सर्वत्र तुल्येषु ञ इति लोपः प्राप्तः । तौ बाध्येते । म्नस्य – पज्जुण्णो प्रद्युम्नः । त्यथ्यद्यां चछजा इति द्यस्य जः । णिण्णआ निम्नगा । ज्ञस्य – अहिण्णाणं, विण्णाणं; अभिज्ञानविज्ञानयोः । पण्णासा पञ्चाशत् । शषोः स इति शस्य सः । स्त्रियामादिति तकारस्य आत्त्वम् । पण्णरह । जश्शसोर्लोप इति जश्शसोर्लोपः । सर्वत्र आदेशस्य द्वित्वम् ॥४३॥

सुबोधिनी

म्नज्ञयोः पंचाशत् पंचदश इत्येतयोर्यो युक्तस्तस्य च णः स्यात् । णिण्णआ निम्नगा । अहिण्णाणं अभिज्ञानम् । पण्णासा पण्णरह ॥४३॥

(१३१) तालवृन्ते ण्टः ॥४४॥

सञ्जीवनी

तालवृन्तशब्दे युक्तवर्णस्य ण्टादेशः स्यात् । तालवेण्टं । ऋतोऽत् इत्यत्त्वम् । ए च शय्यादिषु इत्येत्त्वम् । वृन्तशब्दस्य प्राधान्येनाभिप्रेतत्वात् तालोपपदं विनापि ण्टादेशः स्यात् । वेण्टं वृन्तम् ॥४४॥

सुबोधिनी

अत्र युक्तस्य ण्टः स्यात् । तालवेण्टं । वृन्तशब्दस्य प्राधान्येनाभिप्रेतत्वात्तालोपपदं विनापि ण्टादेशः स्यात् । वेण्टं वृन्तम् ॥४४॥

(१३२) भिन्दिपाले ण्डः ॥४५॥

सञ्जीवनी

भिन्दिपालशब्दे युक्तस्य ण्डादेशः स्यात् । भिडिआलो ॥४५॥

सुबोधिनी

भिन्दिपालशब्दे युक्तस्य ण्डादेशः स्यात् । भिण्डिआलो ॥४५॥

(१३३) विह्वले भो वा ॥४६॥

सञ्जीवनी

विह्वलशब्दे युक्तस्य भादेशः स्याद् वा । वलोपः प्राप्तः । भिब्भलो । आदेश्चेत्युत्तर-सूत्रेण वा वस्य भः । पक्षे विहलो । 'ह्वस्य भः क्वचिदन्यत्र गोजिह्वादावपीष्यते' । गोइब्भा ॥४६॥

सुबोधिनी

अत्र युक्तस्य भो वा स्यात् । भिब्भलो, विहलो विह्वलः । 'ह्वस्य भः क्वचिदन्यत्र गोजिह्वादावपीष्यते' । गोइब्भा ॥४६॥

(१३४) आदेश्च ॥४७॥

सञ्जीवनी

विह्वले भो वा इत्यनुवर्तते । विह्वलशब्दे आदेर्वर्णस्य भः स्याद् वा । बिब्भलो । 'विह्वले यौगपद्येन स्याद् भोविह्वयोर्न वा' । ननु युक्ताधिकारे कथमयुक्तविधिरुच्यते, विह्वलशब्दस्थतावशात् ॥४७॥

सुबोधिनी

विह्वलशब्दे आदेर्भो वा स्यात् । 'विह्वले यौगपद्येन स्यातां तौ विह्वयोर्न वा' । उदाहृतम् । युक्ताधिकारेऽयुक्तविधिः प्रस्तावाल्लाघवार्थम् । वयं तु नायमयुक्तविधिः स्वतन्त्रः । किं नाम यदैवादेर्भकारस्तदैव परं युक्तस्यापि इति युगपद्विधिबोधनार्थं युक्तविधेरेवाऽनुचर इति संदिष्टं सूत्रद्वयमित्युन्नयामः ॥४७॥

(१३५) आत्मनि पः ॥४८॥

सञ्जीवनी

वेत्यनुवर्तते । आत्मशब्दे युक्तवर्णस्य पः स्याद् वा । अधो मनयामिति मलोपः प्राप्तः । अप्पा, अत्ता आत्मा । इत्वद्वित्ववर्जमित्यादिना राजवद्भावे राज्ञश्च इत्यन्त्य-स्यात्त्वम् । पक्षे अप्पाणो । 'अविकल्पेन पादेशो माहात्म्ये प्रतिपाद्यते' । माहप्पं । अदातो यथादिषु वेत्यत्त्वम् । अधो मनयामिति यलोपः ॥४८॥

सुबोधिनी

अत्र युक्तस्य पः स्यात् । अप्पा, अप्पाणो । एष निषातः 'अविकल्पेन पादेशो माहात्म्ये प्रतिपाद्यते' । माहप्पं ॥४८॥

(१३६) क्मस्य ॥४९॥

सञ्जीवनी

प इत्यनुवर्तते। क्म इत्यस्य पकारादेशः स्यात्। रुप्पं, रुप्पिणी; रुक्मरुक्मिण्योः। योगविभागो विकल्पनिवृत्त्यर्थः। 'भवति स्थानिनो ड्मस्य कुड्मलेऽपि पकारता'। कुंपलं। वक्रादिष्विति बिन्द्वागमः। 'त्वस्य स्थाने कचौ क्वापि ग्धद्धध्येषु ढः क्वचित्'। त्वस्य कः– मउक्कं मृदुत्वम्। ऋतोऽदिति अत्त्वम्। कगचादिना दलोपः। त्वस्य चः– चच्चरं चत्वरम्। ग्धस्य ढः – विअड्ढो विदग्धः। परिअड्ढी परिवृद्धिः। वुड्ढो वृद्धः। उद् ऋत्वादिषु इत्यृकारस्य उत्त्वम्। थड्ढो स्तब्धः। स्तस्य थ इति थः। क्वापीति वचनात् सर्वत्र न भवति। गत्तरो गत्वरः। संदिद्धो संदिग्धः। णिसिद्धो निषिद्धः। लद्धो लब्धः॥४९॥

सुबोधिनी

अत्र ाः स्यात्। योगविभागो विकल्पनिवृत्त्यर्थः। रुप्पिणी रुक्मिणी। 'भवति स्थानिनो ड्मस्य कुड्मलेऽपि पकारता' कुंपलं। 'त्वस्य स्थाने कचौ क्वापि ग्धद्धध्येषु ढः क्वचित्'। मउक्कं मृदुत्वम्। चच्चरं चत्वरम्। विअड्ढो विदग्धः। णिसिद्धो निषिद्धः। लद्धो लब्धः॥४९॥

(१३७) शेषादेशयोर्द्वित्वमनादौ॥५०॥

सञ्जीवनी

युक्तस्य इत्येव। शेषश्च आदेशश्च शेषादेशौ। अनादौ वर्तमानयोर्युक्तवर्ण-सम्बन्धिनोः शेषादेशयोर्द्वित्वम्। उपरि लोप इत्यादिना सूत्रेण युक्तवर्णस्य एकदेशलोपे कृते यः शेषः अवशिष्टः, तथा स्तस्य थ इत्यादिभिर्युक्तस्य विहितो य आदेशः, तयोर्द्वित्वं भवतीत्यर्थः। शेषस्य तावत्– आसत्तो आसक्तः। तक्करो तस्करः। उपरि लोप इत्यादिना कसयोर्लोपे कृते शेषयोस्तकयोर्द्वित्वम्। लग्गं, भोज्जं; लग्नभोज्ययोः। अधो मनयामिति नययोर्लोपे कृते शेषयोर्गजयोर्द्वित्वम्। उक्का, विप्पओ; उल्का-विप्लवयोः। सर्वत्र लवरामिति ललोपे कृते शेषयोः कपयोर्द्वित्वम्। णिव्विण्णो निर्विण्णः। आदेशस्य – मज्जाआ मर्यादा। र्यशय्याभिमन्युषु ज इति यस्य जः। पल्लाणं पर्याणम्। पर्यस्तपर्याणादिना र्यस्य लः। गड्डा गर्तः। गर्तस्य डः। पच्चओ, आओज्जं; प्रत्ययातोद्ययोः। त्यथ्यद्यां चछजा इति त्यद्ययोः चजौ। अनादाविति किम्? शेषस्य –

थविरो स्थविरः। उपरि लोप इत्यादिना सलोपः। चवनो च्यवनः। धओ ध्वजः। सर्वत्र लवरामिति यवयोर्लोपः। आदेशस्य– थवओ स्तवकः। स्तस्य थ इति थः। फन्दो स्पन्दः। स्पस्येति स्पस्य फः। झाणं ध्यानं । ध्यह्ययोर्झ इति ध्यस्य झः। खीणो क्षीणः। ष्कस्कक्षां ख इति क्षस्य खः। युक्तस्येति किम्? असई, कामुओ; असतीकामुकयोः। कगचादिना तकयोर्लोपे कृते यौ शेषौ। तडो तटः। टो ड इति टस्य डः। तलाओ तडागः। डस्य ल इति लः। विसेसो विशेषः। शषोः स इति शषयोः सः। 'बिन्द्वादीदूत्परस्येह द्वित्वं शेषस्य नेष्यते'। बिन्दोः– संखा संख्या। वंको वक्रः। वक्रादिषु इति बिन्द्वागमः। आतः– बाणसओ, पासिण्णं; वर्णशत-प्रस्विन्नयोः। आ समृद्ध्यादिषु वेति आत्वम्। इतः– णीसंदो निष्यन्दः। 'ईदूताविदुतोः स्थाने स्यातां लक्ष्यानुरोधतः' इति ईत्त्वम्। ईसरो ईश्वरः। उतः– ऊसित्तो, ऊसुओ; उत्सिक्तोत्सुकयोः। पूर्वेण ऊत्त्वम्। 'आदेशस्य भवेद् द्वित्वं नानुस्वारपरस्य तु'। संझा सन्ध्या। विंझा विन्ध्या ॥५०॥

सुबोधिनी

शेषश्च आदेशश्च तौ शेषादेशौ। संयुक्तस्याधःस्थिते उपरिस्थिते वा व्यञ्जने लुप्ते यद् व्यञ्जनम् अवशिष्टं तच्छेषः। यच्च युक्तस्यैव स्थाने आदिष्टं तदादेशः। तयोर्द्वित्वं स्यादनादौ स्थितौ चेत्। पूर्वोदाहरणप्रपञ्चः पूर्वत्रैवानुसन्धेयः, दिङ्मात्र-मुदाह्रियते– भुत्ती भुक्तिः। रस्सओ रस्मयः। चेट्ठा चेष्टा। युक्तस्येति किम्? कामुओ कामुकः। मसिणं मसृणं। अनादाविति किम्? थविरा स्थविरा। धओ ध्वजः। थवओ स्तवकः। 'बिन्द्वादीदूत्परस्येह द्वित्वं शेषस्य नेष्यते'। संखा संख्या। पासिण्णो प्रस्विन्नः। णीसंदो निस्पन्दः। ऊसुओ। 'आदेशस्य भवेद् द्वित्वं नानुस्वारपरस्य तु'। विंझो विन्ध्यः ॥५०॥

(१३८) वर्गे युजः पूर्वः ॥५१॥

सञ्जीवनी

'अर्थवशाद् विभक्तिपरिणामः' इति वचनाद् द्वित्वशब्दे सप्तम्यन्ते पूर्वसूत्रमनुवर्तते। अनादौ स्थितयोः शेषादेशयोर्वर्गे मध्ये युजः समसंख्यस्य द्वितीयस्य चतुर्थस्य द्वित्वे क्रियमाणे तस्मादेव युजः पूर्वो यथाक्रमं प्रथमस्तृतीयो यो वर्णः, स सर्वत्र भवति। वर्गाश्च कखगघङ इत्यादयः पञ्च पञ्चका इति। शेषस्य द्वित्वम्– सोक्खं सौख्यं। अधो मनयामिति यलोपः। औत ओदित्योत्त्वम्। विग्घो विघ्नः। अधो मनयामिति नलोपः। वग्घओ व्याघ्रः। सर्वत्र लवरामिति रलोपः। अदातो यथादिषु वेत्यत्त्वम्। मुच्छिओ मूर्छितः। उदूतो मधूकादिषु इति उत्त्वम्। ओज्झलो निर्झरः। 'ओत्त्वं सह

नकारेण स्यादितो निर्झरेऽपि वा' इत्वोत्त्वम् । सर्वत्र लवरामिति रलोपः । गोट्ठी गोष्ठी । उपरि इत्यादिना सलोपः । गुणड्ढो गुणाढ्यः । अधो मनयामिति यलोपः । अदातो यथादिष्वित्यत्त्वम् । पत्थिओ पार्थिवः । पूर्ववदत्त्वम् । अद्धओ अध्वगः । सर्वत्र लवरामिति रवयोर्लोपः । गुप्फो गुल्फः । पूर्ववत् ललोपः । अब्भासो अभ्यासः । अधो मनयामिति यलोपः । आदेशस्य बः । णक्खत्तं नक्षत्रम् । ष्कस्कक्षामिति क्षस्य खः । लच्छी लक्ष्मीः । अक्ष्यादिषु छः । उवज्झाओ उपाध्यायः । अदातो यथादिषु वा इत्यत्त्वम् । ध्यह्ययोर्झ इति ध्यस्य झः । धिट्ठो धृष्ठः । इद् ऋष्यादिष्विति ऋकारस्येत्त्वम् । ष्टस्य ठः । वुड्ढो वृद्धः । उद् ऋत्वादिषु इति ऋकारस्योत्त्वम् । 'त्वस्य स्थाने कचौ क्वापि ग्धद्धब्धेष्वपि ढः क्वचित्' इति द्धस्य ढः । वीसत्थो विश्वस्तः । 'ईदूताविदुतोः स्थाने स्यातां लक्ष्यानुरोधतः' इतीत्त्वम् । सर्वत्र लवरामिति वलोपः । स्तस्य थ इति थः । पुप्फिअं पुष्पितम् । स्पस्य फ इति फः । भिब्भलो विह्वलः । विह्वले भो हो वा इति ह्वस्य भः । आदेश्चेति वस्य भः ॥५१॥

सुबोधिनी

द्वित्वमित्यर्थवशाद्विभक्तिविपरिणामेनानुवर्त्तते । वर्गे कवर्गादिपञ्चकेषु युजः समाक्षरस्य द्वितीयस्य चतुर्थस्य वा पूर्वसूत्रेण द्वित्वे क्रियमाणे पूर्वः स्वाव्यवहित-पूर्वस्थो वर्ण उपरिगतो भवति । दिङ्मात्रमुदाह्रियते – सोक्खं सौख्यम् । मोक्खो मोक्षः । वग्घो व्याघ्रः । वर्गान्तरे स्वयमुदाहरणमूह्यम् ॥५१॥

(१३९) नीडादिषु ॥५२॥

सञ्जीवनी

द्वित्वमनादौ इत्यनुवर्तते । नीडशब्देन सदृशा नीडादयः । तेषु अनादौ स्थितस्य वाऽस्य द्वित्वम् । अशेषादेशार्थं वचनम् । णेड्डं नीडम् । एन्नीडादिना इकारस्येत्त्वम् । जोव्वणं यौवनम् । औत ओदिति ओत्त्वम् । तुण्हिक्को तूष्णिकः । उदूतो मधूकादिषु इति उत्त्वम् । ह्नस्नष्णक्ष्णश्नां ण्ह इति ण्हः । कस्य द्वित्वम् । पेम्मं प्रेम । अन्त्यस्य हल इति नलोपः । 'नान्तं नपुंसकं विद्धि पुल्लिङ्गेऽपि प्रचक्षते' इति नपुंसकत्वाद् नपुंसके सोर्बिन्दुरिति बिन्दुः । एक्को एकः । वाहित्तो व्याहृतः । अधो मनयामिति यलोपः । इद् ऋष्यादिष्विति ऋकारस्येत्त्वम् । उज्जुओ ऋजुकः । उद् ऋत्वादिष्विति ऋकारस्योत्त्वम् । स्वार्थे को वेति कः । तस्य कगचादिना लोपः । अत ओत् सोः इति ओत्त्वम् । क्वचिदपि लोप इत्यलोपः । सोत्तो स्रोतः । अन्त्यस्य हल इति सलोपः । वसन्तप्रावृट्शरदः पुंसीति पुंस्त्वाद् अत ओत् सोरिति ओत्त्वम् । चल्लिओ चलितः । मण्डुक्को मण्डूकः । उदूतो मधूकादिषु इत्युत्त्वम् ।

नीडयौवनतूष्णीकाः प्रेमैकव्याहृतर्जुकाः ।

स्रोतश्चलितमण्डूका नीडाद्या एवमादयः ॥५२॥

सुबोधिनी

नीडादिषु शब्देषु अनादेर्व्यञ्जनस्य द्वित्वं स्यात् ।

नीडयौवनतूष्णीकाः प्रेमैकव्याहृतर्जवः ।

स्रोतश्चलितमण्डूका नीडाद्या एवमादयः ॥

णेड्डं, जोव्वणं, तुण्हिक्को, पेम्मो, एक्को, वाहित्तो, उज्जुओ, सोत्तो, चल्लिओ, मंडुक्को ॥५२॥

(१४०) आम्रताम्रयोर्वः ॥५३॥

सञ्जीवनी

द्वित्वमित्यनुवर्तते । शेषस्य द्वित्वे वकारादेशः स्यात् । स चैकदेश एव, लक्ष्यवशात् । अंवं, तंवं । अदातो यथादिषु वेत्यत्त्वम् ॥५३॥

सुबोधिनी

अनयोर्द्वित्वे वादेशः स्यात् । स चैकदेश एव लक्ष्यवशात् । अंवो, तंवो ॥५३॥

(१४१) न रहोः ॥५४॥

सञ्जीवनी

शेषादेशयोर्द्वित्वमनुवर्तते । रेफहकारयोर्युक्तवर्णसम्बधिनोः शेषयोरादेशयोश्च द्वित्वं न भवति । सुंदेरं सौन्दर्यम् । उत् सौन्दर्यादिषु इत्यौकारस्योत्त्वम् । ए च शय्यादिषु इति एत्वम् । तूर्यधैर्यादिना र्यस्य रः । अच्छेरं आश्चर्यम् । अदातो यथादिषु वेत्यत्त्वम् । श्चप्सत्सां छ इति छः । एत्त्वमत्त्वं च पूर्ववत् । पेरंतो पर्यन्तः । पूर्ववदेत्त्वरत्वे । विहलो विह्वलः । सर्वत्र लवरामिति वलोपः । काहावणो कार्षापणः । अदातो यथादिषु वेत्यत्त्वम् । कार्षापणे ह इति र्षस्य हः । पो व इति वः ॥५४॥

सुबोधिनी

रेफहकारयोर्द्वित्वं न स्यात् । शेषादिसूत्रेण प्राप्तस्य बाधः । सुंदेरं सौन्दर्य्यम् । काहावणो कार्षापणः ॥५४॥

(१४२) आङो ज्ञादेशस्य ॥५५॥

सञ्जीवनी

ज्ञस्य आदेशो ज्ञादेशः। नेत्यनुवर्तते। आङः परस्य ज्ञस्य यो ण आदेशस्तस्य द्वित्वं न भवति। आणा आज्ञा। म्नज्ञादिना ज्ञस्य णः। आणत्ती आज्ञप्तिः। पूर्ववद् ज्ञस्य णः। सुभिस्सुप्सु दीर्घ इति दीर्घः। आङ इति किम्? अहिण्णाणं अभिज्ञानं विण्णाणं विज्ञानम् ॥५५॥

सुबोधिनी

ज्ञस्यादेशो ज्ञादेशः। आङः परस्य ज्ञादेशस्य द्वित्वं न स्यात्। आणा आज्ञा। आङ इति किम्? विण्णाणं विज्ञानम् ॥५५॥

(१४३) समासे वा ॥५६॥

सञ्जीवनी

शेषादेशयोरित्यनुवर्तते। समासः शब्दानामैकपद्यम्। तत्र स्थितयोः शेषादेश-योर्द्वित्वं वा भवति। शेषस्य– मरुत्थली, मरुथली, मरुस्थली। उपरि लोप इत्यादिना सलोपः। थस्य द्वित्वे वर्गे युजः पूर्व इति पूर्वस्य तः। गुणज्जेट्ठो, गुणजेट्ठो, गुणज्येष्ठः। अधो मनयामिति यलोपः। घरद्दारं, घरदारं, गृहद्वारम्। गृहस्य घरोऽपतौ इति गृहस्य घरादेशः। सर्वत्र लवरामिति वलोपः। अत्थग्गहो, अत्थगहो, अर्थग्रहः। रलोपः पूर्ववत्। आदेशस्य– घणत्थणी, घणथणी, घनस्तनी। विरहक्खमा, विरहखमा, विरहक्षमा। स्कष्कक्षामिति क्षस्य खः। तस्य द्वित्वे वर्गे युजः पूर्व इति कः। अङ्गप्फंसो, अंगफंसो, अङ्गस्पर्शः। स्पस्य फ इति फः। तस्य द्वित्वे वर्गे युजः पूर्व इति पः। वक्रादिष्विति बिन्द्वागमः। 'द्वित्वं क्वापि समासे स्यादशेषादेशयोरपि'। सप्पियासो, सपियासो, सह पिपासया वर्तत इति सपिपासः। बद्धप्फलो, बद्धफलो। बद्धं फलं येन यस्य वा स बद्धफलः। सिहरक्खण्डो, सिहरखण्डो, शिखरखण्डः। एवमादयः ॥५६॥

सुबोधिनी

समासवशादनादितामापन्नयोः शेषादेशयोर्द्वित्वं वा स्यात्। णअणप्पिआ, णघणपिआ। घणत्थणी, घणथणी। 'द्वित्वं क्वापि समासे स्यादशेषादेशयोरपि'। सप्पियासो, सपियासो, सपिपासः। बद्धप्फलो, बद्धफलः। सिहरखंडो शिखरखण्डः। एवमादिषु ॥५६॥

(१४४) सेवादिषु च ॥५७॥

सञ्जीवनी

द्वित्वमनुवर्तते। सेवाशब्देन सदृशाः सेवादयः। तेषु सेवादिषु शब्देषु शेषादेशयोश्चानादौ द्वित्वं वा भवति। अप्राप्तविकल्पोऽयम्। सेव्वा सेवा सेवैव। कोउहल्लं कोउहलं कौतूहलम्। औत ओदित्योत्त्वम्। उदूतो मधूकादिष्विति उत्त्वम्। देव्वं दइवं दैवम्। द्वित्वादन्यत्र 'दैवे वा' इत्यनेन ऐकारस्य अइ आदेशः। णिहित्तं णिहिअं। द्वित्वादन्यत्र कगचादिना तलोपः। णक्खो णहो नखः। एकत्र द्वित्वे वर्गे युजः पूर्व इति कः। अन्यत्र खघथादिना खस्य हः। संखप्पिव, संखम्मिव, संखव्विव, संखव्व शंख इव। **इवपिवमिवविव व्व इवार्थे निपातिताः।** पक्षे संखोपिव, संखोमिव, संखोविव, संखोव। सन्धावचामित्यादिना शंख इत्यत्र अकारस्योत्त्वम्। अदातो यथादिषु वेति वाशब्दस्य अत्त्वे कृते द्वित्वम्। जण्णुअं जाणुअं जानुकम्। यत्र अदातो यथादिषु वेति अत्त्वं तत्र णस्य द्वित्वम्। स्वार्थे को वेति कप्रत्ययः। तस्य कगचादिना लोपः। नपुंसके सोर्बिन्दुरिति बिन्दुः। तइलोक्कं तइलोअं त्रैलोक्यम्। दैत्यादित्वादैकारस्य अइआदेशः। रेफलोपः। द्वित्वादन्यत्र कस्य कगचादिना लोपः। कण्णिआरो कणिआरो कर्णिकारः। सर्वत्र लवरामिति रेफलोपः। वेस्सा वेसा वेश्या। अधो मनयामिति यलोपः। भुज्जा भुआ भूर्जा। उदूतो मधूकादिषु इत्युत्वम्। रलोपे कृते द्वित्वादन्यत्र जस्य कगचादिना लोपः। दुक्खिओ दुहिओ दुःखितः। उपरि लोप इत्यादिना लोपे कृते द्वित्वादन्यत्र खस्य खघथादिना हः।

सेवा कौतूहलं दैवं निहितं नखजानुनी।
सेवादिपठिताः शब्दा एतदाद्यास्तथापराः॥
त्रैलोक्यं कर्णिकारश्च वेश्या भूर्ज्जा च दुःखितः।
एवंजातीयकान् शब्दान् विदुः सेवादिकांस्तथा॥

ननु रत्ती राई रात्रिः। अदातो यथादिषु वेत्यत्त्वम्। अस्सो आसो अश्वः। आ समृद्ध्यादिषु वेत्यात्त्वम्। तथा– दिग्घो दीहो दीर्घः। इस्सरो ईसरो ईश्वरः। इदीतः पानीयादिषु इति एकत्र पक्षे इत्त्वम्। तथा– पुस्सो पुसो पुष्यः। उस्सासो ऊसासो उच्छ्वासः। पूर्ववदेकत्र पक्षे ऊत्त्वम्। इत्यादयः किमिति नोदाह्रियन्ते। दृश्यते ह्येषां द्वित्वविकल्पः। न प्रकारान्तरेण सिद्धत्वात्। यलोपे तावद् ईदूतौ परेषां 'बिन्द्वादीदूत्परस्येह द्वित्वं शेषस्य नेष्यते' इति द्वित्वप्रतिषेधात्। अन्येषां तु शेषद्वित्वादेव द्वित्वं पर्यवस्यतीति नैवार्थ एतैरेवमुदाहरणैः॥५७॥

सुबोधिनी

सेवादिशब्देषु शेषादेशयोश्चानादौ द्वित्वं स्याद् वा। अप्राप्तविकल्पोऽयम्।

सेवा कौतूहलं दैवं निहितं नखजानुनी।
इवार्थका निपाताश्च एतदाद्यांस्तथापरान्॥
त्रैलोक्यं कर्णिकारश्च वेश्या भूर्जश्च दुःखितः।
एवंजातीयकान् शब्दान् विदुः सेवादिकान् बुधाः॥

सेव्वा सेवा। कोउहल्लं कोउहलं। देव्वं दइवं। णिहित्तं णिहिअं। णक्खो णहो। चण्णुअं जाणुअं। **संखप्पिअ संखम्मिअ संखव्विअ संखव्व शंख इव। एते इवार्था निपाताः। पक्षे संखपिअ संखोमिअ संखोविअ संखोव।** तइलोक्वं तइलोअं। कण्णिआरो कणिआरो। वेसा वेस्सां भुज्जं भुअं। दुक्खिओ दुहिओ।।५७।।

(१४५) विकर्षः॥५८॥

सञ्जीवनी

अधिकारोऽयम्। यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र युक्तवर्णस्य विकर्षो भवतीति अधिकृतं वेदितव्यम्। अयमधिकार आपरिच्छेदपरिसमाप्तेः ॥५८॥

सुबोधिनी

अतः परं युक्तस्य वर्णस्य विकर्षो विश्लेषो वेदितव्यः। अधिकार-सूत्रमिदम् ॥५८॥

(१४६) क्लिष्टश्लिष्टरत्नक्रियाशार्ङ्गेषु तत्स्वरवत् पूर्वस्य॥५९॥

सञ्जीवनी

क्लिष्टादिशब्देषु पञ्चसु युक्तवर्णस्य विकर्षो भवति। तस्य स्वरः तत्स्वरः। तत्स्वर इव तत्स्वरवत्। तस्य युक्तस्य यः स्वरस्तद्वत् तत्सदृशः स्वरो विकर्षे पूर्वस्य युक्तवर्णस्य भवति। रत्नशब्दे अधो मनयामिति लोपः। अन्यत्र सर्वत्र लवरामिति लोपः प्राप्तः। किलिट्ठं सिलिट्ठं क्लिष्टश्लिष्टयोः। ष्टस्य ठ इति ठः। तस्य द्वित्वे वर्गे युजः पूर्व इति टः। अत्र क्रमप्राप्तत्वात् क्लिश्लि एतयोरेव विकर्षः, न तु ष्टस्य। रअणं रत्नम्। तनयोर्विकर्षः। पूर्वस्य तकारस्य तत्स्वरवत् स्वरे कृते कगचादिना लोपः। नो ण इति णः। किरिआ सारंगो क्रियाशार्ङ्गयोः ॥५९॥

सुबोधिनी

एषु युक्तस्य विकर्षो भवति। तत्स्वरवद् युक्तवर्णस्य यः स्वरः, स एव विकर्षावस्थायामपि पूर्ववर्णस्य भवति। किलिट्ठं सिलिट्ठं। अत्र क्रमप्राप्तविकल्पत्वात् क्लिश्लि इत्येतयोर्विप्रकर्षः, न तु ष्टस्य। रअणं किरिआ सारङ्गो ॥५९॥

(१४७) कृष्णे वा ॥६०॥

सञ्जीवनी -

तत्स्वरवत् पूर्वस्येत्यनुवर्तते। कृष्णशब्दे युक्तवर्णस्य विकर्षः स्यात्। पूर्वस्य तत्स्वरवत् स्वरो भवति। ह्रस्नष्णक्षश्नां ण्ह इति ण्हादेशः प्राप्तः। **कसणो**। ऋतोऽदित्यत्त्वम्। शषोः स इति षस्य सः। पक्षे कण्हो। 'कृष्णशब्दे विकर्षो वा वर्णेऽर्थे न तु नामनि' इत्यादिनात्र ह्रस्नादिना ष्णस्य ण्हादेशः ॥६०॥

सुबोधिनी

अत्र वा युक्तस्य विप्रकर्षः स्यात्। पूर्वस्वरवच्च स्वरः। कसणो कण्हो। 'कृष्णशब्दे विकर्षो वा वर्णेऽर्थे न तु नामनि'। तेन वासुदेवार्जुनादौ वाच्ये नित्यं कण्ह इति ॥६०॥

(१४८) इत् श्रीह्रीक्लान्तक्लेशम्लानस्वप्नस्पर्शादर्शहर्षार्हेषु ॥६१॥

सञ्जीवनी

पूर्वस्येत्यनुवर्तते 'ज्यायामीत्' इति यावत्। श्री इत्यादीनां युक्तस्य विकर्षः। पूर्वस्य तु इकारः। स्वप्नशब्दे अधो मनयामिति, अन्यत्र सर्वत्र लवरामिति **लोपः** प्राप्तः। सिरी हिरी श्रीह्रीशब्दयोः। किलन्तो क्लान्तः। अदातो यथादिषु **वेत्यत्त्वम्**। इह क्रमप्राप्तस्य क्ल इत्यस्यैव विकर्षः। किलेसो मिलाणो क्लेशम्लानयोः। **सिविणो** स्वप्नः। इदीषदित्यादिना अत इत्त्वम्। सर्वत्र लवरामिति वलोपः। अथ कथं **क्रम**-व्यतिक्रमे कारणाभावादिति क्रमप्राप्तं स्वप्न इत्यत्र स्वं परित्यज्य प्नस्य विकर्षः? अस्त्येतत्, किन्तु स्व इत्यत्र विकर्षे प्रयोगादर्शनात्। वेत्यनुवर्तते। फरिसो। **फंसो** स्पर्शः। अत्रापि पूर्वन्यायः। स्पस्येति स्पस्य फः। विकर्षादन्यत्र स्पर्श इत्यत्र सर्वत्र लवरामिति रलोपः। वक्रादिषु इति बिन्द्वागमः। दरिसणं दंसणं दर्शनम्। विकर्षादन्यत्र पूर्ववद् रेफलोपो बिन्द्वागमश्च। क्वचिन्नित्यम्। आअरिसो आदर्शः। कगचादिना दलोपः। र्षस्य क्वचिन्नित्यम्। हरिसो हर्षः। अमरिसो अमर्षः। शषोः स इति षस्य सः। वरिसो वर्षः। वरिसवरो वर्षवरः। क्वचिन्नैव। वासारत्तो वाससअं वर्षारात्रवर्षशतयोः।

आ समृद्ध्यादिषु वेति आदेरत आत्वम् । सर्वत्र लवरामिति रलोपः । र्हस्य क्वचिन्नित्यम् । अरिहो अर्हः । बरिहिणो बर्हिणः । गरिहा गर्हा । क्वचिन्नैव । दासारो दाशार्हः । 'रेफस्याधो हकारस्य लोपो भवति कुत्रचित्' इति हलोपः । 'प्लोषे प्लुष्टे भवेत् स्नायौ श्लोके विश्लेष इस्तथा' । पिलोसो प्लोषः । पिलुट्ठो प्लुष्टः । ष्टस्य ठ इति ठः । तस्य द्वित्वे वर्गे युजः पूर्व इति टः। सिणाऊ स्नायुः । कगचादिना यलोपः । सुभिस्सुप्सु दीर्घ इति उकारस्य दीर्घः। सिलोओ श्लोकः । पूर्ववत् कलोपः । सर्वत्र विकर्षं कृत्वा पूर्वस्य इत्त्वम् । 'विकर्षोऽपि भवेद् वज्रे पूर्वस्येत्त्वं च पूर्ववत्' । वइरं । विकर्षे इत्त्वे कृते कगचादिना जलोपः । पक्षे वज्जं । सर्वत्र लवरामिति रलोपः । शेषादेशादिना द्वित्वम् । पूर्वशब्दे विकर्षो वा पूर्वस्येत्त्वं च वस्य मः' पुरिमं पुव्वं पूर्वम् । उदूतो मधूकादिषु इत्युत्त्वम् ॥६१॥

सुबोधिनी

एषु युक्तस्य विकर्षः स्यात्। विकृष्टस्य च पूर्ववर्णस्य च इकारः स्वरो भवति । तत्स्वरवदित्यस्यापवादः । सिरी हिरी किलंतो किलेसो सिणाणो सिविणो । अत्र स्व इत्यस्य विकर्षे प्रयोगादर्शनाद् वेत्यनुवर्त्तमानबलाद् व्यवस्थितविभाषाश्रयेण क्रमप्राप्तं व्यतिक्रम्यापि प्न-इत्यस्य विकर्षः । लक्ष्याऽनुसाराच्च विकर्षो वर्त्तनीयः । फरिसो फंसो दरिसणं दंसणं । क्वचिन्नित्यम् । आअरिसो आदर्शः । र्षस्य क्वचिन्नित्यम् । हरिसो हर्षः । उक्करिसो उत्कर्षः । अमरिसो अमर्षः । पवरिसो प्रवर्षः । क्वचिन्नैव । वासारत्तं वाससअं । र्हस्य क्वचिन्नित्वम् । अरिहो अर्हः । गरिहो गर्हः । बरिहिणो बर्हिणः । क्वचिन्नैव । दासारो दशार्हः । 'प्लोषे प्लुष्टे भवेत् स्नायौ श्लोके विश्लेष इस्तथा' । पिलोसो पिलुट्ठो सिणाऊ सिलोओ। 'वा विश्लेषो भवेद् वज्रे पूर्वस्य स्वर एव च' । वइरं वज्जं । 'पूर्वे तस्य विकर्षो वा पूर्वस्येत्त्वं च वस्य मः' पुरिमं पुव्वं ॥६१॥

(१४९) अः क्ष्माश्लाघयोः॥६२॥

सञ्जीवनी

एतयोः शब्दयोर्युक्तस्य विकर्षः स्यात् । पूर्वस्य चाकारः । अधो मनयामिति मलोपः। सर्वत्र लवरामिति ललोपः प्राप्तः । छमा खमा । क्ष्माशब्दे क्षकारमकारयोर्विकर्षो भवति । क्ष्माशब्दे क्षस्य छकारादेशो विधौ नानार्थत्वप्रसङ्गात् । सलाहा श्लाघा । 'वा विकर्षे विपर्यासो दीर्घेऽप्यत्त्वं च पूर्ववत्' । दिहरो दीहो। खघथादिना घस्य हः । विकर्षादन्यत्र सर्वत्र लवरामिति रलोपः ॥६२॥

सुबोधिनी

एतयोर्युक्तस्य विकर्षः स्यात् पूर्वस्य च अः। खमा सलाह। 'वा विकर्षो विपर्यासो दीर्घेऽप्यत्त्वं च पूर्ववत्'। दिहरो दीहो ॥६२॥

(१५०) स्नेहे वा ॥६३॥

सञ्जीवनी

अ इत्यनुवर्तते। स्नेहशब्दे युक्तस्य विकर्षो भवति, पूर्वस्य चाकारः। सणेहो णेहो। विकर्षादन्यत्र उपरि लोप इत्यादिना सलोपः। ननु अधो मनयामिति परोक्तं नलोपमपि बाधित्वा ह्रस्नादिना स्न इत्यस्य प्रतिपदोक्तो ण्हादेशः प्राप्तः। तत् कथम् उपरिलोप इत्यादिना सलोपः ? उच्यते, लक्ष्यवशात्। यतो लक्ष्यं दृष्ट्वा लक्षणं प्रवर्तते। 'धात्वर्थस्य प्रधानत्वात् स्निग्धेऽपि स्नेहवद्विधिः'। सिणिद्धो णिद्धो। उपरिलोप इत्यादिना सलोपः। तस्य द्वित्वे वर्गे युजः पूर्व इति दः ॥६३॥

सुबोधिनी

अत्र युक्तस्य विप्रकर्षो वा स्यात्। इश्च पूर्वस्य। सिणेहो। अत्र अत्त्वं णकारलोपो ण्हत्वं वा नाशङ्कनीयम्, प्रयोगाऽनुरोधात्। 'धात्वर्थस्य प्रधानत्वात्स्निग्धेऽपि स्नेहवद्विधिः'। सिणिद्धो णिद्धो ॥६३॥

(१५१) उः पद्मतन्वीसमेषु ॥६४॥

सञ्जीवनी

पद्मतन्वीभ्यां समाः पद्मतन्वीसमाः। तेषु पद्मतन्वीसमेषु शब्देषु युक्तस्य विकर्षो भवति। पूर्वस्य उकारः। पद्मसमेषु– पउमं पद्मम्। घसुमरो घस्मरः। कसुमीराः कश्मीराः।'एवं लिङ्गविपर्यासो ज्ञेयः शब्दान्तरेष्वपि' इति स्त्रीत्वाद् आदीतौ बहुलमिति आप्रत्ययः। अन्त्यस्य हल इति सलोपः। प्राकृतलक्ष्यवशाद् बहुत्वम्। वेसुमं वेश्म। सउमं सद्म। कगचादिना दलोपः। अन्त्यस्य हल इति नलोपः। नपुंसके सोर्बिन्दुरिति बिन्दुः। अउमरो अद्मरः। पूर्ववद् दलोपः।

पद्मघस्मरकश्मीरवेश्मसद्माद्मरादयः।
समानाः पद्मशब्दस्य प्राकृतज्ञैः प्रदर्शिताः॥

'द्वारे वा दवयोर्लोपस्तद्विकर्ष इति त्रिधा'। दारं वारं दुआरं। विकर्षपक्षे कगचादिना वलोपः। तन्वीसमेषु– तणुई तन्वी। लहुई लघ्वी। खघथादिना घस्य हः।

असिसुई । अविद्यमानः शिशुर्यस्याः सा अशिश्वी । शषोः स इति शशोः सौ । मउई मृद्वी । ऋतोऽदित्यत्त्वम् । पड्डुई पट्वी । टो डः । बहुई बह्वी । गरुई गुर्वी । अन्मुकुटादिषु इत्युकारस्यात्त्वम् । पिहुई पृथ्वी । इद् ऋष्यादिषु वेति ऋकारस्य इत्त्वम् । खघथादिना थस्य हः । कगचादिना वलोपः ।

तन्वी लघ्वी तथाशिश्वी मृद्वी पट्वी तथैव च ।

बह्वी गुर्वी च पृथ्वी च तन्वीतुल्याः प्रकीर्तिताः ॥ ६४॥

सुबोधिनी

पद्मसमेषु तन्वीतुल्येषु युक्तस्य विकर्षः पूर्वस्य च डः स्यात् ।

पद्मघस्मरकश्मीरवेश्मसद्माद्मरादयः ।

समानाः पद्मशब्दस्य प्राकृतज्ञैः प्रकीर्तिताः ॥

पउमं घसुमरो कसुमीरो वेसुमं सउमं अउमरो ।

तन्वी लघ्वी तथाशिश्वी मृद्वी पट्वी तथैव च ।

वह्वी गुर्वी च पृथ्वी च तन्वीतुल्याः स्युरीदृशाः ॥

तणुई लहुई असिसुई पटुई बहुई गरुई पुहुवी ॥ ६४॥

(१५२) ज्यायामीत् ॥ ६५॥

सञ्जीवनी

ज्याशब्दे युक्तस्य विकर्षो भवति पूर्वस्य च ईकारः । जीआ ज्या । इत्यविकर्षेऽपि जीवाशब्दस्य सिद्ध्यति ।

॥ इति वसन्तराजविरचितायां प्राकृतसञ्जीवन्यां

युक्तवर्णविधिस्तृतीयः परिच्छेदः ॥

सुबोधिनी

ज्याशब्दे विकर्षः पूर्वस्य च ईकारः स्यात् । जीआ इत्यविकर्षेऽपि जीवाशब्देऽपि सिद्ध्यति ॥ ६५॥

वृत्तौ प्राकृतसूत्राणां सदानन्दस्य निर्मितौ ।

परिच्छेदः सुबोधिन्यां तृतीयो युग्विधिर्गतः ॥ ३॥

●

॥ चतुर्थः परिच्छेदः ॥

❀❀❀

अथ संकीर्णविधिरुच्यते

(१५३) सन्धावचामज्लोपविशेषा बहुलम् ॥ १ ॥

सञ्जीवनी

अच् अट् इति प्रत्याहारयोर्ग्रहणम् । अचः स्वराः । अटोऽपि हयवराधिकाः स्वरा एव । अट्च लोपश्च अज्लोपौ। तयोर्विशेषा अज्लोपविशेषाः । सन्धौ कर्तव्ये अचां स्थाने अटो लोपस्य च विशेषा भेदा बहुलं प्रायो भवन्ति । अज्विशेषास्तावत्, क्वचिदेत्त्वविकल्पः– वासेसी वासइसी व्यास-ऋषिः । अधो मनयामिति यलोपः । इद् ऋष्यादिषु वेति ऋकारस्य इत्त्वम् । राएसी राअइसी राजर्षिः । कण्णेरो कण्णऊरो कर्णपूरः । सर्वत्र लवरामिति रलोपः । शेषादेशादिना णस्य द्वित्वम् । अत्र तु अऊ इत्येतयोः सन्धौ वा एत्त्वम् । क्वचिदात्वविकल्पः– चक्काओ चक्कवाओ चक्रवाकः । सर्वत्र लवरामिति रलोपः । शेषादेशादिना कस्य द्वित्वम् । कगचादिना प्रायोग्रहणाद् यत्र पक्षे वलोपस्तत्र अआ इत्येतयोरात्वम् । कुंभारो कुंभआरो कुम्भकारः । अंधारो अन्धआरो अन्धकारः । कगचादिना कलोपः । क्वचिदकारस्य अपूर्वेण सह दीर्घत्वमादिलोपश्च – ममावि ममवि ममापि । अस्मदो मोममममहमज्झ ङसीति ममादेशः । केणवि केणावि केनापि । किमः क इति कः । टामोर्ण इति टाप्रत्ययस्य णः । ए सुप्यङिङसोरित्येत्वम् । पो व इति वः । क्वचिद्दीर्घविकल्पः – वारीमई वारिमई । वारिणा निर्वृत्ता वारिमयी । वईमूलं वइमूलं वृत्तिमूलम् । ऋतोऽदित्यत्त्वम् । कगचादिना तलोपः । सन्धाविकारस्य वा दीर्घः । वेणूवणं वेणुवणं वेणुवनम् । क्वचिद्वा ह्रस्वः– जउणअडं जउणाअडं यमुनातटम् । आदेर्यो ज इति जः । यमुनायां मस्येति मलोपः । नो ण इति णः । टो ड इति डः । णइसोत्तो णईसोत्तो नदीस्रोतः । कगचादिना दलोपः । सर्वत्र लवरामिति रलोपः । नीडादिषु इति तस्य द्वित्वम् । अन्त्यस्य हल इति सलोपः । नसन्तप्रावृट्शरदः पुंसीति पुंस्त्वे अत ओत् सोरित्योत्त्वम् । क्वचिदपि लोप इत्यलोपः । बहुमुहं बहूमुहं वधूमुखम् । खघथादिना खघयोर्हत्वम् । क्वचिद्वा ओकारस्य अत्वम्–

सररुहं सरोरुहमेव । मणहरं मनोहरम् । सिरविअणा सिरोविअणा शिरोवेदना । शषोः स इति शस्य सः । एत इद्वा वेदनादेवरयरितीत्त्वम् । त्रिषु वा क्वचिन्नैवाकारस्य ओत्त्वम्–मणोरहो मणोहओ मनोरथ-मनोभवयोः । खघथादिना थभयोर्हः ।

अथ लोपविशेषाः – क्वचित्पूर्वपदान्तस्य वा अकारलोपः– राउलं राअउलं राजकुलम् । कगचादिना जकयोर्लोपः । पावडणं पाअवडणं पादपतनम् । पूर्ववल्लोपः । पो व इति वः । पदिपत्योर्ड इति डः । पावीढम् , पाअवीढम्, पादपीठम् । ठो ढ इति ढः । पूर्ववदन्यत् । क्वचिद् हल्परयोरपि अचोर्नित्यमादिलोपः– तुम्हे त्थ । यूयमत्र । युस्मदः प्रथमाबहुवचने जसि यूयमिति पदस्य तुम्हे तुज्झे जसीति तुम्हे आदेशः । एतदः परस्य सप्तम्येकवचनस्य ङेः थ आदेशः । एत्थ इत्यत्र एकारलोपः । रइन्दो राजेन्द्रः । अन्त्यस्य हल इति न लोपः । तदवशिष्टस्य अकारस्य सन्धौ नित्यं लोपः । एवं गइन्दो गजेन्द्रः । मइन्दो मृगेन्द्रः । ऋतोऽदित्यत्त्वम् । पूर्ववदन्यत् । उविन्दो उपेन्द्रः । इन्दोओ इन्द्रगोपः । कगचादिना गलोपः । सन्धौ न्द इत्यस्य अलोपे कृपे ओकारेण सस्वरत्वम् । पञ्चस्वपि द्रे रो वेति लोपः । दीवुज्जलो दीपोज्चलः । पो व इति वः। शेषादेशादिना जस्य द्वित्वम् । सन्धावलोपः । उकारेण सस्वरत्वम् । मअरंदुज्जाणं मकरन्दोद्यानम् । कगचादिना कलोपः । त्यथ्यद्यां चछजा इति द्यस्य जः । जस्य शेषादेशादिना द्वित्वम् ।सन्धिःपूर्ववत् ।पमदुज्जाणं प्रमदोद्यानम् ।अत्र सन्धावाकारलोपः । महूसओ महोत्सवः । अत्र सन्धावाकारलोपः । क्वचिन्नित्यमिकारलोपः– तुह त्ति तव इति । युस्मदः षष्ठ्येकवचने ङस्प्रत्यये ङसि तुमो तुह तुज्झ तुम्ह इति तुह आदेशः । मह त्ति मम इति । पूर्ववदस्मदः मो मम मह मज्झ ङसीति मह आदेशः । गओ त्ति गत इति । दइओ त्ति दयित इति । अत ओत् सोरित्योत्त्वम् । कगचादिना तलोपः । सर्वत्रैव इति-शब्दे नीडादिषु इति तकारस्य द्वित्वम् । क्वचिद् यष्टिशब्दस्य वा ललोपः– चम्मट्ठी चम्मलट्ठी, चर्मयष्टिः । सर्वत्र लवरामिति रलोपः । शेषादेशादिना मस्य द्वित्वम् । यष्टिशब्दे यष्ट्यां ल इति लः । ष्टस्य ठ इति ठः । तस्य द्वित्वे वर्गे युजः पूर्व इति टः । क्वचिद् न लोपः । इह न भवति । असिलट्ठी असियष्टिः । क्वचिन्न सन्धिः– मुहअंदो मुखचन्द्रः । परिअरो परिकरः । उवआरो उपकारः । पईरो प्रदीपः । दुराआरो दुराचारः । विआलो विकालः– इत्यादयः । परोप्परं परस्परम् । 'क्वचित् सस्य क्वचित् पस्य लोपः शब्दस्य इष्यते' इति सलोपः । शेषादेशादिना पस्य द्वित्वम् । सन्धावकारस्योत्त्वम् । क्वचिद् विसर्गेण सह पूर्वस्याकारस्यैत्वम् । अन्तेउरं अन्तःपुरम् । कगचादिना तलोपः । तेरह त्रयोदश । तेवीसा त्रयोविंशतिः । मांसादिषु वेति बिन्दुलोपः । ईदूतावित्यादिना ईत्त्वम् । अत्र तिकारस्य स्त्रियामादित्यात्त्वं वक्तव्यम् । तेत्तीसा त्रयस्त्रिंशत् । पूर्ववद् बिन्दुलोपः । अन्त्यस्य हल इत्यादिना सलोपः ।

स्त्रियामादिति तकारस्यात्त्वम् । 'लोपः साचो यकारस्य क्वचिन्नित्यं क्वचिन्न वा' इति त्रि इत्यस्य लोपः । सन्धावचामित्यादिना एत्त्वम् । क्वचिदेकस्यापि पदस्य विशेषाः– पुणो पुणा पुण पुनः । पक्षे विसर्जनीयेन सह अकारस्य ओत्त्वम् । पक्षे आत्त्वम् । पक्षे विसर्जनीयलोपः । एवं बहुलग्रहणात् सन्धौ प्रकारान्तराण्यपि महाकविप्रयोगानुसारेणावगन्तव्यानि । तथा चोक्तम्–

क्वचित् प्रवृत्ति क्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥

सुबोधिनी

अट्च लोपश्च अड्लोपौ । तयोर्विशेषा अड्लोपविशेषाः । अच्अट्प्रत्याहारौ गृह्येते । छायावाहीनि खलु प्रकृतसूत्राणि पाणिनीयानाम् । सन्धौ कर्त्तव्ये अचां स्वराणां स्थाने अटां हयवराधिकानां लोपस्य च विशेषाः प्रभेदा बहुलं प्रायो भवन्ति । तत्र विशेषास्तावत् , क्वचिदेत्त्वविकल्पः– वासेसी वासइसी व्यास-ऋषिः । राएसी राअइसी राज-ऋषिः । अत्र इकारे । कण्णेरो कण्णऊरो कर्ण्णपूरः । अत्र ऊकारे । क्वचिदात्त्वविकल्पः– चक्कओ चक्कावाओ चक्रवाकः । अत्र वलोपपक्षे अआ इत्येतयोरात्त्वम् । कुंभारो कुंभआरो कुम्भकारः । क्वचिदकारात्परस्यापि पूर्वेण सह दीर्घत्वं पूर्वलोपश्च वा । ममावि ममवि ममापि । केणावि केणवि केनापि । क्वचिद्दीर्घविकल्पः– वारीमई वारिमई वारिणा निर्वृत्ता वारिमयी । वईमूलं वइमूलं वृत्तिमूलम् । वेणूवणं वेणुवणं वेणुवनम् । क्वचिद् ह्रस्वः– जउणअडं जउणाअडं यमुनातटम् । णइसोत्तो णईसोत्तो नदीस्रोतः । बहुमुहं बहूमुहं वधूमुखम् । क्वचिदोकारस्य वा अत्त्वम्– सररुहं सरोरुहं । मणहरं मनोहरं । सिरविअणा सिरोविअणा शिरोवेदना । क्वचिन्नैव– मणोरहो मनोरथः ।

अथ लोपविशेषाः, क्वचित्पूर्ववदक्षरस्य वा अलोपः– राउलं राअउलं राजकुलम् । पावडणं पाअवडणं पादपतनम् । पापीढं पाअपीढं पादपीठम् । क्वचिद्धल्परयोरप्यतोर्नित्यमादिलोपः । तंपि तुम्पि त्वमपि । क्वचिद्वा एकारलोपः– तुम्हे त्थ तुम्हे एत्थ यूयमत्र । सिअंचलं सिचयाञ्चलं । पेडन्तो पर्यन्तः । हत्थन्तरं हस्तान्तरम् । करग्गं कराग्रम् । रइन्दो राजेन्द्रः । गइन्दो गजेन्द्रः । मइन्दो मृगेन्द्रः । उविन्दो उपेन्द्रः । इंदोवओ इन्द्रगोपकः । दीवुज्जलो दीपोज्ज्वलः । मअरंदुज्जाणं मकरन्दोद्यानं पमदुज्जाणं प्रमदोद्यानम् । महूसवो महोत्सवः । वसंतूसवो वसन्तोत्सवः । क्वचिन्नित्यमिकार-

लोपः— तुमं त्ति तव इति। मह त्ति मम इति। गओ त्ति गत इति। दइओ त्ति दयित इति। लोमावल्लेकणालं रोमावलिरेवैकनालं यस्येति रोमावल्येकनालम्। क्वचिद् यष्टिशब्दस्य वा ललोपः। चम्मट्ठी चम्मलट्ठी चर्मयष्टिः। इह न भवति— असिलट्ठी असियष्टिः। क्वचिन्न सन्धिः— मुहअंदो मुखचन्द्रः। परिअरो परिकरः। उवआरो उपकारः। पईरो प्रदीपः। दुराआरो दुराचारः। विआलो विकाल इति। क्वचिद्विसर्गेण सह पूर्वस्य अत एत्त्वम्। अन्तेउरं अन्तःपुरम्। तेरह त्रयोदश। तेवीसा त्रयोविंशतिः। तेत्तीसा त्रयस्त्रिंशत्। क्वचिदेकस्यापि परस्याड्लोपविशेषः। पुणो अत्र विसर्जनीयेन सहाकारस्यौत्त्वम्। पुणा अत्रात्त्वम्। पुण। अत्र विसर्गलोपः पुनः। एवं बहुलग्रहणात् सन्धौ प्रकारान्तराण्यपि महाकविप्रयोगाऽनुसारेणावसेयानि ॥१॥

(१५४) उदुम्बरे दोर्वा लोपः ॥२॥

सञ्जीवनी

उदुम्बरशब्दे दोर्दुकारस्य साच्कस्य वा लोपो भवति। कगचादिना दमात्रस्य प्राप्तः। इत आरभ्य सूत्रचतुष्टये साचो हलो लोपार्थः। उम्बरं उउम्बरं उदुम्बरमेव ॥२॥

सुबोधिनी

उदुम्बरशब्दे दोर्दकारस्य साच्कस्य वा लोपः स्यात्। उउम्बरं उम्बरं उदुम्बरम् ॥२॥

(१५५) कालायसे यस्य ॥३॥

सञ्जीवनी

वेत्यनुवर्तते अन्त्यस्य हल इति यावत्। कालायसशब्दे साचो यकारस्य लोपः स्याद् वा। पूर्ववत् प्राप्तिः। कालासं कालाअसं। साचो यस्य लोपादन्यत्र यमात्रस्य कगचादिना लोपः। 'लोपः साचो यकारस्य क्वचिन्नित्यं क्वचिन्न वा'। नित्यं तावद् वक्तव्यमित्यात्त्वम्। तेत्तीसा त्रयस्त्रिंशत्। पूर्ववद् बिन्दुलोप इत्त्वं च। अन्त्यस्य हल इति सुलोपः। स्त्रियामादिति तकारस्यात्त्वम्। त्रिष्वपि साचो यकारस्य लोपे सन्धावचामित्यादिना सन्धौ विसर्गेण सह पूर्वाकारस्योत्त्वम्। सहिओ सहृदयः। इद् ऋष्यादिषु वेति ऋकारस्य इत्त्वम्। कगचादिना दलोपः। अत ओत् सोरित्योत्त्वम्। क्वचिदपि लोप इति दलोपावशिष्टस्याकारस्य लोपः। पक्षे सहिअओ। किसलं किसलअं। ओसो ओसाओ अवश्यायः। ओदवापयोरित्योत्त्वम्। अधो मनयामिति यलोपे कृते सेवादिषु वेति शेषस्य द्वित्वाभावः। कइवं कइवअं कतिपयम्। कगचादिना तलोपः। पो व इति वः। सुहाइ सुहाअइ सुखायते। धूमाइ धूमाअइ धूमायते। ततिपोरिदेताविति तस्य इत्त्वम् ॥३॥

सुबोधिनी

अत्र साचो यकारस्य वा लोपः स्यात्। कालसं कालअसं। 'लोपः साचो यकारस्य क्वचिन्नित्यं क्वचिन्न वा'। तेवीसा तेत्तीसा। इह तु वा। सहिओ सहिआओ सहृदयः। किसलं किसलअं किसलयम्। ओसो ओसाओ अवश्यायः। कइयं कइवअं कतिपयम्। सुहाइ सुहाअइ सुखायते। धूमाई धूमाअइ धूमायते ॥३॥

(१५६) भाजने जस्य ॥४॥

सञ्जीवनी

भाजनशब्दे साचो जस्य लोपो भवति वा। भाणं भाअणं भाजनम् ॥४॥

सुबोधिनी

अत्र जस्य साच्कस्य लोपो वा। भाणं भाअणं ॥४॥

(१५७) यावदादिषु वस्य ॥५॥

सञ्जीवनी

यावदादिषु शब्देषु साचो वस्य लोपो भवति। जा जाव यावत्। अन्त्यस्य हल इति तलोपः। ता ताव तावत्। जीअं जीविअं जीवितम्। देउलं देवउलं देवकुलम्। कगचादिना कलोपः। आट्टन्तं आवट्टन्तं आवर्तमानम्। साचो वस्य लोपपक्षे अदातो यथादिषु वेत्यत्त्वम्। र्त्तस्य ट इति टः। शेषादेशादिना तस्य द्वित्वम्। न्तमाण इत्यादिना न्त आदेशः। सन्धावचामित्यादिना अलोपः। पारओ पाआरओ प्रावारकः। सर्वत्रेति रलोपः। कगचेति कलोपः। अत ओत् सोरित्योत्त्वम्। क्वचिदपि लोप इत्यलोपः। एमेअ एअमेअ एवमेव। साचो वस्य लोपादन्यत्र कगचादिना वलोपः। खंधारो खंधआरो स्कन्धावारः। ष्कस्कक्षां ख इति खः।

यावत्तावज्जीवितदेवकुलावर्तमानशब्दा ये।
प्रावारकैवमेवस्कन्धावारा यावदाद्याः स्युः॥

चक्काओ चक्कवाओ चक्रवाकः। चक्रवाक इत्याद्यपि यादवादिषूदाहरन्ति। साचो वस्य लोपपक्षे ककारेऽकारस्य दीर्घत्वमपि चिन्त्यम् ॥५॥

सुबोधिनी

एषु साचो वस्य लोप स्याद् वा।

यावत्तावज्जीवितदेवकुलावर्तशब्दा ये।

प्रावरक एवमेव स्कन्धावारो यावदादयो ह्येवम्॥

जा जाव। ता ताव। जीअ जीविअं। देउलं देवउलं। अट्टं आअट्टं। पारओ पाअरओ। एमेअ एअमेव। खंधारो खंधाअरो। केचित्तु चक्काओ चक्कवाओ चक्रवाक इत्याद्यपि यावदादिषूदाहरन्ति ॥५॥

(१५८) अन्त्यस्य हलः ॥६॥

सञ्जीवनी

अन्ते भव अन्त्यः। प्रातिपदिकानामन्त्यस्य तेभ्यः परस्य सुप्रत्ययसम्बन्धिनो हलो व्यञ्जनस्य वा लोपः स्यात्। कम्मो चम्मो कर्मचर्मणोः। जसो यशः। आदेर्यो ज इति जः। णमो नमः। सर्वत्र अन्त्यस्य हल इति लोपे कृते नसन्तेत्यादिना पुंस्त्वे अत ओत् सोरित्योत्त्वम्। एसो एषः। तदेतदोः स इति तस्य सः। दलोपः। एतदः सोरोत्त्वं वा इत्योत्त्वम्। धणू धनुः। अन्त्यस्य हलो लोपः। नसन्तेत्यादिना पुंस्त्वे सुभिस्सुप्सु दीर्घ इति दीर्घः। रमा रमणी रमारमण्योः। अत्र सुप्रत्ययसम्बन्धिनो हलो लोपः। पाणी धेणू पाणिधेनुशब्दयोः। सुभिस्सुप्सु दीर्घ इति दीर्घः। 'क्वापि लोपानुबन्धस्य बुधा वाञ्छन्त्यदन्ताम्' सक्खिणो साक्षी। अदातो यथादिषु वेत्यत्त्वम्। ष्कस्कक्षां ख इति क्षस्य खः। पूर्वस्य वर्गे युजः पूर्व इति कः। नकारस्य अदन्तत्वेन अत ओत् सोरित्योत्त्वम्। क्वचिदपि लोप इत्यलोपः। पक्षे सक्खी। अत्रान्त्यस्य हल इति लोपे कृते सुभिस्सुप्सु दीर्घ इति दीर्घः। अन्त्यस्य हल इति सलोपः ॥६॥

सुबोधिनी

प्रातिपदिकप्रविष्टस्य शेषव्यञ्जनस्य तदुत्तरवर्तिनः सुप्रत्ययसम्बन्धिनो हलो व्यञ्जनस्य लोपः। जसो यशः। 'क्वापि लोपानुबन्धस्य बुधा वाञ्छन्त्यदन्तताम्' सक्खिणो सक्खी साक्षी ॥६॥

(१५९) स्त्रियामात् ॥७॥

सञ्जीवनी

अन्त्यस्य हल इत्यनुवर्तते दिक्प्रावृषोरिति यावत्। स्त्रियां वर्तमानस्य प्रातिपदिकस्य योऽन्त्यो हल् तस्याकारः स्यात्। पूर्वेण लोपः प्राप्तः। एसा सम्पआ एषा सम्पत्। एआवआ एतावती। इअं सरिआ इयं सरित्। इअं वाआ इयं वाक् ॥७॥

सुबोधिनी

प्रातिपदिकस्यान्त्यस्य हल आत्त्वं स्यात्। **एसा सरिआ एषा सरित् ॥७॥**

(१६०) न विद्युति ॥८॥

सञ्जीवनी

विद्युच्छब्दे अन्त्यस्य हल आकारादेशो न भवति। पूर्वेण प्राप्तः। विज्जू। त्यथ्यद्यां चछजा इति जः। जस्य शेषादेशादिना द्वित्वम्। अन्त्यस्य हलो लोपः। सुभिस्सुप्सु दीर्घ इति दीर्घः। यावत् सम्भवस्तावद्विधिरिति वचनाद् अन्त्यस्य हल इति सुलोपः ॥८॥

सुबोधिनी

विद्युच्छब्दे तन्न स्यात्। विज्जू ॥८॥

(१६१) रो रा ॥९॥

सञ्जीवनी

स्त्रियामित्यनुवर्तते। र इति षष्ठ्यन्तम्। स्त्रियां वर्तमानस्य प्रातिपदिकस्य योऽन्त्यो रः, तस्य रादेशो भवति। आत्त्वमेव प्राप्तमुत्तरत्रापि। गिरा गीः। पुरा पूः। धुरा धूः। अन्त्यस्य हल इति सुलोपः। 'बहिःशब्दे हलोऽन्त्यस्य रेफादेशो विभाषया'। बाहिरं बहिः। आ समृद्ध्यादिषु वेति आदेरात्त्वम्। नपुंसके सोर्बिन्दुरिति बिन्दुः ॥९॥

सुबोधिनी

स्त्रियां वर्त्तमानस्यान्त्यरेफस्य रात्वं स्यात्। गिरा गीः। 'बहिःशब्दे हलोऽन्त्यस्य रेफादेशो विभाषया'। बाहिरं बहिः ॥९॥

(१६२) क्षुधो हः ॥१०॥

सञ्जीवनी

क्षुधाशब्दस्य ह इत्यादेशः स्यात्। वर्णान्तरस्य विधिरिति वचनाद् अन्त्यस्य भवति। छुहा क्षुधा ॥१०॥

सुबोधिनी

अन्त्यस्य हः स्यात्। छुहा ॥१०॥

(१६३) शरदोऽत् ॥११॥

सञ्जीवनी

शरच्छब्दे अन्त्यस्य हलोऽकारादेशः स्यात्। लोपः प्राप्तः। सरओ शरत्। नसन्तप्रावृट्शरदः पुंसीति पुंस्त्वे अत ओत् सोरित्योत्त्वम्। क्वचिदपि लोप इत्यलोपः। नन्वकारादेशमपि बाधित्वा यदि लोपः कर्तव्यः, तर्हि प्रथमं हलो लोपेन किमपराद्धम्? न वा अत ओत् सोरिति वा। प्रवृत्त्यर्थोऽयमादेशः, यतो लोपे कृते रेफेऽकारोऽस्त्येव। अस्त्येतत्, किन्तु क्वचिदपि लोप इत्यकारलोपः क्रियमाणाकारादेशमन्तरेण रेफाकारस्यैव स्यात्। ततश्च सरो इत्यनिष्टं सिद्ध्येत् ॥११॥

सुबोधिनी

अस्यान्त्यस्य अः स्यात्। सरओ। ननु सूत्रान्तरादेवेदं रूपं सिद्ध्यतीदं सूत्रमनर्थकम्? न क्वचिदपि लोप इत्यलोपे क्रियमाणे सरो इत्यापत्तेः ॥११॥

(१६४) दिक्प्रावृषोः सः ॥१२॥

सञ्जीवनी

एतयोः शब्दयोरन्त्यहलः सादेशः स्यात्। दिक्शब्दस्य स्त्रियामादित्यात्त्वं प्राप्तम्। प्रावृट्शब्दे अन्त्यस्य हल इति लोपः प्राप्तः। दिसा दिक्। आदीतौ बहुलमिति आप्रत्ययः। सन्धावचामित्यादिना अआ इत्येतयोरात्त्वम्। पाउसो प्रावृट्। कगचादिना वलोपः। उद् ऋष्यादिषु इति ऋकारस्योत्त्वम्। नसन्तप्रावृट्शरदः पुंसीति पुंस्त्वे अत ओत् सोरित्योत्त्वम्। क्वचिदपि लोप इत्यलोपः। 'आयुरप्सरसोः सो वा हलोऽन्त्यस्य विधीयते'। दिहाउसो दिहाऊ दीर्घायुः। सर्वत्र लवरामिति रलोपः। खघथादिना घस्य हः। कगचादिना यलोपः। सकारादेशादन्यत्र अन्त्यस्य हल इति सुलोपः। सुभिस्सुप्सु दीर्घ इति दीर्घः। पुनरपि यावत् ससमस्तविधिरिति वचनाद् अन्त्यस्य हल इति सलोपः। अच्छरसा अप्सराः। श्चत्सप्सां छ इति छः। छस्य द्वित्वे वर्गे युजः पूर्व इति चः। सादेशे कृते आदीतौ बहुलमिति आप्रत्ययः। सन्धावचामित्यादिना अआ इत्येतयोरात्त्वम्। पक्षे अच्छरा। अन्त्यस्य हल इति सुलोपः। स्त्रियामादित्यात्त्वम्। पूर्ववदन्यत् ॥१२॥

सुबोधिनी

अनयोरन्त्यस्य सः स्यात्। दिसा। पाउसो। 'आयुरप्सरसोः सो वा हलोऽन्त्यस्य विधीयते'। दिहाउसो दिहाऊ दीर्घायुः। अच्छरसा अच्छरा अप्सराः ॥१२॥

(१६५) मो बिन्दुरचि वाऽलोपश्च ॥१३॥

सञ्जीवनी

अत्रैव सूत्रे त्रीणि सूत्राणि।

मो बिन्दुरित्येकम्। म इत्यक्षरं षष्ठ्यन्तम्। अन्त्यस्य हलो मस्य बिन्दुरादेशः। किं एदं किमेतदोः। कहं कथम्। खघथादिना थस्य हः। तुण्हिं तूष्णीम्। उदूतो मधूकादिषु इत्युत्त्वम्। इदीतः पानीयादिषु इति इत्त्वम्। ह्नष्णस्नश्नां ण्ह इति ण्हः।

अचि वेति द्वितीयं सूत्रम्। मो बिन्दुरित्यनुवर्तते। अचि परे अन्त्यस्य मो बिन्दुर्वा स्यात्। पडमवहरइ पडं अवरइ पटमपहरति। पटशब्दे द्वितीयैकवचने अमि अतोऽमः इत्यकारलोपः। टो ड इति टस्य डः। रसमुवणेइ रसं उवणेइ रसमुपनयति। किमिणमो किं इणमो किमिदम्। इदंशब्दस्य स्वमोरिदमिणमो इति इणमो आदेशः।

अलोपश्चेति तृतीयं सूत्रम्। म इत्यनुवर्तते। नलोपोऽलोपः। तस्य च मस्य लोपो न भवति। अचि वेत्यनेन यत्र पक्षे बिन्दुरादेशस्तस्मादन्यत्र अन्त्यस्य हल इति मस्य लोपः प्राप्तः। स न भवतीत्यर्थः। तत्र सन्धावचामित्यादिना सस्वरत्वमेव जायते। उक्तान्युदाहरणानि। 'अनुस्वारस्य मादेशो वा स्यादचि परे स्थिते' फलमेरिसं फलं एरिसं फलमीदृशम्। फलशब्दे सुप्रत्ययस्य नपुंसके सोर्बिन्दुरिति बिन्दुः। ईदृशशब्दे एन्नीडादिना ईकारस्य एत्त्वम्। युक्तस्यापि रिः इति दृकारस्य रिः। अहमेसो अहं एसो अहमेषः। अस्मदः सुप्रत्यये अहमिति पदस्य अस्मदो अहं माविति अहं आदेशः। एतत्-शब्दे तदेतदोः स इति सः। अन्त्यस्य हल इति दलोपः। एतदः सोरोत्त्वं वा इति ओत्त्वम्। सच्चमिणं सच्च इणं सत्यमिदम्। सत्यशब्दे त्यथ्यद्यां चछजा इति चः। चस्य शेषादेशादिना द्वित्वम्। नपुंसके सोर्बिन्दुरिति बिन्दुः। इदंशब्दे स्वमोरिममिणमो इति इणं आदेशः ॥१३॥

सुबोधिनी

एकत्र त्रीणि सूत्राणि। अन्त्यस्य मस्य बिन्दुः स्यात्। किं। किमो रूपमिदम्।

अचि परे अन्त्यस्य मो बिन्दुर्वा स्यात्। पडमहरइ पडं अवहरइ पटमपहरति।

अन्त्यस्य मकारस्य लोपश्च न स्यात्। उक्तमुदाहरणम्।

'अनुस्वारस्य मादेशो वा स्यादचि परे स्थिते' सच्चमिणं सच्चं इणं सत्यमिदम्। अन्त्यस्येति निवृत्तम् ॥१३॥

(१६६) नङोर्हलि ॥१४॥

सञ्जीवनी

बिन्दुरित्यनुवर्तते यथि तद्वर्गान्तं यावत् । हलि व्यञ्जने परे नकारङकारयोर्बिन्दुरादिश्यते । संझा बंझा सन्ध्यावन्ध्ययोः । ध्यह्ययोर्झ इति झः । पंती पङ्क्तिः । उपरिलोप इत्यनेन कलोपः । सुभिस्सुप्सु दीर्घ इति दीर्घः । अन्त्यस्य हल इति सुलोपः ॥१४॥

सुबोधिनी

नकारङकारयोर्हलि परे बिन्दुः स्यात् । संझा सन्ध्या । पंती पङ्क्तिः ॥१४॥

(१६७) वक्रादिषु ॥१५॥

सञ्जीवनी

वक्रादिशब्देषु बिन्दुरागमः स्यात् । बंको वक्रः । तंसं त्र्यस्रम् । अधो मनयामिति यलोपः । सर्वत्र लवरामिति रलोपः । वअंसा वयस्या । आदीतौ बहुलमिति आप्रत्ययः । सन्धावचामित्यकारलोपः । अंसुं अस्रु । नपुंसके सोर्बिन्दुरिति बिन्दुः । सोरभं सौरभम् । 'प्रायः शब्दानुवृत्त्यापि हत्वाभावः क्वचिद् भवेत्' । औत ओदित्योत्त्वम् । माणंसिणी मनस्विनी । आ समृद्ध्यादिषु वेति आदेरत आत्त्वम् । फंसो स्पर्शः । स्पस्य फ इति फः । णिअंसणं निवसनम् । सुंकं शुल्कम् । सर्वत्र लवरामिति ललोपः ।

वक्रत्र्यस्रवयस्याश्रुसौरभाणि मनस्विनी ।
स्पर्शो निवसनं शुल्कं वक्रादयः स्युरीदृशाः ॥१५॥

सुबोधिनी

वक्रादिशब्दे हलि परे बिन्दुरागमः स्याद् यथादर्शनम् ।

वक्रत्र्यस्रवयस्याश्रुसौरभाणि मनस्विनी ।
स्पर्शो निवसनं शुल्कं स्युर्वक्रादय ईदृशाः ॥

वंको, तंसं, वअंसो, अंसू, सोरभं, मणिंसिणी, फंसो, **णिअंसणं**, सुंकं ॥ १५॥

(१६८) मांसादिषु ॥१६॥

सञ्जीवनी

उदुम्बरे दोर्वा लोप इत्यतो लोप इत्यनुवर्तते । बिन्दुरित्यनुवर्तमानमर्थवशाद् **विभक्तिविपरिणाम** इति षष्ठ्यन्तो जायते । **मांसशब्देन सदृशा मांसादयः**, तेन **मांसशब्दे बिन्दुलोपः** ।

मासं मंसं। अन्यत्र अदातो यथादिषु वेत्यत्त्वम्। नपुंसके सोर्बिन्दुरिति बिन्दुः। कह कहं कथम्। अन्त्यस्य हल इति मलोपः। मो बिन्दुरिति बिन्दुः। तस्यानेन वा लोपः।

मांसादिषु कथं नूनमिदानीं सम्मुखं तथा।
संस्कारे संस्कृतायां तु नित्यं बिन्दुर्विलुप्यते॥

सक्कारो संस्कारः। सक्कओ संस्कृतम्। उपरि लोप इत्यादिना लोपः। शेषादेशादिना द्वित्वम्॥१६॥

सुबोधिनी

मण्डूकप्लुतिन्यायेन लोप इत्यनुवर्त्तते। बिन्दुरित्यनुवर्त्तमानमर्थवशाद्विपरिणत-विभक्तिः। मांसादिशब्दे बिन्दुलोपो वा स्यात्। 'मांसादिकं कथं नूनमिदानीं संमुखं तथा'। मासं मंसं। काह कहं। णूण णूणं। दाणि दाणीं। समुहो संमुहो। 'संस्कारसंस्कृतादौ तु नित्यं बिन्दुर्विलुप्यते'। सक्कारो सक्कअं॥१६॥

(१६९) कपि तद्वर्ग्यान्तः॥१७॥

सञ्जीवनी

वेत्यनुवर्त्तते। बिन्दुरित्येव। कपिति प्रत्याहारः कवर्गादारभ्य पवर्गं **व्याप्य**। तस्य वर्ग्यस्तद्वर्ग्यः। अन्ते भवः अन्त्यः। तद्वर्ग्यस्यान्त्यः तद्वर्ग्यान्त्यः। **तदिति** परामृश्यते। कपि परे बिन्दोस्तद्वर्गान्त्य आदेशः स्याद् वा। यस्य वर्गस्य यः सम्बन्धी, अन्तगतो वर्णः, स बिन्दोर्वा भवतीत्यर्थः। ङस्तावत्– सङ्करो संकरो, सङ्गमो संगमो संकरसंगमयोः। ञकारे– धणञ्जओ धणंजओ धनञ्जयः। णकारे– सण्ठिओ संठिओ संस्थितः। नकारे– चिरन्तणं चिरंतणं। मकारे– किम्पि किंपि। अत्र 'नपुंसके स्वमोः कत्वं न किमः स्यात्तु लुप्तयोः' इति सुलोपे किमश्च किमः क इति कस्याभावः। किम् अपि इत्येतयोः सन्धावचामित्यादिना अलोपः। मो बिन्दुरिति **बिन्दुः**। तत्स्थाने तद्वर्ग्यान्त्यो मकारः। कपीति किम्? अहं राआ। अहमिति **अस्मदः** सुप्रत्यये पदस्यास्मदोऽहमित्यादिना अहं आदेशः। राआ इति राजन्शब्दे **कगचादिना** जलोपः, अन्त्यस्य हल इति नसकारयोर्लोपः। राज इति जलोपावशिष्टस्य अकारस्यात्त्वम्॥१७॥

सुबोधिनी

कप् इति प्रत्याहारः। तेन कवर्गादारभ्य पवर्गं व्याप्य गृह्यते। कादिपञ्चवर्गीयाक्षरे परे यो वर्णः परस्तद्वर्गीयः पञ्चमवर्णो बिन्दोर्वा भवति। सङ्करो संकरो शङ्करः। धणञ्जओ

धणंजओ धनञ्जयः। सण्ठिओ संठिओ संस्थितः। चिरन्तणं चिरंतणं चिरन्तनम्। **किम्पि** किंपि किमपि। एवं वर्णान्तरे स्वयमूह्यम्। कपीति किम्? अहं राआ ॥१७॥

(१७०) नसन्तप्रावृट्शरदः पुंसि ॥१८॥

सञ्जीवनी

नकारेऽकार उच्चारणार्थः। नसौ अन्ते ययोस्तौ नसन्तौ ततो द्वन्द्वः। नकारान्तः सकारान्तः शब्दः प्रावृष् शरद् इत्येतौ च पुँल्लिङ्गे भवन्ति। लिङ्गान्तरस्य बाधः। चम्मो वम्मो चर्म्मवर्मणी। सर्वत्र लवरामिति रलोपः। शेषादेशादिना मस्य द्वित्वम्। अन्त्यस्य हल इति नलोपः। सर्वत्र नपुंसके सोर्बिन्दुरिति बिन्दुः प्राप्तः। तं बाधित्वा पुंस्त्वे अत ओत् सोरित्योत्त्वम्। 'नान्तं नपुंसके विद्धि पुँल्लिङ्गेऽपि प्रशस्यते'। चर्म्म वम्मं चर्म वर्म। पेम्मं प्रेम। नीडादिषु मस्य द्वित्वम्। तमो तमः, महो महः। पाउसो प्रावृट्। उद् ऋत्वादिषु इति ऋकारस्योत्त्वम्। दिक्प्रावृषोः स इति अन्त्यस्य हलः सस्वरत्वम्। अत्र स्त्रीत्वाद् आदीतौ बहुलमिति आप्रत्ययः प्राप्तः, तं बाधित्वा पुंस्त्वाद् अत ओत् सोरित्योत्त्वम्। सरओ शरत्। शरदोऽदिति दकारस्यात्त्वम्। पूर्ववदन्यत् ॥१८॥

सुबोधिनी

नकारेऽकार उच्चारणार्थः। नकारान्तः सकारान्तः प्रावृट्शब्दः शरच्छब्दः पुंसि पुँल्लिङ्गे भवति। वम्मो वर्म। 'नान्तं नपुंसके विद्धि पुँल्लिङ्गेऽपि प्रशस्यते'। चम्मो चर्म। तमो तमः। पाउसो सरसो॥१८॥

(१७१) न शिरोनभसी ॥१९॥

सञ्जीवनी

पुंसीत्यनुवर्त्तते। शिरस् नभस् इत्येतौ पुंसि न भवतः। सान्तत्वात् पूर्वेण प्राप्तौ। सिरं। अन्त्यस्य हल इति सलोपः। नपुंसके सोर्बिन्दुरिति बिन्दुः। णहं। खघथादिना भस्य हः। पूर्ववदन्यत् ॥१९॥

सुबोधिनी

एतौ पुंसि न स्तः। सिरं णहं ॥१९॥

(१७२) पृष्ठाक्षिप्रश्नाः स्त्रियां वा ॥२०॥

सञ्जीवनी

एते शब्दाः स्त्रीलिङ्गे वा भवन्ति। पृष्ठ अक्षि इत्येतयोः प्रसिद्धं नपुंसकं विकल्प्यते। प्रश्नशब्दस्य तु पुंस्त्वम्। पट्ठी। ऋतोऽदित्यत्त्वम्। उपरि लोप इत्यादिना षलोपः। वर्गे युजः पूर्व इति ठस्य द्वित्वे टः। अत्र स्त्रीत्वाद् आदीतौ बहुलमिति ईप्रत्ययः। सन्धावचामित्यादिना अकारलोपः। अच्छी। अक्ष्यादिषु छ इति छः। अत्र स्त्रीत्वात् सुभिस्सुप्सु दीर्घ इति दीर्घः। अच्छिं। नपुंसके सोर्बिन्दुरिति बिन्दुः। पण्हा प्रश्नः। ह्रस्नश्नादिना श्नस्य ण्हः। अत्र स्त्रीत्वाद् आदीतौ बहुलमिति आप्रत्ययः। सन्धावचामित्यादिना अआ इत्येतयोरात्त्वम्। अन्त्यस्य हल इति सुलोपः। पक्षे पण्हो। पुंस्त्वाद् अत ओत् सोरित्योत्त्वम्। 'एवं लिङ्गविपर्यासो ज्ञेयः शब्दान्तरेष्वपि'। गुणाइं बिन्दूइं गुणाः बिन्दवः। पुंस्त्वेऽपि यदा नपुंसकत्वं तदा इ जश्शसोर्दीर्घश्चेति जस इ आदेशः। पूर्वस्य च दीर्घः। पक्षे गुणो बिन्दू। जश्शसोर्लोप इति जसो लोपः। रस्सीओ रश्मयः। अधो मनयामिति मलोपः। शषोः स इति शस्य सः। तस्य शेषादेशादिना द्वित्वम्। पुंस्त्वेऽपि यदा स्त्रीलिङ्गता तदा जसो वेति जस ओत्त्वम्। जश्शसुङस्यांसु दीर्घ इति दीर्घः ॥२०॥

सुबोधिनी

एते स्त्रियां वा स्युः। पट्ठी पट्ठं। अच्छी अच्छिं। पण्हा पण्हो। 'एवं लिङ्गविपर्यासो ज्ञेयः शब्दान्तरेष्वपि'। गुणाइं गुणाः। बिन्दूइं बिन्दवः। लोअणा लोचनो। रस्सीओ रश्मयः ॥२०॥

(१७३) ओदवापयोः ॥२१॥

सञ्जीवनी

वेत्यनुवर्त्तते। अव अप इत्येतयोः ओकारादेशो भवति वा। ओवासो अवकाशः। काशेर्वास इति वासादेशः। पक्षे अवआसो। ओवाहिअं अवगाढम्। 'गाहू' विलोडने इत्यस्यावपूर्वस्य निष्ठायां तः। अव गाहे इति वाहादेशः। क्ते परे वाह इत्यकारस्य इत्त्वम्। कगचादिना तलोपः। पक्षे अववाहिअम्। ओसिअं अवसिअं अपसृतम्। ओत्त्वादन्यत्र पो व इति वः। ओअत्तं अवअत्तं अपवृत्तम्। ऋतोऽदित्यत्त्वम्। कगचादिना वलोपः। 'ओत्त्वं वा स्यान्निरो माल्ये क्वचिदोत्त्वमुपस्य वा। ओमल्लं निर्माल्यम्। अधो मनयामिति यलोपः। पक्षे णिम्मल्लं। अदातो यथादिषु वेत्यत्त्वम्।

रलोपे कृते शेषादेशादिना मस्य द्वित्वम् । ओहसिअं उपहसितम् । पक्षे उवहसिअम् । **पो व** इति वः । 'लुग्वा दुरुपसर्गस्य विसर्गस्य क्वचिद् भवेत्' । दुल्लहो दुर्लभः । **खघथादिना** भस्य हः । विसर्गलोपादन्यत्र सर्वत्र लवरामिति रलोपः । शेषादेशादिना **लस्य** द्वित्वम् । दुसहो दूसहो दुःसहः । अत्र तु विसर्गलोपादन्यत्र 'ऊदुतः सविसर्गस्य **दुःसहादौ** विकल्प्यते' इत्यूत्त्वम् ॥२१॥

सुबोधिनी

अव अप इत्यनयोरुपसर्गयोरोकारादेशः स्याद् वा । ओआसो अवआसो **अवकाशः** । ओसरिअं अवसरिअं । ओत्त्वं वा स्याद् निरो माल्ये क्वचिदोत्त्वमुपस्य **वा'** । ओमल्लं णिम्मल्लं । ओहसिअं उवहसिअं उपहसितम् ॥२१॥

(१७४) तलृत्वयोर्दात्तणौ ॥२२॥

सञ्जीवनी

तलृत्वयोः प्रत्यययोर्यथासङ्ख्यं दात्तणौ भवतः । रम्मदा रम्यता । रम्मत्तणं तुह **मुहस्स** हरेइ चित्तं । रम्यत्वम् । अधो मनयामिति यलोपः । शेषादेशादिना मस्य द्वित्वम् । **तणुदा** तणुत्तणं तनुता तनुत्वम् । 'वकारस्य च लोपोऽपि यथाप्राप्तः प्रवर्त्तते' । रम्मत्तं **तणुत्तं** रम्यत्वं तनुत्वम् । यथाप्राप्तं सर्वत्र लवरामित्यनेन वलोपः । शेषादेशादिना तस्य **द्वित्वम्** ॥२२॥

सुबोधिनी

अनयोर्यथासंख्यमेतौ स्तः । रम्मदा रम्यता । रमत्तणं रम्यत्वम् ॥२२॥

(१७५) क्त्व तूण ॥२३॥

सञ्जीवनी

क्त्वेति लुप्तषष्ठ्यन्तम् । तूण इति लुप्तप्रथमान्तम् । क्त्वाप्रत्ययस्य तूण आदेशः **स्यात्** । हंतूण हत्वा । हन्तेर्नस्य नञोर्हलीति बिन्दुः । आणिऊण आनयनं पूर्वं कृत्वा **आनीय** । णीञ् प्रापणे इत्याङ्पूर्वस्य अइ आदेशा बहुलमित्यनेन ईकारस्य इत्त्वम् । **तूणादेशस्य** कगचादिना तलोपः । काउण कृत्वा । पूर्ववत् तलोपः । कृञः का **भूतभविष्यतोश्चेति** कादेशः । घेत्तूण गृहीत्वा । 'ग्रह उपादाने' इत्यस्य घेत् क्त्वातुमुन्-**तव्येष्विति घेत्** आदेशः । पूर्ववत्तलोपे कृते सन्धावचामित्यादिना ऊकारसन्धिः । 'क्वापि

क्त्वाप्रत्ययादेशे उआण इत्यपीष्यते'। घेतुआण सोउआण गृहीत्वा श्रुत्वा। श्रु श्रवणे इत्यस्य ओ आदेशा बहुलमिति उकारस्यौत्त्वम्। सर्वत्र लवरामिति रलोपः। 'उं वाशब्दस्य वादेशः क्त्वास्थितस्य क्वचिद् भवेत्'। दट्ठुं दृष्ट्वा। ऋतोऽदित्यत्त्वम्। ष्टस्य ठ इति ठः। तस्य वर्गे युजः पूर्व इति टः। मोत्तुं मुक्त्वा। उपरि लोप इत्यादिना कलोपः। शेषादेशादिना तस्य द्वित्वम्। होउं भूत्वा। भू सत्तायामित्यस्य भुवो होहुवाविति हो आदेशः। वा इत्यस्य तुं आदेशे कृते कगचादिना तलोपः। 'असमासे अआदेशः क्त्वेत्यस्य प्रवर्त्तते'। जाणिआ ज्ञात्वा। ज्ञा अवबोधने इत्यस्य ज्ञो जाणमुणौ इति जाण आदेशः। ए च क्त्वादिना अकारस्य इत्वम्। पडिआ पतित्वा। पत्लृ पतने इत्यस्य सदिपत्योर्ड इति तस्य डः। पूर्ववदित्त्वम्। ओसरिआ अपसृत्य। ओदवापयोरित्योत्त्वम्। सृ गताविति सृधातोः ए च क्त्वादिना अकारस्य इत्त्वम्। पूर्ववदन्यत्। प्रायःशब्दः कगचादीनां लोपातिव्याप्तिबाधक इत्येतेषु उदाहरणेषु कगचादिना लोपो यादृच्छिकः॥२३॥

सुबोधिनी

एते लुप्तषष्ठीप्रथमान्ते पदे। क्त्वाप्रत्ययस्य तूण इत्यादिश्यते। घेत्तूण गृहीत्त्वा। 'क्वापि क्त्वाप्रत्ययादेश उआण इति दृश्यते'। घेत्तुआण गृहीत्वा। सोउण श्रुत्वा। 'उं वाशब्दस्य वादेशः क्त्वास्थितस्य क्वचिद् भवेत्'। दृट्ठुं दृष्ट्वा। मोत्तुं मुक्त्वा। होउं भूत्वा। 'असमासे इआऽऽदेशः क्त्वा इत्यस्य प्रवर्त्तते'। जाणिअ ज्ञात्वा। पडिअ पतित्वा। परिहरिअ परिहृत्य। ओसरिअ अपसृत्य॥२३॥

(१७६) तृन इर शीले॥२४॥

सञ्जीवनी

शील इत्युपलक्षणम्। तच्छीलतद्धर्मतत्साधुकारिष्वर्थेषु उत्पन्नस्य तृन्प्रत्ययस्य इर आदेशः स्यात्। घोलिरं घूर्णितुं शीलमस्य इत्याद्यर्थे उत्पन्नस्य तृन इर आदेशः। आत् घूर्णो घोलघुम्मौ इति घोलादेशः। एवं जंपिरं जल्पितुं शीलमस्य जल्पितृ। जल्पे लो म इति मः। विविरं वेपितुं शील्मस्येति वेपितृ। टुवेपृ कंपने। पो वः। ननु शीलाद्यर्थमन्तरेण तृण उत्पत्तिर्नास्ति, तत् किं शील इत्यनेन ? स्वरूपस्यैव द्योतनार्थम्॥२४॥

सुबोधिनी

ताच्छील्ये उत्पन्नस्य तनूप्रत्ययस्य इरादेशः स्यात्। शीलमित्युपलक्षणम्। तेन तद्धर्मतत्साधुत्वकारित्वयोर्ग्रहणम्। नन्वेवं शीलम् इत्यव्यावर्तकं शीलाद्यर्थमन्तरेण तृन्प्रत्ययाऽनुत्पत्तेरिति किं शील इत्यनेन ? स्वरूपस्यैव द्योतनार्थम्। घोलिरं घूर्णितुं शीलमस्येति घूर्णितृ॥२४॥

(१७७) आल्विल्लोल्लालवन्तेन्ता मतुपः ॥ २५ ॥

सञ्जीवनी

मतुप इति मतुबादयो गृह्यन्ते। ते तदस्यास्त्यस्मिन्नर्थे विहितानां स्थाने यथादर्शनं आलु इल्ल उल्ल आलवन्त इन्त इत्येते आदेशा भवन्ति। आलुस्तावत्– ईशालू ईर्ष्यावान्। सर्वत्र लवरामिति अधोमनयामिति यरयोर्लोपः। शषोः स इति षस्य सः। तस्य द्वित्वं न भवति। 'बिन्द्वादीदूत्परस्येह द्वित्वं शेषस्य नेष्यते' इति द्वित्वनिषेधात्। सन्धावचामित्यादिना अकारलोपः। सुभिस्सुप्सु दीर्घः। णेहालू स्नेहवान्। स्नेहे वेति विकर्षादन्यत्र ह्रस्नेत्यादिना स्नस्य ण्हादेशः। प्रतिलक्ष्यानुरोधात्। उपरि लोप इत्यादिना सलोपः। इल्लः– गहिल्लो ग्रहवान्। सणेहिल्लो स्नेहवान्। स्नेहे वेति सनयोर्विकर्षः। पूर्वस्य च अत्त्वम्। सन्धावचामित्यादिना अकारलोपः। उल्लः– विआरुल्लं विकारवत्। विहारुल्लं विहारवत्। आलः– वणालं वनवत्। चोरालं चौरवत्। औत ओदित्योत्त्वम्। सन्धावात्त्वम्। वन्तः– जसवन्तो यशस्वी। आदेर्यो ज इति जः। अन्त्यस्य हल इति सलोपः। धणवन्तो धनवान्, धनी वा। इन्तः– घरइन्तो गृहवान्, गृही वा। गृहस्य घरोऽपताविति घर आदेशः। पुत्तइन्ता पुत्रवती। इन्त आदेशे कृते आदीतौ बहुलमिति आप्रत्ययः। 'अर्थे तस्येदमित्यस्मिन्नुल्ल इल्लस्तु तद्भवे'। अप्पुल्लं आत्मीयम्। अदातो यथादिषु वेत्यत्त्वम्। आत्मनि प इति त्मस्य पः। तस्य शेषादेशयोर्द्वित्वमिति द्वित्वम्। गामेल्लिआ ग्रामे भवा ग्रामीणाः। तत्र भव इत्यर्थे प्रत्ययस्य इल्लादेशः। सन्धावचामित्यादिना अ इ इत्येतयोरेत्त्वम्। पुरिल्लं पुरोभवं पौरस्त्यम्। तत्र भव इत्यर्थे प्रत्ययः। अन्त्यस्य हल इति सलोपः। सन्धावकारलोपः। 'भवेतां मतुपोऽन्त्यस्य आकारस्तु तथा क्वचित्'। हणुमा हणुमन्तो हनुमान्। 'संख्यायाः कृत्वसो हुत्तं आभिमुख्येऽपि दृश्यते'। पचहुत्तं पञ्चकृत्वः, छहुत्तं षट्कृत्वः। षट्शावकसप्तपर्णेषु छ इत्यनेन छः, सअहुत्तं शतकृत्वः। पिअहुत्तं प्रियाभिमुखम्। 'इष्टौ किं यत्तदेतेभ्यः परिमाणे त्तिअड्डहौ'। केत्तिअं केद्दहम्। किं परिमाणमस्य कियत्। किंशब्दे किमः क इति क आदेशः। जेत्तिअं तेद्दहं यावत्। आदेर्यो ज इति जः। तेत्तिअं तेद्दहं तावत्। ए च शय्यादिषु इति आदेरत एत्त्वम्। एत्तिअं एद्दहं एतावत्। एतच्छब्दे त्तत्थयोस्तलोप इति तलोपः। त्रिष्वपि अन्त्यस्य हल इति दलोपः ॥२५॥

सुबोधिनी

तदस्यास्त्यस्मिन्नित्यर्थे विहितप्रत्ययानां सर्वेषां ग्रहणम्। मतुप्पदेन मतुबादीनां यथादर्शनम् अल्वादय आदेशाः स्युः। ईसालू ईर्ष्यावान्। णेहालू स्नेहवान्। गहेल्लो

गृहवान् । सिणेहिल्लो स्नेहवान् । विआरुल्लं विकारवत् । विहारुल्लं विहारवत् । चोरालं चौरवत् । वणालं वनवत् । जसवन्तो यशस्वी । धणवन्तो धनवान्, धनी वा । घरइन्तो गृहवान्, गृही वा । पुत्तइन्ता पुत्रवती । 'अर्थे तस्येदमित्यस्मिन्नुल्ल इल्लस्तु तद्भवे' । अप्पुल्लो आत्मीयः । गामेल्लिआ ग्रामीणा । पुरिल्लं पौरस्त्यम् । 'भवेतां मतुपोऽन्त्यस्य न्तआकारस्तथा क्वचित्' । छहुत्तं षट्कृत्त्वः । सअहुत्तं शतकृत्वः । पिअहुत्तं प्रियाभिमुखम् । घरहुत्तं गृहाभिमुखम् । 'इष्टौ किं यत्तदेतेभ्यः परिमाणे त्तिअड्डहौ' । केत्तिअं केड्डहं कियत् । जेत्तिअं जेड्डहं यावत् । तेत्तिअं तेड्डहं तावत् । एत्तिअं एड्डहं एतावत् ॥२५॥

(१७८) स्वार्थे को वा ॥२६॥

सञ्जीवनी

अस्मिन्नर्थे प्रातिपदिकात् कप्रत्ययो भवति वा । भमरओ भ्रमर एव भ्रमरकः । पक्षे भमरो । कसणओ कृष्ण एव कृष्णकः । पक्षे कसणो । ऋतोऽदित्यत्त्वम् । कृष्णे वेति षणयोर्विकर्षः । पूर्वस्य चकारः । एवं चन्दओ चन्द्रकः । पक्षे चन्दो । द्रे रो वेति रेफलोपः । गअणांअणअं गगनाङ्गणकम् । सर्वत्र प्रत्ययस्य कगचादिना कलोपः । इत्यादयः प्रयोगाः स्कन्धकादिषु बाहुल्येन द्रष्टव्याः ।

कुसुमाउहपियदूअओ मउलाविअघणचूअओ ।
सिढिलिअमाणग्गहणओ वाहअइ ढाहिणपवणओ ॥

'वेष्यते स्वार्थ इल्लोल्लौ आभ्यां कः स्वार्थ एव वा' । सच्चं सच्चिल्लं सच्चिल्लअं सत्यम् । त्यथ्यद्यां चछजा इति त्यस्य चः । तस्य शेषादेशादिना द्वित्वम् । कगचादिना लोपः । नपुंसके सोर्बिन्दुरिति बिन्दुः । करहो करहुल्लो करहुल्लओ करभकः । खघथादिना भस्य हः । पूर्ववत् कलोपः । अत ओत् सोरित्योत्त्वम् । क्वचिदपि लोप इत्यलोपः । एवं भमरो भमरुल्लो भमरुल्लओ भ्रमरकः । सर्वत्र इल्ल-उल्लप्रत्यययोः कृतयोः सन्धावकारलोपः । 'स्वार्थे कः स्याद् डकारोऽपि को वा तस्मादपि स्मृतः' । पुत्तो पुत्तडो पुत्तडओ पुत्रकः । वच्छो वच्छडो वच्छडओ वत्सकः । श्चत्सप्सां छ इति त्सस्य छः । तस्य द्वित्वे वर्गे युजः पूर्व इति चः । हत्था हत्थडा हत्थडआ हस्तौ । हस्तशब्दाद् द्विवचनस्य बहुवचनं नित्यमिति जस्प्रत्ययः । तस्य जश्शसोर्लोप इति लोपः । जस्शस्ङस्यांसु दीर्घ इति दीर्घः । स्तस्य थ इति थः । तस्य द्वित्वे वर्गे युजः पूर्व इति तः । 'द्वित्वापन्नो लकारोऽपि क्वचित् स्वार्थ इतीष्यते' । एक्वल्लो एकाकी,

एकको एको वा। नीड़ादिष्विति कस्य द्वित्वम्। णवल्लो नवकः। स्वार्थ इत्यस्य उपलक्षणपरार्थत्वेनाभिमतत्वादज्ञातादिष्वर्थेषु प्रयोगोऽयं द्रष्टव्यः। तथा चोक्तम्—

अज्ञाते कुत्सिते चाल्पे तथा ह्रस्वानुकम्पयोः।
संज्ञायामपि विद्वद्भिः प्रत्ययोऽयं विधीयते।

तान्येवोदाहरणानि ॥२६॥

सुबोधिनी

अस्मिन्नर्थे प्रातिपदिकात् को वा स्यात्। भमरओ भ्रमरकः। पक्षे भमरो। इत्यादयः प्रयोगा बाहुल्येन द्रष्टव्याः। यथा—

कुसुमाउहापि अदूअओ मउलाविअघणचूअओ।
सिढिलिअमाणग्गहणओ वाहअइ दाहिणपवणओ॥

'वेष्यते स्वार्थ इल्लोल्लौ आभ्यां कः स्वार्थ एव वा'। सच्चं सच्चिलं सच्चिल्लअं सत्यम्। करहो करहुल्लो करहुल्लओ करभकः। भमरो भमरुल्लो भमरुल्लओ भ्रमरकः। 'स्वार्थे कः स्याद् डकारो वा को वा तस्मादपीष्यते'। पुत्तो पुत्तडो पुत्तडओ पुत्रकः। वच्छो वच्छडो वच्छडओ वत्सकः। हत्था हत्थडा हत्थडआ हस्तौ। 'द्वित्वापन्नो लकारोऽपि क्वचित् स्वार्थ इतीष्यते'। एक्कल्लो एकाकी, एकको वा। णवल्लो नवकः। स्वार्थ इत्युपलक्षणम्। तथा चोक्तम्—

अज्ञाते कुत्सिते चाल्पे तथा ह्रस्वानुकम्पयोः।
संज्ञायामपि विद्वद्भिः प्रत्ययोऽयं प्रकीर्त्तितः॥२६॥

(१७९) विद्युत्-पीतयोर्लः ॥२७॥

सञ्जीवनी

स्वार्थ इत्यनुवर्त्तते। वेति च विद्युत्-पीत इत्येतयोः तस्मिन्नर्थे लप्रत्ययो वा भवति। पूर्वेण कः प्राप्तः। विज्जुला। त्यथ्यद्यां चछजा इति द्यस्य जः। तस्य शेषादेशादिना द्वित्वम्। अन्त्यस्य हल इति तलोपः। आदीतौ बहुलमिति आप्रत्ययः। सन्धावात्त्वम्। पक्षे विज्जू। अत्र सुभिस्सुप्सु दीर्घ इति दीर्घः। पीअलं पीअं। कगचादिना तलोपः ॥२७॥

सुबोधिनी

एतयोः स्वार्थे लप्रत्ययो वा स्यात्। विज्जुली विज्जू। पीअलं पीअं ॥२७॥

(१८०) वृन्दे दो वः ॥२८॥

सञ्जीवनी

स्वार्थ इत्यनुवर्त्तते । वेति निवृत्तम् । द इत्यक्षरं पञ्चम्यन्तम् । वृन्दशब्दे दकारात् परः स्वार्थे वः प्रत्ययो भवति । अत्र अकारदकारयोर्मध्ये इत्यर्थः । वन्द्वं । ऋतोऽदित्यत्त्वम् ॥२८॥

सुबोधिनी

वृन्दे रः ॥२८क॥

वृन्दशब्दे दकारादुत्तरं प्रातिपदिकात् पूर्वं रप्रत्ययः स्यात् । वन्द्रः ॥२८॥

(१८१) करेण्वां रणोः स्थितिपरिवृत्तिः ॥२९॥

सञ्जीवनी

करेणुशब्दे रेफणकारयोः स्थितिपरिवृत्तिः स्थानव्यत्ययो भवति । एसा कणेरू हस्तिनी । सुभिस्सुप्सु दीर्घ इति दीर्घः । स्त्रीलिङ्गनिर्देशात् पुंसि न भवति । एस करेणू हस्ती । उभयत्र अन्त्यस्य हल इति सुलोपः ॥२९॥

सुबोधिनी

अत्र रेफणकारयोः स्थानव्यत्ययः स्यात् । एसा कणेरू हस्तिनी । स्त्रीलिङ्ग-ग्रहणात् पुंसि न । एस करेणू हस्ती ॥२९॥

(१८२) आलाने लनोः ॥३०॥

सञ्जीवनी

स्थितिपरिवृत्तिरित्यनुवर्त्तते । उत्तरत्र च । लकारे अकार उच्चारणार्थः । आलानशब्दे लकारनकारयोर्व्यत्ययः स्यात् । आणालो । 'स्थितयोः परिवृत्तिर्वा हरिताले लरेफयोः' । हलिआरो, हरिआलो । कगचादिना तलोपः ॥३०॥

सुबोधिनी

अत्र लनोः स्थानव्यत्ययः स्यात् । आणालं । 'स्थितयोः परिवृत्तिर्वा हरिताले लरेफयोः' । हरिआलो, हलिआरो ॥३०॥

(१८३) महाराष्ट्रे हरोः ॥३१॥

सञ्जीवनी

महाराष्ट्रशब्दे हकाररेफयोर्व्यत्ययः स्यात् । मरहट्ठो । ष्टस्य ठ इति ठः । अदातो यथादिषु वेति ह्रस्वः । द्वित्वे वर्गे युजः पूर्व इति टः ॥३१॥

सुबोधिनी

महाराष्ट्रे हरोः व्यत्ययः स्यात् । मरहट्ठो ॥३१॥

(१८४) बृहस्पतौ बहोः ॥३२॥

सञ्जीवनी

बृहस्पतिशब्दे बकारहकारयोर्यथासंख्यं भकारपकारादेशौ भवतः । भपप्फई । ऋतोऽदित्यत्त्वम् । स्पस्य फ इति फः । तस्य द्वित्वे वर्गे युजः पूर्व इति पः । कगचादिना तलोपः । सुभिस्सुप्सु दीर्घ इति दीर्घः । केचित्तु 'भपत्सई' इत्यपीच्छन्ति । तच्च 'क्वचित् सस्य क्वचित् पस्य लोपः शब्दस्य इष्यते' इति पलोपः । शेषादेशादिना द्वित्वम् । अन्यत् समानम् ॥३२॥

सुबोधिनी

अत्र क्रमेण बकारहकारयोर्भपौ स्याताम् । भपप्फई । केचित्तु भफत्सई इत्यपीच्छन्ति ॥३२॥

(१८५) मलिने लिनोरिलौ वा ॥३३॥

सञ्जीवनी

मलिनशब्दे लिकारनकारयोर्यथासंख्यम् इकारलकारादेशौ भवतो वा । मइलं, मलिणं ॥३३॥

सुबोधिनी

अत्रानयोरिकारलकारौ वा स्याताम् । मइलं मलिणं ॥३३॥

(१८६) गृहस्य घरोऽपतौ ॥३४॥

सञ्जीवनी

गृहस्य घरादेशो भलति अपतौ परे । अनेकवर्णः सर्वस्येति वचनात् । घरं गृहम् । राजहरं राजगृहम् । घरादेशे खघथादिना घस्य हः । घरसामी गृहस्वामी । अन्त्यस्य

हल इति नलोपः। सुभिस्सुप्सु दीर्घ इति दीर्घः। अपताविति किम् ? गहवई गृहपतिः। ऋतोऽदित्यत्त्वम् ॥३४॥

सुबोधिनी

गृहशब्दे घरादेशः स्यात् पतिश्चेद् न परस्तात्। घरसामी गृहस्वामी। अपताविति किम् ? गहवई ॥३४॥

(१८७) दाढादयो बहुलम् ॥३५॥

सञ्जीवनी

श्रुतानुमित्यध्याहारैर्वाक्यार्थपरिकल्पनमिति दंष्ट्रादीनामित्याह्रियते। तेन दंष्ट्रा इत्येवमादीनां स्थाने दाढा इत्येवंरूपा निपात्यन्ते। प्रत्ययलोपागमवर्णविकारा ये लक्षणेनानुपपन्नास्ते निपातनात् साध्यन्ते इत्यर्थः। बहुलस्य क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिरित्यादिकोऽर्थोऽवगन्तव्यः। तथा क्वचिन्नित्यम्–

दंष्ट्राललाटपत्तीनां स्युर्भ्रुवो व्याकुलस्य च।
दाढा गिडाल पाइक्क भुभआ वावलाः क्रमात् ॥

क्वचिद् वा–

अधोवैदूर्यशुक्तीनां वधूभ्रमितशब्दयोः।
हेट्ठ वेरुल्लिअं सुप्पी अउज्झा चाथ भामिअम् ॥
दुहित्राकृष्टयोस्तद्वत् स्यात् श्वश्रूलेलिहानयोः।
धूआ आअट्टिअं चैव अत्ता लल्लक्कमेव च ॥
मण्डलीसमयेदानीनिलयानां भवन्त्यमी।
विचिल्लिअं च अच्छुक्कं एण्हिं चाथ निहेलणं ॥
कडसी अवहोआसं श्मशानोभयपार्श्वयोः।
उत्पलस्य तु कंदोट्टं कोड्डं कौतूहलस्य च ॥
लज्जालुइणी चैव लज्जावत्यां निपात्यते।
शातवाहनशब्दस्य हालो शालाहणो तथा ॥
गोदावर्याश्च गोला स्यादित्वाद्याः पाक्षिकाः पुनः।
अहो वेदुज्जअं सुत्ती बह्वाद्या एवमादयः ॥

मातृष्वसृपितृष्वस्रोऽत इत्त्वं सलुक् ततः।
पक्षे च स्वसृशब्दस्य छा इत्येतन्निपात्यते॥

माउस्सिआ पिउस्सिआ। 'मातृष्वसृपितृष्वस्रोरप्यात्त्वं स्यादृतः सुपि' इति आत्त्वम्। माउच्छा पिउच्छा। इत्यादयोऽन्येऽपि निपाता आदृताः। केचित्तु दुःखश्रवः दुर्भाणिकोऽयमर्थ इति दुरधिगमत्वादिदोषदुष्टत्वेन सत्प्रयोगा अपि हेयाः। यथा—

भस्मभीष्मव्रजव्रात्यप्रेतप्रोक्तविपश्चितः।
वाक्यक्रुष्टाक्षरादित्वादेते नैवादृता बुधैः॥

आदिशब्दश्च प्रकारे। प्रकारः सादृश्यम्। तेन अन्येऽपि ये शब्दा इव सामान्यविशेषलक्षणाः संगृहीतविदर्भादिदेशगृहीतसम्बन्धा महाकविपरम्पराविधीयमानाश्च दृश्यन्ते, तेऽपि प्रायो लोपागमवर्णविकाररूपतया निरूप्यमाणा दाढादिवत् सङ्गच्छन्त एव। तथा चोक्तम्— 'यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्' इति।

केचित्तु व्यवस्थावाचिनमादिशब्दं व्याचक्षते। तथा चोक्तम्—

सामीप्येऽथ व्यवस्थायां प्रकारेऽवयवे तथा।
आदिशब्दं तु मेधावी चतुर्ष्वर्थेषु लक्षयेत्॥

तन्मतेनाथ अनुकारिविकारिभेदेन द्विविधं प्राकृतम्। तत्रानुकारिणस्तावद् विभक्तिविशेषपरिणाममात्रेण मनाग् ये संस्कृताद्भिद्यन्ते। हरिणं अरुणं लीला सारङ्गः सुन्दरी रामा इत्याद्याः संस्कृतसदृशाः। तथा क्वचन संस्कृतप्राकृतयो राजविदूषकयोः सदृशः पाठः। यथा—

इह हि नववसन्ते मञ्जरीपुञ्जरेणु-
च्छुरणधवलदेहा बद्धवेला वसन्ति।
तरलमणिमयूरा हारिहुंकारकण्ठा
बहलपरिमलालीसुन्दराः सिन्दुवाराः॥
कुन्दं विहाय विमलं भसला वसन्ते
गन्धालयं बहुरसं कमलं भजन्ते।
इन्दिन्दिरागुणमये गुणभालसा हि
गम्भीरपुञ्जरमणीयरवा रमन्ते॥

इह विकारिणस्तावद् आ समृद्ध्यादिषु वेत्यनेन प्रतिपादितश्चाग्रे प्रतिपादयिष्यमाणश्च तौ। तद्व्याप्तिमन्तरेण ये यावदुक्तास्तद्रूपा एव दाढादयः। प्राकृतस्य सर्वमेव संस्कृतं योनिः। यद्येवं तर्हि प्रकृतिः संस्कृतमिति यथा प्रतिपादितं तथा द्विविधमेव प्रकृतं भवितुमर्हति। ये तु इह उत्पलादीनां निपाता नानुकारिणो नापि विकारिणस्ते कथं प्राकृतत्वेन निर्दिश्यन्ते ? कथं वा तथा चेहइ बोलेइ देश्यामेवंविधाः क्रियाः। उक्तं च –

मरहट्ठदेस-भासाअ संकइ जो राहिइस्सं देहिइजा गोहिअं पसिद्धं।
सो दावेण णसावइ कविअणचिर साइअं भणइं॥

अथैवंविधानां प्राकृतत्वेनातिप्रसिद्धत्वात् पर्यनुयोगस्यानवकाश एव। तथा चोक्तम् – 'महाराष्ट्राश्रयां भाषां प्राकृष्टं प्राकृतं विदुः' इति।

इदं सकलप्रकृतसाधारणलक्षणम्।

ऐ-औ-स्फष्य्ङ्कॢकॄलृलॄप्लुतशषा बिन्दुश्चतुर्थी क्वचित्
प्रान्ते हलूङञनाः पृथगू द्विवचनं नाष्टादश प्राकृते।
रूपं चापि यदात्मनेपदकृतं यद्वा परस्मैपदे
भेदौ नैव तयोश्च लिङ्गनियमस्तादृगू यथा संस्कृते॥३५॥

॥इति श्रीवसन्तराजविरचितायां प्राकृतसञ्जीवन्यां सङ्कीर्णविधिश्चतुर्थः परिच्छेदः॥

सुबोधिनी

श्रुतानुमित्यध्याहारैर्वाक्यार्थपरिकल्पनमिति न्यायाद् दंष्ट्रादीनामित्यध्याह्रियते। दंष्ट्रादीनां स्थाने दाढादयः शब्दा निपात्यन्ते। क्वचित्प्रवृत्तिरित्यादिको बहुलशब्दार्थः। तथा च क्वचिन्नित्यम्।

दंष्ट्राललाटपत्तीनां स्याद् ध्रुवो व्याकुलस्य च।
दाढा लिलार पाइक्क भुमआ बाउलाः क्रमात्॥

क्वचिद् वा –

अधोवैदूर्यशुक्तीनां वधूभ्रमितशब्दयोः।
हेट्ठं वेरुल्लिअं सिप्पी अउज्झा चाथ भामिअं॥
दुहित्राकृष्ट्योस्तद्वत् स्यात् श्वश्रूलेलिहानयोः।
धूआ आआड्ढिअं चैव अत्तालल्लक्कमेव च॥
मण्डलीसमयेदानीं निलयानां भवन्त्यमी।
विचिल्लअं च अच्छुक्कं एण्हिं बाथ णिहेलणं॥

कडसी अवहोआसं श्मशानोभयपार्श्वयोः।
उत्पलस्य तु कंदोट्टं कोड्डुं कौतूहलस्य च॥
लज्जालुइणी चेति लज्जावत्यां निपात्यते॥
शालिवाहनशब्दस्य हालो शालाहणो तथा॥
गोदावर्याश्च गोला स्यादित्याद्याः पक्षिकाः पुनः।
अहो वेदुज्जअं सुत्ती सुखाद्या (?) एवमादयः॥
मातृष्वसृपितृष्वस्रोरत इत्वं सुलुक्ततः।
पक्षे च स्वसृशब्दस्य छा इत्येतन्निपात्यते॥

माउच्छा पिउच्छा। अत्र दाढादय इत्यादिशब्दः प्रकारे। प्रकारः सादृश्यम्। अथान्येऽपि ये शब्दा इह सामान्यविशेषलक्षणाः संगृहीतविदर्भादिदेशगृहीतसंबन्धा महाकविपरम्पराप्रयुज्यमाना दृश्यन्ते, तेऽपि प्रत्ययलोपवर्णविकाररूपतया निरूप्यमाणा अत्र अङ्गच्छन्त एव। तथा चोक्तम्- 'यन्न पदार्थविशेषसमुत्थं प्रत्ययतःप्रकृतेश्च तदूह्यम्'। वस्तुतस्तु व्यवस्थायामेवादिशब्दः।

नन्वेवं कथं मरहट्ठादिशब्दानां बहूनां महाकविप्रयुक्तानां प्राकृतलक्षणाक्रान्तत्वादिति तत्त्वातत्त्वानवबोधात्। तथा हि त्रिविधं प्राकृतमनुकारिविकारिदेशीभेदात्। तत्राऽनुकारि संस्कृतसमं विभक्तिविशेषपरिणामादिमात्रकृते वैलक्षण्यम्। हरिणवरुणवेलामञ्जरीपुंजकुञ्जमित्यादि। विकारि संस्कृतोद्भवम्। आ समृद्ध्यादिषु वेत्यादिसूत्रजातलक्षितविकारं सामिद्ध्यादिपदम्। एतदुभयभिन्नं तत्तद्देशगृहीतसम्बन्धं महाकविप्रयुज्यमानं तद्देशीति निर्देश्यते तत्र। मरहट्ठादिशब्दानामन्तर्भावः। अत एवाहुः— 'तद्भवं तत्समं देशी त्रिविधः प्राकृतक्रमः' इति। न चैवं प्राकृतसंस्कृतयोरतिविशेषः, तस्यानुकारिमात्रपरत्त्वात्। न च देशी संस्कृता प्राकृताद्भिन्न एव प्रकार इति कस्यचिद्वचनं नादर्त्तव्यम्। 'महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः' इति विरोधाद् व्यवहारातिक्रमाच्चेति। इदं तु सकलप्राकृतसाधारणम्—

ऐ-औ-प्यस्फ-ऋॠलृॡप्लुतशषा बिन्दुश्चतुर्थी क्वचित्
प्रान्ते हलूङञनाः पृथग् द्विवचनं नाष्टादश प्राकृते।
रूपं चाऽपि यदात्मनेपदकृतं यद्वा परस्मैपदे
भेदो नैव तयोश्च लिङ्गनियमस्तादृग् यथा संस्कृते॥३५॥

वृत्तौ प्राकृतसूत्राणां सदानन्दस्य निर्मितौ।
परिच्छेदः सुबोधिन्यां सङ्कीर्णोऽगात्तुरीयकः॥

॥ पञ्चमः परिच्छेदः ॥

❀❀❀

अथ सुब्विधिरुच्यते

(१८८) अत ओत् सोः ॥१॥

सञ्जीवनी

अत इति पञ्चम्यन्तम्। अकारान्तात् प्रातिपदिकात् परस्य सुप्रत्ययस्य ओकारादेशो भवति। इंदो, चंदो इन्द्रचन्द्रयोः। भत्तारो, कत्तारो, भर्ता कर्ता। ऋत आरः सुपीति आरादेशः। सर्वत्र ओत्त्वे कृते क्वचिदपि लोप इत्यलोपः। 'परस्य क्वचिदीकारात् सोराकारः प्रवर्तते'। हसन्तीआ, भणन्तीआ, हसन्ती भणन्ती ॥१॥

सुबोधिनी

अकारान्तात् प्रातिपदिकादुत्तरस्य सोः प्रथमैकवचनसुप्रत्ययस्यौकारदेशः स्यात्। कण्हो कृष्णः। 'परस्य क्वचिदीकारात् सोराकारः प्रवर्तते'। हसन्तीआ हसन्ती। भणन्तीआ भणन्ती ॥१॥

(१८९) जश्शसोर्लोपः ॥२॥

सञ्जीवनी

अत इत्यनुवर्त्तते। इदुतो शसो णो इत्यतः प्राक्। अकारात् परयोः प्रथमाद्वितीयाबहुवचनयोर्जस्शसोर्लोपः स्यात्। देवा, असुरा, माणुसा। जसो लोपे कृते प्रत्ययलोपपरिभाषया जस्शस्ङस्यांसु दीर्घ इति दीर्घः। पिअरो, भादरो, पितरो भ्रातरः। पितृभ्रातृजामातॄणामर इति ऋकारस्य अरादेशः। देवे, असुरे, माणुसे। देवान्, असुरान्, मानुषान्। शसो लोपे कृते अत्रापि प्रत्ययलोपपरिभाषया ए सुप्यङिङसोरित्येत्वम्। पिअरे, भादरे; पितॄन्, भ्रातॄन्।

अदन्ताद् यो विधिः प्रोक्तः शेषादित्यतिदेशतः।
आदन्तादिदुदन्तात् स ईदूदन्तादपीष्यते॥

आदन्तात्– नाला, साला। इदुदन्तात्– अग्गी, अग्नयः। वायू, वायवः। **जसो लोपे** कृते अतः अदन्तवद्भावादेव जस्‌शस्ङस्यांसु दीर्घ इति दीर्घः। ईदूदन्तात्– **णई, बहू**, नद्यः, वध्वः। शसि शेषाददन्तवदित्यतिदेशो नोपतिष्ठते। इदुतो शसो णो इति स्त्रियां शस उदोताविति वा शेषत्वात्। कथं तर्हि बाला 'पेच्छ माला गेण्ह। बालाः प्रेक्षस्व मालाः गृहाण इत्यत्र शसो लोपः ? 'आकारान्ताच्छसो लोपो बुधैः क्वचन चेष्यते' इति तत्रैवेष्यते ॥२॥

सुबोधिनी

अकारात् परयोर्जश्शसोर्लोपः स्यात्। देवा, देवाः। देवे, देवान्।

अदन्ताद्यो विधिः प्रोक्तः शेषादित्यतिदेशतः।
आदान्तादिदुदन्तात् स ईदूदन्तादपीष्यते॥

साला, शालाः। अग्गी, अग्नयः। वायू, वायवः। णई, नद्यः। बहू, वध्वः। शेषाददन्तवदित्यतिदेशः शसं प्रति नोपतिष्ठते ॥२॥

(१९०) अतोऽमः ॥३॥

सञ्जीवनी

लोप इत्यनुवर्त्तते। अकारान्तात् परस्य द्वितीयैकवचनस्य अमोऽकारस्य लोपो भवति। गामं गओ, ग्रामं गतः। णामं गेण्हइ, नाम गृह्णाति। नामच्छब्दे अन्त्यस्य हल इति नलोपः। न च क्वचिदपि लोप इति अकारस्य लोपे कृते प्रयोगाणां सिद्धत्वात् किमर्थमिदं सूत्रमुच्यते ? शेषादन्तवदित्येतदर्थम्। असति सूत्रे च परस्मिन्नपि सति केन कस्य लोपः स्यात्। अदन्ताद् यो विधिरित्यादि। हेलं, लीलं, हेलाम्, लीलाम्। अमि ह्रस्व इति ह्रस्वः। अग्गिं, वाउं, अग्निम्, वायुम्। णइं, बहुं, नदीं, वधूम्। अमि ह्रस्व इति ह्रस्वः। सर्वत्रामोऽकारस्य लोपे कृते मो बिन्दुरिति बिन्दुः ॥३॥

सुबोधिनी

अकारात् परस्यामो योऽकारस्तस्य लोपः स्यात्। गामं, ग्रामम्। लीलं, लीलम्। अदन्ताद्यो विधिरित्यादिना अग्गिं, वाउं णइं बहुम्। अग्निम्, वायुम्, नदीम्, वधूम् ॥३॥

(१९१) टामोर्णः ॥४॥

सञ्जीवनी

कार्यिणा हन्यते कार्यो कार्यं कार्येण बाध्यते।
निमित्तं च निमित्तेन शेषं तदनुवर्त्तते॥

इति परिभाषया अत इति पञ्चम्यन्तमनुवर्त्तते। अकारात् परयोस्तृतीयैकवचन-षष्ठीबहुवचनयोः टा – आम् इत्येतयोर्णकारादेशः स्यात्। धम्मेण, जम्मेण, धर्मेण, जन्मना। न्मो म इति मः। तस्य शेषादेशादिना द्वित्वम्। अन्त्यस्य हल इति नलोपः। कत्तारेण, कर्त्रा। आरः सुपीति आरादेशः। सर्वत्र टाप्रत्ययस्य णादेशे कृते ए सुप्यङ्ङिसोरित्येत्त्वम्। धम्माण, जम्माण, धर्माणां जन्मनाम्। कत्ताराण, कर्तृणाम्। आमो णादेशे कृते जस्शस्ङस्यांसु दीर्घ इति दीर्घः। अदन्ताद् यो विधिरित्यादि। अण्णाण, कण्णाण, अन्यासाम्, कन्यानाम्। बुद्धीण, बुद्धीनाम्। धेणूण, धेनूनाम्। शेषाददन्तवदित्यदन्तवद्भावादेव जस्शसादिना दीर्घः। रमणीण, कण्डूण, रमणीनाम्, कण्डूनाम्। टाप्रत्यये त्वदन्तवद्भावो भवति। टा णा इति टाङस्ङीनामिदेदात इति च शेषत्वात्। 'बिन्दुर्टामोर्ण इत्यादौ सन्नसन्नपि वा क्वचित्' इति वक्ष्यते। **तेन** धम्मेणं, जम्मेणं, धम्माणं, जम्माणं, कत्तारेणं, कत्ताराणं इत्यपि। एवमा**दि** आपरिच्छेदपरिसमाप्तेः प्रायेण द्रष्टव्यम् ॥४॥

सुबोधिनी

अकारान्तात् परयोष्टामोरित्येतयोः स्थाने णः स्यात्। धम्मेण, धर्मेण। जम्मेण, जन्मना। शेषाददन्तवदिति कण्णाण, कन्यानाम्। बुद्धीण, बुद्धीनाम्। धेणू, धेनूनाम्। रमणीण, रमणीनाम् ॥४॥

(१९२) भिसो हिं ॥५॥

सञ्जीवनी

अकारान्तात् परस्य भिसः स्थाने हिमादेशः स्यात्। धम्मेहिं, कम्मेहिं, **धर्मैः**, कर्मभिः, अन्त्यस्य हल इति नलोपः। ए सुप्यङिङसोरित्येत्त्वम्। अदन्ताद् **यो** विधिरिति। बालाहिं, लोलाहिं, बालाभिः, लोलाभिः। पाणीहिं, जाणूहिं, पाणिभ्याम्, जानुभ्याम्। द्विवचनस्य बहुवचनमिति भ्यामः स्थाने भिस्। तस्य हिमादेशः। रमणीहिं, तणूहिं, रमणीभिः, तनूभिः ॥५॥

सुबोधिनी

अकारात् परस्य भिसो हिमादिश्यते। धम्मेहिं धर्म्मैः। एवमादन्तानामप्यूह्यम् ॥५॥

(१९३) ङसेरादोदुहयः ॥६॥

सञ्जीवनी

अकारात् परस्य पञ्चम्येकवचनस्य ङसेः स्थाने आत् ओत् उ हि इत्येते आदेशा भवन्ति। तकारोऽसन्देहार्थः। गामा गओ, ग्रामादागतः। अकारादेशे कृते क्वचिदपि लोप इत्यलोपः। गामाओ गओ। गामाउ गओ। गामाहि गओ। आदेशे जस्शसादिना ग्रामस्य दीर्घः। एवं सप्पा भअं। सप्पाओ भअं। सप्पाउ भअं। सप्पाहि भअं। सर्पाद् भयम्। 'ङसेरतः परस्येह हिन्तो इत्यपि दृश्यते'। सप्पाहिन्तो भाअइ, सर्पाद् बिभेति। दूराहिन्तो णाशइ, दूरान्नश्यति। अदन्ताद्यो विधिरित्यादिना आतः – गंगाओ, गंगाउ, गङ्गाहिः; गङ्गाहिन्तो गङ्गायाः। इदुद्भ्याम् आ न भवति। गिरीओ, गिरीउ, गिरीहिन्तो, गिरेः। साणूओ, साणूउ, साणूहिन्तो; सानोः। शेषाददन्तवदिति अदन्तवद्भावाद् ग। जस्शस्ङस्यांसु दीर्घ इति दीर्घः। 'ङसेर्यदाऽऽहिरादेशौ नादन्तवदुतो विधिः' इति न आहिरादेशौ। ईदूद्भ्याम् – तरुणीओ, तरुणीउ, तरुणीहिन्तो; तरुण्याः। वहूओ, वहूउ, वहूहिन्तो; वध्वाः। अकारान्तादन्यत्र न ङिङसोरिदेताविति ङसेराकारादेश-निषेधाद् गङ्गाओ इत्यादिषु अपादानवक्तव्ये गत इत्यादि वाच्यम्॥७॥

सुबोधिनी

अकारात् परस्य ङसेः स्थाने आ ओ उ हि इति चत्वार आदिश्यन्ते। गामा, गामाओ, गामाउ, गामाहि, ग्रामात्। 'ङसेरतः परस्येह हिन्तो इत्यपि दृश्यते'। गामाहिन्तो। एवमादन्तानामप्यूह्यम्॥६॥

(१९४) भ्यसो हिन्तो सुन्तो॥७॥

सञ्जीवनी

अकारात् पञ्चमीबहुवचनस्य भ्यसः स्थाने हिन्तो सुन्तो इत्यादेशौ स्याताम्। अविशेषणापादानात् चतुर्थीबहुवचनस्यापि भ्यसो न ग्रहणम्, चतुर्थ्याः षष्ठीविधानात्। पंचाहिन्तो, पंचासुन्तो, पञ्चभ्यः। सत्ताहिन्तो, सत्तासुन्तो, सप्तभ्यः। ए भ्यसीति एत्वप्रतिषेधे जस्शस्ङस्यांसु दीर्घ इत्यत्र ङसेः पञ्चम्युपलक्षणत्वादन्यत्रापि दीर्घः। अदन्ताद् यो विधिरित्यादि। आतः – रामाहिंतो, रामासुंतो, रामाभ्यः। ईदुद्भ्याम् – अच्छीहिंतो, अच्छीसुंतो, अक्षिभ्यः। ऊरुहिंतो, ऊरुसुंतो, ऊरुभ्याम्।

द्विवचनस्य बहुवचनमिति भ्यामः स्थाने भ्यस् । तस्य हिंतो सुन्तो आदेशौ । इदूद्भ्याम्— जणणीहिंतो, जणणीसुंतो, जननीभ्यः । चमूहिंतो, चमूसुंतो, चमूभ्यः ॥७॥

सुबोधिनी

अकारात् परस्य भ्यसो स्थाने हिन्तो सुन्तो इत्येतौ स्तः । अर्थात् पञ्चमी-बहुवचनस्य । चतुर्थ्याः षष्ठीविधानात् । पञ्चाहिन्तो, पञ्चासुन्तो, पञ्चभ्यः । एवमादाद्यन्तानामप्यूह्यम् ॥७॥

(१९५) स्सो ङसः ॥८॥

सञ्जीवनी

अकारान्तात् परस्य ङसः स्थाने द्वित्वापन्नः स्स इत्यादेशः स्यात् । णरस्स, वाणरस्स, नरस्य, वानरस्य । तेअस्स, तमस्स, तेजसः, तमसः । अन्त्यस्य हल इति सलोपः । अदन्ताद्यो विधिरित्यादिना इदुद्भ्याम्— मउलिस्स, मौलेः । हणुस्स, हनोः स्त्रियां ङसि परेऽदन्तवद्भावो न भवति । टाङस्ङीनामिदेददात इत्यादेशात् । उत्तरत्र च ॥८॥

सुबोधिनी

अकारात् परस्य ङसः स्स इत्यादिश्यते । णरस्स, नरस्य । एवमिदुदन्तयोरप्यूह्यम् ॥८॥

(१९६) ङेम्मी ॥९॥

सञ्जीवनी

अकारात् परस्य सप्तम्येकवचनस्य ङि इत्यस्य स्थाने ए म्मि इत्येतौ आदेशौ भवतः । सरे, सरम्मि, शरे । चम्मे, चम्मम्मि, चर्म्मणि । अदन्ताद्यो विधिरित्यादि । गिरिम्मि, तरुम्मि, गिरौ तरौ । एकारादेशस्तु न भवति, न ङिङस्योरिदेताविति निषेधात् ॥९॥

सुबोधिनी

अकारात् परस्य ङि इत्येतस्य ए म्मि इत्येतौ स्तः । सरे, सरम्मि । एवमिदुदन्तयोः म्मिरादेश ऊह्यः ॥९॥

(१९७) सुपः सुः ॥१०॥

सञ्जीवनी

अकारात् परस्य सप्तमीबहुवचनस्य सुपः सुरादेशः स्यात् । सरेसु, कमलेसु, सरःसु कमलेषु । ए च सुप्यङिङसोः इति एत्वम् । ङसः स्सविधानं यथा सुपः सुविधानं तथा प्रयोजनवदित्याहुः ॥१०॥

सुबोधिनी

अकारात् परस्य सुपः सुः इति स्यात्। कमलेसु, कमलेषु। सुपः सुविधानं च प्रयोजनवदित्याहुः ॥१०॥

(१९८) जसूङस्यांसु दीर्घः ॥११॥

सञ्जीवनी

अत इति षष्ठ्यन्तमनुवर्तते। अर्थवशाद् विभक्तिविपरिणाम इति वचनात्। क्वचिदपि लोप इति यावत्। प्रथमाबहुवचनं जस्, पञ्चम्येकवचनं ङसि, षष्ठीबहुवचनम् आम्। एषु परेषु अकारान्तस्य दीर्घो भवति। जसि–देवा, माणुसा; देवाः, मानुषाः। 'सर्वविधिभ्यो लोपविधिर्बलवान्' इति जसो लोपे कृते 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति वचनाद् अनेन दीर्घः। ङसौ – देवाहि, माणुसाहि; देवाओ, माणुसाओ, देवात्, मानुषात्। आदेशस्य स्थानिवद्भावाद् अनेन दीर्घः।

'सर्वादिष्विदमो दीर्घो न त्वन्येषां ङसौ भवेत्'।

इमाओ इमाहि अस्मात्। इदं इम इति इमादेशः। इदमः इति किम् ? सव्वतो, सव्वादो, सर्वस्मात्। तओ, तत्तो, तदो, तस्मात् ततो वा। ङस्योत्तोदोङसेरनिदमः इति ओ त्तो दो इति त्रय आदेशाः। आमि – देवाण, माणुसाण। टामोर्ण इति आमो णः। देवानां मानुषाणाम्। अदन्ताद्यो विधिरित्यादि गिरी। तरू, गिरयः, तरवः। स्त्रियामपि – बुद्धी, धेणू, बुद्धयः, धेनवः। ङसौ – गिरीओ तरूओ, बुद्धीओ, धेणूओ; गिरेः, तरोः, बुद्धेः, धेनोः। शेषाददन्तवदित्यतिदेशादनेन दीर्घः। आमि – गिरीण, तरूण, गिरीणां तरूणाम्। बुद्धीण, धेणूण, बुद्धीनां धेनूनाम्। अत्रापि अदन्तवद्भावादेव टामोर्ण इत्यामो णः, दीर्घश्च।

'शसूटाङसिषु दीर्घत्वं वक्तव्यमिदुतोः स्त्रियाम्'।

शसि – बुद्धीओ पेच्छ। धेणूओ पेच्छ। बुद्धीः प्रेक्षस्व। धेनूः प्रेक्षस्व। स्त्रियां शस उदोतौ इति ओत्त्वम्। टाङसूङीनामिदेददात इति टाङसूङिषु। बुद्धीए, बुद्ध्या, बुद्धेः, बुद्धौ वा। धेणूए, धेन्वा, धेन्वाः, धेनौ वा। तिसृणां विभक्तीनामेकारादेशः। एषां तुल्येऽपि रूपे अर्थतो विशेषः ॥११॥

सुबोधिनी

अत इति षष्ठ्यन्तमनुवर्त्तते। अर्थवशाद्विभक्तिपरिणाम इति वचनात्। जस् ङसि आम् इत्येषु परेषु अकारस्य दीर्घत्वं स्यात्। देवा देवाः। माणुसाहि, मानुषात्। रक्खसाणं, राक्षसानाम्।

'सर्वादिष्विदमो दीर्घो न त्वन्येषां ङसौ भवेत्'।

इमाओ, अस्मात्। सव्वाओ, सर्वस्मात्। अन्यदप्येवमूह्यम्। एवमादन्तानामप्यूह्यम्। परन्तु 'शस्टाङसिषु दीर्घत्वं वक्तव्यमिदुतोः स्त्रियाम्'। बुद्धीओ, बुद्धीः। धेणूओ, धेनूः। बुद्धीए, धेणूए; बुद्ध्या, बुद्धेः, बुद्धौ वा। धेन्वा, धेनोः, धेनौ वा ॥११॥

(१९९) ए सुप्यङिङसोः ॥१२॥

सञ्जीवनी

सुपीति प्रत्याहारः। तेन सुप्रत्ययादौ विभक्तिगणे परे एकारः स्यात्। सप्तम्येकवचनं ङि, षष्ठ्येकवचनं ङस् एतौ वर्जयित्वा। जणे, पेच्छ, जनान् पश्य। जश्शसोर्लोप इति शसो लोपः। जलेण, घणेण, जलेन घनेन। जलेहिं, घणेहिं; जलैः, घनैः। जलेसु, घणेसु। अङिङसोरिति किम्? जलम्मि, घणम्मि, जले घने। ङेरम्मीति म्मिरादेशः। जलस्य घणस्य, जलस्य घनस्य। 'ए सुप्यङिङसोः सूत्रे नेष्टं शेषाददन्तवत्' इति अदन्तवद्भावादन्यत्र एकारादेशो न भवति। रामाओ, सामाओ; रामाः, श्यामाः। सहीओ वहूओ, सखीः, वधूः। स्त्रियाम् उदोताविति ओत्त्वम्। सालिणो, पीलुणो, सालीन् पीलून्। इदुतोः शसो णो इति णो आदेशः। एवमन्येऽपि जसि दीर्घः। 'जसि दीर्घः शसि त्वेत्वं ष्णान्तां संख्यां विना भवेत्' छ, षड्। षडादिना छः। पंच, पञ्चैव। सत्त सप्त। छ पेच्छ, षट् प्रेक्षस्व। पंच पेच्छ, पञ्च प्रेक्षस्व। सत्त पेच्छ, सप्त प्रेक्षस्व ॥१२॥

सुबोधिनी

ङिङसोर्वर्जयित्त्वाऽन्यस्मिन् सुपि परे अकारस्य एत्त्वं स्यात्— जणे, जनान्। जणेण, जनेन। जणेहिं, जनैः। जणेसु, जनेषु। अङिङसोरिति किम्? जणम्मि, जणस्स।

'जसि दीर्घः शसि त्वेत्वं ष्णान्तां संख्यां विना भवेत्'।

छ पञ्च षट् पञ्च इति जसि। छ पञ्च इति शसि ॥१२॥

(२००) क्वचिदपि लोपः ॥१३॥

सञ्जीवनी

अचीत्यध्याह्रियते, सुपीति च। अजादौ सुपि परे अकारस्य लोपो भवति। क्वचिदिति असकलविधिद्योतनार्थम्। जम्मो, जन्म। तमो, तमः। पाउसो, दिसो; प्रावृट्, दिक्। दिक्प्रावृषोः स इति सः। सरओ, शरत्। शरदोऽदिति तस्य अत्त्वम्। नसन्तप्रावृट्शरदः पुंसीति पुंस्त्वम्। अत ओत् सोरित्येत्त्वम्। चंदओ, चन्द्रकः, चन्द्र

एव । स्वार्थे को वेति कः । सप्पा अहिअं पिसुणा वीहेइ । सर्पादधिकं पिशुनाद् बिभेति । ङसेरादोदुहय इति आकारादेशः । णहे पक्खिणो, नभसि पक्षिणः । अन्त्यस्य हल इति सलोपः । दहे मच्छा, ह्रदे मत्स्याः । दाढादयो बहुलमिति हदयोः परिवृत्तिः । द्रे रो वेति रलोपः । ङेरेम्मी इति एकारादेशः । क्वचिदिति किम् ? सप्पाओ, सप्पाउ । पिसुणाओ, पिसुणाउ । सर्पात् पिशुनात् । जस्ङस्यांसु दीर्घ इति दीर्घः । 'अकारलोपसूत्रेऽपि नेष्टं शेषाददन्तवत्' इति अदन्तवद्भावादन्यत्र लोपो न भवति । बाला, बालाः । बुद्धीओ, धेणूओ, बुद्धयः, धेनवः । शेषादन्तवद्भावाद् जस्ङस्यादिना दीर्घः । सहीओ, वहूओ, सख्यः, वध्वः । सर्वत्र जसो वेति जस ओत्त्वमित्यादि ॥१३॥

सुबोधिनी

अचीत्यध्याह्रियते । अजादौ सुपि परेऽकारस्य लोपः स्यात् । जम्मो, जन्म । सप्पा, सर्पात् । क्वचिदिति किम् ? सप्पाउ सप्पाओ ॥१३॥

(२०१) इदुतो शसो णो ॥१४॥

सञ्जीवनी

इदुतोः षष्ठी पञ्चम्याः स्थानमित्याहुः । येन विधिस्तदन्तस्येति वचनाद् इकारोकाराभ्याम् इकारान्तोकारान्तशब्दौ गृह्येते । इकारान्ताद् उकारान्ताच्च प्रातिपदिकात् परस्य शस्प्रत्ययस्य णो इत्यादेशो भवति । सहिणो, सारहिणो, सखीन्, सारथीन् । खथयोर्हत्वम् । बाहुणो, बाहून् । स्त्रीनपुंसकयोर्विशेषस्य वक्ष्यमाणत्वात् पुंस्येवायं विधिः । 'इदुद्भ्यामुत्तरस्येष्टो वा णो इति ङसेरपि' । जलहिणो पुब्वो । मेरुणो उत्तरो । जलधेः पूर्वः । मेरोरुत्तरः । पक्षे ङसेरादोदुहयः । जलहीओ, मेरूओ, जलधेः, मेरोरित्यादयः ॥१४॥

सुबोधिनी

इकारान्ताद् उकारान्ताच्च प्रातिपदिकात् परस्य शस्प्रत्ययस्य णो इत्यादेशो भवति । बाहुणो, बाहून् । 'इदुद्भ्यामुत्तरस्येष्टो वा णो इति ङसेरपि' । जलहिणो, जलहीओ, जलधेः । मेरुणो, मेरूओ, मेरोः ॥१४॥

(२०२) ङसो वा ॥१५॥

सञ्जीवनी

इदुतो इत्यनुवर्त्तते । स्त्रियां शस उदोतौ इत्यतः प्राक् । णो इत्यनुवर्त्तते उत्तरत्र

च। इकारोकारान्ताभ्यां परस्य ङसो णो इत्यादेशो वा भवति। असिणो, रासिणो, असेः, राशेः। इन्दुणो, बिन्दुणो, इन्दोः, बिन्दोः। पक्षे अदन्तवत् स्स आदेशः ॥१५॥

सुबोधिनी

इदुद्भ्यामुत्तरस्य ङसो णो इति वा स्यात्। हरिणो, हरिस्स, हरेः। इंदुणो, इंदुस्स, इन्दोः ॥१५॥

(२०३) [1]जस ओ वो वाऽत्त्वं च ॥१६॥

सुबोधिनी

इदुद्भ्यामुत्तरस्य जस ओत्वं वोत्वं च स्यादत्त्वं च पूर्वस्य। एकयोगनिर्दिष्टानामित्यादित ओत्वादिपक्ष एव इदुतोरत्त्वम्। रासओ, रासिवो, रासिणो, रासी, राशयः। वेणओ, वेणुवो, वेणुणो, वेणू, वेणवः। अत्राददन्तत्वाऽभावाद् दीर्घत्वं न स्यात्, अत्त्वस्यैव विधानात्। क्वचिदित्यनुवृत्तेश्चेति ॥१६॥

(२०४) [2]टा णा ॥१७॥

सुबोधिनी

इदुद्भ्यामुत्तरस्य टा इत्यस्य णा स्यात्। दहिणा दध्ना, वाउणा वायुना ॥१७॥

(२०५) सुभिस्सुप्सु दीर्घः ॥१८॥

सञ्जीवनी

एषु त्रिषु परेषु इदुतोर्दीर्घो भवति। सौ तावत्– पंत्ती, पङ्क्तिः। तंतू, तन्तुः। भिसि – पंतीहिं, तंतूहिं। पङ्क्तिभिः, तन्तुभिः। सुपि – पंतीसु, पंक्तिषु। तंतूसु, तन्तुषु। 'क्वचिदित्यनुवृत्तेः स्यान्न क्वचित् सुपि दीर्घता'। भूमिसु, भूमिषु इत्यादौ ॥१८॥

सुबोधिनी

सु भिस् सुप इत्येतेषु परेषु इदुतोर्दीर्घः स्यात्। पंती पङ्क्तिः। तणू तनुः। पंतीहिं, पंक्तिभिः। तणूहिं, तनुभिः। पंतीसु, पङ्क्तिषु। तणूसु, तनुषु। भूमिसु, भूमिषु इत्यादौ। क्वचिदित्यनुवृत्तेर्दीर्घत्वं न। इदुद्भ्यामिति निवृत्तम् ॥१८॥

---

१ - २. अनयोः सूत्रयोः सञ्जीवनी नोपलभ्यते।

(२०६) स्त्रियां शस उदोतौ ॥१९॥

सञ्जीवनी

इदुतोरिति निवृत्तम्। स्त्रीलिङ्गे वर्तमानात् प्रातिपदिकात् परस्य शस उत् ओत् इत्यादेशौ भवतः। तकारोऽसन्देहार्थः। आसाउ, आसाओ, आशाः। दिसाउ, दिसाओ, दिशः। दिक्प्रावृषोः स इति सः। आदीतौ बहुलमिति ओप्रत्ययः। 'अकारान्तवदादन्तात् शसो लोपाय चेष्टते'। इति पक्षे शसो लोपः। आसा, दिसा। जुवईउ जुवईओ, युवतीः। विज्जूउ, विज्जूओ, विद्युतः। अन्त्यस्य हल इति तलोपः। त्यथ्यद्यां चछजा इति द्यस्य जः। जस्शस्ङस्यांसु दीर्घ इति दीर्घत्वे वक्तव्ये उतो स्त्रियामिति दीर्घः। माणिणीउ, माणिणीओ, मानिनीः। करहोरुउ, करहोरुओ करभोरुः ॥१९॥

सुबोधिनी

स्त्रीलिङ्गे वर्त्तमानात् प्रातिपदिकादुत्तरस्य शस उत्त्वमोत्त्वं च स्याताम्। रामाउ, रामाओ; रामाः। एवमीदन्तानामप्यूह्यम् ॥१९॥

(२०७) [1]जसो वा ॥२०॥

सञ्जीवनी

स्त्रियामित्यनुवर्त्तते नपुंसके सोर्बिन्दुरिति यावत्। उदोतावित्यनुवर्तते। स्त्रीलिङ्गे वर्तमानात् प्रातिपदिकात् परस्य जस इत्येतस्य उ ओ इत्येतौ आदेशौ वा भवतः। रेहाउ रेहाओ रेखाः। सिप्पीउ सिप्पीओ शुक्तयः। शुक्तिशब्दस्य दाढादयो बहुलमिति सिप्पि आदेशः। सिणाउ, सिणाओ, स्नायवः। 'प्लोषे प्लुष्टे भवेत् स्नायौ श्लोके विश्लेष इस्तथा' इति सकारनकारयोर्विकर्षः। पूर्वस्य च इत्त्वम्। देईउ, देईओ; देव्यः। सासुउ, सासुओ; श्वस्रः। आ समृद्ध्यादिषु वेति आत्त्वम्। सर्वत्र वाग्रहणात् पक्षे शेषाददन्तवद् इति अदन्तवद्भावाद् जश्शसोर्लोप इति जसो लोपः। दिसा, सोभा, दिवीत्यादि ॥२०॥

(२०८) अमि ह्रस्वः ॥२१॥

सञ्जीवनी

ह्रस्व इति सम्बन्धिशब्दाद् दीर्घं स्थानिनमाक्षिपति। तेन द्वितीयैकवचने अमि परे दीर्घस्य ह्रस्वो भवति। धरं, धराम्। धारं, धाराम्। लहुइं, गरुइं; लघ्वीम्, गुर्वीम्।

---

१. एतत्सूत्रादारभ्य 'नातोऽदातौ' इति सूत्रं यावत् सुबोधिनी नोपलभ्यते।

उः पद्मतन्वीसमेषु इति धकारवकारयो रकारवकारयोश्च विकर्षः स्यात्। पूर्वस्य च उत्त्वम्। कदुदुं, कद्रम्। द्रे रो वेति रलोपः। शेषादेशादिना द्वित्वे कृते शेषाददन्तवदिति अदन्तवद्भावाद् अतोऽम इत्यकारलोपः। मो बिन्दुरिति बिन्दुः ॥२१॥

(२०९) टाङस्ङीनामिदेदादतः ॥२२॥

सञ्जीवनी

स्त्रीलिङ्गात् परेषां टा ङस् ङि इत्येतेषां प्रत्येकम् इत् एत् आत् अत् इत्येते चत्वार आदेशा भवन्ति। तकारोऽसन्देहार्थः। बुद्धीइ, बुद्धीए, बुद्धीआ, बुद्धीअ; बुद्ध्या, बुद्धेः, बुद्धौ। धेणूइ, धेणूए, धेणूआ, धेणूअ; धेन्वा, धेनोः, धेनौ। टाङस्ङिषु इदुतोः स्त्रियामिति दीर्घः। ससिमुहीइ, ससिमुहीए, ससिमुहीआ, ससिमुहीअ। शशिमुख्याः, शशिमुख्याः, शशिमुख्याम्। करहोरूइ, करहोरूए, करहोरूआ, करहोरूअ। करभोर्वा, करभोर्वाः, करभोर्वाम्। तिसृषु विभक्तिषु समं रूपम्। कर्तृकरण-सम्बन्धाधिकरणभेदेन पुनरर्थविशेषोऽवगन्तव्यः ॥२२॥

(२१०) नातोऽदातौ ॥२३॥

सञ्जीवनी

टाङस्ङीनामित्यनुवर्त्तते। आकारान्तात् स्त्रीलिङ्गात् परेषां टा ङस् ङि इत्येतेषां त्रयाणाम् अत् आत् इत्यादेशौ न भवतः। पूर्वेण सर्वत्र चत्वारः प्राप्ताः। इत् एत् इत्यादेशौ भवतः। गोलाइ, गोलाए; गोदावर्या, गोदवर्याः, गोदावर्याम्। दाढादयो बहुलमिति गोदावरीशब्दस्य गोला इति निपात्यते। धुराई, धुराए; धुरा, धुरः, धुरि। रो रा इति रादेशः। अत्रापि समं रूपम्। अर्थे परं विशेषः ॥२३॥

(२११) आदीतौ बहुलम् ॥२४॥

सञ्जीवनी

स्त्रीलिङ्गे वर्तमानात् प्रातिपदिकाद् आ इ इत्येतौ प्रत्येकं भवतः। काइ, कीअ; कया, कस्याः, कस्यां वा। जाइ, जीइ, जीआ; यया, यस्याः, यस्यां वा। ताइ, तीइ, तीआ; तया, तस्याः, तस्यां वा। इमाइ, इमीअ; अनया, अस्याः, अस्यां वा। इदम इम् इति इदम इमादेशः। टाङसिङीनामिदेदादत इति टा ङसि ङि इत्येतेषामन्यतमस्य इकाराकारादेशौ। बहुलग्रहणात् क्वचिद् विकल्पः। हलद्दा, हलद्दी। सुप्पणहा, सुप्पणही। उदूतो मधूकादिषु इति उत्त्वम्। क्वचिदाकार एव वा।

असहणा, कोपणा। पिआ, वल्लहा। प्रिया, वल्लभा। क्वचिद् ईकार एव। माणिणी, माणंसिणी; मानिनीमनस्विन्योः। गाअणी गायनशब्दस्य। णच्चणी नर्तनशब्दस्य। च्चो व्रजिनृत्योरिति च्चो आदेश इत्यादयः।

आदन्तात् परमाकार ईकारो व्यञ्जनादपि।
इत्येवं व्यवतिष्ठन्ते बहुलग्रहणात् परे ॥२४॥

सुबोधिनी

स्त्रियां वर्त्तमानात् प्रातिपदिकाद् आ ई इत्येतौ प्रत्ययौ स्तः। बहुलग्रहणात् क्वचित् प्रवृत्तिरित्यादिकमभिप्रैति। काइ, कीइ; कया, कस्याः, कस्यां वा। जाइ, जीअ; यया, यस्याः, यस्यां वा। ताइ, तीअ; तया, तस्याः, तस्यां वा। इमाइ, इमीआ; अनया, अस्याः, अस्यां वा। हलद्दा, हलद्दी, हरिद्रा। सुप्पणहा, सुप्पणही, शूर्पणखा। क्वचिदाकार एव। असहणा, कोपणा; असहना, कोपना। पिया, प्रिया। वल्लहा, वल्लभा। क्वचिदीकार एव। माणिणी, मानिनी। माणंसिणी, मनस्विनी। गाअणी, गायनशब्दस्य स्त्रीप्रत्ययान्तः। णच्चणी नर्त्तनशब्दात् सिद्धम्।

अदन्तात् परमाकार ईकारो व्यञ्जनादपि।
इत्येवं व्यवतिष्ठन्ते बहुलग्रहणात् परे ॥२४॥

(२१२) नपुंसके सोर्बिन्दुः ॥२५॥

सञ्जीवनी

नपुंसकलिङ्गे वर्तमानात् प्रातिपदिकात् परस्य प्रथमैकवचनस्य सुप्रत्ययस्य बिन्दुरादेशः स्यात्। अत ओत् सोरित्योत्त्वं प्राप्तम्। वअणं, वदनम्। रअणं, रत्नम्। क्लिष्टश्लिष्टेत्यादिना तनयोर्विकर्षः। पूर्वस्य वा अदन्तत्वम्। दहिं, दधि। महुं, मधु। अच्छिं, अक्षि। अक्ष्यादिषु छ इति छः। धणुं, धनुः। अन्त्यस्य हल इति सलोपः ॥२५॥

सुबोधिनी

नपुंसके वर्त्तमानात् प्रातिपदिकात् परस्य सोर्बिन्दुरादेशः स्यात्। रअणं, रत्नम्। दहिं, दधि। महुं, मधु। इत्यादि ॥२५॥

(२१३) इं जश्शसोर्दीर्घः ॥२६॥

सञ्जीवनी

नपुंसक इत्यनुवर्त्तते उत्तरत्र च। नपुंसकलिङ्गे वर्तमानात् प्रातिपदिकात् परयोर्जश्शसोः इं इत्यादेशो भवति पूर्वस्य च दीर्घः। जश्शसोर्लोप इति, इदुतो शसो

णो इति, जस ओ वो वाऽत्त्वं च इति प्राप्तानां बाधः। पुण्णाइं, पुण्यानि। रण्णाइं, अरण्यानि। लोपोऽरण्ये इत्यलोपः। जाइं, ताइं; यानि तानि। दहीइं, वारीइं; दधीनि, वारिणी। महूइं, साहूइं; मधूनि, साधूनि। 'जश्शसोरिदुतोः क्वापि निकारोऽपि नपुंसके'। अच्छीणि अक्षीणि इत्यादौ ॥२६॥

सुबोधिनी

नपुंसके जस्शस् इत्येतयोरिमिति स्यात्। पूर्वस्य च दीर्घः स्यात्। रण्णाइं, अरण्यानि। दहीइं, दधीनि। महूइं, मधूनि इत्यादि ॥२६॥

(२१४) नामन्त्रणे सावोत्त्वदीर्घबिन्दवः ॥२७॥

सञ्जीवनी

आह्वानमामन्त्रणम्। आमन्त्रणे अर्थे सुप्रत्ययः। तस्मिन् सति ओकारादेशो दीर्घत्वं बिन्द्वादेशश्च न भवति। अत ओत् सोरिति, सुभिस्सुप्सु दीर्घ इति, नपुंसके सोर्बिन्दुरिति क्वचित् प्राप्तानि। ओत्त्वं तावत्– हे देअर, हे वल्लह; हे देवर, हे वल्लभ। दीर्घत्वम्– हे ससि, हे समि; हे शशिन्, हे स्वामिन्। अन्त्यस्य हल इति नलोपः। अरे वडु, अरे फसु; अरे वटो, अरे पशो। बिन्दुः– हे मिहुण, हे मिथुन। हे हिअअ, हे हृदय। हे अच्छि, हे अक्षि, हे अक्षे वा। हे दहि, हे दधि, हे दधे वा। हे जाणु, हे जानु, हे जानो वा। 'दीर्घत्वमपि मन्यन्ते क्वचिदामन्त्रणे बुधाः'। हे पहू, हे प्रभो। हो पिअवअस्स, भो प्रियवयस्य। रे णिग्घण्णा, रे निर्घृण इत्यादि। सर्वत्र अन्त्यस्य हल इति सुलोपः ॥२७॥

सुबोधिनी

संबोधने सुप्रत्ययस्य ये ओत्त्वादय आदेशास्ते न स्युः। हे वल्लह, हे वल्लभ। हे हिअअ, हे हृदय इत्यादि ॥२७॥

(२१५) आत ए ॥२८॥

सञ्जीवनी

स्त्रियामित्यपेक्षते। आमन्त्रणे साविति द्वयमनुवर्त्तते। उत्तरत्र च। आमन्त्रणेऽर्थे सौ परे स्त्रियामाकारस्य एकारादेशो भवति। हे बाले, हे मुद्धे; बाला मुग्धा इत्यनयोः। 'आकारस्य न सावेत्त्वं क्वचिदामन्त्रणे भवेत्'। हे माउच्छा, हे मातृष्वसः।

हे पिउच्छा, हे पितृष्वसः। मातृष्वसृपितृष्वसृशब्दयोः दाढादयो बहुलमिति माउच्छा, पिउच्छा इत्येतौ निपात्येते। हे अत्ता। श्वश्रूशब्दस्य पूर्ववत् अत्तापि निपात्यते ॥२८॥

सुबोधिनी

स्त्रियामित्यपेक्षते। आमन्त्रणे सौ स्त्रियामाकारस्य एत्वं स्यात्। हे बाले, हे बाले। 'आकारस्य न सावेत्त्वं क्वचिदामन्त्रणे भवेत्'। हे माउच्छा, हे पिउच्छा, हेअत्ता। हे मातृष्वसः, हे पितृष्वसः, हे श्वश्रु ॥२८॥

(२१६) ईदूतोर्ह्रस्वः ॥२९॥

सञ्जीवनी

आमन्त्रणार्थे सौ ईकारान्तस्य ऊकारान्तस्य च ह्रस्वो भवति। हे माणिणि, हे मानिनि। हे बहु। हे सासु। वधू-श्वश्रू इत्येतयोः ॥२९॥

सुबोधिनी

आमन्त्रणे सौ परे स्त्रियामीकारस्योकारस्य च ह्रस्वः स्यात्। हे माणिणि, हे मानिनि। हे बहु, हे वधु ॥२९॥

(२१७) ऋत आरः सुपि ॥३०॥

सञ्जीवनी

सुपिति प्रत्याहारः। तेन स्वादौ विभक्तिगणे परे ऋकारान्तस्य आर आदेशो भवति। भत्तारो, भर्त्ता। आरादेशे कृते अत ओत् सोरित्योत्त्वम्। क्वचिदपि लोप इत्यलोपः। भत्तारं, भर्त्तारम्। अतोऽम इत्यकारलोपः। मो बिन्दुरिति बिन्दुः। भत्तारेहिं, भर्तृभिः। भिसो हिमिति भिसः स्थाने हिमादेशः। ए सुप्यङिङसोरित्येत्वम्। आमन्त्रणेऽपि हे भत्तार, हे भर्तः। आमन्त्रणे सौ इत्यादिना अत ओत् सोरित्योत्त्वस्य प्रतिषेधात्। अन्त्यस्य हल इति सुलोपः। एवं कर्तृशब्दादीनामपि उदाहार्यम् ॥३०॥

सुबोधिनी

स्वादौ परे ऋकारस्य आर इत्यादिश्यते। भत्तारो, भर्त्ता ॥३०॥

(२१८) मातुरा ॥३१॥

सञ्जीवनी

अत इत्यनुवर्त्तते राज्ञ इत्यतः प्राक्। सुपीत्यनुवर्त्तते। स्वादौ विभक्तिगणे मातृशब्दस्य आकारादेशः स्यात्। पूर्वेणारादेशः प्राप्तः। माआ, माता। कगचादिना

तलोपः। अन्त्यस्य हल इति सुलोपः। माआओ, मातरः। जसो वेति जस ओत्त्वम्। माअं, मातरम्। अमि ह्रस्व इति ह्रस्वत्वम्। अतोऽम इत्यकारलोपः। मो बिन्दुरित्यादिना बिन्दुः। माआओ, मातॄः। स्त्रियां शस उदोताविति ओत्त्वम्। माआइ, मात्रा; मातुः, मातरि वा। टाङस्ङीनामिदेदादय इति त्रयाणामन्यतमस्य इकारादेशः। माआहिं, मातृभिः। भिसो हिमिति हिं। माअउ, मातुः। ङसेरादोदुहय इति उः। माआहिन्तो मातृभ्यः। भ्यसो हिन्तो सुन्तो इति हिन्तो आदेशः। माआणं, मातॄणाम्। अदन्तवद्भावात् टामोर्ण इति णः। माआसु मातृषु। आमन्त्रणेऽपि हे माए हे मातः। आत ए इत्याकारस्य एत्वम्। 'मातृष्वसृपितृष्वस्रोरप्यात्वं स्यादृतः सुपि'। माउस्सिआ, पिउस्सिआ। मातृष्वसा, पितृष्वसा। कगचादिना तलोपः। उद् ऋत्वादिषु इति ऋकारस्योत्त्वम्। शषोः स इति षस्य सः। सर्वत्र लवरामिति वलोपः। माउस्सिआओ, पिउस्सिआओ; मातृष्वसृपितृष्वस्रोः। जस ओत्वम्। सोर्लोपे कृते दाढादित्वादकारस्य इत्त्वं निपात्यते। ततश्च इकारात् परस्य सकारस्य लोपः। माउस्सिआओ, पिउस्सिआओ; मातृष्वसारः, पितृष्वसारः। जसो वेति जस ओत्त्वम्। एवमन्यास्वपि विभक्तिषु उदाहार्यम्। 'मातृवत् स्यान्ननान्दापि ऋत आत्त्वविधौ सुपि'। नणान्दा, ननान्दा। नणान्दाओ, ननान्दरः। पूर्ववद् जस ओत्त्वम्। नो ण इति णः। आदिस्थस्य तु न भवति। अनादाविति कस्यचिदत्रानुवर्तनत्वात् ॥३१॥

सुबोधिनी

मातृशब्दसम्बन्धिन ऋकारस्य आत्त्वं स्यात्। माआ, माता। 'मातृष्वसृपितृष्वस्रोरप्यात्त्वं स्यादृतः सुपि'। माउस्सिआ, पिउस्सिआ। 'मातृवत् स्यान्ननान्दाऽपि ऋत आत्त्वविधावपि'। नणान्दा। अत्र प्रथमनकारस्य णत्वं न स्यात् ॥३१॥

(२१९) उ जसूशस्टाङस्सु वा ॥३२॥

सञ्जीवनी

विशेषादिष्टः प्रकृतं न बाधते। ऋत इत्यनुवर्त्तते, तथैव अधिकाराकृष्ट आर इत्यपि। प्रथमाबहुवचनं जस्, द्वितीयाबहुवचनं शस्, तृतीयैकवचनं टा, षष्ठ्येकवचनं ङस्, एषु चतुर्षु परेषु ऋकारस्य उ आर इत्येतावादेशौ भवतः। भत्तू, भर्तारः। उकारादेशे कृते अदन्तवद्भावाद् जश्शसोर्लोप इति जसो लोपः। तथैव जसूङस्यादिना दीर्घः। पक्षे भत्तारा। अत्रारादेशे कृते मुख्या वृत्त्या जसो लोपो दीर्घत्वं च। भत्तुणो, भर्तॄन्। इदुतोः शसो णो इति णो आदेशः। भत्तारे। जश्शसोर्लोप इति शसो लोपः। **ए सुप्यङिङसोरित्येत्त्वम्**। भत्तुणा, भर्त्रा। टा णा इति णा आदेशः।

पक्षे भत्तारेण। पक्षे टामोर्ण इति टाप्रत्ययस्य णः। भत्तुणो, भर्तुः। ङसो वेति णो आदेशः। पक्षे भत्तारस्स ॥३२॥

सुबोधिनी

विशेषादिष्टः प्रकृतं न बाधत इति ऋत इत्यनुवर्त्तते। जस् शस् टा ङस् एषु ऋत उत्त्वं स्याद् वा। भत्तू, भत्तारो, भर्त्तारः। भत्तूणो, भत्तारे, भर्त्तॄन्। भत्तुणा, भत्तारेण, भर्त्रा। भत्तुणो, भत्तारस्स, भर्त्तुः ॥३२॥

(२२०) पितृभ्रातृजामातृणामरः ॥३३॥

सञ्जीवनी

विशेषादिष्टः प्रकृतं न बाधत इति सुपि इति प्रत्याहारोऽनुवर्तते। पितृ-भ्रातृ-जामातृ इत्येतेषां त्रयाणां सम्बन्धिन ऋकारस्य स्वादौ विभक्तिगणे परे अर इत्यादेशो भवति। ऋत आरः सुपीति आरादेशः प्राप्तः। पिअरा, भाअरा, जामाअरा। पितरः, भ्रातरः, जामातरः। जश्शसोर्लोप इति जसो लोपः। जसृङस्यादिना दीर्घः। पिअरं, भाअरं, जामाअरं। पितरम्, भ्रातरम्, जामातरम्। अतोऽम इति अकारलोपः। मो बिन्दुरिति बिन्दुः। पिअरे, भाअरे, जामाअरे। पितॄन्, भ्रातॄन्, जामातॄन्। जश्शसोर्लोप इति शसो लोपः। ए सुप्यङिङसोरिति एत्त्वम्। पिअरेण, भाअरेण, जामाअरेण। पित्रा, भ्रात्रा, जामात्रा। टामोर्ण इति णः। पिअराउ, भाअराउ, जामाअराउ। पितुः, भ्रातुः जामातुः। ङसेरादोदुहय इति उत्त्वम्। जसृङस्यांसु दीर्घ इति दीर्घः। पिअराहिंतो, भाअराहिंतो, जामाअराहिंतो। पितृभ्यः, भ्रातृभ्यः, जामातृभ्यः। भ्यसो हिंतो सुंतो इति हिंतो आदेशः। ए भ्यसीति भ्यस्येत्वे निषिद्धे ङसि पञ्चम्युपलक्षणत्वाद् जसृङस्यांसु दीर्घ इति दीर्घः। पिअरस्स, भाअरस्स, जामाअरस्स। पितुः, भ्रातुः, जामातुः। स्सो ङस इति स्सः। पिअराणं, भाअराणं, जामाअराणं। पितॄणाम्, भ्रातॄणाम्, जामातॄणाम्। टामोर्ण इति आमो णः। बिन्दुष्टामोर्ण इत्यादौ सन्नसन्नपि वा क्वचित्' इति बिन्दुः। पिअरे, भाअरे, जामाअरे। पितरि, भ्रातरि, जामातरि। ङेरेम्मी इति ङेरेत्त्वम्। क्वचिदपि लोप इति अलोपः। पिअरेसु भाअरेसु, जामाअरेषु। पितृषु, भ्रातृषु, जामातृषु। 'जसृशसृटाङस्सु वा स्यादुः पूर्वसूत्रानुवृत्तितः'। जसि – पिऊ, भाऊ, जामाऊ। उकारादेशे कृते अदन्तवद्भावाद् जसो लोपो दीर्घोऽपि। पिउणो, भाउणो, जामाउणो। इदुतो शसो णो इति णो आदेशः। टाप्रत्यये – पिउणा, भाउणा, जामाउणा। टा णा इति णादेशः। ङसि – पिउणो, भाउणो, जामाउणो। ङसो वेति णो आदेशः। मूलोदाहरणान्येव पाक्षिकोदाहरणानि ॥३३॥

सुबोधिनी

'विशेषादिष्टः प्रकृतं न बाधते' इति सुपीत्यनुवर्त्तते। एषां सम्बन्धिन ऋत अरः स्यात्। पिअरा, भाअरा, जामाअरा। पितरः, भ्रातरः, जामातरः। 'जस्शस्-टाङस्सु वा स्यादुः पूर्वसूत्राऽनुवृत्तितः' जसि – पिऊ, भाऊ, जामाऊ। शसि – पिउणो, भाउणो, जामाउणो। पक्षे – पिअरे, भाअरे, जामाअरे। टाप्रत्यये – पिउणा, भाउणा, जामाउणा। पक्षे – पिअरेण, भाअरेण जामाअरेण। ङसि – पिउस्स, भाउस्स, जामाउस्स। पक्षे – पिअरस्स, भाअरस्स, जामाअरस्स ॥३३॥

(२२१) आ च सौ ॥३४॥

सञ्जीवनी

पूर्वसूत्रमनुवर्त्तते। पितृभ्रातृजामातृणां सुप्रत्यये परे ऋकारस्य आकारादेशः स्यात्। अर आदेशश्च। पिआ, भाआ, जामाआ। पिता, भ्राता, जामाता। अन्त्यस्य हल इति सुलोपः। पक्षे – पिअरो, भाअरो, जामाअरो। अत ओत् सोरिति ओत्त्वम्। क्वचिदपि लोप इत्यलोपः। आमन्त्रणेऽपि। हे पिआ, हे भाआ, हे जामाआ। हे पितः, हे भ्रातः, हे जामातः। 'पित्रादिभ्यः परस्यापि सावाकार ऋतो मतः' **भत्ता**, भर्ता। कत्ता, कर्त्ता। पोत्ता, पोता। आमन्त्रणेऽपि- हे भर्तः, हे कर्तः, **हे पोतः**। पूर्ववद् ओत्त्वं न भवति ॥३४॥

सुबोधिनी

एषामेव ऋतः सौ आत्त्वं स्यात्। पिआ, भाआ, जामाआ। चकारादरश्च। तेन पिअरो, भाअरो, जामाअरो। आमन्त्रणेष्वेवम्। 'पित्रादिभ्यः परस्यापि सावाकार ऋतो मतः'। भत्ता, भर्त्ता। कत्ता, कर्त्ता। पोत्ता, पोता ॥३४॥

(२२२) राज्ञः ॥३५॥

सञ्जीवनी

पूर्वसूत्रमनुवर्त्तते। राजन्शब्दस्य सुप्रत्यये परे आकारादेशो भवति। वर्णान्तरस्य विधिरिति वचनादन्त्यस्य। राआ, राजा। अन्त्यस्य हल इति नकारसुकारलोपः ॥३५॥

सुबोधिनी

राजन्शब्दे सौ परे आकारः स्यात्। वर्णान्तरस्य विधिरिति वचनादन्त्यस्य। राआ ॥३५॥

(२२३) आमन्त्रणे बिन्दुर्वा ॥३६॥

सञ्जीवनी

अर्थवशाद् विभक्तिविपरिणाम इति वचनाद्राज्ञ इति पञ्चम्यन्तमनुवर्त्तते, आत्मनोऽप्पाणो वेति अतः प्राक्। साविति षष्ठ्यन्तम्। तेन राजन्शब्दात् परस्यामन्त्रणेऽर्थे उत्पन्नस्य सुप्रत्ययस्य बिन्दुरादेशः स्यात्। हे राअं, हे राजन्। पक्षे – हेराआ। 'बिन्दुदीर्घौ विनाह्वाने राज्ञो हे राअ इत्यपि'। 'भवद्भगवतोर्बिन्दुः। सावना-मन्त्रणेऽपि च' भवं, भअवं; भवान्, भगवान्। अन्त्यस्य हल इति नलोपः। एवं हे भवं, हे भअवं, हे भवन्, हे भगवन् ॥३६॥

सुबोधिनी

अर्थवशाद्विभक्तिविपरिणामेन राज्ञ इति पञ्चम्यन्तमनुवर्त्तते। राजन्शब्दादनन्तरमामन्त्रणेऽर्थे उत्पन्नस्य सुप्रत्ययस्य बिन्दुः स्यात्। हे राअं, हे राजन्। पक्षे – हे राआ। 'बिन्दुदीर्घौ विनाह्वाने राज्ञो हे राअ इत्यपि'। हे राअ। 'भवद्भगवतोर्बिन्दुः सावनामन्त्रणेऽपि च'। भवं, भअवं, भवान्, भगवान्। हे भवं, हे भअवं; हे भवन्, हे भगवन् ॥३६॥

(२२४) जसशस्ङसां णो ॥३७॥

सञ्जीवनी

जस् शस् ङस् इत्येतेषां त्रयाणां राजन्शब्दात् परेषां णो आदेशो भवति। जश्शसोर्लोप इत्यस्य स्सो ङसः इत्येतस्य चापवादः। जसः– राआणो, राजानः। शस् – राआणो पेच्छ, राज्ञः पश्य। आकारादेशश्च। पूर्वेण ए इत्यादेशः प्राप्तः। राआणो पुलअ, राज्ञः पश्य। आ णोणमोरङसीत्यात्त्वम्।

राए पच्छ, राज्ञः पश्य। अत्र शस एत्वे कृते क्वचिदपि लोप इति जलोपावशिष्टाकारस्य लोपः। अनेनैवादेशद्वयसिद्धत्वात् पूर्वसूत्रे शस आदानं न कर्तव्यमित्याहुः। ननु जश्शसोर्लोप इति शसो लोपे कृते ए सुप्यङिङसोरिति एत्त्वे कृते राए इत्यस्य सिद्धत्वात् किं पुनरायासेन ? राआउ, राआओ। ङसेरादोदुहय इति उ ओ इत्येतावादेशौ। जस्ङस्यादिना दीर्घः। राए राजनि। ङेरम्मी इति एत्त्वम्। राए पेच्छ, राज्ञः प्रेक्षस्व। शस एच्चेत्येत्त्वम्। उभयत्रापि क्वचिदपि लोप इति अलोपः। 'भिस्भ्यसांङस्सुपामित्वं राज्ञोऽकारस्य चेष्यते'। भिसि– राइहिं, राजभिः। पक्षे– राएहिं। ए सुप्यङिङसोरित्येत्त्वम्। भ्यसि– राइहिंतो, राइसुंतो। पक्षे–राआहिंतो, राआसुंतो। ङसेः पञ्चम्युपलक्षणत्वाद् जस्ङस्यांसु दीर्घ इति दीर्घः। आमि– राइणं,

राज्ञाम्। टामोर्ण इति आमो णः। तस्मिन् बिन्दुः। पक्षे राआणं। पूर्ववद् दीर्घः। सुपि – राइसु, राएसु, राजसु। ए सुप्यङ्ङिसोरिति एत्वम् ॥३७॥

सुबोधिनी

राजन्शब्दात् परेषां जस् ङस् इत्येतेषां णो इति स्यात्। राआणो इति जश्शसोः। ङसि – राइणो ॥३७॥

(२२५) शस एच्च[1] ॥३८॥

सुबोधिनी

राजन्शब्दादुत्तरस्य शस एकारः स्यात्। चकारात् णो इत्यपि। राए, राआणो। अनेनैवादेशद्वयसिद्धे पूर्वसूत्रे शस्ग्रहणं न कर्त्तव्यमित्याहुः। राज्ञः शसो णो इत्यादेशो नित्यं प्राप्तोऽनेन सूत्रेण विकल्प्यते ॥३८॥

(२२६) अमो णं ॥३९॥

सुबोधिनी

राजन्शब्दात् अमो णं इति स्यात्। राआणं, राजानम्। राआणमिति षष्ठीबहुवचने बिन्द्वागमस्य प्रकारान्तरेणाऽपि संभवात्, अमादेशस्य प्रापकाभावाच्च। आमो णमिति कैश्चित् पठितमिदं सूत्रं नादेयम् ॥३९॥

(२२७) टा णा ॥४०॥

सुबोधिनी

टा इति लुप्तषष्ठ्यन्तं पदम्। राजन्शब्दात् टा इत्यस्य णा स्यात्। राइणा ॥४०॥

(२२८) ङसश्च द्वित्त्वं वा जलोपश्च ॥४१॥

सुबोधिनी

ङस इत्यादेशिन आदेशो गृह्यते। राजन्शब्दात् ङसादेशस्य णो इत्यस्य द्वित्त्वं वा स्यात्। द्वित्त्वपक्षे राजन्शब्दस्य जकारलोपश्च। साच्कजकारलोपार्थमयमारम्भः। चकारात् टादेशस्य णा इत्यस्यापि परिग्रहः। द्वित्त्वं त्वत्र व्यञ्जनमात्रस्य। रण्णो, राज्ञः। पक्षे राइणो। रण्णा; पक्षे राइणा, राज्ञा। 'णो ङसेर्णत्वद्वित्वं स्याद् राज्ञो लोपश्च जस्य वा'। रण्णो, राइणो; राआ, राआउ, राआहिन्तो। एते पञ्चम्यां ङसौ ॥४१॥

---

१. इत आरभ्य एकोनत्रिंशत्तमसूत्रं यावत् सञ्जीवनी नोपलभ्यते।

(२२९) इदद्वित्वे ॥४२॥

सुबोधिनी

टा ङस इत्यनयोर्द्वित्वाऽभावपक्षे राजन्शब्दस्य इत्त्वं स्यात् । अन्त्यविधिबलान्निरच्क-जकारलोपानन्तरमवशिष्टस्य अकारस्य भवति । राइणा, राज्ञा । राइणो, राज्ञः । अद्वित्वे इति किम् ? रण्णा, रण्णो । 'ङसिङ्योर्जश्शसो राज्ञ इवदिशेऽनजादिके' । ङसौ – राइणो । ङौ – राइम्मि । जसि – राइणो । शसि – राइणो । पक्षे रण्णो, राअम्मि, राआणो, राआणो । आदेशेऽनजादिक इति वचनादजादौ न भवति । ङसौ – राआओ, राआउ । ङौ – राआए, राए । 'भिसुभ्यसोरांसुपो रित्त्वं राज्ञोऽकारस्य चेष्यते' – राइहिं, राएहिं, राजभिः । राइहिन्तो, राइसुन्तो, राआहन्तो, राआसुन्तो, राजभ्यः । राइणं, राआणं, राज्ञाम् । राइसु, राएसु, राजसु ॥४२॥

(२३०) आ णोणमोरङसि ॥४३॥

सञ्जीवनी

णो णं इत्यादेशौ । एतयोः परयो राज्ञ इत्यस्य आकारादेशो भवति । षष्ठ्येकवचनस्य ङस आदेशं वर्ज्जयित्वा । राआणो राजानः । जस्शस्ङसां णो इति णो आदेशः । राआणो णिअच्छ, राज्ञः पश्य । शस एच्चेति णो आदेशः राअणं, राज्ञाम् । आमो णं इति णं आदेशः । अङसीति किम् ? राइणो, अण्णा, राज्ञः । इदद्वित्वे इतीत्त्वम् ॥४३॥

सुबोधिनी

ङसादेशं वर्जयित्वा यौ णो ण इत्यादेशौ तयो राजन्-शब्दान्तस्य आत्त्वं स्यात् । जश्शसोः– राआणो । अमि– राआणं । अङसीति किम् ? राइणो अण्णा, राज्ञः आज्ञा ॥४३॥

(२३१) आत्मनोऽप्पाणो वा ॥४४॥

सञ्जीवनी

आर सुपीत्यतो मण्डूकप्लुतिन्यायेन सुपीत्यनुवर्तते सर्वादिरित्यतः प्राक् । तेन आत्मन्शब्दे सुपि प्रत्याहारे परे अप्पाण इत्यादेशो वा निपात्यते । **प्रत्ययलोपागमवर्णविकारेषु यल्लक्षणेनानुपपन्नं तन्निपातनात् साध्यते इत्यर्थः ।** अप्पाणो आत्मा । अत ओत् सोरिति ओत्त्वम् । क्वचिदपि लोप इत्यलोपः । अप्पाणा, आत्मानः । जस्शसोर्लोप इति जसो लोपः । जस्ङस्यांसु

दीर्घ इति दीर्घः। इत्यादयः पुंस्यकाराः। अत्र समुचितेन रूपेणोदाहरणीयाः। अनादेशपक्षोदाहरणानि य उत्तरसूत्रोदाहरणान्येव ॥४४॥

सुबोधिनी

मण्डूकप्लुतिन्यायेन सुपीत्यनुवर्तते। सुपि परे 'आत्मन्'शब्दस्य अप्पाण इति निपात्यते। अप्पाणो, अप्पा, आत्मा ॥४४॥

(२३२) इद् द्वित्ववर्जं राजवदनादेशे ॥४५॥

सञ्जीवनी

आत्मन इत्यनुवर्तते। राजा इव राजवद् अतिदेशार्थम्। तेन अनादेशपक्षे अप्पाण इत्यादेशाभावपक्षे आत्मन्शब्दस्य सुपि प्रत्याहारे परे राजवद्भावो भवति। राज्ञ आमन्त्रणे बिन्दुर्वेत्यादीनि कार्याणि अतिदेशाद् आत्मनो भवन्ति। किं सर्वाण्यपीत्याह– इद्द्वित्ववर्जमिति। इदद्वित्व इति यद् इत्त्वं ङसश्च द्वित्वमित्यादिना यद् द्वित्वं **तद्** वर्जयित्वा। अप्पा, आत्मा। अदातो यथादिषु वेत्यत्त्वम्। आत्मनि प इति त्म **इत्यस्य** पः। तस्य शेषादेशादिना द्वित्वम्। अन्त्यस्य हल इति नकारसुकारयोर्लोपः। **ततः** प्रत्ययलोपपरिभाषया आ च सावित्यनुवर्तमाने राजवद्भावाद् राज्ञ इत्यात्त्वम्। **हे अप्पं,** हे आत्मन्। आमन्त्रणे बिन्दुर्वेति सोर्बिन्दुः। पक्षे आत्त्वम्। हे अप्प। **'बिन्दुदीर्घौ** विनाह्वाने राज्ञो हे राअ इत्यपि'। इति बिन्दुदीर्घयोरभावः। अप्पाणो, आत्मानः। जस्शस्ङसां णो इति जसो णो आदेशः। पूर्ववद् दीर्घः। यत्र त्वेकारस्तत्र **क्वचिदपि** लोप इत्यकारलोपः। अप्पाणं, आत्मानम्। अमो णं इति णमादेशः। आ णोणमोरङसीति आत्वम्। इद्द्वित्ववर्ज्जमिति किम्? अप्पणा, आत्मना। टा णा इति णादेशः! **अप्पाणो,** आत्मनः। जस्शस्ङसां णो इति ङसो णो आदेशः। ङसश्च द्वित्वं वेत्यादिना णाणोर इत्यादेशयोर्द्वित्वं प्राप्तम्। तन्न भवति। तदभावादेव द्वित्वं प्राप्तम्। तदपि न भवति। 'केचित्तु नित्यमप्पाणं भिसामोर्ङिसुपोर्विदुः'। अप्पाणेहिं आत्मभिः। भिसो हिमिति हिं। ए सुप्यङिङसोरित्येत्वम्। आप्पाणाणं, आत्मनाम्। टामोर्ण इति आमो णः। जस्ङस्यादिना दीर्घः। अप्पाणे, आत्मनि। ङेरेम्मी इति एत्वम्। क्वचिदपि लोप इत्यलोपः। अप्पाणेसु, **आत्मसु। 'अन्यत्रादेशतोऽन्येषां** टा इत्यस्य णिआ भवेत्'। अप्पाणिआ आत्मना ॥४५॥

सुबोधिनी

अप्पाण इत्यादेशाभावपक्षे आत्मशब्दस्य राजशब्दस्येव कार्यं स्यात् । किं राज्ञः आमन्त्रणे चेत्यादिसर्वकार्याण्यविशेषेणेत्याह– इद्द्वित्ववर्जमित्यादिना । इदद्वित्वमिति यद् इत्त्वं ङसश्च द्वित्त्वं वेत्यादिना यद् द्वित्त्वं विहितं तद्वर्ज्जम् । अप्पा, आत्मा । हे अप्प, हे अप्पा, हे आत्मन् । अप्पाणो, आत्मानः । अप्पाणो, अप्पे, आत्मनोः । अप्पाणं, आत्मानम् । इद्द्वित्ववर्जमिति किम् ? अप्पणा, आत्मना । अप्पाणो, आत्मनः । 'केचित्तु नित्यमप्पाणो भिसामोर्ङिसुपोर्विदुः' । अप्पाणेहिं, आत्मभिः । अप्पाणाणं, आत्मनाम् । आप्पणे, आत्मनि । अप्पाणेसु, आत्मसु । 'अन्यत्रादेशतोऽन्येषां टा इत्यस्य णिआ भवेत्' । अप्पाणिआ, आत्मना ॥४५॥

(२३३) ब्रह्मादयोऽप्येवम् ॥४६॥

सञ्जीवनी

ब्रह्माद्या आत्मवदिति यावत् । ब्रह्मशब्देन सदृशा ब्रह्मादयः । एवं पूर्वप्रकारेण वा निपात्यते । कोऽयमभिप्रायः ? यथा सुपि परे आत्मशब्दस्य अप्पाण इति निपात्यते वा, तथा ब्रह्मादीनामपि सुपिस्थानामतिदेशतया बम्हाण इत्यादयो निपात्यन्ते । तथा इद् द्वित्ववर्जं राजवदनादेशे इत्यनेन यथा आत्मशब्दस्य राजवद्भावस्तथैवादेशाद् अत्र ब्रह्मादीनां राजवद्भावो द्रष्टव्यः । ब्रम्हाणो, ब्रह्मा । अत ओत् सोरित्योत्त्वम् । बम्हणा, ब्रह्माणः । जस्शसोर्लोप इति जसो लोपः । जसूङस्यादिना दीर्घः । बम्हाणं, ब्रह्माणम् । अतोऽम इति अलोपः । बम्हाणं पेच्छ, ब्रह्मणः प्रेक्षस्व । पूर्ववत् शसो लोपः । अनोदेशे बम्हा, ब्रह्मा । अन्त्यस्य हल इति नकारसुकारयोर्लोपः । ह्नल्ह्मेत्यादिना हस्योपरि मस्य स्थितिः । राजवद्भावाद् राज्ञ इति आत्त्वम् । बम्हाणो, ब्रह्माणः । शस एच्चेति णो आदेशः । पूर्ववदात्त्वम् । यत्र त्वेकारस्तत्र क्वचिदपि लोप इत्यलोपः ।

बम्हाणो ब्रह्मणो वा स्याद् यूनो जूआण इत्यपि ।
राज्ञो राआण आदेशो ग्राव्णो गावाण इत्यपि ॥
अर्यमस्त्वज्जमाणो वा पूष्णः पूसाण इत्यपि ।
अद्धाणो त्वध्वनः स्थाने ब्रह्माद्या एवमाध्यः ॥

एषां च यत्र पक्षे निपातनं तत्रैते अकारान्तसमुचितेन रूपेण किलोदाहरणीयाः । अनिपातनपक्षे त्वेते राजशब्दवद् इदद्वित्वसूत्रे चात्मशब्दवदुदाहरणीयाः । ब्रह्मादिपर्यन्ते

राजप्रकारेण यस्य विभक्तौ विशेषेण लक्षणं नोक्तं तत्र यथासम्भवं प्रकारान्तराल्लक्षणमनुसन्धेयमिति ॥४६॥

सुबोधिनी

ब्रह्मशब्दादयोऽपि एवम् अप्पाणनिपातनप्रकारेण वा निपात्यन्ते। निपातनाभावपक्षे चेद् द्वित्त्ववर्जं राजशब्दवत् कार्यं भजन्ते।

बम्हाणो ब्रह्मणो वा स्याद् यूनो जूवाण इत्यपि।

राज्ञो राआण आदेशो ग्राव्णो गावाण इत्यपि॥

उक्ष्ण उच्छाण इत्येवं पूष्णः पूसाण इत्यपि।

अद्धाण अध्वनः स्थाने ब्रह्माद्या एवमादयः॥

अनिपातनपक्षे बम्हा, ब्रह्मा इत्यादिक्रमेणोदाहरणानि ज्ञेयानि ॥४६॥

(२३४) सर्वादेः ॥४७॥

सञ्जीवनी

सर्वशब्द आदिर्यस्य स सर्वादिर्गणः। अधिकारोऽयम्। यदित ऊर्ध्वमुपक्रमिष्यामस्तत् सर्वादेः सर्वनाम्नो भवतीत्यर्थ इत्यधिकृतं वेदितव्यम्। सर्वादेरिति चार्थवशात् क्वचित् पञ्चम्यन्तम्, क्वचित् षष्ठ्यन्तमनुसन्धातव्यम्। द्वेर्दो इति यावदयमधिकारः। उक्तं सर्वादीनि सर्वनामानीति। तथा च–

सर्वो विश्व उभोभयौ तरतमौ डादी किमन्येतर–

त्वंनेमान्यतरान्तराः समभवत् त्यत्तत्त्वदेतद्यदः।

सीमेदंपरयुष्मदस्मदधाराद्व्येकोत्तरार्द्धादसः

पूर्वस्वापरदक्षिणावर इति त्रिंशत् समं पञ्चभिः ॥४७॥

सुबोधिनी

सर्व आदिर्येषां ते सर्वादयः। सर्वादय सर्वनामशब्दाः।

सर्वो विश्व उभोभयौ तरतमौ डादी किमन्येतर

त्वन्नेमान्यतरान्तरा समभवत्त्यत्तत्त्वदेतद्यदः।

सीमेदंपरयुष्मदस्मदधराद्व्येकोत्तरार्द्धादसः

पूर्वस्वापरदक्षिणावर इति त्रिंशत् समं पञ्चभिः॥

अतः परं यद्वक्तव्यं कार्यं तत् सवदिर्वेदितव्यम्। अधिकारोऽयम्। सर्वादेरित्यर्थवशादुत्तरसूत्रे क्वचित् पञ्चम्यन्तम्, क्वचित् षष्ठ्यन्तमनुमन्तव्यम्॥४७॥

(२३५) जस एत् ॥४८॥

सञ्जीवनी

सवदिः परस्य जस एकारादेशः स्यात्। जस्शसोर्लोप इति लोपः प्राप्तः। सव्वे, सर्वे। के इमे किमिदमोः। किमः कः इदमः इम इति च क इम इत्यादेशौ। जे ते यत्तदोः। अन्त्यस्य हल इति दलोपः। अण्णे, इतरे; अन्येतरयोः। सर्वत्र जस एत्वे कृते क्वचिदपि लोप इत्यलोपः। इत्यादयोऽन्येऽपि॥४८॥

सुबोधिनी

सवदिः परस्य जस एकारः स्यात्। सव्वे, सर्वे। एवं विश्वादीनामप्युदाहरणीयम्॥४८॥

(२३६) ङेः स्सिम्मित्थाः॥४९॥

सञ्जीवनी

सवदिर्गणात् परस्य ङिप्रत्ययस्य स्सिं म्मि त्थ इत्येते कृतद्वित्वा त्रय आदेशा भवन्ति। ङेरेम्मी इति एत्वस्यापवादः। सव्वस्सिं, जस्सिं, तस्सिं, सर्वस्मिन्, यस्मिन्, तस्मिन्। सव्वम्मि, जम्मि, तम्मि। सव्वत्थ, जत्थ, तत्थ इत्यादयः॥४९॥

सुबोधिनी

सवदिः परस्य ङेः स्थाने स्सिं म्मि त्थ इत्यादिश्यन्ते। सव्वस्सिं, जस्सिं, तस्सिं, कस्सिं; सव्वम्मि, जम्मि, तम्मि, कम्मि; सव्वत्थ, जत्थ, तत्थ, कत्थ; सर्वस्मिन्, यस्मिन्, तस्मिन्, कस्मिन् इत्यादयः॥४९॥

(२३७) इदमेतत्किंयत्तद्भ्यष्टा इणा वा ॥५०॥

सञ्जीवनी

टा इति लुप्तषष्ठ्यन्तम्। इणा इति लुप्तप्रथमान्तम्। इदम्, एतत्, किम्, यत्, तत्, एभ्यः पञ्चभ्यः सर्वादिगणपठितेभ्यः परस्य टाप्रत्ययस्य इणा इत्यादेशो वा भवति। टामोर्ण इति नित्यो णकारादेशः प्राप्तः। स विकल्प्यते। इदमस्तावत्—

इमिणा, इमेण, अनेन । एतदः – एदिणा, एदेण, एतेन । अन्त्यस्य हल इति दलोपः । ऋत्वादिषु तो द इति दः । पक्षे कगचादिना तलोपः ॥५०॥

सुबोधिनी

टा इति लुप्तषष्ठ्यन्तम्। इदम्, एतद्, यद्, तत्, किम् एभ्यः परस्य टा इत्यस्य इणा इति स्यात् । इमिणा, इमेण, अनेन । एदिणा, एइणा, एदेण, एएण, एतेन । किणा, केण, केन । जिणा, जेण, येन । तिणा, तेण, तेन ॥५०॥

(२३८) आम एसिं ॥५१॥

सञ्जीवनी

इदमादिभ्यः परस्य आम् इत्यस्य एसिं इति वा स्यात् । इमेसिं, इमाण, एषाम् । एदेसिं, एदाण, एतेषाम् । किमः– केसिं, काण, केषाम् । किमः क इति कः । यतः – जेसिं, जाण, येषाम् । यत्र एसिं आदेशो न, तत्र सर्वत्र जसुङस्यादिना दीर्घः । 'सव्वेसिं आमि सव्वाणं सर्वलिङ्गेषु तत्समम्' ॥५१॥

सुबोधिनी

इदमादिभ्यः परस्य आम् इत्यस्य एसिं इति वा स्यात् । इमेसिं, इमाण, एषाम् । एदेसिं, एदाण, एएसिं, एआण, एतेषाम् । केसिं, काण, केषाम् । जेसिं, जाण, येषाम् । तेसिं, ताण, तेषाम् ॥५१॥

(२३९) किंयत्तद्भ्यो ङस आस ॥५२॥

सञ्जीवनी

आस इत्येतत् लुप्तप्रथमान्तम् । किम्, यत्, तत् एभ्यः पर य ङसः आस इत्यादेशो वा भवति । स्सो ङस इति नित्यं स्सादेशः प्राप्तः । किमस्तावत्– कास । पक्षे कस्स, कस्य । यदः– जास, जस्स, यस्य । तदः– तास, तस्स, तस्य ॥५२॥

सुबोधिनी

किम्, यत्, तद् एभ्यः परस्य ङस आस इति स्याद् वा । कास, कस्स, कस्य । जास, जस्स, यस्य । तास, तस्स, तस्य ॥५२॥

(२४०) इद्भ्यः स्सासे ॥५३॥

सञ्जीवनी

किंयत्तद्भ्य इत्यनुवर्तते। ओ त्तो दो ङसेरनिदम इत्यतः प्राक् ङस् इत्यनुवर्तते। स्सासे इति द्विवचनान्तम्। इद्भ्यः इप्रत्ययान्तेभ्यः किंयत्तद्भ्यः परस्य स्सासे इत्यादेशौ भवतः। टाङस्ङीनामिदेदादत इत्येत एव प्राप्ताः। किमः– किस्सा, कीसे, कस्याः। किमः क इति कः। आदीतौ बहुलमिति ईप्रत्ययः। क्वचिदपि लोप इति वा सन्धावचामित्यादिना वा अकारलोपः। पक्षे कीआ, कीए, कीअ। एवं यदः– जिस्सा, जिसे, यस्याः। पक्षे जीआ, जीए, जीइ, जीअ। तदः– तिस्सा तिसे। पक्षे तीआ, तीए, तीइ, तीअ। स्सादेशे सर्वत्र इदीतः पानीयादिषु इति इत्त्वम्। 'किंयत्तद्भ्यो भवत्याद्भ्यः स इत्येव तु वा ङसः।' कास, जास तास। आदीतौ बहुलमिति आप्रत्ययः। पूर्ववदकारलोपो वा सन्धिर्वा। पक्षे काइ, काए; जाइ, जाए; ताइ, ताए। टाङस्ङीनामिदेदादत इति ङस ए इ इत्यादेशौ। अ आ इत्येतौ न भवतः, नातोऽदातौ इति प्रतिषेधात् ॥५३॥

सुबोधिनी

इप्रत्ययान्तेभ्यः किंयत्तद्भ्यः परस्य ङसः स्सा से इत्यादेशौ वा स्तः। किस्सा, किस्से, कस्याः। जिस्सा, जीसे, यस्याः। तिस्सा तीसे, तस्याः। पक्षे कीइ, कीए, कीअ, कीआ। जीइ, जीए, जीअ, जीआ। तीइ, तीए, तीअ, तीआ। 'किंयत्तद्भ्यो भवत्याद्भ्यः स इ ए वा ङसस्तथा'। कास, यास, तास। काइ, जाइ, ताइ। काए, जाए, ताए ॥५३॥

(२४१) ङेर्हिं ॥५४॥

सञ्जीवनी

इद्भ्य इति निवृत्तमनपेक्षितत्वात्। किम्यत्तद्भ्यः परस्य ङिप्रत्ययस्य हिं इत्यादेशो वा भवति। ङे स्सिम्मित्था इत्येव प्राप्ताः। कहिं, जहिं, तहिं; कस्मिन्, यस्मिन्, तस्मिन्। पक्षे कसिं, कम्मि, कत्थ। जस्सिं, जम्मि, जत्थ। तस्सिं तम्मि, तत्थ। 'अन्यशब्दात् परस्यापि हिंकारो ङेर्विकल्प्यते'। अण्णेहिं, अन्यस्मिन्। पक्षे अणस्सिं, अण्णम्मि, अण्णत्थ ॥५४॥

सुबोधिनी

किं यत्तद्भ्यः परस्य स्थाने हिं इत्यादिश्यते वा। कहिं, जहिं, तहिं; कस्मिन्, यस्मिन्, तस्मिन्। पक्षे कस्सिं, कम्मि, कत्थ इत्यादयोऽपि द्रष्टव्याः। 'अन्यशब्दात् परस्यापि हिंकारो ङेर्विकल्प्यते'। अण्णेहिं। पक्षे अणस्सिं, अण्णम्मि, अण्णत्थ ॥५४॥

(२४२) आहे इआ काले ॥५५॥

सञ्जीवनी

ङेरित्यनुवर्त्तते। आहे इआ इति लुप्तप्रथमाद्विवचनान्तम्। किंयत्तद्भ्यः **परस्य** ङिप्रत्ययस्य आहे इआ इत्यादेशौ भवतो वा काले। ङेर्हिमिति ङेः स्सिम्मित्था **इत्येत** एव प्राप्ताः। तदेवं षडादेशा भवन्तीत्यर्थः। काहे कइआ; कस्मिन् काले कदा। **पक्षे**- कहिं, कस्सिं, कम्मि, कत्थ। यदः – जाहे, जइआ; यस्मिन् काले यदा। पक्षे-जहिं, जस्सिं, जम्मि, जत्थ। तदः– ताहे, तइआ, तस्मिन् काले तदा। पक्षे-तहिं, तस्सिं, तम्मि, तत्थ। 'आला इत्यपि यत्तद्भ्यां काले वाच्ये वदन्ति ते'। जाला, ताला; यदा, तदा। 'काले ङेरेतदस्याहे एकशब्दादिआ तु वा'। एत्ताहे, एतस्मिन् काले। क्वचिदपि लोप इत्यलोपः। नीडादिष्विति तस्य द्वित्वम्। पक्षे ङेः स्सिम्मित्था इति। एतस्सिं, एतम्मि, एत्थ। अत्र त्तत्थयोस्तलोप इति तलोपः। एक्कइआ, एकस्मिन् काले एकदा। पक्षे पूर्ववत्– एक्कस्सिं, एक्कम्मि, एक्कत्थ। नीडादिष्विति चतुर्ष्वपि ककारस्य द्वित्वम्। आदेशः सर्वशब्दस्य काले ङेराइ इष्यते'। सव्वाइ, सर्वस्मिन् काले सर्वदा। **पक्षे**– सव्वस्सिं, सव्वम्मि, सव्वत्थ ॥५५॥

सुबोधिनी

किंयत्तद्भ्यः परस्य ङेः काले प्रतिपाद्ये आहे इआ इत्यादेशौ वा स्तः। **काहे**, कइआ। जाहे, जइआ। ताहे, तइआ। पक्षे कहिं इत्यादयः। 'आला इत्यपि यत्तद्भ्यां काले वाच्ये विधीयते' जाला, ताला। 'काले तु एतदस्याहे एकशब्दादिआ तु वा'। एत्ताहे, एतस्मिन् काले। पक्षे–एअस्सिं, एअम्मि, एत्थ। एक्कइआ, एकदा। पक्षे– एक्कस्सिं, एक्कम्मि, एक्कत्थ। 'आदेशः सर्वशब्दस्य काले ङेराइ इष्यते'। सव्वाइ, सर्व्वदा। पक्षे पूर्ववत् ॥५५॥

(२४३) ओत्तोदो ङसेरनिदमः ॥५६॥

सञ्जीवनी

वेति निवृत्तम्। ओत्तोद्दो लुप्तप्रथमाबहुवचनान्तम्। अनिदमः इदंशब्दरहितात् सवदिः परस्य ङसिप्रत्ययस्य ओ त्तो दो इति त्रय आदेशा भवन्ति। ङसेरादोदुहय इत्यस्य बाधः। सव्वओ, सव्वत्तो, सव्वदो; सर्वस्मात्, सर्वतो वा। अण्णओ, अण्णत्तो, अण्णदो; अन्यस्मात्, अन्यतो वा। तओ, तत्तो, तदो; तस्मात् ततो वा। अन्त्यस्य हल इति दलोपः। इत्यादयः। अनिदम इति किम्? इमाओ, इमाहि, अस्मात्। **अस्मादिदमः 'सर्वादिष्विदमो दीर्घो न त्वन्येषां ङसौ भवेदिति'** दीर्घः। इमाहिंतो।

'ङसेरतः परस्येह हिन्तो इत्यपि दृश्यते'। इति हिंतो आदेशः। पूर्ववद् दीर्घः। 'तो इत्यपि तदः प्राहुरादेशं ङसिना सह'। तो, तस्मात् ॥५६॥

सुबोधिनी

ङसिप्रत्ययस्य ओ त्तो दो इत्यादेशाः स्युः, इदं शब्दं वर्जयित्वा। सव्वओ, सव्वतो, सव्वदो; सर्वस्मात्। एवं विश्वादीनामुदाहरणीयम्। अनिदम इति किम्? इमाओ, इमाहि, इमाहिन्तो; अस्मात्। 'तो इत्यपि तदः प्राहुरादेशं ङसिना सह'। तो, तस्मात् ॥५६॥

(२४४) तदो ङसा से वा स्त्रियामपि ॥५७॥

सञ्जीवनी

से इति लुप्तप्रथमैकवचनान्तम्। न केवले पुंनपुंसकयोः, स्त्रीलिङ्गेऽपि तच्छब्दस्य ङस्प्रत्ययेन सह से इत्यादेशो भवति वा। पुंनपुंसकयोः स्सो ङस इति, स्त्रियां तु टाङस्ङीनामिदेदादत इत्येत एव प्राप्ताः। ते विकल्प्यन्ते। से, तस्य। पक्षे तस्स। से, तस्याः। पक्षे तीए, तीआ। 'एतदोऽपि ङसा से वा त्रिलिङ्ग्यामिष्यते बुधैः'। से, एतस्य। पक्षे एतस्स। से, एतस्याः। पक्षे– एआए, एआइ। टाङस्ङीनामित्यादिना इ ए आदेशौ ॥५७॥

सुबोधिनी

स्त्रियामपि। ङस्प्रत्ययेन सह तच्छब्दस्य स्त्रियां से वा आदिश्यते। अपिशब्दात् पुंनपुंसकयोरपि। से तस्य, तस्याः। पक्षे तस्स, तीइ, ताए इत्यादयः। 'एतदोऽपि ङसा से वा त्रिलिङ्ग्यामिष्यते बुधैः'। से, एतस्याः, एतस्य वा। पक्षे– एआइ, एअस्स इत्यादयः ॥५७॥

(२४५) आमः सिं ॥५८॥

सञ्जीवनी

तद इति वेति स्त्रियामिति च अनुवर्त्तन्ते। सिमिति लुप्तप्रथमैकवचनान्तम्। तेन स्त्रीलिङ्गेऽपि तच्छब्दस्य आप्रत्ययेन सह सिं इत्यादेशो भवति। सिं, तेषाम्। पक्षे ताणं। सिं, तासाम्। पक्षे ताण। आदीतौ बहुलमिति आप्रत्ययः। 'आंटाभिस्सु तदः स्थाने ण इत्येतत् स्त्रियामपि'। णं पेच्छ, तं प्रेक्षस्व। णेण कअं, तेन कृतम्। णाइ कअं, णाए कअं, तया कृतम्। टाङस्ङीनामिदेदादत इति टाप्रत्यस्य इ एं एतावादेशौ। णाहिं कअं, ताभिः कृतम्। शेषाददन्तवद् इत्यतिदेशाद् भिसो हिं स्त्रियामपि। आदीतौ बहुलमिति आप्रत्ययः। 'स्त्रियामपि सहैवामा स्याच्च सिं इदमोऽपि वा'। सिं, एषाम्। सिं, आसाम्। पक्षे इमाण। आदीतौ बहुलमिति आपक्षे इमाण। टामोर्ण इति आमो णः। जस्ङस्यादिना दीर्घः ॥५८॥

सुबोधिनी

तच्छब्दस्य आंप्रत्ययेन सह सिं वा आदिश्यते। स्त्रियां पुंनपुंसकयोश्च। सिं, तासां तेषां वा। पक्षे ताण, ताणं वा। 'आंटाभिस्सु तदः स्थाने ण इत्येषु स्त्रियामपि'। णं, तं, णेण, तेन, णेहिं, तैः। णं, तां; णाइ, णाए, तया, णाहिं, ताभिः। 'स्त्रियामपि सहैवामा स्याच्च सिं इदमोऽपि वा'। सिं, आसाम्, एषां वा। पक्षे इमाण ॥५८॥

(२४६) किमः कः ॥५९॥

सञ्जीवनी

ऋत आरः सुपि इत्यतः सुपीत्यनुवर्त्तते। उत्तरत्र च। सुपि प्रत्याहारे परे किंशब्दस्य कादेशः स्यात्। को, कः। अत ओत् सोरिति ओत्त्वम्। के, क एव। जसः एच्चेति एत्त्वम्। क्वचिदपि लोप इत्यलोपः। कं, कमेव। अतोऽम इति अलोपः। कीइ, कीए, कया, कस्याः, कस्यां वा। टाङस्ङीनामित्यादिना अत्र त्रयाणामन्यतमस्य इ ए इत्यादेशौ। काइ। इं जश्शसोर्दीर्घश्चेति जश्शसोरन्यतमस्य इं आदेशः। दीर्घश्च। 'नपुंसके स्वमोः कत्वं न किमः स्यादलुप्तयोः'। किं एदं, किमेतत्। किं करेइ, किं करोति ॥५९॥

सुबोधिनी

सुपि परे किमः कः स्यात्। को, कः ॥५९॥

(२४७) इदम इमः ॥६०॥

सञ्जीवनी

सुपि प्रत्याहारे परे इदंशब्दस्य इमादेशः स्यात्। इमो, अयम्। अत ओत् सोरित्योत्त्वम्। इमस्स, अस्य। स्सो ङस इति स्सादेशः। इमेसु, एषु। स्त्रियाम्– इमा, इयम्। स्त्रियामात्। अन्त्यस्य हल इति सुलोपः। इमाओ, इमाः। जसो वेति जस ओत्त्वम्। इमाए अनया, अस्याः, अस्यां वा। टाङस्ङीनामित्यादिना त्रयाणामन्यतमस्य एत्वम्, सर्वत्र आदीतौ बहुलमिति आप्रत्ययः। क्लीबे– इमाइं, इमानि। इं जश्शसोर्दीर्घश्चेति जश्शसोरन्यतरस्य इं आदेशः दीर्घश्च। 'आदेशाविदमश्चान्यौ सौ पुंसि अमिअं स्त्रियाम्'। अअं भत्ता, इअं भरिआ, अयं भर्ता, इयं भार्या। 'इमिआ इति वादेशः सौ स्त्रियामिदमो भवेत्'। इमिआ इयम्। सर्वत्र अन्त्यस्य हल इति सुलोपः ॥६०॥

सुबोधिनी

सुपि परे इदम इम इति स्यात् । इमो, अयं, इमा इयम् । 'आदेशाविदमश्चान्यौ सौ पुंसि अमिअं स्त्रियाम्' । अअं, अयम् । इअं, इयम् । 'इमिआ इति वादेशः सौ स्त्रियामिदमो भवेत्' । इमिआ, इयम् ॥६०॥

(२४८) अं स्सिंस्सयोर्वा ॥६१॥

सञ्जीवनी

इदम इत्यनुवर्त्तते । एतदः सोरोत्त्वं वा इत्यतः प्राक् । ङेः स्सिंम्मित्था इति यः स्सिं आदेशः, स्सो ङस इति यः स्स आदेशस्तयोरिदमः स्थाने अकारादेशः स्याद् वा । अस्सिं, अस्मिन् । पक्षे इमस्सिं । अस्स । पक्षे इमस्स, अस्य । 'स्यात् प्रत्ययान्तरेऽप्यत्त्वं स्त्रियामन्यत्र चेदमः' । एहिं, एभिः । अकारादेशस्य ए सुप्यङिंङ-सोरिति एत्त्वम् । इमेहिं । एसु, एषु । पक्षे इमेसु । पूर्ववदेत्त्वम् । आहिं, इमाहिं, आभिः । आदीतौ बहुलमिति आप्रत्ययः । तेन सन्धावकारादेशस्य चात्त्वम् । अदन्तवद्भावादिति भिसो हिं । आसु, इमासु । 'इदमोऽत्त्वं स्त्रियामात्त्वं सह स्सा च ङसस्तु वा' । अस्सा, अस्याः । पक्षे इमाइ, इमाए ॥६१॥

सुबोधिनी

ङिङसादेशयोः स्सिंस्सयोः परयोरिदम अ इति वादिश्यते । अस्सिं, इमस्सिं, अस्मिन् । अस्स, इमस्स, अस्य । 'स्यात् प्रत्ययान्तरेऽप्यत्त्वं स्त्रियामन्यत्र चेदमः' । एहिं, इमेहिं, एभिः । एसु, इमेसु, एषु । आहिं, इमाहिं, आभिः । आसु, इमासु, आसु । 'इदमोऽत्त्वं स्त्रियामात्त्वं सह स्सा च ङसस्तु वा' । अस्सा, अस्याः । पक्षे इमाइ, इमाए ॥६१॥

(२४९) ङेर्मेन हः ॥६२॥

सञ्जीवनी

वेति वर्तते । इदम इम इत्यादेशे कृते मेन मकारेण सह ङिप्रत्ययस्य हकारादेशो भवति वा । ङे स्सिम्मित्था इति स्सिं म्मि त्थ इत्येते प्राप्ताः । इह, अस्मिन् । पक्षे– अस्सिं, इमस्सिं ॥६२॥

सुबोधिनी

इदम उत्तरस्य ङिप्रत्ययस्य इदमः सम्बन्धिना मकारेण सह ह इति स्याद् वा । इह । पक्षे– इमस्सिं, इमम्मि ॥६२॥

(२५०) न त्थः ॥६३॥

सञ्जीवनी

वेति निवृत्तम्। ङीत्यनुवर्त्तते। इदंपरस्य ङेः त्थ इत्यादेशो न भवति। ङेर्मेन ह इति हवत् ङेः स्सिम्मित्था इति च स्सिम्मिवत् प्राप्तः। इह, अस्मिन्। इमस्सिं, इमम्मि ॥६३॥

सुबोधिनी

इदंपरस्य ङेः त्थ इति न स्यात्। इह, इमस्सिं, इमम्मि, अस्मिन् ॥६३॥

(२५१) नपुंसके स्वमोरिदमिणमिणमो ॥६४॥

सञ्जीवनी

नपुंसकलिङ्गे वर्तमानस्य इदम इदं इणं इणमो इति त्रय आदेशा भवन्ति। सु अम् इत्येतयोः। सोः– इदं वणं, इणं वणं, इणमो वणं, इदं वनम्। अन्त्यस्य हल इति सुलोपः। मो बिन्दुरित्यादिना बिन्दुः। अमः– इदं वणं पेच्छ, इणं वणं पेच्छ, इणमो वणं पेच्छ, इदं वनं प्रेक्षस्व। त्रिष्वप्यमो लोपो वक्तव्यः। पूर्ववद् बिन्दुः। 'नपुंसक इमश्च स्यात् चतुर्थ इदमः स्वमोः'। इमं वणं। नपुंसके **सोर्बिन्दुरिति** सोर्बिन्दुः। इमं वणं पेच्छ। इणमो वण पेच्छ। अतोऽम इत्यलोपः। **मो** बिन्दुः ॥६४॥

सुबोधिनी

सु अम् इत्येतयोः परयोर्नपुंसके इदंशब्दस्य इदं इणं इणमो इत्यादेशाः स्युः। इदं, इणं, इणमो, इदम्। 'नपुंसके इमश्च स्याच्चतुर्थ इदमः स्वमोः'। इमं इदम् ॥६४॥

(२५२) एतदः सोरोत्त्वं वा ॥६५॥

सञ्जीवनी

एतच्छब्दात् परस्य सुप्रत्ययस्य ओत्त्वं भवति। अन्त्यस्य हल इति दलोपे कृते अत ओत् सोरिति ओत्त्वं प्राप्तम्। एसो, एषः। 'तदेतदोः सः सावनपुंसके' इति तस्य सः। अन्त्यस्य हल इति दलोपः। क्वचिदपि लोप इत्यकारलोपः। पक्षे एस। अन्त्यस्य हल इति सुलोपः ॥६५॥

सुबोधिनी

एतच्छब्दादुत्तरस्य सुप्रत्ययस्य ओत्त्वं वा स्यात्– एसो, एस, एषः ॥६५॥

(२५३) त्तो ङसेः ॥६६॥

सञ्जीवनी

एतद इत्यनुवर्त्तते । वेति वा । ओ त्तो दो ङसेरनिदम इति सिद्धत्वाद् नियमार्थो योगः । तेन एतच्छब्दात् परस्य ङसेः त्तो इत्ययं द्वितकारक आदेशो भवतीति नियम्यते । पक्षे ङसेरादोदुहय इत्येते वर्तन्ते । एत्तो, एतस्मात् । अन्त्यस्य हल इति दलोपः । **त्तोत्थयोस्तस्य** लोप इति तलोपः । पक्षे एआओ, एआहि । कगचादिना तलोपः । **जस्ङस्यांसु** दीर्घ इति दीर्घः ॥६६॥

सुबोधिनी

सिद्धे सत्यारम्भोऽयं नियमार्थः। तेन ओ त्तो दो ङसेरिति सूत्रेण सिद्धानां **त्रयाणां मध्ये एको नियम्यते**। एतच्छब्दादुत्तरस्य ङसेः सर्वाद्यधिकारः प्राप्तः, त्तो इत्येवादेशो भवति । एत्तो, एतस्मात् सामान्यतः प्राप्तास्तु न बाध्यन्ते । एसा, एसाओ, एआउ, एआहि ॥६६॥

(२५४) त्तत्थयोस्तस्य लोपः ॥६७॥

सञ्जीवनी

त्तो ङसेरिति यः त्तो आदेशः, ङः स्सिम्मित्था इति यश्च त्थादेशः, तयोः परयोरेतदः **साचस्तकारस्य** लोपः स्यात् । एत्तो, एतस्मात् । एत्थ एतस्मिन् ॥६७॥

सुबोधिनी

त्तो त्थ इत्येतयोः परयोरेतदस्तकारलोपः स्यात् । एत्तो, एतस्मात् । एत्थ, एतस्मिन् ॥६७॥

(२५५) तदेतदोः सः सावनपुंसके ॥६८॥

सञ्जीवनी

तस्यैवानुवर्त्तते । तदेतच्छब्दसम्बन्धिनस्तकारस्य सकारादेशः स्यात्, अनपुंसक-लिङ्गे सौ परतः । सो पुरिसो, स पुरुषः । एसो पुरिसो, एस पुरिसो, एष पुरुषः । एकत्र एतदः सोरोत्त्वं वेति ओत्त्वम् । अन्यत्र अन्त्यस्य हल इति सुलोपः । सा जुअई, एसा जुअई । आदीतौ बहुलमिति आप्रत्ययः । पूर्ववत् सुलोपः । अत्र अन्त्यस्य हल इति दलोपः । अनपुंसक इति किम् ? तं वणं, तद् वनम् । एणं वणं, एतद् वनम् । नपुंसके सोर्बिन्दुरिति बिन्दुः । 'एस इत्येव सावाहुः स्त्रियामप्येतदः परे' । एस गई, एषा गतिः । एस जुअई, एषा युवतिः । आदीतौ बहुलमिति बहुलग्रहणाद् आदीतोरनुत्पत्तिः ।

एस सरो, एतत् सरः । एस जसो, एतद् यशः । इत्यादिलिङ्गत्रयेऽपि साधारणं रूपमिति नपुंसकबुद्ध्या अपूर्वत्वेनान्ते स इति विदधति, तन्न समीचीनम्; यतस्तेषां प्रयत्न-मन्तरेणापि नसन्तप्रावृट्शरदः पुंसीति सान्तस्य पुंस्त्वं पर्यवस्यति । न चापि एस रणमिति गन्त्रशाब्दिका अनुमन्यन्ते ॥६८॥

सुबोधिनी

तदेतच्छब्दयोः सुप्रत्यये परे नपुंसकलिङ्गे सकारादेशः स्यात् । सो, सः, एसो, एषः । सा, एसा । 'एस इत्येव सावाहुः स्त्रियामप्येतदः परे' । एस, एषा ॥६८॥

(२५६) अदसो दो मुः ॥६९॥

सञ्जीवनी

सुपीत्यपेक्ष्यते स्त्रियामिति च । अदस इति षष्ठ्यन्तम् । तेन लिङ्गत्रयेऽपि वर्तमानस्य अदसः सम्बन्धी यो दकारस्तस्य मुरादेशो भवति । पुंसि – अमू पुरिसा, अमी पुरुषाः । शेषाददन्तवदित्यतिदेशाद् अदन्तवद्भावाद् जश्शसोर्लोप इति लोपः । अत एव जसृङस्यादिना दीर्घः । अमुणो णिअच्छ, अमून् पश्य । इदुतोः शसो णो इति णो आदेशः । अमुणा अमुना । टा णा इति णादेशः । अमुणो धणं, अमुष्य धनम् । ङसो वेति णो आदेशः ।

अमूओ जुअइओ, अमूः युवतयः । जसो वेति जस ओत्त्वम् । शेषाददन्तवदित्य-तिदेशाद् जसृङस्यांसु दीर्घ इति दीर्घः । अमूउ पेच्छ, अमूः प्रेक्षस्व । स्त्रियां शस उदोताविति उ आदेशः । जसृशसृङस्यांसु दीर्घ इति दीर्घत्वे वक्तव्ये इदुतोः स्त्रियां दीर्घः । अमूइ अमूए अमूअ अमूआ अमुया अमुष्याः अमुष्यां वा । टाङसृङीनामिदेदादत इति त्रयाणामन्यतमस्य इ ए अ आ इत्येते आदेशाः । पूर्ववद्दीर्घः ।

नपुंसके अमूइं अमूनि । इं जश्शसोर्दीर्घश्चेति इं आदेशो दीर्घश्च ॥६९॥

सुबोधिनी

सुपि परे अदस्सम्बन्धिनो दकारस्य मु इत्यादिश्यते । अमू अमूओ अमूइं, अमी अमूः अमूनि ॥६९॥

(२५७) हश्च सौ ॥७०॥

सञ्जीवनी

अदस इति स्त्रियामिति सुपीति त्रयमनुवर्तते । लिङ्गत्रयेऽपि अदसो दस्य हकारादेशः सुप्रत्यये परे, चकारात्तु मुरादेशोऽपि । अह पुरिसो, असौ पुरुषः । पक्षे–

अमू पुरिसो । सुभिस्सुप्सु दीर्घ इति दीर्घः । स्त्रियाम् – अह जुअई, पक्षे – अमू जुअई । क्लीबे – अह वणं । सर्वत्र अन्त्यस्य हल इति सुलोपः । पक्षे – अमुं वणं । नपुंसके सोर्बिन्दुरिति बिन्दुः । अह इत्यत्र यथालिङ्गं अत ओत् सोरिति, आदीतौ बहुलमिति, नपुंसके सोर्बिन्दुरिति च प्राप्नुवन्ति, ते न भवन्ति, अनभिधानात् ॥७०॥

सुबोधिनी

सुपि प्रत्यये परे अदसो दकारस्य ह इत्यादिष्यते । अह अमू असौ इति स्त्रीपुंसकयोः अदसोः । ह इत्यादेशपक्षे पुल्लिङ्गादिविहितकार्याणि न भवन्त्यनभिधानात् ॥७०॥

(२५८) पदस्य ॥७१॥

सञ्जीवनी

अधिकारोऽयम् । इत ऊर्ध्वं यदनुक्रमिष्यामः सुबन्तस्य पदस्य स्थाने तद् भवतीत्यधिकृतं वेदितव्यम् । उक्तं च सुप्तिङन्तं पदम् । द्वेर्दो इत्यतः प्रागयमधिकारः ॥७१॥

सुबोधिनी

अतः परं यत् कार्यं तत्पदस्य सुबन्तस्य स्थाने वेदितव्यम् । अधिकारोऽयम् ॥७१॥

(२५९) युष्मदस्तं तुमं ॥७२॥

सञ्जीवनी

हश्च सौ इत्यतः सौ इत्यनुवर्त्तते । सुप्रत्यये सति सिद्धस्य युष्मत्सम्बन्धिनः पदस्य त्वमित्यस्य तं तुमं इत्यादेशौ भवतः । अनेकवर्णः सर्वस्य एकवर्ण आदेशः क्वचित् सर्वस्येति वचनात् । तं दिट्ठो । तुमं दिट्ठो । त्वं दृष्टः ॥७२॥

सुबोधिनी

सिद्धस्य युष्मदः सम्बन्धिनस्त्वमिति पदस्य सुबन्तस्य स्थाने तं तुममित्यादेशौ स्तः । तं तुमं त्वम् ॥७२॥

(२६०) तुं चामि ॥७३॥

सञ्जीवनी

युष्मद इत्यनुवर्त्तते । अस्मदो हं अहं अहअं सावित्यतः प्राक् । द्वितीयैकवचने **अम्प्रत्यये** सति सिद्धस्य युष्मदः पदस्य त्वामित्यस्य तुमित्यादेशो भवति, चकारात्

तं तुममित्येतावपि । तुं पेच्छामि, तं पेच्छामि, तुमं पेच्छामि, त्वां प्रेक्षे । 'युष्मदोऽमिपदस्य स्याच्चतुर्थस्तु तुमे इति' । तुमे पेच्छति ॥७३॥

सुबोधिनी

अमि परे सिद्धस्य युष्मदः त्वामिति पदस्य तुं इत्यादिश्यते। चकारात् तंतुमावपि। तं तुमं तुं त्वाम्। 'युष्मदोऽमिपदस्य स्याच्चतुर्थस्तु तुमे इति'। तुमे ॥७३॥

(२६१) तुज्झे तुज्झ तुम्हे जसि ॥७४॥

सञ्जीवनी

जसूप्रत्यये सति सिद्धस्य युष्मदः पदस्य यूयमित्यस्य तुज्झे तुज्झ तुम्हे इति त्रय आदेशा भवन्ति । तुज्झे तुज्झ तुम्हे गुरू । 'तज्झे तव्वे तम्हे चैव त्रयोऽन्ये युष्मदो जसि' । तज्झे तव्वे तम्हे गुरू, यूयं गुरवः ॥७४॥

सुबोधिनी

जसि परे यूयमिति पदस्य तुज्झे तुम्हे तुज्झ इत्यादिश्यन्ते। तुज्झे तुज्झ तुम्हे यूयम्। 'तज्झे तव्वे तम्हे चैव त्रयोऽन्ये युष्मदो जसि'। तज्झे तव्वे तम्हे यूयम् ॥७४॥

(२६२) वो च शसि ॥७५॥

सञ्जीवनी

शसूप्रत्यये सति सिद्धस्य युष्मदः पदस्य युष्मानित्यस्य वो इत्यादेशः स्यात् । चकारात् पूर्वे षडपि । वो रक्ख, तुज्झे रक्ख, तुज्झ रक्ख, तुम्हे रक्ख, तज्झे रक्ख, तव्वे रक्ख, तम्हे रक्ख, युष्मान् रक्ष ॥७५॥

सुबोधिनी

शसि परे सिद्धस्य युष्मानिति पदस्य वो इति स्यात्। चकारात् पूर्वे षडपि। वो तुज्झे तुम्हे तुज्झ तज्झे तम्हे तव्वे युष्मान् ॥७५॥

(२६३) टाङ्योस्तइ तए तुमइ तुमए तुमे ॥७६॥

सञ्जीवनी

टाप्रत्यये ङिप्रत्यये च सति सिद्धस्य युष्मदः पदस्य त्वयेत्स्य त्वयीत्यस्य च तइ तए तुमइ तुमए तुमे इति प्रत्येकं पञ्चादेशा भवन्ति। तइ कअं। तए कअं।

तुमए कअं । तुमे कअं । **त्वया कृतम्** । तइ ठिअं । तए ठिअं । तुमे ठिअं । तुमए ठिअं । तुमइ ठिअं । **त्वयि स्थितम्** ॥७६॥

सुबोधिनी

टाप्रत्यये ङिप्रत्यये च सिद्धस्य युष्मदः पदस्य त्वयेत्यस्य त्वयीत्यस्य च तइ तए तुमइ तुमे तुमए इति पञ्चादेशाः स्युः । तइ तए तुमइ तुमे तुमए त्वया त्वयि ॥७६॥

(२६४) तुमम्मि च ङौ ॥७७॥

सञ्जीवनी

ङौ सिद्धस्य युष्मदः पदस्य त्वयीत्यस्य तुमम्मि आदेशः स्यात् । तुमम्मि ठिअं, त्वयि स्थितम् ॥७७॥

सुबोधिनी

ङिप्रत्यये सिद्धस्य युष्मदः पदस्य तुमम्मि इत्यादिश्यते । तुमम्मि त्वयि ॥७७॥

(२६५) ङसि तुमो-तुह-तुज्झ-तुव-तुम्हाः ॥७८॥

सञ्जीवनी

ङस्प्रत्यये सिद्धस्य युष्मदः पदस्य तवेत्यस्य तुमो तुह तुज्झ तुव तुम्ह इत्येते पञ्च आदेशा भवन्ति । तुमो धणं, तुह धणं, तुज्झ धणं, तुव धणं, तुम्ह धणं, तव धनम् ।

तज्झ-तम्वे-दिए-तुम्ह-तुमाइ-तु-तुमे-तुमाः ।
युष्मदो ङसि सिद्धस्य स्युरष्टावपरेऽप्यमी ॥

तज्झ धणं । तम्वे धणं । दिए धणं । तुम्ह धणं । तुमाइ धणं । तु धणं । तुमे धणं । तुम धणं । तव धनम् ॥७८॥

सुबोधिनी

ङस्प्रत्यये सिद्धस्य युष्मदः पदस्य तवेत्यस्य पञ्चादेशाः स्युः । तुमो तुह तुज्झ तुव तुम्ह तव ।

तज्झ-तम्वे-दिए-तुम्ह-तुमाइ-तु-तुमे-तुमाः ।
युष्मदो ङसि सिद्धस्य स्युरष्टावपरेऽप्यमी ॥

तज्झ तम्वे दिए तुम्ह तुमाइ तु तुमे तुम तव ॥७८॥

(२६६) आङि च ते दे ॥७९॥

सञ्जीवनी

आङिति तृतीयैकवचनस्य ग्रहणम्। ङसीत्यनुवर्त्तते। तेन टाप्रत्यये सति सिद्धस्य युष्मदः पदस्य त्वयेत्यस्य तथा ङसि सिद्धस्य तवेत्यस्य च प्रत्येकं ते दे इत्यादेशौ भवतः। ते कअं, दे कअं, त्वया कृतम्। ते धणं दे धणं, तव धनम् ॥७९॥

सुबोधिनी

आङिति टाप्रत्ययस्य ग्रहणम्। टाप्रत्यये सिद्धस्य त्वयेतिपदस्य ते दे इत्यादिश्येते। चकारात् ङसीत्यनुवर्त्तते। ते दे त्वया तव वा ॥७९॥

(२६७) तुमाइ च ॥८०॥

सञ्जीवनी

चानुकृष्टमुत्तरत्र नानुवर्त्तते। तेन ङसीति निवृत्तम्। आङीति चानुवर्त्तते। टाप्रत्यये सिद्धस्य युष्मदः पदस्य त्वयेत्यस्य तुमाइ इत्यादेशो भवति। न केवलं पूर्वोक्ता एवेति। तुमाइ कअं, त्वया कृतम्। 'आहुः ए दि तु इत्यन्यानादेशानाङि युष्मदः'। ए कअं, दि कअं, तु कअं, त्वया कृतम् ॥८०॥

सुबोधिनी

टाप्रत्ययसिद्धस्य त्वयेत्यस्य तुमाइ इति स्यात्। तुमाइ त्वया। 'आहुः ए दि तु इत्यन्यानादेशानाङि युष्मदः'। ए दि तु त्वया ॥८०॥

(२६८) तुज्झेहि तुब्भेहि तुम्हेहि भिसि ॥८१॥

सञ्जीवनी

भिसुप्रत्यये सति सिद्धस्य युष्मदः पदस्य युष्माभिरित्यस्य तुज्झेहि तुब्भेहि तुम्हेहि इति त्रय आदेशा भवन्ति। तुज्झेहि कअं। तुब्भेहि कअं। तुम्हेहि कअं। युष्माभिः कृतम् ॥८१॥

सुबोधिनी

भिसि सिद्धस्य युष्माभिरित्यस्य त्रय आदिश्यन्ते। तुज्झेहि तुब्भेहि तुम्हेहि युष्माभिः। 'तज्झेहि तब्भेहि तम्हेहि त्रयोऽन्ये युष्मदो भिसि'। तज्झेहि तब्भेहि तम्हेहि युष्माभिः ॥८१॥

(२६९) ङसौ तत्तो तइत्तो तुमाओ तुमाइ तुमाहि वा ॥८२॥

सञ्जीवनी

पञ्चम्येकवचने ङसि प्रत्यये सति सिद्धस्य युष्मदः पदस्य त्वदित्यस्य तत्तो तइत्तो तुमाओ तुमाइ तुमाहि इत्येते पञ्चादेशा भवन्ति। तत्तो अण्णो। तइत्तो अण्णो। तुमाओ अण्णो। तुमाइ अण्णो। तुमाहि अण्णो। त्वदन्यः।

तुम्हाहिन्तो तम्हाहिन्तो तुम्हिन्तो युष्मदो ङसौ।
अमी अपि त्रयः प्रोक्ताः पृथगादेशपञ्चकात्॥

तुम्हाहिन्तो अण्णो। तम्हाहिन्तो अण्णो। तुम्हिन्तो अण्णो। **त्वदन्य** इत्यादि ॥८२॥

सुबोधिनी

ङसि प्रत्यये सिद्धस्य युष्मत्पदस्य पञ्चादिश्यन्ते। तत्तो **तइत्तो तुमाओ तुमाइ** तुमाहि त्वत्।

तुम्हाहिन्तो तम्हाहिन्तो तुम्हिन्तो युष्मदो ङसौ।
अमी अपि त्रयः प्रोक्ताः पृथगादेशपञ्चकात्॥

तुम्हाहिन्तो, तम्हाहिन्तो, तुम्हिन्तो ॥८२॥

(२७०) तुज्झाहिन्तो तुज्झासुन्तो भ्यसि ॥८३॥

सञ्जीवनी

पञ्चमीबहुवचने भ्यसि सिद्धस्य युष्मदः पदस्य युष्मदित्यस्य तुज्झाहिन्तो तुज्झासुन्तो इत्येतावादेशौ भवतः। तुज्झाहिन्तो तुज्झासुन्तो अण्णो। युष्मदन्यः।

तुज्झेहिन्तो तुम्हेहिन्तो तुम्हासुन्तो तुम्हेत्तो तुम्हाहिन्तो तुज्झन्तो तुहेहि तुम्हेहि तुज्झेहि तुब्भासुन्तो इति चान्ये दश प्रख्याता युष्मदो भ्यसि। तुज्झेहिन्तो अण्णो, एवं तुम्हाहिन्तो अण्णो। तुम्हासुन्तो अण्णो। तुम्हेत्तो अण्णो इत्यादि उदाहरणीयम् ॥८३॥

सुबोधिनी

भ्यसि प्रत्यये सिद्धस्य युष्मदः पदस्य एतावादेशौ स्तः। तुज्झाहिन्तो तुज्झासुन्तो युष्मत्। तुज्झेहिन्तो तुम्हेहिन्तो तुम्हासुन्तो तुम्हेत्तो तुम्हाहिन्तो तुज्झन्तो तुज्झेहि तुब्भासुन्तो तुहेहि तुम्हेहि इति दशाऽन्ये युष्मदो भ्यसि प्रोक्ताः ॥८३॥

(२७१) वो ते तुज्झाणं तुम्हाणं आमि ॥८४॥

सञ्जीवनी

आमि सिद्धस्य युष्मदः पदस्य युष्माकमित्यस्य वो ते तुज्झाणं तुम्हाणं इत्येते चत्वार आदेशा भवन्ति। वो धणं, ते धणं। तुज्झाणं धणं। तुम्हाणं धणं। युष्माकं धनम्। 'तुज्झ तुब्भ तुम्ह इति त्रयोऽन्ये चापि युष्मदः'। तुज्झ धणं, तुब्भ धणं, तुम्ह धणं। युष्माकं धनम् ॥८४॥

सुबोधिनी

आम्प्रत्यये युष्मदः पदस्य चत्वार आदिश्यन्ते। वो ते तुज्झाणं तुम्हाणं युष्माकम् ॥८४॥

(२७२) तुज्झेसु तुब्भेषु तुम्हेसु सुपि ॥८५॥

सञ्जीवनी

सप्तमीबहुवचने सुपि सति सिद्धस्य युष्मदः पदस्य युष्मासु इत्यस्य तुज्झेसु तुब्भेसु तुम्हेसु इति त्रय आदेशा भवन्ति। तुज्झेसु ठिअं, तुब्भेसु ठिअं, तुम्हेसु ठिअं, युष्मासु स्थितम् ॥८५॥

सुबोधिनी

सुपि युष्मदः पदस्य एते स्युः। तुज्झेसु ठिअं, तुम्हेसु ठिअं, तुब्भेसु ठिअं। युष्मासु स्थितम् ॥८५॥

(२७३) अस्मदो हं अहं अहअं सौ ॥८६॥

सञ्जीवनी

पदस्येत्येव। सुप्रत्यये सति सिद्धस्य अस्मदः पदस्य अहमित्यस्य हं अहं अहअं इति त्रय आदेशा भवन्ति। हं जाणामि। अहं जाणामि। अहअं जाणामि। अहं जानामि ॥८६॥

सुबोधिनी

सुप्रत्यये सिद्धस्य अस्मदः पदस्य अहमित्यस्य हं अहं अहअं इति त्रय आदेशा भवन्ति। हं अहं अहअं अहम् ॥८६॥

(२७४) अम्मिरमि च ॥८७॥

सञ्जीवनी

अस्मद इत्यनुवर्त्तते। द्वेर्दो इत्यतः प्राक् सावित्यनुवर्त्तते। सुप्रत्यये सति सिद्धस्य अस्मदः पदस्य अहमित्यस्य अमि प्रत्यये च सिद्धस्य मामित्यस्य अम्मि आदेशो भवति। अम्मि जप्पामि, अहं जल्पामि। अम्मि पेच्छ, मां प्रेक्षस्व। 'सावस्मदो भवत्यत्र म्मि इत्येष च पञ्चमः'। म्मि करोमि, अहं करोमि ॥८७॥

सुबोधिनी

सु-अम्-प्रत्यययोः सिद्धस्यास्मदः पदस्य अम्मि इत्यादिश्यते। अम्मि अहं मां वा। 'सावस्मदो भवत्यत्र म्मि इत्येष च पञ्चमः' म्मि अहम् ॥८७॥

(२७५) मं ममं च ॥८८॥

सञ्जीवनी

चानुकृष्टमुत्तरसूत्रे नानुवर्त्तते इति साविति निवृत्तम्। अमीत्यनुवर्त्तते। अमि सिद्धस्य अस्मदः पदस्य मामित्यस्य मं ममं इत्यादेशौ भवतः। मं रक्ख, ममं रक्ख, मां रक्ष। 'चत्वारोऽन्येऽस्मदोऽमि स्युर्मिमं णो अम अम्ह च'। मिमं रक्खउ, णो रक्खउ, अम रक्खउ, अम्ह रक्खउ, मां रक्षतु ॥८८॥

सुबोधिनी

चानुक्तस्तु सुबत्र नानुवर्त्तत इति साविति निवृत्तम्। अमि सिद्धस्यास्मदः पदस्य एतावादिश्येते। मं ममं माम्। 'चत्वारोऽन्येऽस्मदोऽमि स्युर्मिमं णो अम अम्ह च'। मिमं णो अम अम्ह माम् ॥८८॥

(२७६) अम्हे जस्शसोः ॥८९॥

सञ्जीवनी

जसि शसि सिद्धस्य अस्मदः पदस्य वयमिति, अस्मानित्यस्य च अम्हे इत्यादेशो भवति। अम्हे जाणिमो, वयं जानीमः। अम्हे पालेउ, अस्मान् पालयतु। 'अम्हो अम्ह तथैवैतौ जश्शसोरस्मदो मतौ'। अम्हो बुज्झामो, वयं बुध्यामहे। अम्हो सासति, अम्ह सासति, अस्मान् शासति ॥८९॥

सुबोधिनी

जसि शसि च अस्मदः सिद्धस्य पदस्य अम्हे इति स्यात्। अम्हे वयं अस्मान् वा। 'अम्हो अम्ह तथैतौ च जश्शसोरस्मदो मतौ'। अम्हो अम्ह वयं अस्मान् वा ॥८९॥

(२७७) णो च शसि ॥९०॥

सञ्जीवनी

शसि प्रत्यये सति सिद्धस्य अस्मदः पदस्य अस्मानित्यस्य णो इत्यादेशः स्यात्, न केवलं पूर्वोक्तास्त्रय एव। णो हसइ, अस्मान् हसति ॥९०॥

सुबोधिनी

शस्प्रत्यये अस्मदः पदस्य णो इति स्यात्। णो अस्मान् ॥९०॥

(२७८) आङि मे ममाइ ॥९१॥

सञ्जीवनी

आङि तृतीयैकवचने टाप्रत्यये सिद्धस्य अस्मदः पदस्य मयेत्यस्य मे ममइ इत्येतावादेशौ भवतः। मे हीरइ, ममाइ हीरइ, मया ह्रियते ॥९१॥

सुबोधिनी

टाप्रत्यये सिद्धस्यास्मदः पदस्य मे ममाइ एतौ स्तः। मे ममाइ मया ॥९१॥

(२७९) ङौ च मइ मए ॥९२॥

सञ्जीवनी

आङीत्यनुवर्त्तते। टाप्रत्यये सिद्धस्य अस्मदः पदस्य मयेत्यस्य ङिप्रत्यये च मयीत्यस्य च प्रत्येकं मइ मए इत्यादेशौ स्याताम्। मइ मुणिओ, मए मुणिओ, मया ज्ञातः। मइ ठिअं, मए ठिअं, मयि स्थितम्। 'टाप्रत्ययेऽस्मदो णे मि स्यातां द्वावपरावपि'। णे दिट्ठा, मि दिट्ठा, मया दृष्टा ॥९२॥

सुबोधिनी

टाप्रत्यये ङिप्रत्यये सिद्धस्यास्मदः पदस्य एतौ स्तः। मइ मए, मया मयि वा। 'टाप्रत्ययेऽस्मदो णे मि स्यातां द्वावपरावपि'। णे मि मया ॥९२॥

(२८०) ममम्मि च ॥९३॥

सञ्जीवनी

ङावित्येव । ङिप्रत्यये सिद्धस्य अस्मदः पदस्य मयीत्यस्य ममम्मि इत्यादेशश्च भवति, न केवलं पूर्वोक्तावेव । ममम्मि ठिअं । मयि स्थितम् ॥९३॥

सुबोधिनी

ङिप्रत्यये सिद्धस्यास्मदः पदस्य ममम्मि इत्यादिश्यते । चकारात् पूर्वोक्तावपि । ममम्मि मयि ॥९३॥

(२८१) अम्हेहिं भिसि ॥९४॥

सञ्जीवनी

भिसि प्रत्यये सिद्धस्य अस्मदः पदस्य अस्माभिरित्यस्य अम्हेहिं इत्यादेशः स्यात् । अम्हेहिं भणिअं, अस्माभिर्भणितम् । 'णे अम्हे अम्ह अम्हाण चतरोऽन्येऽस्मदो भिसि' । णे सुअं, अम्हे सुअं, अम्ह सुअं, अम्हाण सुअं, अस्माभिः श्रतुम् ॥९४॥

सुबोधिनी

भिसि प्रत्यये सिद्धस्य अस्मदः पदस्य अम्हेहिं इत्यादेशो भवति । अम्हेहिं अस्माभिः । 'णे अम्हे अम्ह अम्हाण चत्वारोऽन्येऽस्मदो भिसि' । णे अम्हे अम्ह अम्हाण अस्माभिः ॥९४॥

(२८२) मत्तो मइत्तो ममाओ ममाउ ममाहि ङसौ ॥९५॥

सञ्जीवनी

ङसि प्रत्यये सिद्धस्य अस्मदः पदस्य मदित्यस्य मत्तो मइत्तो ममाओ ममाउ ममाहि इत्येते पञ्चादेशा भवन्ति । मत्तो अण्णो, मइत्तो अण्णो, ममाओ अण्णो, ममाउ अण्णो, ममाहि अण्णो, मदन्यः ॥९५॥

सुबोधिनी

ङसौ सिद्धस्यास्मदः पदस्य पञ्चादिश्यन्ते । मत्तो मइत्तो ममाओ ममाउ ममाहि मत् ॥९५॥

(२८३) अम्हाहिन्तो अम्हासुन्तो भ्यसि ॥९६॥

सञ्जीवनी

भ्यस्प्रत्यये सति सिद्धस्य अस्मदः पदस्य अस्मदित्यस्य अम्हाहिन्तो अम्हासुन्तो इत्येतावादेशौ भवतः । अम्हाहिन्तो इअरो, अम्हासुन्तो इअरो, अस्मदितरः । 'अम्हेहिन्तो

च अम्हेहि अम्हेन्तो वाऽस्मदो भ्यसि'। अम्हेहिन्तो गआ, अम्हेहि गआ, अम्हेन्तो गआ, अस्मद् गताः ॥९६॥

सुबोधिनी

भ्यसि प्रत्यये सिद्धस्यास्मदः पदस्य एतावादिश्यते। अम्हाहिन्तो अम्हासुन्तो अस्मत् ॥९६॥

(२८४) मे मम मह मज्झ ङसि ॥९७॥

सञ्जीवनी

ङस्प्रत्यये सिद्धस्य अस्मदः पदस्य ममेत्यस्य मे मम मह मज्झ इत्येते चत्वार आदेशा भवन्ति। मे पिओ, मम पिओ, मह पिओ, मज्झ पिओ, मम प्रियः ॥९७॥

सुबोधिनी

ङसि प्रत्यये सिद्धस्यास्मदः पदस्य एते स्युः। मे मम मह मज्झ मम ॥९७॥

(२८५) णो अम्ह अम्हाण अम्हे आमि ॥९८॥

सञ्जीवनी

आमि सिद्धस्य अस्मदः पदस्य अस्माकमित्यस्य णो अम्ह अम्हाण अम्हे इत्येते चत्वार आदेशा भवन्ति। णो पई, अम्ह पई, अम्हाण पई, अम्हे पई, अस्माकं पतिः। 'अन्योऽस्मदो भवेद्रूपं णे इत्यपि च पञ्चमः'। णे वल्लहो, अस्माकं वल्लभः ॥९८॥

सुबोधिनी

आम्प्रत्यये सिद्धस्यास्मदः पदस्य एते स्युः। णो अम्ह अम्हाण अम्हे अस्माकम् ॥९८॥

(२८६) अम्हेसु सुपि ॥९९॥

सञ्जीवनी

सुपि सप्तमीबहुवचने सिद्धस्य अस्मदः पदस्य अस्मासु इत्यस्य अम्हेसु आदेशः स्यात्। अम्हेसु ठिअं, अस्मासु स्थितम्। 'अम्हासु इति वादेशो द्वितीयोऽप्यस्मदः सुपि'। अम्हासु ठिअ। **सर्वेषामपि युष्मदस्मत्-प्रयोगाणां किमपि लिङ्गं नास्ति। तथा चोक्तम्— 'अलिङ्गे युष्मदस्मदी' इति। संख्याः ष्णान्ता युष्मदस्मदव्ययमलिङ्गमिति।** 'बिन्दुष्टामोर्ण इत्यादौ सन्नसन्नपि वा क्वचित्'। धम्मेणं धम्मेण धर्मेण। टामोर्ण इति टाप्रत्ययस्य णः। ए सुप्यङिङसोरित्येत्त्वम्। जम्माणं जम्माण जन्मनाम्।

पूर्ववदामो णः। जसुङस्यादिना दीर्घः। कम्मेहिं कम्मेहि कर्मभिः। भिसो-हिमिति हिम्। गामाउं गामाउ। गामाहि गामाहिं ग्रामात्। ङसेरादोदुहय इति उ हि इत्येतावादेशौ। सरेसुं सरेसु सरस्सु। एतेषु सतो बिन्दोर्वा अभावः। राआणं राआण राज्ञाम्। आमो णम् इति णमादेशः। आ णोणमोरङसीत्यात्त्वम्। अप्पाणं अप्पाण आत्मनाम्। अत्रापि इद्‌द्वित्ववर्जमित्यादिना राजवद्‌भावाद् आमो णमिति णम्। राजवद्‌भावादेव पूर्ववदात्त्वम्, अत्र तु सतो बिन्दोरसत्त्वं वा। तुम्हं तुम्ह तव। तुम्हेसुं तुम्हेसु युष्मासु। अस्य युष्मदः पदस्य तुज्झेसु तुब्भेसु तुम्हेसु सुपीति तुम्हे आदेशः। अम्हेहिं अम्हेहि अस्माभिः। अम्हेहिं भिसीति अम्हेहिं आदेशः। महं मह मम। अस्याऽस्मदः पदस्य मे मम मह मज्झ ङसीति महादेशः। अम्हं अम्ह अम्हाणं अम्हाण अस्माकम्। अम्हेसु अम्हेसुं अस्मासु। अस्य अस्मदः पदस्य अम्हेसु सुपीति अम्हेसु आदेशः। इत्यादौ लक्षणानुसारेणाबिन्दुष्वपि बिन्दुसद्‌भावा व्यवस्थितविभाषारूपेण द्रष्टव्याः ॥९९॥

सुबोधिनी

सुपि सिद्धस्यास्मदः पदस्य अम्हेसु इति स्यात्। अम्हेसु अस्मासु। 'अम्हासु इति चादेशो द्वितीयोऽप्यस्मदः सुपि'। अम्हासु। अत्र युष्मदस्मत्प्रयोगाणां किमपि लिङ्गं नास्ति। तथा चोक्तम्– अलिङ्गे युष्मदस्मदी इति। संख्याः ण्णान्ता युष्मदस्मदव्यय-मलिङ्गम्। 'बिन्दुष्टामोर्ण इत्यादौ सन्नसन्नपि वा क्वचित्'। धम्मेणं धम्मेण धर्म्मेण। जम्माणं जम्माण जन्मनाम् इत्यादौ। कम्मेहि कम्मेहिं कर्मभिः। गामाउं गामाहिं गामाउ गामाहि ग्रामात्। सरेसुं सरेसु सरस्सु। तुम्हं तुम्ह तव। तुम्हाण तुम्हाणं युष्माकम्। तुम्हेसुं तुम्हेसु युष्मासु। अम्हेहिं अम्हेहि अस्माभिः। महं मह ममं मम मम। अम्हं अम्ह अम्हाणं अम्हाण अस्माकम्। अम्हेसुं अम्हासु अस्मासु। इत्यादौ लक्ष्यानु-सारेणाबिन्दुष्वपि बिन्दुसद्भावो व्यवस्थितविभाषया द्रष्टव्यः। पदस्येत्यधिकारो निवृत्तः ॥९९॥

(२८७) द्वेर्दो ॥१००॥

सञ्जीवनी

सुपीति प्रत्याहारोऽपेक्ष्यते। अस्मद इति निवृत्तम्। पदस्येति चास्वादौ विभक्तिगणे परे द्विशब्दस्य दो इत्यादेशः स्यात्। दोहिं द्वाभ्याम्। द्विवचनस्य बहुवचनमिति भ्यामो भिस्। तस्य शेषाददन्तवद्‌भावाद् भिसो हिमिति हिमादेशः। दोसु द्वयोः। पूर्ववद् द्विशब्दात् सुप्। सुपः सुरिति सुः ॥१००॥

सुबोधिनी

सुपीत्यनुवर्त्तते। द्विशब्दस्य सुपि परे दो इत्यादिश्यते। दोहि द्वाभ्याम् ॥१००॥

(२८८) त्रेस्ती ॥१०१॥

सञ्जीवनी

सुपीति वर्तते। स्वादौ विभक्तिगणे परे त्रिशब्दस्य ती आदेशो भवति। तीहिं तीसु। इत्येतयोः सिद्धौ योगारम्भो न कर्तव्य इत्याहुः ॥१०१॥

सुबोधिनी

त्रिशब्दस्य सुपि परे ती इत्यादिश्यते। तीहिं त्रिभिः। प्रपञ्चार्थं सूत्रद्वयं प्रयोगस्यान्यथा सिद्धत्वादिति कश्चित् ॥१०१॥

(२८९) तिणि जश्शस्भ्याम् ॥१०२॥

सञ्जीवनी

त्रेरित्यनुवर्त्तते। जस् शस् इत्येताभ्यां प्रत्ययाभ्यां सह त्रिशब्दस्य तिणि इत्यादेशो भवति। पूर्वेण ती आदेशः प्राप्तः। तिणि ट्ठिआ। तिणि पेच्छ। त्रयः स्थिताः। त्रीन् प्रेक्षस्व ॥१०२॥

सुबोधिनी

त्रिशब्दस्य जसा शसा च सह तिणि आदिश्यते। तिणि त्रयः, त्रीन् वा ॥१०२॥

(२९०) द्वेर्दुवे दोणि ॥१०३॥

सञ्जीवनी

जश्शस्भ्यामित्यनुवर्त्तते। उत्तरत्र च। जश्शस्भ्यां सह द्विशब्दस्य दुवे दोणि इत्यादेशौ भवतः। द्वेर्दो इति दो आदेशः प्राप्तः। दुवे ट्ठिआ। दोणि ट्ठिआ। दो ट्ठिआ। द्वौ स्थितौ। दुव रक्ख दोणि रक्ख दो रक्ख द्वौ रक्ष। 'द्वेर्जश्शस्भ्यां सह स्यातां द्वावन्यौ वेणि वे इति'। वेणि हुवन्ति। वे हुवन्ति। द्वौ भवतः। वेणि पेच्छ। वे पेच्छ। द्वौ प्रेक्षस्व ॥१०३॥

सुबोधिनी

द्विशब्दस्य जश्शस्भ्यां दुवे दोणि इत्यादेशौ स्तः। स्पष्टम्। 'द्वेर्जश्शस्भ्यां सह स्यातां द्वावन्यौ वेणि वे इति'। वेणि वे दुवे दोणि द्वौ इति ॥१०३॥

(२९१) चतुरश्चत्तारो चत्तारि ॥१०४॥

सञ्जीवनी

चतुर्शब्दस्य जश्शस्भ्यां सह चत्तारो चत्तारि इत्येतावादेशौ स्याताम्। चत्तारो एदे। चत्वार एते। चत्तारो गेण्ह, चतुरो गृहाण। जश्शस्भ्यामिति किम्? चऊहिं

चतुर्भिः । कगचादिना तलोपः । **अन्त्यस्य हल** इति रलोपः । शेषाददन्तवदित्यतिदेशाद् भिसो हिं । सुभिस्सुप्सु दीर्घ इति दीर्घः । एवं चऊसु चतुर्षु ॥१०४॥

सुबोधिनी

चतुर्शब्दस्य जश्शस्भ्यां सह एतौ स्तः । चत्तारो चत्तारि चत्वारः चतुरो वा । जश्शस्भ्यामिति किम् ? चऊहिं चऊसु ॥१०४॥

(२९२) एषामामो ण्हं ॥१०५॥

सञ्जीवनी

एषां द्वित्रिचतुःशब्दानां सम्बन्धिन आम्प्रत्ययस्य ण्हं आदेशः स्यात् । दोण्हं **द्वयोः** । द्वेर्दो इति दो आदेशः । तिण्हं त्रयाणाम् । त्रेस्ती इति ती आदेशः । तस्य **इदीतः** पानीयादिष्विति इत्त्वम् । चउण्हं चतुर्णाम् । **'कतिपञ्चादिशब्दानाम् आमो ण्हो नैव दीर्घता'** जस्शस्ङस्यादिना दीर्घत्वं प्राप्तम् । **कइण्हं कतीनाम्** । **पञ्चण्हं पञ्चानाम्** । **छण्हं** षण्णाम् । षट्शावकसप्तपर्णेषु छ इति छः । **अन्त्यस्य हल** इति टलोपः । **सत्तण्हं सप्तानाम्** । उपरि लोप इत्यादिना पलोपः । **शेषादेशादिना** तकारस्य द्वित्वम् । इत्यादीनां **द्वेर्दो** इत्यादिसूत्रषट्के विशेषस्याविभासनात् लिङ्गत्रयेऽपि सामान्यं द्रष्टव्यम् ॥१०५॥

सुबोधिनी

द्वित्रिचतुर्शब्दानां आम्प्रत्ययस्य ण्हं इति स्यात् । दोण्हं द्वयोः, तिण्हं त्रयाणाम्, चउण्हं चतुर्णाम् । 'कतिपञ्चादिशब्दानामामो ण्हं नैव दीर्घता' । कइण्हं कतीनाम् । पंचण्हं पंचानाम् । छण्हं षण्णाम् । सत्तण्हं सप्तानाम् । कत्यादीनां लिङ्गत्रयेऽपि साम्यम् ॥१०५॥

(२९३) शेषाददन्तवत् ॥१०६॥

सञ्जीवनी

अतिदेशार्थमिदम् । उक्तादन्यः शेषः । अदन्तादिवद् अदन्तवत् । अत ओत् सोरिति प्रकरणे अदन्ताद् यानि कार्याणि अभिहितानि अनकारान्तादपि अकारान्तादिवत्, तानि भवन्तीत्यतिदिश्यते । उक्तं च तत्रैव –

अदन्ताद्यो विधिः प्रोक्तः शेषादप्यतिदेशतः ।
आदन्तादिदुदन्तात् स ईदूदन्तादपीष्यते ॥

उदाहरणानि च तत्राभिहितानि । 'अकारान्तवदादन्तात् शसो लोपाय वेष्यते' । **बाला पेच्छ**, बालाः, प्रेक्षस्व । जश्शसोर्लोप इति शसो लोपः । पक्षे – बालाओ **पेच्छ** ।

स्त्रियां शस उदोताविति ओत्त्वम्। 'ङसेर्यदा हिदादेशो नादन्तवदिदुतोर्विधिः' ङसेरादोदुहय इति ओदुदादेशवत् प्राप्तः। गिरीओ गिरीउ साणूओ सणूउ गिरेः सानोः। आकारादेशोऽपि न भवति, न ङिङस्योरेदाताविति प्रतिषेधात्। 'ए सुप्यङिङसोः सूत्रे नेष्टं शेषाददन्तवत्'। रामाओ सामाओ, रामाः श्यामाः। जसो वेति जस ओत्त्वम्। सालिणो पीलुणो शालीन् पीलून्। इदुतोः शसो णो इति णो आदेशः। सहीओ बहूओ सखीः वधूः। स्त्रियां शस उदोताविति ओत्त्वम्। अदन्तवद्भावाद् एत्त्वं न भवतीत्यर्थः। 'अकारलोपसूत्रेऽपि नेष्टं शेषाददन्तवत्'। क्वचिदपि लोप इत्यत्रेत्यर्थः। सव्वाओ भव्वाओ सर्वाः भव्याः। बुद्धीओ धेणूओ बुद्धयः धेनवः। शेषाददन्तवदित्यदन्तवद्भावाद् जसुङस्यांसु दीर्घ इति दीर्घः। सहीओ बहूओ सख्यः वध्वः। सर्वत्र जसो वेति जस ओत्त्वम्। उदाहृतं चान्यत्र यथायोग्यमित्यलमतिप्रसङ्गेन ॥१०६॥

सुबोधिनी

उक्तादन्यः शेषः। विशेषसूत्रैर्न यस्य कार्याणीति यावत्। अकारान्तादत ओत् सोरित्यादिसूत्रैर्यानि आदिश्यन्ते, तानि पूर्वमेवाभिहितानि। 'अकारान्तवदादन्तात् शसो लोपाय वेष्यते'। बाला बालाओ बालाः। गिरिओ गिरिउ गिरेः। साणूओ साणूउ सानोः। 'ए सुप्यङिङसोः सूत्रे नेष्टं शेषाददन्तवत्'। रामाओ रामाः, शालिणो शालीन्, पीलुणो पीलून्, सखीओ सखीः, बहूओं वधूः। 'अकारलोपे सूत्रेऽपि नेष्टं शेषाददन्तवत्'। सव्वाओ सर्वाः, बुद्धीओ बुद्धयः, धेणूओ धेनवः, सहीओ सख्यः, बहूओ वध्वः ॥१०६॥

(२९४) न ङिङस्योरेदातौ ॥१०७॥

सञ्जीवनी

अकारान्तरहितात् प्रातिपदिकात् परयोः ङिङसिप्रत्यययोर्यथासंख्यम् एत् आत् इत्येतावादेशौ न भवतः। पूर्वेणादन्तवद्भावात् ङेरेम्मी इति म्मिआदेशवद् एकारादेशोऽपि प्राप्तः। तथैव ङसेरादोदुहय इति ओ उ हि इत्यादेशवद् आकारादेशोऽपि प्राप्तः। ङौ गिरिम्मि तरुम्मि गिरौ तरौ। दहिम्मि महुम्मि दध्नि दधनि मधुनि। पुंनपुंसकयोरेवायमेत्त्वनिषेधः, स्त्रियां तु ङावदन्तवद्भावाद् अप्रतिषेध एव। टाङसिङीनामिदेदादत इत्यादेशात्। यतोऽदन्तवद्भावे प्राप्ते अनेन एकारादेशः प्रतिषिध्यते तेनेह ङेरेत्त्वं भवत्येव। बुद्धीए धेणूए। बुद्धौ धेनौ। जश्शसुङसुङिषु दीर्घत्वं वक्तव्यमिति इदुतोः स्त्रियामिति दीर्घत्वम्। 'ङसेरातः— गंगाओ गंगाउ गंगायाः। गंगाहिन्तो। 'ङसेरतः परस्येह हिन्तो इत्यपि दृश्यते'। इति पूर्वेण अदन्तवद्भावाद् हिन्तो आदेशः। इदुद्भ्यां— गिरीओ गिरीउ गिरिहिन्तो गिरेः।

उसेरातः– गंगाओ धेणूओ साणूउ साणूहिन्तो सानोः। उभयत्रापि पूर्वेण अदन्तवद्-भावाद् जश्शसूङस्यांसु दीर्घ इति दीर्घः। हिकारादेशः कस्मान्न भवति ? 'ङसेर्यदा हिरादेशो नादन्तवदिदुतोर्विधिः' इति निषेधात्। ईदूद्भ्याम्– तरुणीओ तरुणीउ तरुणीहिन्तो तरुणीहि तरुण्याः। बहूओ बहूउ बहूहि बहूहिन्तो वध्वाः। गंगाओ इत्यादिषु अपादानव्यक्तये आगत इत्यादिपदं योज्यम् ॥१०७॥

सुबोधिनी

अकारान्तरहितात् प्रातिपदिकात् परयोः ङिङसिप्रत्यययोर्यथासंख्यम् ए आ इत्यादेशौ न भवतः। गिरिम्मि गिरौ। गिरीउ गिरीओ गिरेः ॥१०७॥

(२९५) ए भ्यसि ॥१०८॥

सञ्जीवनी

नेत्येव। भ्यसूप्रत्यये परे नकारान्तस्य एकारादेशो न भवति। ए सुप्यङिङसोरिति प्राप्तः। एवं च एत्त्वे प्रतिषिद्धे जसूङस्यांसु दीर्घ इत्यत्र ङसेः पञ्चम्युपलक्षणत्वाद् दीर्घत्वं प्रवर्तते। पञ्चाहिन्तो पञ्चासुन्तो पञ्चभ्यः। सत्ताहिन्तो सत्तासुन्तो सप्तभ्यः। भ्यसो हिन्तो सुन्तो इति हिन्तो सुन्तो आदेशौ ॥१०८॥

सुबोधिनी

भ्यसूप्रत्यये परे नकारान्तस्य एकारादेशो न भवति। पंचाहिन्तो पंचासुन्तो पंचभ्यः ॥१०८॥

(२९६) द्विवचनस्य बहुवचनम् ॥१०९॥

सञ्जीवनी

सुपां तिङां च विभक्तीनां सम्बन्धिनो द्विवचनस्य औ तस् इत्येवंप्रभृतेर्यथाक्रमं जस् झि इति बहुवचनमादेशो भवति। सुपां तावत्– दो हत्था द्वौ हस्तौ। उभयत्रापि औकारस्य जस्। द्वेर्दो इति दो आदेशः। हत्था इत्यत्र स्तस्य थः। तस्य द्वित्वे वर्गे युजः पूर्व इति तः। जश्शसोर्लोप इति जसो लोपः। जसूङस्यांसु दीर्घ इति दीर्घः। दो हत्थे पेच्छ। द्वौ हस्तौ प्रेक्षस्व। अत्र औकारस्य शस् आदेशः। हत्थ इत्यत्र पूर्ववत् शसो लोपे कृते ए सुप्यङिङसोरिति एत्त्वम्। दोहिं हत्थेहिं द्वाभ्यां हस्ताभ्याम्। भ्यामो भिसि कृते दोहिं इत्यत्र शेषाददन्तवदित्यतिदेशाद् भिसो हिमिति हिं। द्वेर्दो इति दो आदेशः। बिन्दुष्टामोर्ण इत्यादिना हिमादेशे बिन्दुः। दोहिन्तो हत्थाहिन्तो द्वाभ्यां हस्ताभ्याम्। अत्र भ्यामो भ्यस्। तस्य भ्यसो हिन्तो सुन्तो इति हिन्तो आदेशः। अनेनैव

शेषाददन्तवद्भावाद् दोहिन्तो इत्यत्र हिन्तो आदेशः। हत्थाहिन्तो इत्यत्र जसुङस्यांसु दीर्घ इति ङसेः पञ्चम्युपलक्षणत्वाद् दीर्घः। दोण्हं हत्थाणं द्वयोः हस्तयोः। ओस आम्। एकत्र एषामामो ण्हं इति ण्हं आदेशः। हत्थाणं इत्यत्र टामोर्ण इति णः। तस्मिन् बिन्दुष्टामोर्ण इत्यादिना बिन्द्वागमः। दोसु हत्थेसु। द्वयोः हस्तयोः। ओसः सुप्। ए सुप्यङिङसोरित्येत्त्वम्। तिङम्– दो होन्ति द्वौ भवतः। भू सत्तायामित्यस्य भुवो होहुवाविति हो आदेशः। तस्मात् परस्य प्रथमपुरुषद्विवचनस्य तसः झिरादेश। तस्य न्तिहेत्थामोमुमा बहुष्विति न्तिरादेशः। दुवे तुम्हे पढह। दुवे तुम्हे पढित्थ। द्वौ युवां पठथः। पठ व्यक्तायां वाचीत्यस्मात् परस्य मध्यमपुरुषस्य द्विवचनस्य थसः थादेशः। तस्य पूर्ववत् ह इत्था इत्यादेशौ। शेषाणामदन्ततेति धातोरदन्तत्वम्। इत्थादेशे क्वचिदपि लोप इति वा सन्धावचामित्यादिना वा अकारलोपः। ठो ढ इति ठस्य ढः। दोणि अम्हे जाणीमो द्वावावां जानीवः। ज्ञा अवबोधने इत्यस्य ज्ञो जाणमुणौ इति जाण आदेशः। तस्मात् परस्य उत्तमपुरुषद्विचनस्य वसो मसादेशः। अस्य पूर्ववत् मोमुम इत्येतेषामन्यतम आदेशः। इच्च बहुष्विति प्रकृते एत्त्वमित्त्वं वा। दो रमन्ति द्वौ रमेते। रमु क्रीडायामित्यस्मात् परस्य प्रथमपुरुषस्य द्विवचन आतामित्यस्य बहुवचनं झ आदेशः। तस्मात् न्तिहेत्थेत्यादिना न्तिरादेशः। तथाऽऽत्मनेपदस्य बहुवचनमादेशः। शेषाणामदन्ततेति धातोरदन्तत्वम्। दुवे तुम्हे रमह रमित्था वा। द्वौ युवां रमेथे। अत्राऽऽथामित्यस्य बहुवचनं ध्वमित्यादेशः। पूर्ववद् ह इत्था इत्यादेशौ। अदन्तत्वं पूर्ववत्। पूर्ववद् ह इत्था इत्यादिकृते क्वचिदपि लोप इत्यलोपः। दोणि रमामो रमिमो द्वौ आवां रमावहे। अत्र उत्तमपुरुषद्विवचनस्य वहीत्यस्य महिङ् आदेशः, तस्य पूर्ववद् मो मु म इत्येतेषामन्यतम आदेशः। अदन्तत्वं पूर्ववत्। तस्य इच्च बहुषु इति इत्त्वमात्त्वं वा ॥१०९॥

सुबोधिनी

सुपां तिङं च विभक्तीनां सम्बन्धिनो द्विवचनस्य औ तस् इत्यादेर्बहुवचनमादिश्यते। दो हत्था द्वौ हस्तौ। दो होन्ति द्वौ भवतः ॥१०९॥

(२९७) चतुर्थ्याः षष्ठी ॥११०॥

सञ्जीवनी

चतुर्थीविभक्तेः स्थाने षष्ठीविभक्तिर्भवति। ङे भ्यां भ्यस् इत्येतेषां ङस् ओस् आम् इति त्रय आदेशा भवन्ति। बम्हणस्य देसु। ब्राह्मणाय देहि। स्सो ङस इति स्सः। बम्हणीए देसु। ब्राह्मण्यै देहि। अत्र ङसुङीनामिदेदादत इति एकारादेशः। बम्हणाण देसु। ब्राह्मणेभ्यो देहि। पूर्ववदामो णः, दीर्घत्वं च। ह्मष्णेत्यादिना हस्योपरि मस्य स्थितिः। णमो देवाणं। सोत्थि माणुसाणं। नमो देवेभ्यः। स्वस्ति मानुषेभ्यः ॥११०॥

सुबोधिनी

चतुर्थ्या विभक्तेः षष्ठी विभक्तिरादिश्यते । बम्हणस्स देसु, ब्राह्मणाय देहि । एवं बम्हणाण ब्राह्मणाभ्यां ब्राह्मणेभ्यो वा ।।११०।।

(२९८) क्वचिन्न तादर्थ्ये ।।१११।।

सञ्जीवनी

तादर्थ्येऽर्थे विहितायाः चतुर्थ्याः स्थाने षष्ठी न भवति । गमणाअ उज्जतो गमनाय उद्यतः । त्यथ्यद्यां इति द्यस्य जः । देवाअ बली देवाय बलिः । घराअ दारुं गृहाय दारु । इत्यादौ संस्कृतवच्चतुर्थी वक्तव्या । क्वचिद्ग्रहणम् अबहुत्वार्थम् । तादर्थ्येऽपि बहुवचनस्य षष्ठी भवत्येव । देवाणं बलीओ घराणं दारुइं । देवेभ्यो बलयः, गृहेभ्यो दारूणि । 'क्वचिदन्यविभक्त्यर्थे दृश्यन्तेऽन्या विभक्तयः' । तथा चोक्तम्– व्यत्ययोऽप्यासामिति । क्वचित् तृतीयार्थे सप्तमी । अच्छीसु पिज्जसि । अक्षीभ्यां पीयसे । क्वचित् सप्तम्यर्थे द्वितीया । रत्तिं दिट्ठो रात्रौ दृष्ट इत्यादिषु । ये तु कस्स सुमरसि कं स्मरसीत्यादौ द्वितीयायाः स्थाने षष्ठी विदधति, तन्न समीचीनम्, यतः संस्कृत-शब्दानुसारेणैव स्मृत्यर्थे कर्मणि द्वितीयाषष्ठ्यौ विधीयेते, भवत्येव कस्य स्मरसीति । 'अन्यादृश्यपि वीप्सायां द्विरुक्तिः क्वापि दृश्यते' अंगमंगाइं अङ्गान्यङ्गानि । अंगमंगाण अंगानामंगानाम् । अंगमंगसु अङ्गेषु अङ्गेषु । वच्च वच्चह व्रजत व्रजत । होहोइ भवति भवति । इत्यादिषु ।।१११।।

।। इति श्रीवसन्तराजविरचितायां प्राकृतसञ्जीवन्यां पञ्चमः सुविधिपरिच्छेदः ।।

सुबोधिनी

तादर्थ्येऽर्थे विहितायाश्चतुर्थ्याः क्वचित् षष्ठी विभक्तिर्न स्यात् । घराअ दारुं गृहाय दारु । इति संस्कृतवत् चतुर्थी । क्वचिद् ग्रहणमबहुत्वार्थम् । तेन तादर्थ्येऽपि बहुवचनस्य षष्ठी विभक्तिर्भवत्येव । देवाणं बली देवेभ्यो बलिः । 'क्वचिदन्यविभक्त्यर्थे दृश्यन्तेऽन्या विभक्तयः' । तथा चोक्तम्– व्यत्ययोऽप्यासामिति । अच्छीसु पिज्जदि अक्षिभ्यां पीयसे । अत्र तृतीयास्थाने सप्तमी । रत्तिं दिट्ठो रात्रौ दृष्टः । सप्तमीस्थाने द्वितीया । 'अन्यादृश्यपि वीप्सायां द्विरुक्तिः क्वापि दृश्यते' । अंगमंगाइं अंगान्यंगानि । अंगमंगाण अंगानामंगानाम् अंगमंगेसु अङ्गेष्वङ्गेषु । वच्चवच्चह व्रजत व्रजत होहोइ भवति भवति इत्यादिषु ।।१११।।

वृत्तौ प्राकृतसूत्राणां सदानन्दस्य निर्मितौ ।
परिच्छेदः सुबोधिन्यां पञ्चमः सुविधिर्गतः ।।

॥ षष्ठः परिच्छेदः ॥

❀❀❀

अथ तिङ्विधिरुच्यते

(२९९) ततिपोरिदेतौ ॥१॥

सञ्जीवनी

आत्मनेपदपरस्मैपदयोः प्रथमपुरुषैकवचनयोः प्रत्यययोः ततिवित्येतयोः प्रत्येकम् इ ए इत्येतावादेशौ भवतः। तकारोऽसन्देहार्थः। रमइ रमए रमते। रमु क्रीडायामित्यस्मादात्मनेपदिनः परस्य तप्रत्ययस्य इ ए इत्यादेशौ। शेषाणामदन्ततेति धातोरदन्तत्वम्। विरमइ विरमए। एतस्माद् विपूर्वात् परस्मैपदिनः परस्य तिपः इ ए इत्यादेशौ पूर्ववददन्तत्वम्। अत्र यथासंख्यं तिप इ तस्य ए इति न भवति, सिप्थासोः सि से इत्यत्र सिपः सिकारादेशविधानसामान्याद् यथासंख्यपरिभाषाया अनित्यत्वज्ञापनात्। ततिपोरिदेतौ इति व्यत्ययेन निर्देशाद् यथासंख्याभावः। 'शौरसेन्या विभाषासु भवेद् दिरपि तिप्तयोः'। यथा–

चित्ते बिहुट्टदि न खुट्टदि सा गुणेसुं
सेज्जासु लोट्टदि विसट्टदि दिम्मुहेसुं।
बोलम्मि वट्टदि पवट्टदि कब्वबंधे
झाणेन तुट्टदि चिरं तरुणी तरट्टी॥

(कर्पूरमञ्जरी, २।४)

सिद्धावस्थायां साध्यावस्थायां वा लक्ष्यवशात् परिभाषेयम्। **अनियमे नियमः परिभाषा।** ततिपोरिदेतौ इत्यादिना एकाचो हीअ इत्येवमन्येन प्रकारेण न ये तिबादीनामादेशा विधास्यन्ते, ते सिद्धावस्थायां भूते एके भवन्ति। साध्यावस्थायां वर्तमाने वा काले लक्ष्यवशाद् भवन्तीति परिभाष्यते। भूते– पेच्छइ, पेच्छए, प्रैक्षत, प्रैक्षिष्ट, प्रेक्षांचक्रे वा। ईक्ष दर्शने इत्यस्मात् प्रपूर्वात् परस्य आत्मनेपदप्रथमपुरुषैकवचनस्य तप्रत्ययस्य ततिपोरिदेताविति इ ए इत्यादेशौ। शेषाणामदन्ततेति धातोरदन्तत्वम्। सर्वत्र लवरामिति रेफलोपः। सन्धावचामित्यादिना धातूपसर्गयोः

सन्धावेत्वम् । अक्ष्यादिषु छ इति क्षस्य छः । तस्य वर्गे युज पूर्व इति चः । हसइ, हसए; अहसत्, अहसीत् जहास वा । हसे हसने इत्यस्मात् परस्य तिपः पूर्ववद् इ ए इत्यादेशौ । वर्तमाने तु प्रथमसूत्रोदाहरणानि एतान्यपि ॥१॥

सुबोधिनी

आत्मनेपदीयप्रथमपुरुषैकवचनस्य त इत्यस्य परस्मैपदीयप्रथमपुरुषैकवचनस्य तिबित्यस्य च इकार एकारश्च स्याताम् । रमइ, रमए, रमते । विरमइ, विरमए, विरमति । ततिपोरिति व्यत्ययेन ग्रहणाद् यथासंख्यं न भवति । 'शौरसेन्या विभाषायां भवेद् दिरपि तिप्तयोः' । यथा– 'चित्ते बिहुट्टदि न तुट्टति सा गुणेसुं' इत्यादौ । सिद्धावस्थायां साध्यावस्थायां वा लक्ष्यवशात् परिभाषेयम् । **अनियमे नियमः परिभाषा ।** ततिपोरिदेतावित्यादिना एकाचो हीअ इत्येवमन्येन प्रकारेण न ये तिबादीनामादेशा विधास्यन्ते, ते सिद्धावस्थायां भूतकाले साध्यावस्थायां वर्तमानकाले लक्ष्यवशाद् भवन्तीति परिभाष्यते । पेच्छइ, पेच्छए; प्रैक्षत, प्रैक्षिष्ट, प्रेक्षाञ्चक्रे वा । एतदेव वर्तमानोदाहरणम् ॥१॥

(३००) सिप्थासोः सि से ॥२॥

सञ्जीवनी

परस्मैपदात्मनेपदयोः सिप् थास् इत्येतयोः प्रत्यययोः प्रत्येकं सि से इत्यादेशौ भवतः । तुमं जाणासि, तुमं जाणासे, त्वं जानासि । ज्ञा अवबोधने इत्यस्य ज्ञो जाणमुणाविति जाण आदेशः । तस्मात् परस्य सिपः सि से इत्यादेशौ । तुमं वेवसि, तुमं वेवसे, त्वं वेपसे ? टुवेपृ कम्पने इत्यस्मात् परस्य थासः सि से इत्यादेशौ । शेषाणामदन्ततेति धातोरदन्तत्वम् ॥२॥

सुबोधिनी

सिप्प्रत्ययस्य थास्प्रत्ययस्य च सि से इत्यादेशौ स्तः । जाणासि, जाणासे, जानासि । वेवसि, वेवसे, वेपसे ॥२॥

(३०१) इण्मिपोर्मिः ॥३॥

सञ्जीवनी

आत्मनेपदपरस्मैपदयोरुत्तमपुरुषैकवचनपोःइण्मिपोः प्रत्यययोर्मिरादेशः ।अहअं तुअरामि, अहं त्वरे । ञित्वरा संवेगे इत्यस्मात् परस्य इटो मिरादेशः । त्वरस्तुवर इति तुवरादेशः, उत्तमपुरुषोपलक्षणत्वात् । अत आ मिपि वेति मिकारेऽपि आत्वम् । अहं

जंपामि, अहं जल्पामि। जप जल्प अव्यक्तायां वाचि इत्यस्मात् परस्य मिपो मिरादेशः। जल्पेर्लो म इति लस्य मः। शेषाणामदन्ततेति अदन्तता। पूर्ववदात्त्वम्। मिपो मि आदेशविधानं भणेमि करेमि इत्यादौ लादेशे वेति एत्वार्थम्। 'क्वचिल्लेटां मिकारः स्यादिलोपोऽपि विकल्पतः'। अहअं हसं, अहं हसामि। हसे हसने इत्यस्मात् परस्य मेरिकारलोपः। मो बिन्दुरित्यादिना बिन्दुः। पक्षे— अहअं हसामि। उभयत्रापि शेषाणामदन्ततेति धातोरदन्तत्वम्। अहं ण मरं, अहं न म्रिये। मृङ प्राणत्यागे इत्यस्मात् परस्येटो अनेन मिरादेशः। 'अन्त्येऽरः' इति ऋकारस्य अरादेशः। पूर्ववद् बिन्दुः। पक्षे— ण मरामि। अत आ मिपि वेत्यात्त्वम् ॥३॥

सुबोधिनी

इट् मिप् इत्येतयोः परयोर्मिरादिश्यते। तुवरामि, त्वरे। जंपामि जल्पामि। मिपो मिआदेशविधानं भणेमि करेमि इत्यादौ लादेशे वेत्येत्वार्थम्। 'क्वचिल्लेटां मिकारः स्यादिलोपोऽपि विकल्पतः'। हसं हसामि। ण मरं ण मरामि न म्रिये ॥३॥

(३०२) न्तिहेत्थामोमुमा बहुषु ॥४॥

सञ्जीवनी

बहुष्वर्थेषु विहितानां परस्मैपदानां झि थ मस् इत्येतेषाम् आत्मनेपदानां च झ ध्वं महिङ् इत्येतेषां स्थाने न्ति ह इत्था मो मु म इत्येते षडादेशाः स्थान्यादेशतया प्रवर्तन्ते। तत्र च—

स्मृतो न्ति झिझयोः स्थाने ह इत्था वेति थध्वमोः।
मोमुमा मसमहिङोश्च न्त इत्यपि च झस्य झेः॥

झिझयोः— पढन्ति पढन्ते। पठ व्यक्तायां वाचीत्यस्मात् परस्य परस्मैपदबहुवचनस्य झेः न्ति न्ते इत्यादेशौ भवतः। लहन्ति लहन्ते। डुलभष् प्राप्तौ इत्यस्मात् आत्मनेपदबहुवचनस्य झस्य न्ति न्ते इत्यादेशौ पूर्ववददन्तता। खघथादिना भस्य हः। तुज्झ भरह तुज्झे भरित्था यूयं स्मरध्वम्। स्मृ चिन्तायामित्यस्मात् परस्य अस्य ह इत्था इत्यादेशौ। स्मरतेर्भरसुमरौ इति भरादेशः। सन्धावचामित्यादिना क्वचिदपि लोप इति वाऽकारलोपः। तुज्झे तुज्झह। तुज्झे जुज्झित्था यूयं युध्यध्वम्। युधि संप्रहारे इत्यस्माद् आत्मनेपदमध्यमपुरुषबहुवचनस्य ध्वमो ह इत्था इत्यादेशौ। आदेर्यो ज इति जः। युधि-बुधि-गृधि-सिधि-क्रुधां ज्झ इति कृतद्वित्वो ज्झ आदेशः। अम्हे वीहामो अम्हे वीहामु अम्हे वीहाम वयं विभिमः, विभीमो वा। ञिभी भये इत्यस्मात् परस्य मसो मो मु म इति त्रय आदेशा भवन्ति। भियो भीवीहाविति वीहादेशः।

तस्य इच्च बहुषु इत्यात्त्वम्। अम्हे वड्ढामो अम्हे वड्ढामु अम्हे वड्ढाम वयं वर्धामहे। **वृधु** इत्यस्माद् उत्तमपुरुषबहुवचनस्य महिङो मो मु म इत्येते त्रय आदेशाः। आदेः ऋकारस्य ऋतोऽदित्यत्त्वम्। वृधेड्ढ इति धस्य कृतद्वित्वो ड्ढ आदेशः। 'इरे इत्यपि वादेशस्तिपो झेर्झस्य च स्मृतः'। सुसइरे सुहं शुष्यति सुस्वम्। शुष् शोषणे इत्यस्मात् परस्य तिपः इरे इत्यादेशः। शेषाणामदन्ततेति अदन्तत्वम्। शषोः स इति शस्यः सः। रुषादीनां दीर्घ इति दीर्घत्वं न भवति बहुलग्रहणात्। पहुव्विरे रिउणो प्रभवन्ति रिपवः। भू सत्तायामित्यस्मात् परस्य झेः इरे आदेशः। 'भुवः प्रादेः परस्य स्यादादेशो हुव्व इत्यपि' इति हुव्व आदेशः। क्वचिदपि लोप इत्यलोपः। दूमइरे विरहिणो, दूयन्ते विरहिणः। दूङ् परितापे इत्यस्मात् परस्य झस्य इरे आदेशः॥४॥

सुबोधिनी

बहुष्वर्थेषु विहितानां झि थ मस् इत्येतेषां झ ध्वं महिङ् इत्येतेषां च स्थाने न्ति ह इत्था मो मु म इत्यादिश्यन्ते स्थान्यादेशतया प्रवर्तन्ते। तत्र च–

स्मृतो न्ति झिझयोः स्थाने ह इत्था वेति थध्वमोः।
मोमुमा मसुमहिङोश्च न्त इत्यपि च झस्य झेः॥

पढंति पढते पठन्ति। लहंति लहन्ते लभन्ते। भवह भवित्था भवथ। जुज्झह जुज्झित्था युध्यध्वम्। वीहामो वीहामु वीहाम विभीमः विभिमः। वड्ढामो वड्ढामु वड्ढाम वर्धामहे। 'इवे इत्यपि वादेशः तिपो झेर्झस्य च स्मृतः'। सुसइवे शुष्यति। पहुव्विवे प्रभवन्ति। दूसइंवे दूयन्ते॥४॥

(२०३) अत ए से॥५॥

सञ्जीवनी

अदन्तनियमार्थोऽयं योगः, **सिद्धे सत्यारम्भो नियमार्थ इति वचनात्।** तेन **ततिपोरिदेताविति** इदेतौ सामान्येन विहितौ तयोर्मध्ये ए से इति तावादेशौ **अकारान्तादेव** भवत इति नियम्यते। करए करोति कुरुते वा। डुकृञ् करणे इत्यस्य **कृञः** कुण चेति ऋकारस्य अरादेशः। तस्मादुभयपदिनः परस्य त एकारादेशः। **तुमं गेण्हसे** त्वं गृह्णासि, गृह्णीषे वा। ग्रह उपादाने इत्यस्य ग्रहेर्गेण्ह इति गेण्ह **आदेशः।** अस्मादुभयपदिनः परस्य सिपूथासोरन्यतरस्य से इत्यादेशः। अत इति किम्? सो होइ तं होसि स भवति त्वं भवसि। भू सत्तायामित्यस्य भुवो हो हुवौ इति हो आदेशः। अस्मात् परयोः तिप्सिपोः क्रमेण इ सि इत्यादेशौ। सो भाइ।

तं भासि । स विभेति त्वं विभेषि । ञिभी भये इस्यस्य भियो भावीहौ इति भाआदेशः 'अकारान्तान्नियम्येते न्तमाणौ क्वापि पण्डितैः' । हुवन्ते भवन्ति । भुवो होहुवाविति हुवादेशः । न्ते इत्यपि च झस्य झेरिति झप्रत्ययस्य च न्ते आदेशः । हुवमाणो भवन् । न्तमाणौ शतृशानचोरिति माणादेशः । अदन्तादिति किम् ? होन्ति भवन्ति । न्तिहेत्थे-त्यादिना झेः न्तिरादेशः । क्वापीति वचनादिहैवानियमः । होमाणो भवन् ॥५॥

सुबोधिनी

नियमार्थविधिरयम् । **सिद्धे सत्यारम्भो विधिर्नियमार्थ इति वचनात् ।** ततिपोर्य ए इत्यादेशः, सिप्थासोश्च यः से इत्यादेशः सामान्येन विहितौ, तौ आकारान्तादेव भवतः । उदाहरणमुक्तम् । प्रत्युदाहरणं तु होइ भवति । होसि भवसि । 'अकारान्तान्नियम्येते न्तमाणौ क्वापि पण्डितैः' । हुवंते भवन्ति । हुवमाणो भवन् । अकारान्तादिति किम् ? होन्ति भवन्ति । क्वापीति वचनाद् इहैवानियमः । होमाणो भवन् ॥५॥

(३०४) अस्तेर्लोपः ॥६॥

सञ्जीवनी

तिङ्विधेर्द्वितीयसूत्रात् लक्ष्यवशादनुवर्तते । अस् भुवीत्यस्य तिबादिप्रत्ययेषु लक्ष्यवशात् लोपो भवति, सर्वत्र न भवतीत्यर्थः । तुमं सि । पुत्तो सि त्वमसि पुत्रोऽसि । सिप्थासोः सि से इति सिपः सिरादेशः । लक्ष्यवशात् किम् ? इह मा भूत् । अत्थि अस्ति । तिपि सिद्धस्य स्तस्य थ इति थः । तस्य द्वित्वे वर्गे युज पूर्व इति तः । सन्ति सन्त्येव । अत्र झिप्रत्ययस्य न्तिहेत्थेत्यादिना न्तिरादेशः । अडादेशा बहुलमित्य-कारलोपः । शेषाणामदन्ततेति अदन्तत्वम् ॥६॥

सुबोधिनी

तिबादौ परे असुधातोर्लोपः स्यात् । तुमं सि । त्वमसि । पुत्तो सि पुत्रोऽसि । अत्र परिभाषासूत्रात् लक्ष्यवशादित्यनुवर्तते, तेनेह मा भूत् । अत्थि अस्ति । सन्ति सन्त्येव ॥६॥

(३०५) मिमोमुमानामधो हश्च ॥७॥

सञ्जीवनी

अस्तेर्लोप इत्यनुवर्तते । इण्मिपोर्मिरिति मिरादेशः । न्तिहेत्था मोमुमा बहुषु इति मसो मोमुमा आदेशाः । तेषामधो हकारः प्रयोज्यः । अस् भुवीत्यस्य च लोपः । आणत्त म्हि आज्ञप्तोऽस्मि । आणत्त म्हो आणत्त म्ह आज्ञप्ताः स्मः । सन्धावचामित्यादिना आणत्त इत्यत्र ह्रस्वः ॥७॥

सुबोधिनी

अस्तेः सम्बन्धिनां मि मोमु म इत्यादेशानां मध्ये हकारः प्रयोज्यः। चकार उक्तस्य धातुलोपस्य समुच्चयार्थः। आणत्त म्हि आज्ञप्तोऽस्मि। आणत्त म्हो आणत्त म्ह आज्ञप्ताः स्मः ॥७॥

(३०६) यक इअइज्जौ ॥८॥

सञ्जीवनी

संस्कृतशब्दानुशासनैर्भावकर्मणोरर्थयोरार्धधातुकसार्वधातुकयोर्मध्ये विहितो यो यक् तस्य इअ इज्ज इत्यादेशौ भवतः। णच्चिअइ णच्चिज्जइ, णच्चिज्जए नृत्यते। नृती गात्रविक्षेपे इत्यस्माद् भावार्थोत्पन्नस्य यक्प्रत्ययस्य इअ इज्ज इत्यादेशौ। च्चो व्रजि-नृत्योरिति तकारस्य च्च आदेशः। तस्य सन्धावचामित्यादिना क्वचिदपि लोप इत्यादिना वा अकारलोपः। ततिपोरिदेताविति पूर्वसूत्रमनुवर्तते। तेन तप्रत्ययस्य इ ए इत्यादेशौ। एवं गाइअइ गाइअए गाइज्जइ गाइज्जए मए। गीयते मया। कै गै शब्दे इत्यस्मात् कर्मणि उत्पन्नस्य यकः इअ इज्जौ। अडादेशा बहुलमिति एकारस्यात्त्वम् ॥८॥

सुबोधिनी

भावकर्मणोरर्थयोर्विहितसार्वधातुकायोर्मध्ये विहितो यो यक् प्रत्ययस्तस्य इअ इज्ज इत्यादेशौ स्तः। भावे– णच्चिअइ णच्चिअए णच्चिज्जइ णच्चिज्जए नृत्यते। कर्मणि– गाइअइ गाइअए गाइज्जइ गाइज्जए गीयते ॥८॥

(३०७) नान्त्यद्वित्वे ॥९॥

सञ्जीवनी

पूर्वसूत्रमनुवर्तते। शकादीनां द्वित्वमित्यादिना भावकर्मणोरर्थयोर्यदन्त्यवर्णस्य द्वित्वम्, तस्मिन् सति अइ इज्ज इत्यादेशौ न भवतः। द्वित्वेनैव यगर्थस्य प्रतीयमानत्वात्। उक्तार्थानामप्रयोग इति वचनात् तद्योगे न वर्तते इत्यर्थः। सक्कइ मए शक्यते मया। शक् शक्तौ इत्यस्मात् ततिपोरिदेताविति तप्रत्ययस्य इ ए आदेशौ। शकादीनां द्वित्वमिति ककारस्य द्वित्वम्। शेषाणामदन्ततेति अदन्तत्वम्। गम्मइ गामो गम्मए गामो गम्यते ग्रामः। गमादीनां चेति द्वित्वम्। सुप्पइ तीए सुप्यते तया। पूर्ववद् द्वित्वम्। अडादेशा बहुलमिति वस्य उत्वम्। लब्भइ सिविणो। लभ्यते स्वप्नः। डुलभष्

प्राप्तौ इत्यस्य गमादीनां चेति द्वित्वे वर्गे युजः पूर्व इति बः। अयं योगो विभज्यते। तेन यथादर्शनमन्यत्रापि यकोऽभावः। हीरइ कीरइ ह्रियते क्रियते। हृञ्कृञोर्हीर-कीराविति हीरकीरादेशौ ॥९॥

सुबोधिनी

शकादीनामित्यादिना भावकर्मणोरर्थयोर्यदन्त्यवर्णस्य द्वित्वं तस्मिन् सति यक इअ इज्ज इत्यादेशौ न स्तः। अयमर्थो द्वित्वेनैव यगर्थस्य प्रतीयमानत्वादुक्तार्थानाम-प्रयोग इति वचनात्, तदयोगे च न भवति। क्व तदादेशे प्रसक्तिरिति सक्कइ सक्कए शक्यते। सुप्पइ सुप्पए सुप्यते। अयं योगो विभज्यते। तेन यथादर्शनमन्यत्रापि यकोऽभावः। हीरइ ह्रियते। कीरइ क्रियते ॥९॥

(३०८) न्तमाणौ शतृशानचोः ॥१०॥

सञ्जीवनी

शतृ शानच् इत्येतयोः प्रत्यययोरेकस्य न्त माण इत्यादेशौ भवतः। कुप्पन्तो कुप्पमाणो कुप्यतीति कुप्यन्। कुप् क्रोधे इत्यस्मात् शतुः न्तमाणौ। शेषाणामदन्ततेति अदन्तत्वम्। शकादीनां द्वित्वमिति द्वित्वम्। खमन्तो खमामणो क्षमते इति क्षममाणः। क्षमुष् सहने इत्यस्मात् शानचो न्तमाणौ। ष्कक्षस्कां ख इति क्षस्य खः। अदन्तत्वं पूर्ववत्। सर्वत्र अत ओत सोरित्योत्त्वम्। क्वचिदपि लोप इत्यलोपः। 'ऌस्य क्रियातिपत्तौ वा न्तमाणावपि च क्वचित्'। जइ पढन्तो पंडिओ होन्तो। जइ पढमाणो पंडिओ होमाणो। यद्यपठिष्यत् तदा पण्डितोऽभविष्यत्। पठ व्यक्तायां वाचीत्यस्य शेषाणामदन्ततेति अदन्तत्वम्। ठो ढ इति ढः। पक्षे जइ पढेज्जा पण्डिओ होज्ज। 'क्रियातिपत्तिकालेऽपि 'ज्जज्जा वेति न्तमाणवत्' इति ज्ज ज्जा इत्यनयोरन्यतर आदेशः। ऌादेशे वेत्येत्वम् ॥१०॥

सुबोधिनी

शतृशानच् इति प्रत्यययोः प्रत्येकं न्त माण इत्यादिश्येते। कुप्पन्तो कुप्पमाणो कुप्यन्। क्खमन्तो क्खम्माणो क्षममाणः। 'ऌस्य क्रियातिपत्तौ वा न्तमाणावपि च क्वचित्'। जइ पढन्तो पण्डिओ होन्तो। जइ पढमाणो पण्डिओ होमाणो। यद्यपठिष्यत् पण्डितोऽभविष्यत्। पक्षे जइ पढेज्ज पण्डिओ होज्ज ॥१०॥

(३०९) ई च स्त्रियाम् ॥११॥

सञ्जीवनी

पूर्वसूत्रमनुवर्तते । स्त्रीलिंगे वाच्ये सति शतृशानचोरीकारादेशो भवति । चकारात् न्तमाणादेशावपि । कुणई कुर्वन्ती कुर्वाणा । डुकृञ् करणे इत्यस्य कृञः कुण चेति कुण आदेशः। तस्मात् परस्य शतृशानचोरन्यतरस्य ईकारादेशः। एवं हरई हरन्ती हरमाणा । आदीतौ बहुलमित्याप्रत्ययः ॥११॥

सुबोधिनी

स्त्रीलिंगे वाच्ये शतृशानचोरीकारादेशः स्यात् । चकारात् न्तमाणावपि । कुणई कुर्वन्ती कुर्वाणा । पक्षे कुणती कुणमाणा ॥११॥

(३१०) धातोर्भविष्यति हिः ॥१२॥

सञ्जीवनी

भविष्यत्काले विहितेषु लकारेषु धातोर्हिर्विकरणो भवति । तथा चोक्तं भविष्यति लृट्, आशिषि लिङ्, अनद्यतने लुडिति । कातन्त्रेऽप्युक्तं भविष्यति भविष्यन्त्याशीश्च तिस्र इति । काहिइ करिष्यति क्रियात् कर्ता वा । करिष्यते कृषीष्ट कर्तैव वा । डुकृञ् करण इत्यस्योभयपदिनः कृञः का भूतभविष्यतोरिति कादेशः। अस्मात् परस्य लृटो लिङो लुटो वा सम्बन्धिनः प्रथमपुरुषैकवचनस्य तिपूतयोरन्यतरस्य ततिपोरिदेताविति इकारादेशः। काहिन्ति करिष्यन्ति क्रियासुः कर्तारो वा। करिष्यन्ते कृषीरन् कर्त्तार एव वा। अत्र झिझयोरन्यतरस्य न्तिहेत्थेत्यादिना न्तिरादेशः। तं काहिसि त्वं करिष्यसि क्रियाः कर्त्तासि वा । त्वं करिष्यसे कृषीथा कर्त्तासे वा । अत्र सिपूथासोरन्यतरस्य सिपूथासोः सि से इति सिरादेशः। तुम्हे काहिह तुम्हे काहित्था यूयं करिष्यथ क्रियास्त कर्तास्था वा यूयं करिष्यध्वं कृषीध्वं कर्ताध्वे वा। अत्र थध्वमोरन्यतरस्य न्तिहेत्थेत्यादिना ह इत्था इत्यादेशौ। काहित्थेत्यत्र सन्धाविकारलोपः ॥१२॥

सुबोधिनी

भविष्यत्काले विहितलकारेषु परेषु धातोर्हिकारविकरणो भवति । काहिइ । लृटि करिष्यति करिष्यते वा। आशीर्लिङि क्रियात् कृषीष्ट वा। लुङि कर्ता ॥१२॥

(३११) उत्तमे स्सा हा च ॥१३॥

सञ्जीवनी

पूर्वसूत्रमनुवर्तते। भविष्यत्कालविहितानां लृट् लिङ् लुट् इत्येतेषां सम्बन्धिनि उत्तमपुरुषे परे धातोः स्सा हा इत्येतौ विकरणौ भवतः। चकारात् हिकारोऽपि। अम्हे जाणिस्सामो, अम्हे जाणिस्सामु, अम्हे जाणिस्साम, अम्हे जाणिहामो, वयं ज्ञास्यामः, ज्ञेयास्म ज्ञातास्मो वा। वयं ज्ञास्यामहे ज्ञासीमहि ज्ञातास्महे। ज्ञा अवबोधने इत्यस्योभयपदिनो ज्ञो जाणमुणाविति जाणादेशः। तस्मात् परस्य मस्महिङोरन्यतरस्य न्तिहेत्थेत्यादिना मो मु म इति त्रय आदेशाः। ए च क्त्वेत्यादिना एत्वमित्वं वा ॥१३॥

सुबोधिनी

भविष्यत्काले विहिते लृट्लिङ्लुटां सम्बन्धिन्युत्तमपुरुषे परे धातोः स्सा हा इति विकरणौ स्याताम्। चकाराद्धिरपि। जाणिस्सामो, जाणिहामो, जाणिहिमो, जाणिस्सामु, जाणिहामु, जाणिहिमु जाणिस्साम, जाणिहाम, जाणिहिम, ज्ञास्यामहे, ज्ञेयास्म, ज्ञासीमहि वा; ज्ञातास्मः, ज्ञातास्महे वा ॥१३॥

(३१२) मिना स्सं वा ॥१४॥

सञ्जीवनी

भविष्यतीत्यनुवर्तते। उत्तरेषु सूत्रेषु भविष्यति काले विहितानां लृट् लुट् इत्येतेषां सम्बन्धिनोः इण्मिपोर्मिरादेशः, तेन सह धातोः स्सं इति विकरणो भवति वा। धातोर्भविष्यतीति हिः। उत्तमे स्सा हा इति त्रयः प्राप्ताः। अहं चिणिस्सं। पक्षे हं चिणिहिमि, हं चिणिस्सामि, हं चिणिहामि, अहं चेष्यामि, चीयासम्, चेतास्मि वा; अहं चेष्ये, चेषीम, चेताहे वा। चिञ् चयने इत्यस्योभयपदिनः 'चिञश्चिण' इति चिणादेशः। अस्मात् परयोरिण्मिपोरन्यतरस्य इण्मिपोर्मिः इति मिरादेशः, तेन सह एकत्र स्सं इति विकरणः। ए च क्त्वेत्यादिना धातोरेत्वमित्वं वा। ननु मेरिति स्थानित्वेनैव निर्दिश्यतां किं सहभावेन ? असदेतत्। आदेशे हि कृते विकरणान्तराणि प्रवर्तेरन्, ततश्च चिणहिस्सं इत्याद्यनिष्टं संपद्येत; सहभाविनि विकरणविधौ नास्त्येष दोषः ॥१४॥

सुबोधिनी

भविष्यत्काले विहिते मिना इण्मिपोर्यो मिस्तेन मिकारेण सह धातोः स्सं इति विकरणः स्याद्वा। पक्षे हिस्साहादिविकरणः। चिणिस्सं चिणिहिमि चिणिस्साम चिणिहामि चेष्यामि चेष्ये वा, चीयासं चेषीय वा, चेतास्मि चेताहे वा ॥१४॥

(३१३) मोमुमैर्हिस्सा हित्था ॥१५॥

सञ्जीवनी

वेत्यनुवर्तते। भविष्यत्कालविहितयोः लृट् लिङ् लुट् इत्येतेषां सम्बन्धिनोः उत्तमपुरुषबहुवचनयोः मस्महिङोर्ये मो मु म इत्येते त्रय आदेशा भवन्ति, तैः सह धातोः हिस्सा हित्था इति विकरणौ वा भवतः। मोमुमानपास्य विकरणाववतिष्ठेते। ईदृशेऽर्थे उत्तमे स्सा हा चेति स्सा हा इत्येतावेव प्राप्तौ। अम्हे किणिहिस्सा, अम्हे किणिहित्था वयं क्रेयास्मः क्रेतास्मो वा, वयं क्रेष्यामहे, क्रेषीमहि क्रेतास्महे वा। डुक्रीञ् द्रव्यविनिमये इत्यस्योभयपदिनः। वा विकल्पपक्षे उत्तमे स्सा हा इत्येतत्सूत्रोदाहरणान्येव। 'लृटो यन्मध्यमैकत्वे हित्था तेन समं कृञः'। काहित्था करिष्यसि करिष्यसे वा। डुकृञ् करणे इत्यस्य कृञः का भूतभविष्यतोरिति कादेशः। तस्मात् परयोः सिप्थासोरन्यतरस्य सिप्थासोः सि से इति सिरादेशः, तेन सह हित्थाविकरणः ॥१५॥

सुबोधिनी

भविष्यत्काले वर्तमानैः मस्महिङोरादेशैर्मो मु म इत्येतैः सह धातोर्हिस्सा हित्थाविति विकरणौ स्यातां वा। किणिहित्था क्रेष्यामः क्रेष्यामहे वा, क्रेयास्मः क्रेषीमहि वा, क्रेतास्मः क्रेतास्महे वा। पक्षे किणिहिमो किणिस्सामो किणिहामो इत्यादि। 'लृटो यन्मध्यमैकत्वं हित्था तेन समं कृञः' काहित्था करिष्यसि करिष्यसे वा ॥१५॥

(३१४) कृदाश्रुवचिगमिरुदिदृशिरूपाणां काहं दाहं सोच्छं वोच्छं गच्छं रोच्छं दच्छं ॥१६॥

सञ्जीवनी

उत्तम इति नदीस्रोतोन्यायेन अनुवर्त्तते। एकवचन इति निपातसामर्थ्यात् लभ्यते। रूपं प्रकारः। डुकृञ् करणे इत्यादयोऽत्र ये सप्त धातवो निर्दिष्टास्तत्सदृशानां भविष्यदुत्तमपुरुषे स्थितानां सम्बन्धिनः पदस्य यथासंख्यं काहं इत्यादय आदेशा निपात्यन्ते। काहं करिष्यामि। दाहं दास्यामि। सोच्छं श्रोष्यामि। श्रु श्रवणे। वोच्छं वक्ष्यामि। वच् भाषणे। गच्छं गमिष्यामि। गम्लृ गतौ। रोच्छं रुदिष्यामि। रुदिर् अश्रुविमोचने। दच्छं प्रेक्ष्यामि। दृशिर् प्रेक्षणे। 'रूपशब्दस्य सादृश्यादन्येऽन्येषां निपातिताः'। यथा मोच्छं मोक्ष्यामि। मुचॢ मोचने। छेच्छं छेत्स्यामि। छिदिर् द्वैधीकरणे। भोच्छं भोक्ष्ये। भुज् पालनाभ्यवहारयोः। विच्छं वेदिष्यामि। विद् ज्ञाने। इत्यादयोऽन्येऽपि। लिङ्लुटोरप्येते प्रयोगा द्रष्टव्याः ॥१६॥

सुबोधिनी

उत्तमपुरुष इति नदीस्रोतोन्यायादनुवर्त्तत एव। एकवचन इति निपातसामर्थ्याल्लभ्यते। डुकृञ् करण इत्यादयोऽत्र ये धातवो निर्दिष्टास्तद्रूपाणां तत्सदृशानां भविष्यति उत्तमपुरुषे स्थितानां संबन्धिनः पदस्य यथासंख्यं काहमित्यादय आदेशाः स्युः। कृञ् काहं करिष्यामि। दाञ् दाहं दास्यामि। श्रु सोच्छं श्रोष्यामि। वच् वोच्छं वक्ष्यामि। गम्लृ गच्छं गमिष्यामि। रुदि रोच्छं रोदिष्यामि। दृशि दच्छं द्रक्ष्यामि। 'रूपशब्दस्य सादृशादन्येऽन्येषां निपातिताः'। मोच्छं मोक्ष्यामि। छेच्छं छेत्स्यामि। भोच्छं भोक्ष्यामि। विच्छं वेदिष्यामि इत्यादयः। लिङ्लुटोरप्येत एव प्रयोगा द्रष्टव्याः ॥ १६॥

(३१५) श्रुवादीनां त्रिष्वनुस्वारवर्जं हिलोपश्च वा ॥१७॥

सञ्जीवनी

वर्ज्यते इति वर्जः। अनुस्वारो वर्जः यस्मिन् तद् अनुस्वारवर्जमिति क्रियाविशेषणम्। पूर्वसूत्रोक्तक्रमेण श्रु इत्यादीनां श्रुवचिगमिरुदिदृशीनां त्रिषु प्रथममध्यमोत्तमपुरुषेषु यथाक्रमं पूर्वसूत्रोक्ता एवादेशा अनुस्वारवर्जं भवन्ति। त एवादेशा अबिन्दवो भविष्यन्तीत्यर्थः। तथा धातोर्भविष्यति, हिः इति यो हिकारो विहितस्तस्य च लोपो भवति। एतेन धातोरेव अमी आदेशाः, न पदस्य इति पूर्वसूत्रप्रसक्तनिपातनाभावं दर्शयति। सोच्छिइ सोच्छिहिइ श्रोष्यति। शृणोतेः परस्य लृट्प्रथमपुरुषैकवचनं तिप्। तस्य च ततिपोरिदेताविति इकारादेशः। ए च क्त्वेत्यादिना प्रकृतेरेत्वमित्वं वा। अनेनैवाग्रिमोदाहरणेष्वपि एत्वमित्वं वावगन्तव्यम्। सोच्छिन्ति सोच्छिहिन्ति श्रोष्यन्ति। लृट्प्रथमपुरुषबहुवचनस्य न्तिहेत्थेत्यादिना न्तिरादेशः। सोच्छिसि सोच्छिहिसि श्रोष्यसि। अत्र लृट्सम्बन्धिनः सिपः सिप्थासोः सि से इति सिरादेशः। अत्र से आदेशो न भवति। अतः से इति नियमात्। सोच्छिह, सोच्छिहिह, सोच्छित्था, सोच्छिहित्था, श्रोष्यथ। अत्र लृट्-सम्बन्धिनो मध्यमपुरुषबहुवचनस्य थस्य न्ति हेत्था मोमुमा बहुषु इति ह इत्था इत्यादेशौ। इत्था इत्यत्र सन्धावचामित्यादिना इकारलोपः। सोच्छिमो सोच्छिहिमो श्रोष्यामः। अत्र लृट्सम्बन्धिनो मसः न्तिहेत्थेत्यादिना मोमुमानामन्यतम आदेशः। एवं वच्यादीनां वोच्छाद्यादेशेष्वप्युदाहार्यम्। विध्याद्यर्थेषु लिङ्लुटोरप्येत एव प्रयोगाः। अर्थे परं विशेषः ॥१७॥

सुबोधिनी

श्रु-वचि-गमि-रुदि-दृशीनां त्रिषु प्रथममध्यमोत्तमपुरुषेषु पूर्वसूत्रोक्ता एवादेशा अनुस्वारवर्जं भवन्ति। तथा धातोर्यो हि विकरणस्तस्य वा लोपो भवति। एतेन धातोरेवामी आदेशाः, न पदस्येति पूर्वसूत्रेण न प्रसक्तनिपातना। सोच्छिइ सोच्छिहिइ श्रोष्यति। एवं पुरुषान्तरेऽपि वच्यादीनामुदाहरणान्युन्नेयानि। लिङ्लुटोरपि एत एव प्रयोगा द्रष्टव्याः ॥१७॥

(३१६) उ सु मु विध्यादिष्वेकस्मिन् ॥१८॥

सञ्जीवनी

उ सु मु इति लुप्तप्रथमाबहुवचनान्तम्। त्रिष्वित्यनुवर्तमानमर्थवशाद् विभक्ति-परिणाम इति वचनात् षष्ठ्यन्तं जायते। विधिरादिर्येषां ते विध्यादयः। विधि-निमन्त्रणामन्त्रणाभीष्टसंप्रश्नप्रार्थनाख्याः पाणिन्यादिपरिगृहीताः। एष्वर्थेषु त्रयाणां प्रथममध्यमोत्तमपुरुषेष्वेकत्वे उत्पन्नानां लोटो लिङो वा सम्बन्धिनो तिप् सिप् मिप् त थास् इट् इत्येतेषां च यथासंख्यम् उ सु मु इत्येते त्रय आदेशा भवन्ति। उक्तं च – विधौ लोट् लिङ् च। कातन्त्रेऽप्युक्तम् – विध्यादिषु पञ्चमी सप्तमी च। ततिपोरिदे-ताविति सिप्थासोः सि से इति इण्मिपोर्मिरित्येतेषाम् आदेशानां बाधः। कुणउ करोतु कुरुतां वा, कुर्यात् कुर्वीत वा। डुकृञ् करणे इत्यस्य कृञः कुण चेति कुण आदेशः। अस्मात् परस्य लोटो लिङो वा सम्बन्धिनस्ततिपोरन्यतरस्य उकारादेशः। तुमं कुणसु, त्वं कुरु कुर्याः, कुरुष्व कुर्वीथा वा। अत्र सिप्थासोरन्यतरस्य सुरादेशः। हं कुणमु, अहं करवाणि करवै वा। अहं कुर्यां कुर्वीय वा। अत्र उत्तमपुरुषैकवचनस्य इण्मिपोरन्यतरस्य मुरादेशः। 'विध्याद्यर्थेषु सिप्थासोरश्चादेशो विधीयते'। तुमं भिन्द, तुमं छिन्द, त्वं भिन्धि, त्वं छिन्धि, त्वं भिन्द्याः, त्वं छिन्द्याः। भिदिछिदोरन्तस्य न्दः इति न्द आदेशः। तस्य सिपो अकारादेशे कृते क्वचिदपि लोप इत्यलोपः। पक्षे तुमं छिंदसु। एवं तुमं लह त्वं लभस्व लभेथा वा। डुलभष् प्राप्तावित्यस्मात् परस्य थासो अकारादेशः। खघथादिना भस्य हः। पक्षे लहसु। 'विध्यादौ प्रथमैकत्वे शौरसेन्यां दुरिष्यते'। एदु एदु पिअसही, एतु एतु प्रियसखी। इयाद् वा। इण् गतावित्यस्य अडादेशा बहुलमिति एत्वम्। पअट्टदु अज्जो। प्रवर्ततामार्यः, प्रवर्तेत वा। प्रपूर्वस्य वृतु वर्तने इत्यस्य र्तस्य टः इति टः। शेषादेशादिना द्वित्वम्। कगचादिना च वकारस्य लोपः ॥१८॥

सुबोधिनी

विध्याद्यर्थेषु त्रयाणां पुरुषाणाम् एकत्वे उत्पन्नानां लोटो लिङश्च सम्बन्धिनां तिप्सिप्मिपां तथास्इटां च यथाक्रमम् उ सु इत्येते आदेशाः स्युः। कुणउ, करोतु,

कुरुतां वा, कुर्यात्, कुर्वीत वा। कुणसु, कुरु, कुरुष्व, कुर्याः, कुर्व्वीथाः वा। कुणमु, करवाणि करवै वा, कुर्यां कुर्वीय वा। 'विध्याद्यर्थेषु सिप्थासोरश्चादेशो विधीयते' भिन्द भिन्दसु भिन्धि भिन्द्या वा। लह लहसु लभस्व लभेथा वा 'विध्यादौ प्रथमैकत्वे शौरसेन्यां दुरिष्यते'। एदु एदु पिअसही, एतु एतु प्रियसखी स्याद्वा ॥१८॥

(३१७) न्तुहमो बहुषु ॥१९॥

सञ्जीवनी

विध्यादिष्वित्यनुवर्तते। न्तु ह मो इति लुप्तप्रथमाबहुवचनान्तम्। पूर्वसूत्रव्याख्यानेषु विध्याद्यर्थेषु त्रयाणां प्रथममध्यमोत्तमपुरुषाणां बहुत्वे उत्पन्नानां लोटः पञ्चम्याः लिङः सप्तम्याः सम्बन्धिनां परस्मैपदानां झिथमसाम् आत्मनेपदानां झध्वंमहिङां यथासंख्यं न्तु ह मो इत्येते त्रय आदेशा भवन्ति। न्तिहेत्थामोमुमा बहुष्वित्यस्यापवादः। परस्मैपदानां तावत् तूसन्तु तुष्यन्तु तुष्येयुर्वा। तुष तुष्टौ। शेषाणामदन्ततेत्यदन्तत्वम्। रुषादीनां दीर्घ इति दीर्घः। एवं तुम्हे तूसह यूयं तुष्यत तुष्येत वा। अम्हे तूसामो वयं तुष्याम् तुष्येम वा। इच्च बहुषु इति आत्त्वमित्त्वं वा। आत्मनेपदानां विसन्तु ग्रसन्तां ग्रसेरन् वा। ग्रसु ग्लसु अदने इत्यस्य ग्रसेर्विस इति विस आदेशः। एवं तुम्हे विसह यूयं ग्रसध्वं ग्रसेध्वम् वा। अम्हे विसिमो वयं ग्रसामहे ग्रसेमहि वा। इच्च बहुषु इति आत्त्वमित्त्वं वा ॥१९॥

सुबोधिनी

विध्याद्यर्थेषु त्रयाणां पुरुषाणां बहुष्वर्थेषूत्पन्नानां लिङो लोटो वा सम्बन्धिनां झिथमसां झध्वंमहिङां च यथासंख्यं न्तु ह मो इत्यादिश्यन्ते। तूसन्तु तुष्यंतु तूष्येयुर्वा। तूसह तूष्यत तुष्येत वा। तूसामो तुष्याम तुष्येम वा। लङि— विसन्तु ग्रसतां ग्रसेरन् वा। विसह ग्रसध्वं वा। विसिमो ग्रसामहे ग्रसेमहि वा ॥१९॥

(३१८) वर्तमानभविष्यदनद्यतनयोश्च ज्ज ज्जा वा ॥२०॥

सञ्जीवनी

एकस्मिन् बहुष्विति द्वयमनुवर्तते। विध्यादिष्विति च। भविष्यदनद्यतनश्चेति। भविष्यदनद्यतनः। ततो द्वन्द्वः। वर्तमाने उत्पन्नस्य लटो भविष्यदनद्यतने उत्पन्नस्य लुटः तथा विध्याद्यर्थेषूत्पन्नस्य लोटः पञ्चम्याः लिङो वा सप्तम्याः सम्बन्धिनां सर्वेषु वचनेषु ज्जज्जावित्येतावादेशौ भवतः। ततिपोरिदेतौ इत्यादिना इदादय एव प्राप्ताः।

एसो मुणेज्ज एसो मुणेज्जा एष जानाति जानीते वा। ज्ञा अवबोधने इत्यस्य ज्ञो जाणमुणाविति मुणादेशः। लादेशे वेत्यकारस्य एत्वं वा। पक्षे एसो मुणई। ततिपोरिदेताविति ततिपोरन्यतरस्य इदेतोरन्यतर आदेशः। अहं मुणेज्ज मुणेज्जा, अहं जानामि जाने वा। एदे मुणेज्ज एदे मुणेज्जा, एते जानन्ति जानते वा। पक्षे एदे मुणन्ति। न्तिहेत्थेत्यादिना झिझयोरन्यतरस्य न्तिरादेशः। तुमं मुणेज्ज तुमं मुणेज्जा, त्वं जानासि जानीषे वा। पक्षे तुमं मुणसि। सिप्थासोः सि से इति सिप्थासोरन्यतरस्य सिरादेशः। तुम्हे मुणेज्ज तुम्हे मुणेज्जा, यूयं जानीथ जानीध्वे वा। पक्षे तुम्हे मुणह। न्तिहेत्थेत्यादिना थध्वमोरन्यतरस्य ह इत्था इत्येतयोरन्यतर आदेशः। अहं मुणेज्ज मुणेज्जा, अहं जानामि जाने वा। पक्षे अहं मुणामि। इण्मिपोर्मिरिति इण्मिपोरन्यतरस्य मिरादेशः। अत आ मिपि वेत्यात्वम्। अम्हे मुणेज्ज अम्हे मुणेज्जा, वयं जानीमः जानीमहे वा। पक्षे मुणिमो। न्तिहेत्थेत्यादिना मस्महिङोरन्यतरस्य मोमुमानामन्यतम आदेशः। इच्च बहुषु इति इत्त्वमात्त्वं वा। भविष्यदनद्यतने– एसो णच्चावेज्ज णच्चावेज्जा, एष नर्तयिता नर्तयेद् वा। नृती गात्रविक्षेपे इत्यस्य णिजन्तस्थादुभयपदिनः ऋतोऽत् इति अत्त्वम्। च्चो व्रजिनृत्योरिति च्च आदेशः। तस्मात् परस्य णिचः आवे चेति आवे इत्यादेशः। सन्धावात्वम्। पक्षे णच्चावेहिइ। ततिपोरिदेताविति ततिपोरन्यतरस्य इत्त्वम्। धातोर्भविष्यति हिः इति हिविकरणः। एदे णच्चावेज्ज एदे णच्चावेज्जा, एते नर्तयितारः, नर्तयितार एव वा। पक्षे णच्चावेहिन्ति। न्तिहेत्थेत्यादिना झिझप्रत्यययोरन्यतरस्य न्तिरादेशः। तुमं णच्चावेज्ज तुमं णच्चावेज्जा, त्वं नर्तयितासि नर्तयितासे वा। पक्षे तुमं णच्चावेहिसि। तुज्झे णच्चावेज्ज णच्चावेज्जा, यूयं नर्तयितास्थ नर्तयिताध्वे वा। पक्षे तुज्झे णच्चावेहित्था। न्तिहेत्थेत्यादिना थध्वमोरन्यतरस्य ह इत्था इत्येतयोरन्यतर आदेशः। सन्धाविकारलोपः। हं णच्चावेज्ज हं णच्चावेज्जा, अहं नर्तयितास्मि नर्तयिताहे वा। पक्षे हं णच्चावेस्सं। इण्मिपोर्मिरिति इण्मिपोरन्यतरस्य मिरादेशः। मिना स्सं वेति मिकारेण सह स्सं इति विकरणः। अम्हे णच्चावेज्ज णच्चावेज्जा, वयं नर्तयितास्मः, नर्तयितास्महे वा। पक्षे अम्हे णच्चावेहिस्सा। न्तिहेत्थेत्यादिना मस्महिङोरन्यतरस्य मोमुमानामन्यतम आदेशः। मोमुमैर्हिस्सा हित्था चेति उत्तमे स्सा हा वेति चतुर्णामन्यतमो विकरणः। भविष्यदनद्यतने किम्? भविष्यत्सामान्यस्य लृटो भविष्यन्त्या मा भूत्। तेनेह ज्ज ज्जा इत्यादेशौ न भवतः। णच्चावेहिइ णच्चावेहिन्ति, नर्तयिष्यति नर्तयिष्यन्ति इत्यादि। विध्यादौ– सो कुणेज्ज स करोतु कुरुतां वा, कुर्यात् कुर्वीत वा। डुकृञ् करणे इत्यस्य कृञः कुण चेति कुण आदेशः। लादेशे वेति एत्वम्। पक्षे कुणउ। उ सु मु विध्यादिष्वेकस्मिन्निति ततिपोरन्यतरस्य उ आदेशः। तुमं कुणेज्ज कुणेज्जा कुरु

कुरुष्व कुर्याः कुर्वीथा वा। पक्षे तुमं कुणसु। उ सु मु विध्यादिष्वेकस्मिन् इति सिप्थासोरन्यतरस्य सुरादेशः। तुम्हे कुणेज्ज कुणेज्जा, यूयं कुरुत कुरुध्वं वा, कुर्यात् कुर्वीध्वं वा। पक्षे तुम्हे कुणह। न्तिहेत्थेत्यादिना थध्वमोरन्यतरस्य ह आदेशः। अहं कुणेज्ज कुणेज्जा, अहं करवाणि करवै वा, अहं कुर्यां कुर्वीय वा। पक्षे अहं कुणामु। उ सु मु विध्यादिष्वेकस्मिन्निति मिबिटोरेकस्य मुरादेशः। अत आ मिपि वेत्यात्वम्। अम्हे कुणेज्ज कुणेज्जा, वयं करवाम करामहे वा, कुर्याम कुर्वीमहि वो। पक्षे अम्हे कुणामो। न्तिहेत्थेत्यादिना मस्महिङोरन्यतरस्य मो इत्यादेशः। इच्च बहुषु इत्यात्त्वमित्त्वं वा। 'क्रियातिपत्तिकालेऽपि ज्जज्जा वेति न्तमाणवत्'। जइ भुज्जेज्ज भुज्जेज्जा वा ता थिप्पेज्ज थिप्पेज्जा वा। यदाभोक्ष्यत् तदातृप्यत्। भुज पालनाभ्यवहारयोरित्यस्य भुज्ज आदेशः। तस्य लादेशे वेत्येत्वम्। तृप प्रीणने इत्यस्य तृपः थिप्प आदेशः। पक्षे जइ भुज्जन्तो ता थिप्पन्तो। 'लस्य क्रियातिपत्तौ वा न्तमाणावपि वा क्वचित्' इति तत्प्रत्ययस्य न्तमाणयोरेक आदेशः। ज्जहि ज्जो चैव दृश्येते विध्यादिष्वपि वा क्वचित्'। कुणेज्जहि कुणेज्जो करोतु कुरुतां वा। कुर्यात् कुर्वीत वा। पूर्ववत्। कृञः कुणादेशः। एत्वं च। एवं सर्वेषु पुरुषेषु सर्वेषु वचनेषु एतावेव प्रयोगौ द्रष्टव्यौ। अर्थे परं भेदः। पक्षे कुणउ कुणन्तु एवमादयः। 'पक्षे हिश्च सह स्यातां धातूनां लृटि कर्म्मणि'। मए सो सुमरिज्जिहिइ, मया स स्मरिष्यते। स्मरतेः भरसुमराविति सुमरादेशः। तस्मात् परस्य लृटि तकारस्य ततिपोरिदेताविति इकारादेशः। यक इअइज्जावित्यनयोरन्यतर आदेशः। तस्य च ए च क्त्वेत्यादिना इत्वमेत्वं वा। अनेनैव अग्रिमोदाहरणेष्वपि इत्वमेत्वं चावगन्तव्यम्। धातोर्भविष्यति हिरिति हिविकरणः। मए तुमं सुमिरिज्जिहिसि। मया त्वं स्मरिष्यसे। लृटि थासः सिप्थासोः सि से इति सिरादेशः। तुए हं सुमिरिज्जिहिमि त्वया अहं स्मरिष्ये। लृटि इटः इण्मिपोर्मिरिति मिरादेशः। मए एदे सुमरिज्जिहिन्ति, मया एते स्मरिष्यन्ते। लृटि झस्य न्तिहेत्थेत्यादिना न्तिरादेशः। मए तुम्हे सुमरिज्जिहिह मया यूयं स्मरिष्यध्वम्। लृटि ध्वमः पूर्ववत् ह इत्था इत्यनयोरन्यतर आदेशः। तुए अम्हे सुमरिज्जिहिमो, त्वया वयं स्मरिष्यामहे। लृटः पूर्ववद् महिङो मोमुमानामन्यतम आदेशः॥२०॥

सुबोधिनी

भविष्यच्च अनद्यतनश्च इति भविष्यदनद्यतनः वर्तमाने उत्पन्नस्य लटो भविष्यदनद्यतने चोत्पन्नस्य लुटो विध्यादिषूत्पन्नयोर्लोट्लिङोश्च सर्वत्र तिबादीनां ज्ज ज्जा इत्यादेशौ स्तः। मुणेज्ज मुणेज्जा मुणइ जानाति जानीते। णच्चावेज्ज णच्चावेज्जा णच्चावेहिइ नर्तयिता। कुणेज्ज कुणेज्जा कुणेउ करोतु कुरुतां कुर्यात् कुर्वीत वा। एवं

सर्वत्र ॥'क्रियातिपत्तिकालेऽपि ज्जज्जा वेति न्तमाणवत्' । जइ भुज्जिज्ज ता थिप्पिज्ज, जइ भुजेज्जा ता थिप्पिज्जा, यद्यभोक्षत्तदाऽतृप्यत् । पक्षे जइ भुज्यन्तो ता थिप्पन्तो । 'ज्जहि ज्जो चैव दृश्येते विध्यादिषु च वा क्वचित्' । कुणज्जहि, कुणज्जो, करोतु कुरुतां वा, कुर्यात् कुर्वीत वा । एवं सर्वपुरुषेषु एवं सर्ववचनेषु एतावेव प्रयोगौ । 'पक्षे हिश्च सह स्यातां धातूनां लृटि कर्मणि' । सुमरिज्जहि स्मरिष्यते । एवं पुरुषान्तरेषु वचनान्तरेषूह्यम् ॥२०॥

(३१९) मध्ये च ॥२१॥

सञ्जीवनी

ससामग्रीकं पूर्वसूत्रमनुवर्तते । उत्तरत्र च । तेन वर्तमाने सम्प्रति काले भविष्यदनद्यतने श्वस्तने काले विध्यादिषु चार्थेषु सर्वेषु वचनेषु उत्पन्ना ये तिबादयः, तेषां तेषां च धातूनां च यन्मध्यं तत्र ज्ज ज्जा इत्येतौ द्विजकारकौ विकरणौ भवतो वा । पूर्वेण तिङामेव आदेशौ प्राप्तौ । वर्तमाने तावत्– सो देज्जइ सो देज्जाइ स ददाति दत्ते वा । डुदाञ् दाने इत्यस्मात् परे लटि ततिपोरन्यतरस्य ततिपोरिदेताविति इकारादेशः । अडादेशा बहुलमिति आकारस्य एत्वम् । एवमग्रेऽपि । पक्षे सो देज्ज सो देज्जा विकरणादेशाभ्यामन्यत्– सो देइ । अथ तिप्तयोरिकारादेश एव । 'एकाचां झिझयोर्मध्ये ज्ज लक्ष्यवशाद् भवेत्' । यत्र ज्ज एव विकरणः– ते देज्जन्ति ते ददति ददते वा । विकरणादेशाभ्यामन्यत्र ते देन्ति । झिझयोः न्तिरेव । एवमुत्तममध्यमपुरुषयोरप्युदाहार्यम् । पक्षे तस्मात् परस्य लृटि तिपः ततिपोरिदेताविति इ आदेशः । यत्र ज्जाविकरणः सो होज्जा । भविष्यदनद्यतने सो होज्जइ सो होज्जाइ स भविता । भुवो हो हुवौ इति हो आदेशः । पक्षे सो देज्जाइ ददाति दत्ते वा । डुदाञ् दाने इत्यस्मात् परस्य लटि ततिपोरन्यतरस्य ततिपोरिदेतौ इति इकारः । विकरणादेशाभ्यामन्यत्र होहिइ ।अत्र धातोर्भविष्यति हिरिति हिविकरणः । एकाचामित्यादि ।ते होज्जन्ति ते भवितारः । लुटि झेः न्तिहेत्थेत्यादिना न्तिरादेशः । अत्र ज्जा एव विकरणः । पक्षे ते होज्ज ते होज्जा । विकरणादेशाभ्यामन्यत्र ते होहिन्ति । एवं मध्यमोत्तमपुरुषयोरपि । विध्यादिषु– एसो लेज्जाउ एसो लेज्जउ एष लातु लेयाद् वा । ला आदाने इत्यस्मात् परस्य लोटि लिङि वा तिपः उ सु मु विध्यादिष्वेकस्मिन्निति उकारादेशः । पक्षे एसो लेज्जा । विकरणादेशाभ्यामन्यत्र लाउ । तिपः उकारादेश एव । एकाचामित्यादि । एदे लेज्जन्तु एते लान्तु लेयुर्वा । अत्र लोटि लिङि वा झेः न्तुहमो बहुषु इति न्तुरादेशः । पक्षे एद लेज्जा एदे लेज्ज । विकरणादेशाभ्यामन्यत्र लेन्तु । अत्र झेः न्तुरादेशः । एवं मध्यमोत्तमयोरपि । उत्तरत्र अनेकाचः प्रतिषेधसामर्थ्याद् एकाच एव एतौ विकरणौ इति ॥२१॥

सुबोधिनी

वर्तमानादिपूर्वोक्तार्थेषूत्पन्ना ये तिबादयस्तेषां धातूनां च मध्ये सर्वपुरुषेषु सर्ववचनेषु च ज्ज ज्जा इति विकरणौ वा स्तः। पूर्वसूत्रे तिबादीनामेव विहितम्। देज्जइ देज्जाइ ददाति। पक्षे देज्ज देज्जा देइ। होज्जइ होज्ज होज्जा होहिइ भविता। लेज्जइ लेज्जाइ लेज्ज लेज्जा लेउ लातु लायाद् वा। एवमन्यत्राप्यूह्यम्॥२१॥

(३२०) नानेकाचः॥२२॥

सञ्जीवनी

वर्तमाने लटो भविष्यदनद्यतने लुटो विध्यादिषु च लोटो लिङो वा सम्बन्धिनः प्रत्ययस्य अनेकाचः अनेकस्वरस्य धातोर्यन्मध्यं तत्र ज्ज ज्जा इत्येतौ विकरणौ न स्तः। पूर्वेणाविशेषात् प्राप्तौ घोलेज्ज घोलेज्जा घूर्णते। घूर्ण भ्रमणे इत्यस्य घूर्णेर्घोल्लघुम्मौ इति घोल आदेशः। तस्मात् परस्य तप्रत्ययस्य वर्तमानभविष्यदादिना ज्ज ज्जा इत्यादेशौ। लादेशे वेत्येत्वम्। पक्षे घोलइ घोलए। ततिपोरिदेतौ इति तप्रत्ययस्य इदादेशः। इत्यादयो वर्तमानभविष्यदादिसूत्र एव विस्तरेण प्रतिपादितास्त एवानुसन्धेयाः। 'अनेकाचोऽपि विध्यादौ ज्ज ज्जा मध्ये तिङां क्वचित्'। कुणेज्जसु कुणेज्जासु कुरु कुरुष्व वा, कुर्याः कुर्वीथा वा। डुकृञ् करणे इत्यस्मात् परस्य लोटि लिङि वा सिप्थासोरन्यतरस्य उ सु मु विध्यादिष्वेकस्मिन्निति सुरादेशः। कृञः कुण चेति कुणादेशः, तस्य लादशे वेत्येत्वम्॥२२॥

सुबोधिनी

अनेकाचो धातोस्तिबादीनां च मध्ये पूर्वसूत्रेण प्राप्तौ ज्ज ज्जा इति विकरणौ न स्तः। घोणेज्ज घोणेज्जा घोणइ घोणए घूर्णते इत्यादि वर्तमानभविष्यादिसूत्रोदाहरणं च संधेयम्।

'अनेकाचोऽपि विध्यादौ ज्ज ज्जा मध्ये तिङ क्वचित्'। कुणेज्जसु कुणेज्जासु कुरु कुरुष्व वा, कुर्याः कुर्वीथा वा॥२२॥

(३२१) ईअ भूते॥२३॥

सञ्जीवनी

अनेकाच इत्यनुवर्तते। भूतेऽतीते काले उत्पन्नानाम् अनेकाचो धातोः परेषां **तिङां स्थाने** ईअ इत्यादेशो भवति। एकस्मिन् बहुष्वित्यनुवृत्तेः सर्वेषु पुरुषेषु सर्वेषु **वचनेषु। भूत इति भूते लुङ् अद्यतनी, अनद्यतने लङ् ह्यस्तनी, परोक्षे लिट् परोक्षा**

इति । हुवीअ अभूत्, अभवत्, **बभूव वा** । भू सत्तायामित्यस्य भुवो होहुवाविति हुवादेशः । **तस्य** क्वचिदपि लोप **इत्यलोपः** । **लहीअ** अलब्ध अलभत लेभे वा डुलभष् प्राप्तौ इत्यस्य शेषाणामदन्ततेति अदन्त**त्वम्** । पूर्ववद् अकारस्य लोपः । खघथादिना भस्य हः ॥२३॥

सुबोधिनी

अनेकाचो धातोः परेषां भूतार्थे वर्त्तमानानां लुङ्लङ्लिट्सम्बन्धिनां तिबादीनाम् ईअ इत्यादिश्यते । हुवीअ अभूत्, अभवत्, बभूव वा । लहीअ अलब्ध अलभत लेभे वा ॥२३॥

(३२२) एकाचो हीअ ॥२४॥

सञ्जीवनी

भूते इत्यनुवर्तते । उत्तरत्र च । एकाच एकस्वरस्य धातोर्भूतकाले लुङ् अद्यतनी, लङ् अनद्यतनी, लिट् परोक्षा एतत्सम्बन्धिनां तिङां हीअ इत्यादेशः स्यात् । सर्वेषु पुरुषेषु सर्वेषु वचनेषु । होहीअ अभूत्, अभवत्, बभूव वा । भू सत्तायामिति भुवो होहुवौ इति हो आदेशः । काहीअ अकार्षीत्, अकृत वा, अकरोत्, अकुरुत वा, चकार चक्रे वा । डुकृञ् करणे इत्यस्य कृञः का भूतभविष्यतोश्चेति कादेशः । 'स्यात्तिङां हीअ एकाचो वर्तमानेऽपि भूतवत्' । सोहीअ शृणोति । श्रु श्रवणे इत्यस्य ॥२४॥

सुबोधिनी

एकाचो धातोः परेषां भूतवर्तमानलकारसम्बन्धिनां तिङां हीअ इत्यादिश्यते । होहीअ अभूत्, अभवत्, बभूव वा । काहीअ अकार्षीत्, अकरोत् अकुरुत वा, चकार चक्रे वा ॥२४॥

(३२३) आसिरस्तेः ॥२५॥

सञ्जीवनी

अस् भुवीत्यस्य धातोर्भूते काले तिङा सह आसि इत्यादेशो निपात्यते । आसि राअणो, अभूत्, आसीत्, बभूव वा रावणः । आसि रामलक्खणौ, अभूतां आस्ताम्, बभूवतुर्वा रामलक्ष्मणौ । द्विवचनस्य बहुवचनमिति तसो झिः । तेन सह आसि आदेशः । आसि रिक्खबाणरक्खसा अभूवन् अभवद् बभूवुर्वा ऋक्षवानरराक्षसाः ॥२५॥

सुबोधिनी

अस्धातोस्तिङ्भिः सह भूतेऽर्थे आसि इति निपात्यते । आसि अभूद् आसीद् बभूव वा । अयमुत्तरत्र सर्वत्र प्रयोगः ॥२५॥

(३२४) णिचः एदादेरात् ॥२६॥

सञ्जीवनी

धातोरित्येव । अन्यन्निवृत्तम् । णिच्प्रत्ययस्य एकारादेशः, धातोः सम्बन्धी य आदिस्तस्य आत्त्वम् । कारेइ कुर्वन्तं प्रयुङ्क्ते कारयति कारयते वा । हेतौ णिच्, तस्य एत्त्वम् । कृञः कुण चेति ऋकारस्य अरादेशः । ततिपोरिदेताविति ततिप्रत्यययोरन्यतरस्य इत्त्वम् । एवं पाढेइ पठन्तं प्रयुङ्क्ते पाठयति पाठयते वा । ठो ढ इति ढः ॥२६॥

सुबोधिनी

धातोः परस्य णिच्प्रत्ययस्य एकार आदिश्यते । धातोः संबंधी य आदिस्तस्य आत्त्वं च स्यात् । कारेइ कारयति ॥२६॥

(३२५) आवे वा ॥२७॥

सञ्जीवनी

णिच इत्यनुवर्तते उत्तरसूत्रयोश्च । धातोः परस्य णिच्प्रत्ययस्य आवे इति वादेशो भवति, न केवलं पूर्वोक्त एव । करावेइ पढावेइ कारयति पाठयति । पूर्वसूत्राद् योगभेद आदेरानादेशार्थः ॥२७॥

सुबोधिनी

धातोः परस्य णिच्प्रत्ययस्य आवे इति स्यात् । करावेइ कारयति । योगभेद आदेरनादेशार्थः ॥२७॥

(३२६) आविः क्तभावकर्मसु वा ॥२८॥

सञ्जीवनी

क्तप्रत्यये भावे कर्मणि वार्थे णिचः स्थाने आविरादेशः स्यात् । पक्षे णिच एदादेराद् इति धातोरात्त्वं भवति । ए आवे इत्येतौ पाक्षिकौ न भवतः । नैदावे इति प्रतिषेधस्य वक्ष्यमाणत्वात् । हसाविओ हासितः । हसे हसने इत्यस्य । पक्षे हासिओ । अत्र धातोरात्त्वमेव । एवं पढाविओ पाढिओ पाठितः । केचित्तु यत्र आविरादेशस्तत्र लक्ष्यवशाद् धातोरादेरात्वमिच्छन्ति । तेन हासाविओ पाढाविओ इत्यपि भवतीत्याहुः । भावकर्मणोः– चोराविअइ चोराविज्जइ चोर्यते । चुर स्तेये इत्यस्य । अडादेशा बहुलमित्यात्त्वम् । चिन्ताविअइ चिन्ताविज्जइ चिन्त्यते । चिति स्मृत्याम् । धाराविअइ

धाराविज्जइ धार्यते। धृङ् अवस्थाने इत्यस्य अन्ते अर इति अरादेशः। भावे कर्मणि च लकारः। तस्य ततिपोरिदेतावितीत्त्वम्। भावकर्मणोरेव यक इअइज्जाविति इअ इज्ज इत्येतावादेशौ। सन्धावकारलोपः। पक्षे चोरिअइ चोरिज्जइ। चिन्तिअइ चिन्तिज्जइ। धारिअइ धारिज्जइ। 'आहुरोत्त्वं णिचः स्थाने स्यादाविर्युगपद् क्वचित्'। तुरोविअं तुरिअं। त्वर त्वरणे इत्यादयो यथालक्ष्यमनुसर्तव्याः ॥२८॥

सुबोधिनी

क्तप्रत्यये भावकर्मणि चार्थे णिच आविरादिश्यते वा। हसाविओ हासितः। पक्षे हासिओ। केचित्तु आविरादेशपक्षेऽपि आदेर्लस्य वशादात्त्वम्, तेन हासाविओ इत्यपि प्रयोगो भवतीत्याहुः। भावे सुप्पावीअइ सुप्पाविज्जइ स्वाप्यते। पक्षे सुप्पिअइ सुप्पिज्जइ। कर्मणि– चिन्ताविअइ, चिन्ताविज्जइ, चिन्त्यते। पक्षे चिन्तिअइ, चिन्तिज्जइ। 'आहुरोत्त्वं णिचः स्थाने स्यादाविर्युगपत् क्वचित्' ॥२८॥

(३२७) नैदावे ॥२९॥

सञ्जीवनी

क्तभावकर्मस्वित्यनुवर्तते। एदावे इति लुप्तप्रथमाद्विवचनान्तम्। क्तप्रत्यये परे भावे कर्म्मणि चार्थे सति णिच ए आवे इत्यादेशौ न भवतः। अत्र णिच एदादेराद् इति पाक्षिकमादेरात्त्वम्। हसाविअइ हसाविज्जइ हास्यते। कर्मणि लकारः। तथैव यक्। तस्य यक इअइज्जाविति इअ इज्जा इत्यादेशौ । पूर्वेण णिचः आविः। हासिअइ हासिज्जइ पूर्ववत्। पाक्षिकमात्त्वम् ॥२९॥

सुबोधिनी

क्तप्रत्यये परे भावे कर्मणि च णिच ए आवे आदेशौ न स्तः। उक्तान्युदाहरणानि ॥२९॥

(३२८) अत आ मिपि वा ॥३०॥

सञ्जीवनी

मिबिति उत्तमपुरुषोपलक्षणार्थं व्याख्यानात्। तथा चोक्तं भवति – 'व्याख्यानतो विशेषप्रतिपत्तिः' न हि सन्देहादलक्षणमिति'। उत्तरत्र बहुष्विति वचनाद् एकत्वम्। येन विधिस्तदन्तस्येति वचनात् तदन्तविधिः। तेन अकारान्तस्य धातोरात्त्वं भवति उत्तमपुरुषैकवचने परे। लादेशे वेत्येत्त्वमेव प्राप्तम्। जाणामि जाणेमि जानामि जाने वा। ज्ञा अवबोधने इत्यस्य ज्ञा जाणमुणाविति जाणादेशः। तस्मादुत्तरस्य इण्मिपोरन्य-

तरस्य इण्मिपोर्मिरिति मिरादेशः। पक्षे लादेशे वेत्येत्त्वम्। एवं सहामि सहेमि सहे। सह मर्षणे इत्यस्य शेषाणामदन्ततेत्यदन्तत्वम्। पूर्ववदन्यत् ॥३०॥

सुबोधिनी

मिपा उत्तमपुरुषैकवचनमात्रमुपलक्षितम्। अतोऽकारान्तस्य धातोरुत्तमपुरुषैकवचने आकारादेशो वा स्यात्। जाणामि जाणेमि। जाने जानामि ॥३०॥

(३२९) इच्च बहुषु ॥३१॥

सञ्जीवनी

पूर्वमत्रानुवर्तते। बहुषु अर्थेषु उत्पन्ने उत्तमपुरुषे परे अतोऽकारान्तस्य धातोराकारादेशो भवति, इकारादेशश्च भवति। णिअक्कामो णिअक्किमो पश्यामः। दृशिर् प्रेक्षणे इत्यस्मात् परस्य मसः न्तिहेत्थेत्यादिना मोमुमानामन्यतम आदेशः। दृशेः पुलअणिअक्क अवक्खसच्च वा इति चतुर्णामन्यतम आदेशः। लहामो लहिमो लभामहे। डुलभष् प्राप्तौ इत्यस्मात् परस्य महिङः पूर्ववद् मोमुमानामन्यतम आदेशः। शेषाणामदन्ततेति धातोरदन्तता। खघथादिना भस्य हः ॥३१॥

सुबोधिनी

बह्वर्थविहितोत्तमपुरुषे अत आत्त्वं इत्त्वं वा स्यात्। लहामो लहिमो लभामहे ॥३१॥

(३३०) क्ते ॥३२॥

सञ्जीवनी

अत इदिति द्वयमनुवर्तते। उत्तरत्र च। आ इ इति निवृत्तम्। चानुकृष्टमुत्तरत्र नाभिसम्बध्यते इति वचनात्। तेनाकारान्तस्य धातोरिकारादेशो भवति क्तप्रत्यये परे। भरिअं स्मृतम्। स्मृ चिन्तायामित्यस्य स्मरतेर्भरसुमराविति भरसुमरयोरन्यतर आदेशः। खघथादिना भस्य हः। कगचादिना अनचस्तस्य लोपः। नपुंसके सोर्बिन्दुरिति बिन्दुः। एवं जाणिअं ज्ञातम्। ज्ञो जाणमुणाविति जाणमुणयोरन्यतर आदेशः। पढिअं पठितम्। पठ व्यक्तायां वाचीत्यस्य। शेषाणामदन्ततेति अदन्तत्वे सति अनेन इत्त्वम्। ठो ढ इति ढः ॥३२॥

सुबोधिनी

क्तप्रत्यये परे इत्त्वं स्यात्। पढिअं पठितम् ॥३२॥

(३३१) ए च क्त्वातुमुन्तव्यभविष्यत्सु ॥३३॥

सञ्जीवनी

भविष्यदिति भविष्यत्कालविहितः प्रत्ययो लृटादिर्गृह्यते। तेन क्त्वा तव्य तुमुन् इत्येतेषु भविष्यद्विहितेषु च प्रत्ययेषु अकारान्तस्य धातोरेकारादेशः स्यात्,

इकारादेशश्च। हरेऊण हरिउण हृत्वा। हृञ् हरणे इत्यस्य अन्ते अर इति ऋकारस्य अरादेशः। क्त्वा तूण इति क्त्वाप्रत्ययस्य तूण आदेशः। तस्य कगचादिना तलोपः। हरेउं हरिउं हर्तुम्। अत्र तुमुनो मो बिन्दुरित्यादिना बिन्दुः। पूर्ववदन्यत्। हरेअव्वं हरिअव्वं हर्तव्यम्। तव्यप्रत्ययस्य अधो मनयामिति यलोपः। शेषादेषादिना वस्य द्वित्त्वम्। पूर्ववत् तलोपः। हरेहिइ हरिहिइ हरिष्यति हरिष्यते वा। भविष्यति लृटि भविष्यत्काले तिप्प्रत्यययोरन्यतरस्य ततिपोरिदेताविति इत्त्वम्। एकादेशोऽपि न भवति। अत ए से इति नियमात्। धातोर्भविष्यति हिरिति हिविकरणः। इत्यादयोऽन्येऽपि ॥३३॥

सुबोधिनी

भविष्यदित्यनेन तदर्थविहितो लृटादिर्गृह्यते। क्तादौ परे अत एत्त्वम् इत्वं च स्यात्। हरेऊण हरिऊण हृत्वा। हरेउं हरिउं हर्तुम्। हरेअव्वं हरिअव्वं हर्तव्यम्। हरेहिइ हरिहिइ हरिष्यति हरिष्यते वा। इत्यादयोऽन्येऽपि ॥३३॥

(३३२) लादेशे वा ॥३४॥

सञ्जीवनी

अत इत्यनुवर्तते। एदिति च। लस्य आदेशः लादेशः। तस्मिन् लकारादेशे परतोऽकारान्तस्य धातोरेकारादेशो भवति वा। अप्राप्ते विकल्पः। हसेइ हसइ हसति। हस् हसने इत्यस्मात् तिपः ततिपोरिदेताविवितीत्त्वम्। शेषाणामदन्ततेति अदन्तत्वे सत्यनेन वा एत्त्वम्। रमेइ रमइ रमते। रमु क्रीडायामित्यस्मात् तप्रत्ययस्य पूर्ववदित्त्वम्। खमेन्तो खमन्तो क्षममाणः। क्षमुष् सहने। आनश्प्रत्ययस्य न्तमाणौ शतृशानचोरिति न्त आदेशः। ष्कक्षस्कां ख इति क्षस्य खः। अत ओत् सोरिति ओत्त्वम्। वड्ढेन्ति वड्ढन्ति वर्धन्ते। वृधु वृद्धौ। न्तिहेत्थेत्यादिना झस्य न्तिरादेशः। न्तं इत्यपि न भवति। 'अकारान्ताद् नियम्येते न्तमाणौ क्वापि पण्डितैः' इति नियमाद् वृधेर्ड्ढ इति धस्य ड्ढः। ऋतोऽत् इत्यत्त्वम्। विरमेउ विरमउ विरमतु। विधौ लोडिति तिपः उ सु मु विध्यादिष्वेकस्मिन्निति उकारादेशः। पूर्ववद्धातोरदन्तत्वम्। एवं तुमं विरमेसु विरमसु त्वं विरम्। अत्र मध्यमपुरुषैकवचनस्य लोटि सिपः पूर्ववत् सुरादेशः ॥३४॥

॥इति प्राकृतसञ्जीवन्यां तिङ्विधिः षष्ठः परिच्छेदः॥

सुबोधिनी

लकारादेशे धातोरत ए वा स्यात्। अप्राप्तविकल्पोऽयम्। रमेइ रमइ रमते ॥३४॥

वृत्तौ प्राकृतसूत्राणां सदानन्दस्य निर्मितौ।
परिच्छेदः सुबोधिन्यां षष्ठोऽयं तिङ्विधिर्गतः॥

॥ सप्तमः परिच्छेदः ॥

❀❀❀

अथ धातुविधिरुच्यते

(३३३) भुवो होहुवौ ॥१॥

सञ्जीवनी

भू सत्तायामित्यस्य धातोः हो हुव इत्यादेशौ भवतः । होइं भवति । ततिपोरिदेताविति तिपः इत्त्वम् । होन्ति हुवन्ति । न्तिहेत्थेत्यादिना झिप्रत्ययस्य न्तिरादेशः ॥१॥

सुबोधिनी

भू सत्तायामिति धातोः होइं हुव इत्यादेशौ स्तः । होइं हुवइ भवति ॥१॥

(३३४) क्ते हू ॥२॥

सञ्जीवनी

हू इति लुप्तप्रथमान्तम् । क्तप्रत्यये परे भूधातोः हू इति स्यात् । हूअं भूतम् । 'उपसर्गात् परस्यापि भुवो हूरदुरुत्समः' । अणुहूओ अनुभूतः । अहिहूओ अभिभूतः । अदुरुत्सम इति किम् ? दुब्भुओ दुर्भूतः । संभुओ संभूतः । 'भूओ इति पिशाचे स्यात् तत्र क्ते हू भुवो नहि' । भूओ भूतः ॥२॥

सुबोधिनी

क्तप्रत्यये परे भूधातोः हू इति स्यात् । हूअं भूतम् । 'उपसर्गात् परस्यापिं भुवो हूरदुरुत्समः' । परिहूअं परिभूतम् । अदुरुत्सम इति किम् ? दुब्भुओ उब्भुओ संभुओ, दुर्भूतः, उद्भूतः, संभूतः । 'भूओ इति पिशाचे स्यात् तत्र क्ते हूर्भुवो न हि' भूओ भूतः पिशाचः ॥२॥

(३३५) प्रादेर्भवः ॥३॥

सञ्जीवनी

प्रशब्दः आदिर्यस्य स प्रादिः, तस्मात् प्रादेः। प्रायः, एवमादेर्व्याकरणप्रतिपादिताद् उपसर्गगणात् परस्य भुवो भव इत्यादेशो भवति। होहुवयोर्बाधः। पहवेइ पहवइ प्रभवति। ततिपोरिदेताविति तिपः ए इ इत्यादेशौ भवतः। सर्वत्र लवरामिति रलोपः। खघथादिना भस्य हः। लादेशे वेत्यकारस्य वा एत्त्वम्। एवं पहवेन्ति पहवन्ति। न्तिहेत्थेत्यादिना झेः न्तिरादेशः। संभवेइ संभवइ संभवए संभवति। संभवेन्ति संभवन्ति। 'न हत्वं खघथादीनां परेषां बिन्दुतो भवेत्' इति हत्वाभावः। एवमुपसर्गान्तरे अन्यत्राऽपि क्वापि। 'अप्रादेरपि तथा दृश्यते भवतेर्भवः'। भवेइ भवइ भवति। 'भुवः प्रादेः परस्य स्यादादेशो हुव्व इत्यपि'। पहुव्वइ पहुव्वए ॥३॥

सुबोधिनी

प्रपराद्युपसर्गादुत्तरस्य भुवो भव इत्यादिश्यते। पहवेइ पहवइ प्रभवति। एवमुपसर्गान्तरेऽपि। 'अप्रादेरपि तथा दृश्यते भवतेर्भवः'। भवेइ भवइ भवति। 'भुवः प्रादिपरस्य स्यादादेशो हुव्व इत्यपि'। पहुव्वइ पहुव्वेइ प्रभवति ॥३॥

(३३६) त्वरस्तुवरः ॥४॥

सञ्जीवनी

त्वर इति षष्ठ्यन्तम्। ञित्वरा संभ्रमे इत्यस्य धातोः तुवर इत्यादेशो भवति। तुमं तुवरसि, तुमं तुवरेसि, तुमं तुवरसे। सिप्थासोः सि से इत्यादेशौ। सिकारादेशविषये लादेशे वा एत्वम्। कथं तर्हि तुरिअं ? तुर त्वरण इत्यस्य। तूरिअं इत्यपि तस्य रुषादित्वाद् दीर्घे सिद्धम् ॥४॥

सुबोधिनी

ञित्वरा संभ्रमे इत्यस्य धातोस्तुवर इत्यादिश्यते। तुवरेइ तुवरइ तुवरए त्वरते। कथं तर्हि तवरिअं इति ? त्वर त्वरण इत्यस्य धातोः ॥४॥

(३३७) घुर्णो घोलघुमौ ॥५॥

सञ्जीवनी

घुण घूर्ण भ्रमणे इत्यस्य घोल घुम्म इत्येतावादेशौ भवतः। घोलन्तो घोलमाणो घुम्मन्तो घुम्ममाणो घूर्णमाणः। न्तमाणौ शतृशानचोरित्यादिनान्तमाण इत्यादेशौ ॥५॥

सुबोधिनी

घुर्ण इत्यस्य घोण घुम्म इत्यादेशौ स्तः। घोणेइ घुम्मेइ, घोणइ घुम्मइ, घोणए घुम्मए घूर्णते ॥५॥

(३३८) नुदो णोल्लः ॥६॥

सञ्जीवनी

नुद प्रेरणे इत्यस्य णोल्ल इत्यादेशो भवति। पणोल्लिअं प्रणुन्नम्। क्ते इति इत्त्वम् ॥६॥

सुबोधिनी

नुद प्रेरणे इत्यस्य धातोः णोल्ल इत्यादिश्यते। णोल्लेइ णोल्लइ नुदति ॥६॥

(३३९) पाटेः फालः ॥७॥

सञ्जीवनी

अट पट गताावित्यस्य पटतेः फाल आदेशो भवति। णिजन्तस्यास्य निर्देशाद् न केवलस्यायमादेशः। फालेन्ति पाटयन्ति पाटयन्ते। णिच एदादेरादिति णिच एत्त्वम्। न्तिहेत्थेत्यादिना झिझयोरन्यतरस्य न्तिरादेशः। तुम्हे फालावेह। णिच आवे आदेशः। न्तिहेत्थेत्यादिना ह आदेशः। फालाविअं पाटितम्। आविः क्तेत्यादिना णिच आविरादेशः। कगचादिना तलोपः ॥७॥

सुबोधिनी

पट गताविति धातोः फाल इत्यादेशः स्यात्। फालेइ पाटयति ॥७॥

(३४०) वृषादीनामृतोऽरिः ॥८॥

सञ्जीवनी

वृष इत्यनेन सदृशा वृषादयः। तेन वृष सेचने इत्येवंप्रकाराणां धातूनां सम्बन्धिन ऋकारस्य अरिः आदेशो भवति। तेषाम् उपधाया ऋकारस्य अरिरादेशो दृश्यते इत्यर्थः। ऋतोऽत् इत्यस्य बाधः। ऋत इति उत्तरत्र च। एस वरिसउ एस वरिसेउ एष वर्षतु। वरिसेऊण वर्षित्वा। हरिसिऊण हर्षित्वा। हृष् हृष्टौ इत्यस्य क्त्व-तूण इति तूणादेशः। तस्य कगचादिना तलोपः। ए च क्त्वेत्यादिना एत्वम् इत्वं वा। मरिसेअव्वं मरिसिअव्वं मर्षितव्यम्। मृष तितिक्षायामिति तव्यप्रत्ययस्य अधो

मनयामिति यलोपः। शेषादेशादिना द्वित्वम्। शेषं पूर्ववत्। करिसेइ करिसइ कर्षति। कृष विलेखने इत्यस्य पूर्ववद् अदन्तत्वम्। तस्य लादेशे वेति च एत्त्वम्। अथ कथं कर्षतीत्यस्य कड्ढ इति ? उच्यते – एवमन्येऽपीति बहुलग्रहणात् पक्षे ड्ढादेशस्य प्रवृत्तेः। वृषादीनामिति किम् ? णच्चइ णच्चइ नृत्यति। च्चो व्रजिनृत्योरिति च्च आदेशः। ऋकारस्य ऋतोऽत् इत्यत्त्वम् ॥८॥

सुबोधिनी

वृष सेचन इत्यादिधातूनां सम्बन्धिन उपधाया ऋकारस्य अरिरादेशः स्यात्। वरिसइ वर्षति। हृष – हरिसइ हृष्यति। मृष – मरिसइ मृष्यते। कृष – करिसइ कर्षति। एवं लक्ष्यवशादुत्प्रेक्ष्यम्। अथ कथं कर्षतीत्यस्य कड्ढ इति ? बहुलग्रहणात् पक्षे ड्ढादेश इति प्रवृत्तेः। वृषादीनामिति किम् ? णच्चइ नृत्यति ॥८॥

(३४१) अन्ते अरः ॥९॥

सञ्जीवनी

ऋत इत्यनुवर्तते। धारोरन्ते वर्तमानस्य ऋकारस्य अर इत्यादेशो भवति। अम्हे हरिमो अम्हे हरामो, वयं हरामः, हरामहे वा। हृञ् हरणे इति धातोः न्तिहेत्थेत्यादिना मस्महिङोरन्यतरस्य मोमुमानामन्यतम आदेशः। इच्च बहुषु इति इत्त्वमात्त्वं वा। वरामो, वृणुमः, वृण्महे वा। वृञ् वरणे इत्यस्य। धरइ धरए ध्रियते। धृङ् अवस्थाने। ततिपोरिदेताविति इदेतावादेशौ ॥९॥

सुबोधिनी

धातोरन्ते वर्तमानस्य ऋतः अर इति स्यात्। हरइ हरति ॥९॥

(३४२) कृञः कुण च ॥१०॥

सञ्जीवनी

डुकृञ् करणे इत्यस्य कुण आदेशः स्यात्। चकाराद् ऋकारस्यारादेशः। कुणइ कुणए करोति कुरुते वा। ततिपोरिदेताविति तिप्तग्गेरन्यतरस्य इदेतौ। पक्षे करेइ ॥१०॥

सुबोधिनी

कृञ् इति धातोः कुण इत्यादिश्यते। चकारादर इत्यपि। कुणए करोति कुरुते वा। पक्षे करइ करए ॥१०॥

(३४३) जृभेर्जम्भा ॥११॥

सञ्जीवनी

जभि जृभी गात्रविनामे इत्यस्य जंभा स्यात् । जंभाइ जंभाअइ जृम्भते । तप्रत्ययस्य ततिपोरिदेताविति इत्त्वम् । अनदन्तानामद् वा इति वा अकारागमः । 'जृभेर्जम्भेति नादेशः सोपसर्गस्य दृश्यते' । आअंभइ आजृम्भते विअंभइ विजृम्भते । ऋतोऽद् इत्यत्त्वम् । कगचादिना जलोपः ॥११॥

सुबोधिनी

जृभी गात्रविनामे इत्यस्य धातोर्जंभा इति स्यात् । जंभाइ जृम्भते । 'जृभेर्जंभेति नादेशः सोपसर्गस्य दृश्यते' । विअंभइ विजृम्भते इति ॥११॥

(३४४) ग्रहेर्गेण्हः ॥१२॥

सञ्जीवनी

ग्रह उपादाने इत्यस्य गेण्ह आदेशः स्यात् । गेण्हइ गृह्णाति गृह्णीते वा । गेण्हिअइ गेण्हिज्जइ गृह्यते । यक इअइज्जाविति इअइज्जौ । क्वचिदपि लोप इत्यलोपः ॥१२॥

सुबोधिनी

ग्रह उपादान इत्यस्य गेण्ह इति स्यात् । गेण्हइ गृह्णाति ॥१२॥

(३४५) घेत्त क्त्वातुमुन्तव्येषु ॥१३॥

सञ्जीवनी

ग्रहेरित्यनुवर्तते । घेत्त इति लुप्तप्रथमान्तम् । क्त्वातुमुन्तव्येषु परेषु ग्रहेर्घेत्त आदेशः स्यात् । पूर्वेण गेण्ह आदेशः प्राप्तः । घेत्तूण गृहीत्वा । क्त्व तूण इति तूणादेशः । तस्य कगचादिना तलोपः । क्वचिदपि लोप इत्यलोपः । घेत्तुं गृहीतुम् । पूर्ववत् लोपद्वयम् । घेत्तव्वं गृहीतव्यम् । अधो मनयामिति यलोपः । शेषादेशादिना वस्य द्वित्वम् ॥१३॥

सुबोधिनी

क्त्वादिपरे ग्रहेर्घेत्त इति स्यात् । घेत्तूण गृहीत्वा । घेत्तुं गृहीतुं । घेत्तव्वं गृहीतव्यम् ॥१३॥

(३४६) कृञः का भूतभविष्यतोश्च ॥१४॥

सञ्जीवनी

का इति लुप्तप्रथमान्तम् । क्त्वातुमुनूतव्येष्वित्यनुवर्तते । भूते भविष्यति च यः प्रत्ययः तस्मिन् परे क्त्वा तुमुन् तव्य इत्येतेषु प्रत्ययेषु च डुकृञ् करणे इत्यस्य कादेशो भवति । कृञः कुण च इत्यस्य बाधकः । काहीअ, अकार्षीत्, अकरोत्, चकार वा । भूते लुङ् अद्यतनी, अनद्यतने लङ् ह्यस्तनी, परोक्षे लिट् परोक्षा । एषामन्यतमो यो लकारः, तस्य एकाचो हीअ इति हीअ आदेशः । काहिइ करिष्यति क्रियात् कर्ता वा । भविष्यति लृट् भविष्यन्ती, आशिषि लिङ् आशीः, अनद्यतने लुट् श्वस्तनी, एषामन्यतमो यो लकारस्तस्य मो बिन्दुरित्यादिना बिन्दुः । पूर्ववत् तलोपः । काअव्वं कर्त्तव्यम् । अधो मनयामित्यादिना यलोपः । शेषादेशादिना वस्य द्वित्वम् । पूर्ववत् तलोपः ॥१४॥

सुबोधिनी

भूते भविष्यति च यः प्रत्ययस्तस्मिन् परे क्त्वादिषु परेषु च कृञ् इत्यस्य का इति स्यात् । काहीअ, अकरोत्, अकार्षीत्, चकार वा । काहिइ करिष्यति क्रियात् कर्त्ता वा । काऊण कृत्वा । काउं कर्त्तुम् । काअव्वं कर्तव्यम् ॥१४॥

(३४७) स्मरतेर्भरसुमरौ ॥१५॥

सञ्जीवनी

स्मृ चिन्तायामित्यस्य भरसुमरावित्यादेशौ भवतः । अधो मनयामिति अन्ते अर इत्येते बाध्येते । भरिस्सं भरिहिमि, सुमरिस्सं सुमरिहिमि, स्मरिष्यामि । भविष्यति लृट् भविष्यन्ती । अन्ते इण्मिपोर्मिरिति मिरादेशः । तेन सह मिना स्सं वेति स्सं इति द्विसकारको विकरणः । पक्षे तेनैव मध्ये हिः । ए च क्त्वेत्यादिना प्रकृतेरेत्वमित्वं वा ॥१५॥

सुबोधिनी

स्मृ चिन्तायामित्यस्य धातोर्भर-सुमर इत्यादेशौ स्तः । भरइ सुमरइ स्मरति ॥१५॥

(३४८) भियो भावीहौ ॥१६॥

सञ्जीवनी

ञिभी भय इत्यस्य भावीहौ इत्यादेशौ भवतः । भाइ वीहइ । भियो वीह इत्येष वादेशः क्तेऽपि । भीओ वीहिओ भीतः । वीहादेशस्य क्ते इतीत्वम् ॥१६॥

सुबोधिनी

ञिभी भये इत्यस्य भा वीह इत्यादेशौ स्तः । भाइ वीहइ बिभेति ॥१६॥

(३४९) म्लो वा वाअ ॥१७॥

सञ्जीवनी

वा वाअ इति लुप्तप्रथमान्तम् । म्लै गात्रविनामे इत्यस्य वा वाअ इत्येतौ आदेशौ भवतः । वाइ वाअइ म्लायति । ततिपोरिदेतौ इति तिप इत्त्वम् । ननु अनदन्तानामद् वा इत्यनेन अकारागमेनैव वाअइ इत्यस्य सिद्धत्वात् किं वाअ इत्यादेशान्तरविचारेण ? सत्यम्, तस्यैव प्रपञ्चार्थम् ॥१७॥

सुबोधिनी

म्लै गात्रविनाम इत्यस्य वा वाअ इत्यादेशौ स्तः । वाइ वाअइ म्लायति । वाअग्रहणमनतिप्रयोजनमित्याहुः ॥१७॥

(३५०) तृपस्थिप्पः ॥१८॥

सञ्जीवनी

तृप् प्रीणने इत्यस्य थिप्प इत्यादेशः स्यात् । थिप्पन्तो थिप्पमाणो तृप्यन् तृप्यमाणः । न्तमाणौ शतृशानचोरिति न्त माण आदेशौ भवतः । थिप्पई तृप्यन्ती । ई च स्त्रियामिति शतृशानचोरीकारादेशः ॥१८॥

सुबोधिनी

तृष् प्रीणने इत्यस्य थिप्प इत्यादिश्यते । थिप्पइ तृप्यति ॥१८॥

(३५१) ज्ञो जाणमुणौ ॥१९॥

सञ्जीवनी

ज्ञा अवबोधने इत्यस्य जाण मुण इत्यादेशौ भवतः । तुम्हे जाणह तुम्हे जाणित्था, तुम्हे मुणह तुम्हे मुणित्था, यूयं जानीथा जानीध्वे वा । न्तिहेत्थेत्यादिना थध्वयोः प्रत्येकं ह इत्था इत्यादेशौ भवतः । यत्र इत्था तत्र सन्धावकारलोपः । 'म्नज्ञादिनेह सूत्रेण ज्ञो ण इत्यपि दृश्यते' । णाइ जानाति । णाअं ज्ञातम् । णाऊण ज्ञात्वा । अडादेशा बहुलमिति आत्वम् । इत्यादयः ॥१९॥

सुबोधिनी

ज्ञा अवबोधन इत्यस्य जाण मुण इत्यादिश्येते। जाणइ मुणइ जानाति जानीते वा। 'म्नज्ञादिनेह सूत्रेण ज्ञो ण इत्यपि दृश्यते'। णाइ जानाति ॥१९॥

(३५२) घटेर्गढः ॥२०॥

सञ्जीवनी

घट चेष्टायामित्यस्य गढादेशः स्यात्। गढइ घटते। तस्य ततिपोरिदेताविति इ ए आदेशौ ॥२०॥

सुबोधिनी

घट चेष्टायामित्यस्य गढ इति स्यात्। गढइ घटते ॥२०॥

(३५३) समो गलः ॥२१॥

सञ्जीवनी

घट इत्यनुवर्तते। सम् उपसर्गात् परस्य घटतेर्गल आदेशः स्यात्। संगलइ संघटते ॥२१॥

सुबोधिनी

समुपसर्गादुत्तरस्य घटेः गल इत्यादिश्यते। संगलइ संघटते ॥२१॥

(३५४) स्रंसो ल्हसः ॥२२॥

सञ्जीवनी

स्रंसु ध्वंसु अधःपतने इत्यस्य स्रंसः ल्हस इत्यादेशः स्यात्। ल्हसइ ल्हसए स्रंसते ॥२२॥

सुबोधिनी

स्रंसु अधःपतने इत्यस्य ल्हस इत्यादिश्यते। ल्हसइ स्रंसते ॥२२॥

(३५५) नेः सदः सज्जः ॥२३॥

सञ्जीवनी

नेरुपसर्गात् परस्य षद्लृ विशरणगत्यवसादनेषु इत्यस्य सज्ज आदेशः स्यात्। निसज्जइ निषीदति ॥२३॥

सुबोधिनी

नि-उपसर्गादुत्तरस्य षद्लृ विशरण इत्यस्य सज्ज इति स्यात्। णिसज्जइ निषीदति ॥२३॥

(३५६) आङो रभेर्ढवः ॥२४॥

सञ्जीवनी

आङ उपसर्गात् परस्य रभ राभ इत्यस्य ढव आदेशः स्यात्। आढवइ आढवेइ आरभते। लादेशे वा इति एत्वम्। आढविअं आरब्धम्। क्ते इति इत्वम्। कथं तर्हि आढत्तं आरब्धमिति ? उच्यते– क्तेन दिण्णादय इति आढत्तादेशस्य निपातनात् ॥२४॥

सुबोधिनी

आङ उपसर्गात् रभ राभ इत्यस्य ढव इति स्यात्। आढवइ आढवेई आरभते। कथं तर्हि आढत्तं आरब्धमिति ? क्तेन दिण्णादय इत्याढत्तं इत्यादेशस्य निपातनात् ॥२४॥

(३५७) उदि शलेः थल्लो वा ॥२५॥

सञ्जीवनी

उदि उपसर्गे सति शल चल आशुगतौ इत्यस्य शलः थल्ल आदेशः स्यात्। उत्थल्लइ उच्छलति। उपरि लोप इत्यादिना तलोपः। शेषस्य थस्य द्वित्वे वर्गे युजः पूर्व इति तः। पक्षे उच्छलइ ततिपोरिदेताविति तिप इत्त्वम्। शेषं संस्कृतवत् ॥२५॥

सुबोधिनी

उदुपसर्गे सति शल चल गतावित्यस्य थल्ल इत्यादेशो वा स्यात्। उत्थल्लइ उच्छलति पक्षे उच्छलइ ॥२५॥

(३५८) पिबतेर्घोटः ॥२६॥

सञ्जीवनी

वा इत्यनुवर्तते पा पाने इत्यस्य घोट आदेशः स्याद् वा। घोटइ पिबति। पक्षे पिवइ पिअइ। एवमन्येऽपीति पिव पिअ आदेशौ ॥२६॥

सुबोधिनी

पा पान इत्यस्य घोट इति स्यात्। घोटइ पिबति पक्षे पिवइ ॥२६॥

(३५९) जल्पेर्लो मः ॥२७॥

सञ्जीवनी

ल इति षष्ठ्यन्तम् । मकारे अकार उच्चारणार्थः । जल्प व्यक्तायां वाचीत्यस्य जल्पेः सम्बन्धी यो लकारस्तस्य मकारादेशः स्यात् । सर्वत्र लवरामिति ललोपः प्राप्तः । जंपिरो जल्पनशीलः । तृण इर शील इति तृण्प्रत्ययस्य इरादेशः । जंपिअं जल्पितम् । शेषाणामदन्ततेति अदन्तत्वात् क्ते इति इत्वम् ॥२७॥

सुबोधिनी

जल्प व्यक्तायां वाचीत्यस्य यो लकारस्तस्य म इति स्यात् । जंपइ जल्पति ॥२७॥

(३६०) स्थाध्यागानां ठाअ झाअ गाअ ॥२८॥

सञ्जीवनी

ष्ठा गतिनिवृत्तौ, ध्यै चिन्तायाम्, कै गै शब्दे इत्येतेषां धातूनां यथासंख्यं ठाअ झाअ गाअ इति त्रय आदेशा भवन्ति । ठाअइ तिष्ठति । झाअइ ध्यायति । गाअइ गायति । ठाइअ स्थित्वा । झाइअ ध्यात्वा । गाइअ गात्वा । 'असमासे अ आदेशः क्त्वेत्यस्य प्रवर्तते' इति अ आदेशः । ए च क्त्वेत्यादिना इत्वमेत्वं वा ॥२८॥

सुबोधिनी

ष्ठा गतिनिवृत्तौ, ध्यै चिन्तायाम्, गै शब्दे, इत्येतेषां धातूनां यथासंख्यं ठाअ झाअ गाअ इत्यादेशाः स्युः । ठाअइ झाअइ गाअइ तिष्ठति ध्यायति गायति ॥२८॥

(३६१) ठाझागाश्च भविष्यद्वर्तमानविध्याद्येकवचने ॥२९॥

सञ्जीवनी

ष्ठाध्यागा इत्यनुवर्तन्ते । विधिरादिर्येषां निमन्त्रणादीनां ते विध्यादयः । भविष्यति लृट् भविष्यन्ती, आशिषि लिङ् आशीः, लुट् श्वस्तनीति त्रीणि, वर्तमाने लट् वर्तमाना, विधिलोट् पञ्चमी, लिङ् सप्तमी, एषां सम्बन्धिनि एकवचने परे ष्ठा ध्या गा इत्येतेषां त्रयाणां यथासंख्यं ठा झा गा इति त्रय आदेशाः स्युः । चकारात् पूर्वसूत्रोक्ताः ठाअ झाअ गाअ इत्यन्येऽपि त्रयो भविष्यन्ति । ठाहिइ ठाअहिइ स्थास्यति स्थेयात् स्थाता वा । एवं झाहिइ झाअहिइ ध्यास्यति ध्येयाद् ध्याता वा । गाहिइ गाअहिइ गास्यति गेयाद् गाता वा । वर्तमाने – ठाइ तिष्ठति । तिपः ततिपोरिदेतौ

इति इत्त्वम् । पक्षे ठाअइ तिष्ठति । एव झाइ झाअइ ध्यायति । गाइ गाअइ गायति । विध्यादौ– ठाउ ठाअउ तिष्ठतु तिष्ठेद् वा । लोटि लिङि च तिपः उ सु मु विध्यादिष्वेकस्मिन् इति उकारादेशः । एवं झाउ झाअउ ध्यायतु ध्यायेद् वा । गाउ गाअउ गायतु गायेद् वा । एकवचन इति किम् ? ठाअन्ति तिष्ठन्ति । झाअन्ति ध्यायन्ति । गाअन्ति गायन्ति । एषु पूर्वेण ठाअ झाअ गाअ आदेशाः । न्तिहेत्थेत्यादिना लटि झेः न्तिरादेशः ॥२९॥

सुबोधिनी

भविष्यदाद्यर्थे उत्पन्ने एकवचने परे ष्ठादीनां क्रमेण ठा झा गा इत्यादिश्यन्ते । चकारात् ठाअ आदयः । ठाहिइ स्थास्यति स्थेयात् स्थाता वा । पक्षे ठाअहिइ । झाहिइ ध्यास्यति ध्यायाद् ध्याता वा । पक्षे झाअहिइ । गाहिइ गास्यति गायाद् गाता वा । पक्षे गाअहिइ । ठाइ ठाअइ झाइ झाअइ गाइ गाअइ तिष्ठति ध्यायति गायति । ठाउ ठाअउ तिष्ठतु, झाउ झाअउ ध्यायतु, गाउ गाअउ गायतु; तिष्ठेद् वा ध्यायेद् वा गायेद् वा ॥२९॥

(३६२) खादिधाव्योः खा धा ॥३०॥

सञ्जीवनी

खाधा लुप्तप्रथमाद्विवचनान्तम् । भविष्यद्वर्तमानविध्याद्येकवचनमित्यनुवर्तते । खादृ भक्षणे धावु गतिशुध्योरित्यनयोर्यथासंख्यं खा धा इत्येतावादेशौ भवतः, भविष्यति वर्तमाने विध्यादौ च एकवचने परे । भविष्यति तावत्– खाहिइ खादिष्यति । धाहिइ धाविष्यति । लृटि तिपः ततिपोरिदेताविति इत्त्वम् । धातोर्भविष्यति हिः इति हिर्विकरणः । वर्तमाने तु– तुमं खासि त्वं खादसि । तुमं धासि त्वं धावसि । लटि सिप्थासोः सि से इति सिरादेशः । विध्यादौ– अहं खामु अहं खादानि । अहं धामु अहं धावानि । लोटि मिपः उ सु मु विध्यादिष्वेकस्मिन् इति मुरादेशः । एकवचन इति किम् ? खाअन्तु खादन्तु । धाअन्तु धावन्तु । न्तुहमो बहुषु इति लोटि झेः न्तुरादेशः । शेषाणामदन्ततेति धातोरदन्तत्वम् । कगचादिना तलोपः । 'एकत्वेऽपि भवेत् क्वापि धावतेर्धा विभाषया' । धाहिइ धाविहिइ धाविष्यति । धाइ धावइ धावति । धाउ धावउ धावतु ॥३०॥

सुबोधिनी

खादृ भक्षणे धावु गतिशुध्योरित्यनयोः क्रमेण खा धा इत्यादेशौ स्तः, भविष्यद्वर्तमानविध्याद्येकवचने परे । खाहिइ खादिष्यति खाद्यात् खादिता वा । धाहिइ

धाविष्यति धाव्याद् धाविता वा। खाइ खादति, धाइ धावति, खाउ खादतु, धाउ धावतु; खादेद् वा धावेद् वा।'एकत्वेऽपि भवेत् क्वापि धावतेर्धा विभाषया'। धावहिइ धावइ धाइ धाउ धावउ ॥३०॥

(३६३) ग्रसेर्विसः ॥३१॥

सञ्जीवनी

ग्रसु ग्लसु अदने इत्यस्य ग्रसेर्विस आदेशः स्यात्। अम्हे विसिस्सामो अम्हे विसिहामो वयं ग्रसिष्यामः, वयं ग्रसिष्यामहे। भविष्यति लृटि महिङः न्तिहेत्थेत्यादिना मोमुमानामन्यतम आदेशः स्यात्। उत्तमे स्सा हा इति स्सा हा विकरणौ। ए च क्त्वेत्यादिना प्रकृतेरेत्वमित्वं वा ॥३१॥

सुबोधिनी

ग्रसु अदने इत्यस्य विस इत्यादेशः स्यात्। विसइ ग्रसते ॥३१॥

(३६४) चिञश्चिणः ॥३२॥

सञ्जीवनी

चिञ् चयने इत्यस्य चिण आदेशो भवति। चिणेइ चिणइ चिनोति चिनुते वा। लादेशे वा इत्येत्वम्। 'आदिश्यते चिञो धातोश्चेअ इत्येष वा क्वचित्'। उच्चेअइ उच्चिनोति। अडादेशा बहुलमिति इकारस्य एत्वम्। पक्षे उच्चिणइ। उच्चेअउं उच्चिणिउं उच्चेतुम्। उभयत्र ए च क्त्वेत्यादिना इत्वमेत्वं वा ॥३२॥

सुबोधिनी

चिञ् चयन इत्यस्य चिण आदेशः स्यात्। चिणइ चिणेइ चिणए चिनोति चिनुते वा। 'आदिश्यते चिञो धातोश्चेअ इत्येष वा क्वचित्'। उच्चेअइ उच्चिणइ उच्चिनोति। उच्चेअउं उच्चिणेउं उच्चिणिउं उच्चेतुम् ॥३२॥

(३६५) क्रीञः किणः ॥३३॥

सञ्जीवनी

डुक्रीञ् द्रव्यविनिमये इत्यस्य किण इत्यादेशः स्यात्। किणइ किणए क्रीणाति क्रीणीते वा। ततिपोरिदेताविति तिपूतयोरन्यतरस्य इदेतौ। किणिअं क्रीतम्। क्ते इति किणादेशस्य इत्वम् ॥३३॥

सुबोधिनी

क्रीञ् इत्यस्य किण इत्यादिश्यते। किणइ किणए क्रीणाति क्रीणीते वा ॥३३॥

(३६६) वे के च ॥३४॥

सञ्जीवनी

क्रीञ् इत्यनुवर्तते। विरित्युपसर्गात् परस्य क्रीञः के इत्यादेशः स्यात्। चकारात् पूर्वसूत्रोक्तः किणादेशः। विक्केइ विक्किणइ विक्रीणीते। सेवादिषु वा इति क इत्यादेर्द्वित्वम्। किणादेशेऽपि। विक्केन्तो विक्किणन्तो विक्रीणानः। न्तमाणौ शतृशानचोरिति न्त आदेशः॥३४॥

सुबोधिनी

वि-उपसर्गादुत्तरस्य क्रीञः के इत्यादिश्यते। चकारात् किणादेशोऽपि। विक्केइ विक्किणइ विक्रीणीते॥३४॥

(३६७) उध्मो धुमा ॥३५॥

सञ्जीवनी

उध्म इति षष्ठ्यन्तम्। ध्मा-शब्दाग्निसंयोगयोरित्यस्य उदुपसर्गात् परस्य धुमा इत्यादेशः स्यात्। उद्धुमाइ उद्धमति ॥३५॥

सुबोधिनी

उदुपसर्गादुत्तरस्य ध्मा-शब्दाग्निसंयोगयोरित्यस्य धूमा इत्यादिश्यते। उद्धूमाइ उद्धमति॥३५॥

(३६८) श्रदो धो दहः ॥३६॥

सञ्जीवनी

ध इति षष्ठ्येकवचनान्तम्। **श्रद इत्युपसर्गात् परस्य डुधाञ् धारणपोषणयोरित्यस्य दह इत्यादेशो भवति। सद्दहइ श्रद्दधाति।** सर्वत्र लवरामिति रलोपः। शषोः स इति शस्य सः। सद्दहियं श्रद्धितम्। क्ते इति इत्वम्। कगचादिना तलोपः। अन्त्यस्य हल इति श्रदो दलोपः। धातोर्वा अकृतद्वित्वो दहादेशः॥३६॥

सुबोधिनी

श्रदित्यतः डुधाञ् इत्यस्य दह इति स्यात्। सद्दहइ श्रद्दधाति॥३६॥

(३६९) अवाद् गाहेर्वाहः ॥३७॥

सञ्जीवनी

अव इत्यस्मादुपसर्गात् परस्य गाहू विलोडने इत्यस्य वाह आदेशो भवति। **ओवाहइ** अवगाहते। ओढवापयोरिति वा ओत्वम्। ओत्वाभावपक्षे अवआहइ। कगचादिना आदेशस्य वलोपः। अवादिति किम्? गहइ। शेषाणामदन्ततेत्यदन्तत्वम्॥३७॥

सुबोधिनी

अवोपसर्गादुत्तरस्य गाहू विलोडने इत्यस्य वाह इति स्यात्। ओवाहइ ओवाहए **अवगाहते**। अवादिति किम्? गहइ॥३७॥

(३७०) काशेर्वासः ॥३८॥

सञ्जीवनी

अवादित्यनुवर्तते। काशृ दीप्तावित्यस्यावोपसर्गात् परस्य वास आदेशो भवति। ओवासइ अवआसइ ओवासए अवआसए अवकाशते। अवादिति किम्? **कासइ**। सर्वत्र पूर्वसूत्रवत् रूपसिद्धिः। ओवासिउं अवआसिउं अवकाश्य। 'वाशब्दस्य उं **आदेशः** क्त्वास्थितस्य क्वचिद्भवेत्' इति उं आदेशः। ए च क्त्वेत्यादिना एत्वमित्वं वा। कगचादिना तलोपः। णमुलि वा प्रतिप्रयोगौ॥३८॥

सुबोधिनी

अवात् परस्य काशृ दीप्तावित्यस्य वास इति स्यात्। ओवासइ अवआसइ **ओवासए** अवआसए अवकाशते। अवादिति किम्? कासइ काशते॥३८॥

(३७१) निरो माङो माणमवौ ॥३९॥

सञ्जीवनी

निरुपसर्गात् परस्य माङ् माने इत्यस्य माण मव आदेशौ भवतः। णिम्माणेइ **णिम्माणइ** णिम्मवए णिम्मवइ निर्मिमीते। ततिपोरिदेताविति इदेतौ। माणमवा-**देशयोर्लदिशे** वा इति पक्षे एत्वम्। सर्वत्र लवरामिति निरो रलोपः। शेषादेशादिना **मस्य द्वित्वम्**। नो ण इति णः। ननु कथं सम्माणेइ सम्मानयति? मान **पूजायामिति** धात्वन्तरस्य। 'निरः परस्य माङो वा स्यातां मणमरौ **क्वचित्**'। **णिम्मणिऊण** णिम्मारिऊण। क्त्व तूणः इति तूण आदेशः। माण मव आदेशाभ्याम-

न्यत्र अडादेशा बहुलमिति अकारस्य आत्वम्। त्रिष्वपि ए च क्त्वेत्यादिना एत्वमित्वं वा ॥३९॥

सुबोधिनी

निरुपसर्गादुत्तरस्य माङ् माने इत्यस्य माण मव इत्यादिश्येते। णिम्माणेइ णिम्माणइ णिम्माणए णिम्मवइ णिम्मवए निर्मिमीते। ननु कथं सम्माणेइ सम्मानयति ? मान पूजायामित्यस्य स्यात्। 'निरः परस्य माङो वा स्यातां मणमरौ क्वचित्'। णिम्मणिऊण णिम्मारिऊण निर्माय ॥३९॥

(३७२) पदेर्व्वलः ॥४०॥

सञ्जीवनी

निर इत्यनुवर्तते। निरुपसर्गात् परस्य पद गतौ इत्यस्य व्वल इत्यादेशो भवति। णिव्वलइ निष्पद्यते वस्तु ॥४०॥

सुबोधिनी

निरुपसर्गात्परस्य पद गतौ इत्यस्य व्वल इति स्यात्। णिव्वलइ निष्पद्यते ॥४०॥

(३७३) क्षियो झिज्जः ॥४१॥

सञ्जीवनी

क्षि क्षये इत्यस्य झिज्ज इत्यादेशः। झिज्जइ क्षीयते ॥४१॥

सुबोधिनी

क्षि क्षये इत्यस्य झिज्ज इत्यादेशो भवति। झिज्जइ क्षीयते ॥४१॥

(३७४) भिदिछिदोरन्त्यस्य न्दः ॥४२॥

सञ्जीवनी

भिदिर् विदारणे छिदिर् द्वैधीकरणे इत्यनयोर्धात्वोर्योऽन्त्यो वर्णस्तस्य न्द इत्यादेशः स्यात्। तुमं भिन्दसु तुमं छिन्दसु। त्वं भिन्धि त्वं छिन्धि। अत्र मध्यमपुरुषैकवचने लोटि सिपः उ सु मु विध्यादिष्वेकस्मिन् इति सुरादेशः। 'त्त इति क्वचिदादेशो विकल्पेन भिदिच्छिदोः'। भेत्तूण छेत्तूण भित्वा छित्वा। क्त्व तूण इति तूणः। अडादेशा बहुलमिति इकारस्य एत्वम्। पक्षे भिन्दिऊण छिन्दिऊण। न्द इत्यादेशस्य ए च क्त्वेत्यादिना एत्वमित्वं वा ॥४२॥

सुबोधिनी

भिदि्र छिदि्र इत्यनयोरन्त्यवर्णस्य न्द इति स्यात् । भिन्दइ भिनत्ति छिन्दइ छिनत्ति । 'त्त इति क्वचिदादेशो विकल्पेन भिदिच्छिदोः' । भिन्दिऊण भेत्तूण भित्वा । छिन्दिऊण छेत्तूण छित्वा ॥४२॥

(३७५) क्वथेर्ढः ॥४३॥

सञ्जीवनी

अन्त्यस्य इत्यनुवर्तते श्रुहुजिलूधूनां णोऽन्ते ह्रस्वश्च इत्यतः प्राक् । क्वथ निष्पाके इत्यस्य योऽन्त्यो वर्णस्तस्य ढकारादेशः स्यात् । खघथादिना हत्वं प्राप्तम् । कढइ कढए क्वथयति । कढुआण क्वथित्वा । 'क्वचित् क्त्वाप्रत्ययस्येह उआण इत्यपीष्यते' इति उआण आदेशः । सन्धावकारलोपः ॥४३॥

सुबोधिनी

क्वथ निष्पाके इत्यस्य योऽन्त्यो वर्णस्तस्य ढ इति स्यात् । कढए क्वथयति ॥४३॥

(३७६) वेष्टेश्च ॥४४॥

सञ्जीवनी

ढ इत्यनुवर्तते । वेष्ट वेष्टने इत्यस्य योऽन्त्यो वर्णः ष्टः, तस्य ढकारादेशः स्यात् । ष्टस्य ठ इत्यस्य बाधः । वेढइ वेष्टते । योगविभाग उत्तरार्थः ॥४४॥

सुबोधिनी

वेष्ट वेष्टन इत्यस्य योऽन्त्यो वर्णस्तस्य ढ इति स्यात् । वेढइ वेढए वेष्टते ॥४४॥

(३७७) उत्समोर्ल्लः ॥४५॥

सञ्जीवनी

वेष्टेरित्यनुवर्तते । उत्समोरिति पञ्चम्याः स्थाने षष्ठीयमित्याहुः । तेन उत्समित्येताभ्यां वेष्ट वेष्टने इत्यस्य योऽन्त्यो वर्णस्तस्य द्वित्वापन्नो ल्ल आदेशः स्यात् । उव्वेल्लइ उद्वेष्टते । उपरि लोप इत्यादिना उदो दलोपः । शेषादेशादिना द्वित्वम् । संवेल्लइ संवेष्टते । शेषादेशादिना द्वित्वस्य सिद्धत्वात् किमर्थं द्विलकारको निर्देशः ? ल्ल आदेशसामर्थ्यविधानादेव द्वित्वस्याप्राप्तिः । अन्यथा वेष्टेश्चेत्यनेन ढकारादेशस्यापि द्वित्वं स्यात् ॥४५॥

सुबोधिनी

उत्पूर्वस्य संपूर्वस्य च वेष्टेरन्त्यवर्णस्य ल्ल इति स्यात्। उव्वेल्लइ उद्वेष्टते संवेल्लइ संवेष्टते ॥४५॥

(३७८) रुदो वः ॥४६॥

सञ्जीवनी

रुदिर् अश्रुविमोचने इत्यस्य योऽन्त्यो वर्णस्तस्य वकारादेशः स्यात्। रुवइ। ये तु रोवइ इत्युदाहरन्ति, तन्मते अडादेशा बहुलमिति उकारस्य। ओत्वम् रुइरा रोदनशीला। तृण इर शील इति इरादेशः। कगचादिना वकारादेशस्य लोपः। तस्यैव क्वचिदपि लोप इत्यकारलोपः। आदीतौ बहुलमिति आप्रत्ययः। क्वचिदपि लोप इति पुनरकारलोपः ॥४६॥

सुबोधिनी

रुदिर इत्यस्यान्त्यवर्णस्य व इति स्यात्। रुवइ रोदिति रोवइ इति केचित् ॥४६॥

(३७९) उदो विजेः ॥४७॥

सञ्जीवनी

व इत्यनुवर्तते। उदुपसर्गात् परस्य ओविजी भयचलनयोरित्यस्य योऽन्त्यो वर्णस्तस्य वकारादेशः स्यात्। उव्वेवइ उव्वेवए। अडादेशा बहुलमिति इकारस्य एत्वम्। उपरि लोप इत्यादिना उदो दलोपः। शेषादेशादिना वस्य द्वित्वम् ॥४७॥

सुबोधिनी

उदः परस्य ओविजी इत्यस्यान्त्यवर्णस्य वकारादेशः स्यात्। उव्वेवइ उव्वेवए उद्विजते ॥४७॥

(३८०) वृधेर्ड्ढः ॥४८॥

सञ्जीवनी

वृधु वृद्धौ इत्यस्य योऽन्त्यो वर्णस्तस्य द्वित्वापन्नो ड्ढ आदेशः। वड्ढइ वड्ढए वर्धते। ऋतोऽदिति अत्त्वम् ॥४८॥

सुबोधिनी

वृधु वृद्धावित्यस्यान्त्यस्य ड्ढः स्यात्। वेड्ढइ वेड्ढए वर्द्धते ॥४८॥

(३८१) हन्तेर्म्मः ॥४९॥

सञ्जीवनी

हन हिंसागत्योरित्यस्य योऽन्त्यो वर्णस्तस्य द्वित्वापन्नो म्म इत्येतदादेशः स्यात् । हम्मए हन्यते । तप्रत्ययस्य इदेतौ । कर्त्रर्थस्य प्रयोगस्याभावाद् भावकर्मणोरेव हन्तेज्जइ इत्ययं द्रष्टव्यः । 'क्वापि हन्तेर्म्म इत्येष आदेशो नेष्यते बुधैः' । हणइ हन्ति । शेषाणामदन्ततेति अदन्तत्वम् । हन्तव्वं हन्तव्यम् । तव्यप्रत्ययस्य अधो मनयामिति यलोपः, शेषादेशादिना वस्य द्वित्वम् । हन्तूण हत्वा । क्त्व तूण इति तूणादेशः । हओ हतः । क्तेन दिण्णादय इति क्तप्रत्ययेन सह हन्तेहदिशः, संस्कृतसिद्धस्यैव अङ्गीकारात् । कगचादिना तलोपः । 'खनेः क्वापि म्म इत्येष स्यादन्त्यस्य हनेरिव' । खम्मइ खायते खन्यते वा । खनु अवदारणे इत्यस्य इह नान्तद्वित्वमिति इअ इज्जयोरभावः । क्वापीति वचनादिह न भवति । खणिअइ खणिज्जइ ॥४९॥

सुबोधिनी

हन हिंसागत्योरित्यस्यान्त्यवर्णस्य म्म इति स्यात् । हम्मइ हम्मए हन्यते । कर्तरि तु न भवति । तच्चोक्तम्– 'क्वचिच्च हन्तेर्म्म इति आदेशो नेष्यते बुधैः' । हणइ हन्ति । हन्तव्वं हन्तव्यम्, हत्तूण हत्वा । हओ हतः । 'खनेः क्वापि म्म इत्येष स्यादन्त्यस्य यथा हनः' । खम्मइ खायते खन्यते वा । खनु क्वापीति वचनादिह न भवति । खाणिअइ खाणिज्जइ, हणिअइ हणिज्जइ ॥४९॥

(३८२) रुषादीनां दीर्घः ॥५०॥

सञ्जीवनी

अन्त्यस्येति नदीस्रोतोन्यायेन वर्तमानमपि अत्र सूत्रे नानुवर्तते । अन्ते ह्रस्वस्यासम्भवात् । रुष आदिर्येषां ते रुषादयः । रुष रोष इत्येवमादीनां धातूनां सम्बन्धिन्या उपधाया उपकारस्य दीर्घता भवति । रूसइ रूसेइ रूसए रुष्यति । ततिपोरिदेतौ इति तिप इदेतौ । शषोः स इति षस्य सः, तस्य लादेशे वा इति वा एत्वम् । सूसइ शुष्यति । शुष् शोषणे । शषोः स इति शषोः सौ । दूसेइ दूषयति । दुष् वैकृत्ये । णिचः एदादेरादिति एत्वम् । इदं च नोदाहार्यम्, संस्कृतशब्दानुशासने एव णिचि ऊत्वविधाने सिद्धत्वात् । सुषादीनामिति किम् ? रुवइ रोदिति । रुदो व इति दस्य वः ॥५०॥

सुबोधिनी

अस्मिन् सूत्रे अन्त्यस्य इति नानुवर्तते। रुष रोष इत्यादीनामुपधाया उकारस्य दीर्घः स्यात्। रूसइ रूसए रुष्यति। तूसइ तुष्यति। दूसइ दूसेइ दुष्यति। रुषादीनामिति किम्? रुवइ रोदिति ॥५०॥

(३८३) च्चौ व्रजिनृत्योः ॥५१॥

सञ्जीवनी

व्रज गतौ इत्यस्य व्रजेः, नृती गात्रविक्षेपे इत्यस्य योऽन्त्यो वर्णस्तस्य च्च आदेशः स्यात्। वच्चइ व्रजति। सर्वत्र लवरामिति रलोपः। णच्चइ नृत्यति। ऋतोऽत् इति अत्त्वम्। ननु कथं णट्टं उच्यते? नट् नृत्य इत्यस्य नटनीयं नाट्यमिति। नाट्यशब्दस्य अधो मनयामिति यलोपः। शेषादेशादिना द्वित्वम्। अदातो यथादिषु वेति अत्त्वम् ॥५१॥

सुबोधिनी

व्रज गतौ नृती गात्रविक्षेपे इत्यनयोरन्त्यवर्णस्य च्च इति स्यात्। वच्चइ व्रजति। णच्चइ नृत्यति। ननु कथं णट्टं? नट नृत्य इत्यस्य नाट्यमिति, तस्मादिदं स्यात् ॥५१॥

(३८४) युधिबुधिगृधिसिधिक्रुधां ज्झः ॥५२॥

सञ्जीवनी

युध संप्रहारे, बुध अवगमने, गृधु अभिकांक्षायाम्, सिधु सन्धौ, क्रुध कोपे, इत्येतेषां पञ्चानां धातूनां कृतद्वित्वो ज्झ इत्यादेशो भवति। जुज्झन्ति। न्तिहेत्थेत्यादिना झप्रत्ययस्य न्तिरादेशः। आदेर्यो ज इति जः। एवं बुज्झन्ति बुध्यन्ति। गिज्झन्ति गृध्यन्ति। अडादेशा बहुलम् इति ऋकारस्य इत्वम्। सिज्झन्ति सिध्यन्ति। कुज्झन्ति क्रुध्यन्ति। सर्वत्र लवरामिति रलोपः ॥५२॥

सुबोधिनी

युद्ध्यादीनामन्यस्य ज्झः स्यात्। युधि संप्रहारे जुज्झइ युध्यति। बुध अवगमने, बुज्झइ बुध्यति। गृधु अभिकांक्षायाम्, गिज्झइ गृध्यति। सिधु सन्धौ, सिज्झइ सिध्यति। क्रुध कोपे, कुज्झइ क्रुद्ध्यति ॥५२॥

(३८५) रुधेर्न्धम्भौ ॥५३॥

सञ्जीवनी

रुधिर् आवरणे इत्यस्य योऽन्त्यो वर्णस्तस्य न्ध म्भ इत्येतौ आदेशौ भवतः। रुन्धइ रुम्भइ रुणद्धि। 'रुधो न्धम्भौ क्वचिन्नैव क्वचिज्झो भावकर्मणोः'। क्तेन दिण्णादय इति क्तेन सह रुद्ध इति निपात्यते। रुज्झइ रुध्यते। अत्र भावकर्मणोरर्थयोः झ इत्यप्रवृतेः। नान्तद्वित्वे इति यकः, इअ-इज्जोरभावः ॥५३॥

सुबोधिनी

रुधिर् आवरणे इत्यस्यान्त्यस्य वर्णस्य न्ध म्भ इत्यादिश्येते। रुन्धइ रुम्भइ रुणद्धि। 'रुन्धो न्धम्भौ क्वचिन्नैव क्वचिज्झो भावकर्मणोः'। रुद्धो रुद्धः। रुज्झइ रुध्यते ॥५३॥

(३८६) मृदो लः ॥५४॥

सञ्जीवनी

मृद क्षोदे इत्यस्य योऽन्त्यो वर्णस्तस्य ल इत्यादेशः स्यात्। मलइ मलेइ मृद्गाति। लादेशे वेति लकारादेशस्य वा एत्वम्। ऋतोऽदित्यत्त्वम् ॥५४॥

सुबोधिनी

मृद क्षोदे इत्यस्यान्त्यवर्णस्य ल इति स्यात्। मलइ मलेइ मृद्गाति ॥५४॥

(३८७) शदिपत्योर्डः ॥५५॥

सञ्जीवनी

शद्लृ शातने पत्लृ गतावित्यनयोरन्त्यवर्णस्य डकारादेशः स्यात्। सडइ शीयते। शषोः स इति शस्य सः। पडइ पतति ॥५५॥

सुबोधिनी

शद्लृ शातने पत्लृ गतौ इत्यनयोरन्त्यस्य ड इति स्यात्। सडइ शीयते। पडइ पतति ॥५५॥

(३८८) शकादीनां द्वित्वम् ॥५६॥

सञ्जीवनी

शक इत्यनेन सदृशाः शकादयः। शक्लृ शक्तौ इत्येवंप्रकाराणां धातूनां सम्बन्धिनोऽन्त्यवर्णस्य द्वित्वं भवति। सक्कइ शक्नोति। शषोः स इति शस्य सः,

शेषाणामदन्ततेति अदन्तत्वम् । सक्कइ मए शक्यते मया । भावे लकारः । नान्त्यद्वित्वे इति यक इअइज्जाभावः । लग्गइ लगति । लग सङ्गे । मग्गई मार्गति । इदं वाऽत्र नोदाहार्यम्, प्रकारान्तरेण सिद्धत्वात् । तथा हि मार्ग अन्वेषणे । अडादेशा बहुलम् इत्याकारस्य अत्त्वम् । सर्वत्र लवरामिति रलोपः । शेषादेशादिना गस्य द्वित्वम् ॥५६॥

सुबोधिनी

शकॢ शक्तौ इत्यादीनां धातूनामन्त्यवर्णस्य द्वित्वं भवति । सक्कइ शक्नोति ॥५६॥

(३८९) स्फुटिचलोर्वा ॥५७॥

सञ्जीवनी

द्वित्वमित्यनुवर्तते । स्फुट विकसने चल कम्पने इत्यनयोरन्त्यवर्णस्य द्वित्वं वा भवति । अप्राप्तो विकल्पः । फुट्टइ फुडइ स्फुटति । उपरि लोप इत्यादिना सलोपः । द्वित्वाभावपक्षे टस्य टो ड इति डः । चल्लइ चलइ । फुट्ठो फुडिओ स्फुटितः । क्तेन दिण्णादय इत्यनेन फुट्ठ इति निपातितत्वात् । फुडिओ इत्यत्र टो ड इति डः । शेषाणामदन्ततेति अदन्तत्वे सति क्ते इतीत्वम् । चल्लिओ चलितः । अदन्तत्वमित्वं च पूर्ववत् ॥५७॥

सुबोधिनी

स्फुट विकसने चल कम्पने इत्यनयोरन्त्यस्य वा द्वित्वं स्यात् । फुट्टइ फुडइ स्फुटति । चल्लइ चलइ चलति ॥५७॥

(३९०) प्रादेर्मीलः ॥५८॥

सञ्जीवनी

वेत्यनुवर्तते । मील इति षष्ठ्येकवचनान्तः । प्र आदिर्यस्य स प्रादिः । तस्मात् प्र परा इत्येवमादेरुपसर्गात् परस्य मील निमेषणे इत्यस्य योऽन्त्यो वर्णस्तस्य द्वित्वं स्याद् वा । णिमिल्लइ णिमीलइ निमीलति । पमिल्लइ पमीलइ प्रमीलति । संमिल्लइ संमीलति । वाशब्दस्य व्यवस्थावाचित्वाद् यत्र अडादेशा बहुलमिति ईकारस्य इत्वं तत्रैव लस्य द्वित्वम् । एवं उम्मिल्लइ उम्मीलइ उन्मीलति । म्नो म इति मः । तस्य शेषादेशादिना द्वित्वम् । प्रादेरिति किम् ? मीलइ मीलति ॥५८॥

सुबोधिनी

प्राद्युपसर्गादुत्तरस्य मील इत्यस्यान्त्यस्य द्वित्वं स्यात् । पमिल्लइ पमीलइ प्रमीलति । एवमुपसर्गान्तरादूह्यम् । प्रादेरिति किम् ? मीलइ मीलति ॥५८॥

(३९१) भुजादीनां क्त्वा-तुमन्-तव्येषु लोपः ॥५९॥

सञ्जीवनी

भुज इत्यनेन सदृशा भुजादयः। भुज पालनाभ्यवहारयोरित्येवंप्रकाराणां धातूनाम् अन्त्यवर्णस्य लोपः स्यात् क्त्वा तुमुन् तव्य इत्येतेषु प्रत्ययेषु परेषु। शेषाणामदन्ततेत्यदन्तत्वे कृते ए च क्त्वेत्यादिना इत्वमेत्वं च प्राप्तम्। भोत्तूण भुक्त्वा। अडादेशा बहुलमिति उकारस्य ओत्वम्। क्त्वे तूण इति तूणः। भोत्तुं भोक्तुम्। सेवादिषु वेति तकारस्य द्वित्वम्। मो बिन्दुरित्यादिना तुमुनो मस्य बिन्दुः। भोत्तव्वं भोक्तव्यम्। तव्यप्रत्ययस्य अधो मनयामिति यलोपः। शेषादेशादिना द्वित्वम्। उभयत्रापि शेषं पूर्ववत्। एवं मोत्तूण मुक्त्वा। मोत्तुं मोक्तुम्। मोतव्वं मोक्तव्यम्। रोत्तूण रुदित्वा। रोत्तुं रोदितुम्। रोत्तव्वं रोदितव्यम्। रुदिर् अश्रुविमोचने ॥५९॥

सुबोधिनी

भुज पालनाभ्यवहारयोरित्यादीनां क्त्वादिषु परेषु अन्त्यस्य लोपः स्यात्। भोऊण भुक्त्वा। भोत्तुं भोक्तुम्। भोतव्वं भोक्तव्यम्। एवं भोऊण भुक्त्वा। रोऊण रुदित्वा इत्यादि लक्ष्यवशादुत्प्रेक्ष्यम् ॥५९॥

(३९२) श्रुहुजिलूधूनां णोऽन्ते ह्रस्वश्च ॥६०॥

सञ्जीवनी

अन्त इति पुनरनुवर्तमाने पुनरत्र ग्रहणमग्रादेशाय, सप्तम्यन्तनिर्देशात्। तेन श्रु इत्येवमादीनां पञ्चानां धातूनाम् अन्ते परे णकारः प्रयोक्तव्यः। ह्रस्वश्चेति विशेषः। चकारोऽत्रान्वाचये। यथा भो वटो भिक्षामट, यदि गच्छसि ताञ्चानयेति। तेनान्ते णकारस्यैव इत्वमेत्वं वा। यस्य च धातोर्दीर्घस्तस्य ह्रस्वो भवति। सुणइ शृणोति। श्रु श्रवणे। सर्वत्र लवरामिति रलोपः। शषोः स इति शस्य सः। 'श्रुवादीनां यो णकारोऽन्त्यः स क्वचिद् वा विधीयते'। सुणिऊण सोऊण श्रुत्वा। णकारस्य ए च क्त्वेत्यादिना इत्वमेत्वं वा। णकारान्तत्वाद् अन्यत्र अडादेशा बहुलमित्युकारस्योत्वम्। हुणइ जुहोति। हु दाने। हुणन्तो जुह्वत्। न्तमाणावित्यादिना शतुः न्तः। जिणइ जअइ जयति। जि जये इत्यस्य। णकारान्तादन्यत्र, एवमन्येऽपीति जअ आदेशः। जिणिऊण जेऊण जित्वा। णकारान्तादन्यत्र अडादेशा बहुलमिति इकारस्य एत्वम्। शेषं पूर्ववत्। लुणेइ लुनाति लुनीते वा। लूञ् छेदने अत्र ह्रस्वत्वम्। लादेशे वेति वा

एत्वम् । लुणिअव्वं लवितव्यम् । ए च क्त्वेत्यादिना णस्य इत्वम् । धुणइ धुणेई धुनाति धुनीते वा । धूञ् कम्पने । अत्रापि ह्रस्वः । पूर्ववद् वा एत्वम् । 'श्रवादिभ्य इतरस्यापि णोऽन्ते क्वचन दृश्यते' । थुणइ स्तौति । ष्टु स्तुतौ । ष्टस्य थ इति थः । थुणिऊण । ए च क्त्वेत्यादिना इत्वमेत्वं वा ॥६०॥

सुबोधिनी

एषामन्ते णकारो योज्यः । यस्य च दीर्घस्तस्य ह्रस्वः स्यात् । श्रु श्रवणे, सुणइ शृणोति । हु दानादानयोः । हुणइ जुहोति । जि जये, जिणइ जअइ जयति । लूञ् छेदने, लुणइ लुणेइ लुनाति लुनीते वा । धूञ् कम्पने, धुणेइ धूणइ धूनाति धूनीते वा । 'श्रवादीनां यो णकारोऽन्ते स क्वचिद्वा विधीयते' । सुणिऊण सोऊण श्रुत्वा । जिणिऊण जेऊण जित्वा । 'श्रवादिभ्य इतरस्यापि णोऽन्ते क्वचन दृश्यते' । थुणइ स्तौति ॥६०॥

(३९३) भावकर्मणोर्व्वश्च ॥६१॥

सञ्जीवनी

पूर्वसूत्रमनुवर्तते । भावे कर्मणि वाऽर्थे श्रुवादीनां धातूनामन्ते कृतद्वित्वो व्व इति प्रयोक्तव्यः । चकारात् पूर्वसूत्रोक्तो णकारोऽपि । एषाञ्च मध्ये यत्र दीर्घस्तत्र ह्रस्वो भवति । सुव्वइ श्रूयते । श्रु श्रवणे इत्यस्माद् भावे कर्मणि वा लकारः । नान्त्यद्वित्व इति इअइज्जोरभावः । सुणिअइ सुणिज्जइ । अत्र यक इअइज्जाविति इअइज्जा-वित्यादेशौ । हुव्वइ हुणिअइ हुणिज्जइ हूयते । जिव्वइ जिणिअइ जिणिज्जइ जीयते । लुव्वइ लुणिअइ लुणिज्जइ लूयते । धुव्वइ धुणिअइ धुणिज्जइ धूयते ॥६१॥

सुबोधिनी

श्रवादीनां धातूनां भावे कर्मणि चान्ते व्व इति वक्तव्यः । चकाराण्णकारोऽपि । दीर्घस्य च ह्रस्वः । सुव्वइ श्रूयते । पक्षे सुणिअइ सुणिज्जइ । लुव्वइ लुणिअइ लुणिज्जइ लूयते । धुव्वइ धुणिअइ धुणिज्जइ धूयते ॥६१॥

(३९४) गमादीनां द्वित्वं वा ॥६२॥

सञ्जीवनी

भावकर्मणोरित्यनुवर्तते क्तेन दिण्णादयः इत्यतः प्राक् । गम इत्यनेन सदृशा गमादयः । तेषामन्त्यस्य द्वित्वं वा दृश्यते । गम्लृ गतौ इत्येवं प्रकाराणां धातूनां द्वित्वं

वा भवति भावकर्मणोरर्थयोः। मण्डूकप्लुतिन्यायेनान्त्यस्येत्यनुवृत्तेरन्त्यस्य। गम्मइ गम्यते। कर्मणि लकारः। नान्त्यद्वित्वे इति एक इअइज्जाभावः। पक्षे गमिअइ गमिज्जइ। अत्र यकः इअइज्जौ। लब्भइ लभ्यते। डुलभष् प्राप्तौ। अत्र द्वित्वे वर्गे युजः पूर्व इति भस्योपरि बः। पक्षे लहिअइ लहिज्जइ। रम्मइ रमिअइ रम्मिज्जइ। यकः इअइज्जौ। रम्यते। भण्णइ भणिअइ भणिज्जइ भण्यते। भण शब्दार्थः। आकृतिगणोऽयम् ॥६२॥

सुबोधिनी

गम्लृ गतावित्यादीनां धातूनां भावकर्मणोर्द्वित्वं वा स्यात्। मण्डूकप्लुतिन्याये-नान्त्यस्येत्यनुवृत्तेरन्त्यस्य। गम्मइ गमिअइ गम्मिज्जइ गम्यते। लब्भइ लहिअइ लहिज्जइ लभ्यते। रम्मइ रमिअइ रमिज्जइ रम्यते। भण्णइ भणिअइ भणिज्जइ भण्यते। आकृतिगणोऽयम् ॥६२॥

(३९५) दुहिलिहिवहां दुज्झ-लिज्झ-बुज्झाः ॥६३॥

सञ्जीवनी

दुह प्रपूरणे, लिह आस्वादने, वह प्रापणे, इत्येतेषां त्रयाणां धातूनां यथासंख्यं दुज्झ लिज्झ बुज्झ इत्येते त्रय आदेशाः स्युर्भावकर्मणोरर्थयोः। अनेकवर्णः सर्वस्येति वचनात् सर्वस्य। दुज्झइ दुह्यते। लिज्झइ लिह्यते। वुज्झइ उह्यते। नान्त्यद्वित्वे इति यकोऽभावः। एवमुत्तरसूत्रयोरपि ॥६३॥

सुबोधिनी

एषां धातूनां भावकर्मणोर्यथासंख्यं दुज्झ लिज्झ वुज्झ आदेशाः स्युः। अनेकवर्णः सर्वस्यैवेति वचनात् सर्वस्य। दुज्झइ दुह्यते। लिज्झइ लिह्यते। बुज्झइ उह्यते। केचित्तु वेत्यनुवर्तते, तेन दुहिअइ दुहिज्जइ इत्याद्यपि भवति वा। एवमुत्तरसूत्रयोरपीत्याहुः ॥६३॥

(३९६) हृञ्कृञोर्हीरकीरौ ॥६४॥

सञ्जीवनी

हृञ् हरणे, डुकृञ् करणे इत्यनयोर्हीरकीरौ यथासंख्यं भवतो भावकर्मणोरर्थयोः। हीरइ ह्रियते, कीरइ क्रियते। नान्त्यद्वित्व इति योगविभागाद् यकोऽभावः ॥६४॥

सुबोधिनी

अनयोर्भावकर्मणोर्यथासंख्यम् एतौ स्तः। हीरइ ह्रियते, कीरइ क्रियते ॥६४॥

(३९७) ज्ञो जाणमुणौ ॥६५॥

सञ्जीवनी

ज्ञा अवबोधने इत्यस्य भावकर्मणोः जाण मुण इत्यादेशौ भवतः। जाणेइ मुणेइ ज्ञायते। नान्त्यद्वित्व इति योगविभागाद् यकोऽभावः। पक्षे जाणिअइ जाणिज्जइ, मुणिअइ मुणिज्जइ। यक इअइज्जौ। वाग्रहणाद् म्नज्ञादिना सूत्रं पाक्षिकं भवत्येव। तेन णकारादेशोऽपि भवति। णाइअइ णाइज्जइ ज्ञायते। अडादेशा बहुलम् इति आत्वम्। इअइज्जौ पूर्ववत् ॥६५॥

सुबोधिनी

ज्ञो णज्जणव्वौ ॥६५॥

ज्ञा इत्यस्य भावकर्मणोः णज्ज णव्व इत्यादेशौ स्तः। णज्जइ णव्वइ ज्ञायते ॥६५॥

(३९८) ग्रहेर्घेप्पः ॥६६॥

सञ्जीवनी

वेत्यनुवर्तते। ग्रहँ उपादानें इत्यस्य घेप्प इत्यादेशः स्यात्, भावकर्मणोरर्थयोः। ग्रहेर्गेण्ह इति नित्यं प्राप्तः। घेप्पइ गृह्यते। नान्त्यद्वित्व इति यकोऽभावः। पक्षे गेण्हिअइ गेण्हिज्जइ। यक इअइज्जाविति इअइज्जौ। सन्धावकारलोपः ॥६६॥

सुबोधिनी

ग्रह इत्यस्य भावकर्मणोः घेप्प इति वा स्यात्। घेप्पइ गेण्हिअइ गेण्हिज्जइ गृह्यते ॥६६॥

(३९९) क्तेन दिण्णादयः ॥६७॥

सञ्जीवनी

क्तेनेति तृतीयान्तम्। निपातनार्थमिदम्। डुदाञ् दाने इत्यादीनां क्तप्रत्ययेन सह दिण्ण इत्यादय आदेशा निपात्यन्ते। ये **प्रत्ययलोपागमवर्णविकारलक्षणेन अनुपपन्नास्ते निपातनात् साध्यन्ते इत्यर्थः।**

दत्तमुक्तव्यतिक्रान्तत्रस्तानामुदितस्य च।
दिण्णं मुत्तं च बोलीणहित्थरुण्णा भवन्त्यमी ॥

दष्टदग्धार्जितख्यातस्थापितानामिमे मताः।
डक्कं दड्ढं विढत्तं च संखाअं थविअं तथा॥
स्पृष्टास्वादितनष्टानां स्यात् प्रतारितलूनयोः।
छिबिअं चक्खिअं लुक्कं तथा विलबिअं लुअम्॥
आरब्धार्पितयोः स्याताम् आढत्तं च विणाविअम्।
एवं दिण्णादयोऽन्येऽपि दत्तादीनां निपातिताः॥६७॥

सुबोधिनी

क्तेन प्रत्ययेन सह डुदाञ् दान इत्यादीनां धातूनां दिण्णादयो निपात्यन्ते।

दत्तमुक्तव्यतिक्रान्तत्रस्तानामुदितस्य च।
दिण्णं मुत्तं च वोलीणहित्थरुण्णा भवन्त्यमी॥
दष्टदग्धार्जितख्यातस्थापितानामिमे मताः।
डक्कं दड्ढं विढत्तं च संखाअं थविअं तथा॥
स्पृष्टास्वादितनष्टानां स्यात् प्रतारितलूनयोः।
छिविअं चक्खिअं लुक्कं तथा विसविअं लुअम्।
आरब्धार्पितयोः स्याताम् आढत्तं च विणाविअम्।
एवं दिण्णादयोऽन्येऽपि दत्तादीनां निपातिताः॥६७॥

(४००) तक्षे रंपवच्छौ॥६८॥

सञ्जीवनी

तक्ष त्वक्ष तनूकरणे इत्यस्य तक्षे रंप वच्छ इत्येतौ आदेशौ भवतः। रंपइ वच्छइ तक्षति तक्ष्णोति वा॥६८॥

सुबोधिनी

तक्षेः रंपचच्छौ॥६८॥

तक्ष त्वक्ष तनूकरणे इत्यस्य रंप चच्छ चेत्यादेशौ स्तः। रंपइ चच्छइ तक्षति तक्ष्णोति वा॥६८॥

(४०१) खिदेर्विसूरः॥६९॥

सञ्जीवनी

खिद दैन्ये इत्यस्य विसूर आदेशो भवति। विसूरइ विसूरए खिद्यते। तप्रत्ययस्य

इदेतौ । लादेशे वा इति एत्त्वम् । अत्रापि बहुलग्रहणानुवृत्तेः खिज्जइ इत्यपि । त्यथ्यद्यां चछजा इति जः ॥६९॥

सुबोधिनी

खिद दैन्ये इत्यस्य विसूर इत्यादिश्यते। विसूरेइ, विसूरइ खिद्यते। अत्रापि बहुलग्रहणानुवृत्तेः खिज्ज इत्यादिश्यते। तेन खिज्जइ ॥६९॥

(४०२) क्रुधेर्जूरः ॥७०॥

सञ्जीवनी

क्रुध कोपे इत्यस्य जूर इत्यादेशः स्यात्। जूरइ क्रुध्यति। जूरेन्तो क्रुध्यन्। न्तमाणावित्यादिना शतुः न्तः। लादेशे वेति एत्त्वम् ॥७०॥

सुबोधिनी

क्रुध कोपे इत्यस्य जूर इत्यादिश्यते। जुरइ क्रुध्यति ॥७०॥

(४०३) चर्चेश्चरः ॥७१॥

सञ्जीवनी

चर इत्येकं पदम्। चर्च अध्ययने इत्यस्य ण्यन्तस्य चर इति आदेशो भवति। चरइ चर्चयति वक्तीत्यर्थः। चरिज्जइ चर्च्यते। यक इअइज्जौ इति इअइज्जो-रन्यतरः ॥७१॥

सुबोधिनी

चर्च अध्ययने इत्यस्य चर आदेशः स्यात्। चरइ चर्चयति वक्तीत्यर्थः ॥७१॥

(४०४) त्रसेर्वज्जः ॥७२॥

सञ्जीवनी

त्रसि उद्वेगे इत्यस्य वज्ज आदेशः स्यात्। वज्जइ त्रसति त्रस्यति वा ॥७२॥

सुबोधिनी

त्रसी उद्वेगे इत्यस्य वज्ज इत्यादेशः स्यात्। वज्जइ त्रसति त्रस्यति वा ॥७२॥

(४०५) मृजेर्लुभपुंसौ ॥७३॥

सञ्जीवनी

मृजूष् शुद्धौ इत्यस्य लुभपुंसौ इत्येतौ आदेशौ स्याताम्। लुभइ पुंसइ मार्ष्टि ॥७३॥

सुबोधिनी

मृजेर्लुहलुभौ ॥७३ क॥

मृजूष् शुद्धावित्यस्य लुह लुभ इत्यादेशौ स्तः। लुहइ लुभइ मार्ष्टि ॥७३॥

(४०६) बुड्डखुप्पौ मज्जेः ॥७४॥

सञ्जीवनी

टु मस्जो शुद्धौ इत्यस्य बुड्ड खुप्प इत्यादेशौ भवतः। बुड्डइ, खुप्पइ। सर्वत्र लवरामिति रलोपस्य प्रायिकत्वात् सेवादिषु वेति डस्य द्वित्वे कृते बुड्ड इत्यादेशस्य सिद्धत्वाद् बुड्ड इत्यादेशो न कर्तव्यः इत्याहुः ॥७४॥

सुबोधिनी

टु मस्जो शुद्धावित्यस्य बुड्ड खुप्प इत्यादेशौ स्तः। बुड्डइ, खुप्पइ मज्जति। बुड निमज्जन इत्यस्यापि बुड्डइ इत्येव प्रयोगः ॥७४॥

(४०७) दृशेः पुलअ-णिअच्छ-अवक्ख-सच्चवाः ॥७५॥

सञ्जीवनी

दृशिर् प्रेक्षणे इत्यस्य पुलअ णिअच्छ अवक्ख सच्चव इत्येते चत्वार आदेशाः स्युः। सच्चवा इति वा पाठः, तच्चिन्त्यम्। लिपेर्भ्रमः। पुलअइ, पुलएइ; णिअच्छइ, णिअच्छेइ; अवक्खइ, अवक्खेइ; सच्चवइ, सच्चवेइ पश्यति। लादेशे वेत्येत्त्वम्। यत्तु पलोएइ इति रूपं तत् प्रपूर्वस्य लोकृ दर्शन इत्यस्य स्वार्थे णिजन्तस्य ॥७५॥

सुबोधिनी

दृशिर् इत्यस्य पुलअ इत्यादेशाः स्युः। पुलएइ, पुलअइ; णिअक्खइ, णिअक्खेइ; अवक्खइ, अवक्खेइ; सच्चवइ, सच्चवेइ पश्यति। ननु कथं पलोएइ इति रूपम्? लोकृ दर्शने इत्यस्य प्रपूर्वस्य स्वार्थे णिजन्तस्य स्यात् ॥७५॥

(४०८) शकेस्तरवअतीराः ॥७६॥

सञ्जीवनी

शक्लृ शक्तौ इत्यस्य तर वअइ तीरा इति त्रय आदेशाः स्युः। तरइ, वअइ, तीरइ शक्नोति। तरिज्जइ, वइज्जइ, तीरिज्जइ, शक्यते। यक इअइज्जौ इति इअइज्जोरन्यतर आदेशः, सन्धावकारलोपः ॥७६॥

सुबोधिनी

शकेस्तरचअतीराः ॥७६ क॥

शक्लृ शक्तौ इत्यस्य तरादय स्युः। तरइ, चअइ, तीरइ शक्नोति ॥७६॥

(४०९) एवमन्येऽपि ॥७७॥

सञ्जीवनी

श्रुत्यनुमित्यध्याहारैर्वाक्यार्थपरिकल्पनेति। अन्येषामिति अध्याह्रियते। यथैव भू सत्तायामित्येवमादीनां होहुवादयो विहिताः, एवमनेनैव प्रकारेण अन्येषामपि लवि अवस्रंसने इत्येवमादीनां धातूनां यथादर्शनमन्ये थक्क इत्येवमादय आदेशाः स्युः। थक्कइ विलम्बते। लवि अवस्रंसन इत्यस्य विशब्दोपसर्गसहितस्य क्वचिदपि विथक्कन्तो शतृङन्तः। अच्छइ आस्ते। आस उपवेशने इत्यस्य अच्छ इत्यादेशः। छुहइ क्षिपति। क्षिप प्रेरणे इत्यस्य छुह इत्यादेशः। महइ वंछइ वाञ्छति। वाञ्छ इच्छायामित्यस्य मह वंछ इत्यादेशौ। अणिअइ आश्रयति। श्रिञ् सेवायामित्यस्य आङ्पूर्वस्य अणि इत्यादेशः। णूमेइ गोपायति। गुपू रक्षणे इत्यस्यादेः णु आदेशः। लादेशे वेति एत्वम्। जअइ जयति। जि जये इत्यस्य जअ आदेशः। ढक्कइ स्थगयति। स्थग संवरणे इति स्वार्थे णिजन्तस्य ढक्क आदेशः। पिणुवइ प्रहिणोति। हि गतौ इत्यस्य प्रपूर्वस्य पिणुव इत्यादेशः। जेंवइ इति तु भुज पालनाभ्यवहारयोरित्यस्य जेंव आदेशात्। जेंमइ इत्येवं नोदाहार्यम्, चमु जमु झमु जिमु अदने इति जेमतेः अडादेशा बहुलमिति एत्वेन सिद्धत्वात्। बहुलग्रहणानुवृत्तेः क्वचित् थक्कादय आदेशा न भवन्ति। खिवइ क्षिपति। ष्कस्कक्षां ख इति क्षस्य खः। जिणइ जयति श्रुजीत्यादिना अन्ते णः। भावकर्मणोरपि– दीसइ दृश्यते। दृशिर् प्रेक्षणे इत्यस्य दीस आदेशः। बिढप्पइ अर्ज अर्जने इत्यस्य बिढप्प आदेशः। क्त्वाप्रत्ययेऽपि। णूमिअं गोपायितम्। क्ते इतीत्त्वम्, पूर्ववत् तल्लोपः। एवं महिअं वाञ्छितम्। ढक्किअं स्थगितम्। पिणुविअं प्रहितम् इत्यादयोऽपि यथादर्शनम्। प्रत्ययान्तरेऽपि धात्वन्तराणामादेशा ऊह्याः। केचित्तु एवमन्येऽपीति सूत्रे क्रियापदमेव व्याचक्षते, तन्न समीचीनम्; अक्रियापदानामपि आदेशविधानदर्शनात्। उदाहृतं चैव– यद्येवं तर्हि अनेनैव सिद्धत्वाद् अनर्थकं क्तेन दिण्णादय इति सूत्रमिति चेत्, तत्र क्तेनेति सहार्थे तृतीया। तेन क्तप्रत्ययसहितानां धातूनां तत्रादेशः। अत्र केवलानामिति अस्त्येव सार्थकत्वम् ॥७७॥

सुबोधिनी

यथा भ्वादीनां धातूनां होहुवादयस्तथानुक्तानामपि धातूनां यथादर्शनमन्ये आदेशाः स्युः। विअविइ स्रंसते थक्कइ विलम्बते वित्थक्कन्तो विलंबमानः। एवम् अच्छइ आस्ते। छुहइ क्षिपति। महइ वञ्छइ वाञ्छति। अल्लिअइ आश्रयति। णूमइ गोपायति। जअइ जयति। ढक्कइ स्थापयति। पिणवइ प्रहिणोति। बहुलग्रहणानुवृत्तेः क्वचिद् विभाषा। थक्कइ खिवइ क्षिपति इत्यादौ। भावकर्मणोरपि दीसइ दृश्यते, आढप्पइ आरभ्यते, विढप्पइ अर्ज्यते। क्त्वाप्रत्ययेऽपि थक्किऊण; स्थित्वा, छुहिऊण; छित्वा, ढक्किऊण, स्थगयित्वा। क्तप्रत्ययेऽपि-णूमिअं, गोपायितम्; महिअं, वाञ्छितम्; ढक्किअं, स्थगितम्; पिण्णविअं, प्रहितम्; इत्यादयः। एवं प्रत्ययान्तरेष्वपि धात्वन्तराणामपि यथादर्शनमादेशा ऊह्याः। ननु चानेनेनैव सूत्रेण लब्धार्थत्वात् क्तेन दिण्णादय इति सूत्रं व्यर्थम्, मैवम्; तत्र क्तप्रत्ययेनैव सह आदेशविधानादत्र धातुमात्रस्यैव ॥७७॥

(४१०) शेषाणामदन्तता ॥७८॥

सञ्जीवनी

विहितादेशेभ्यो धातुभ्योऽन्येऽकृतादेशाः शेषाः। अदन्तानां भावः अदन्तता। शेषाणां हलन्तानां धातूनाम् अदन्तता भवति। अकारान्तं भवतीत्यर्थः। हसेइ हसइ हसति। हसे हसने इत्यस्य अदन्तत्वे लादेशे वेत्येत्वं वा। हसिओ हसितः। अत्र अदन्तत्वे क्ते इति इत्त्वम्। हसिऊण हसित्वा। अत्रापि अदन्तत्वे सति ए च क्त्वेत्यादिना इत्त्वमेत्त्वं वा। अहअं रूसामि। रुष रुष्टौ। रुषादीनां दीर्घ इति उकारस्य दीर्घः। अदन्तत्वे सति अत आ मिपि वेति आत्वम्। लहामो लभामहे। डुलभष् संप्राप्तौ। न्तिहेत्थेत्यादिना महिङो मोमुमानामन्यतम आदेशः। अदन्तत्वे सति इच्च बहुषु इति आत्त्वमित्त्वं च। खघथादिना भस्य हः। रमु क्रीडायाम्। अत्रादन्तत्वे सति अत ९ से इत्यादेशौ। इत्यादयः। क्वचिददन्तत्वे अकारान्तपाठ एव प्रयोजनम्। अदन्ततावदिति इवार्थप्रयोजनं चिन्त्यम् ॥७८॥

सुबोधिनी

विहितादेशेभ्यो धातुभ्योऽन्येऽकृतादेशा ये हलन्ता धातवस्तेषामदन्तता स्यात्। हसइ हसेइ हसति। एवमन्यत्रापि हलन्तधातावदन्ततायामत इत्यधिकारविहित-कार्याणि द्रष्टव्यानि ॥७८॥

(४११) अनदन्तानामद् वा ॥७९॥

सञ्जीवनी

अनदन्तानाम् अकाररहितानां स्वराणाम् अकारागमो भवति। भाइ भाअइ बिभेति। ञिभी भये इत्यस्य भियो भावीहौ इति भादेशः। अनदन्तानामिति किम्? हुवइ ॥७९॥

सुबोधिनी

अकारान्तरधातूनामकारागमो वा स्यात्। भाइ भाअइ बिभेति। होइ होअइ भवति इत्यादि ॥७९॥

(४१२) अडादेशा बहुलम् ॥८०॥

सञ्जीवनी

अट् प्रत्याहारः। अटश्च आदेशश्चेति द्वन्द्वः। अइउण् इत्यादयो हयवरट्पर्यन्ता अटः। भुवो होहुवौ इत्यादिसूत्रप्रतिपादिताश्च धातूनां ये आदेशास्ते बहुलम् अनेकप्रकारा भवन्ति। तथा चोक्तम्—

क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥

अटस्तावत्— धोवइ धावति। धा गतिशुद्ध्योः। गतिपोरिदेताविति इत्त्वम्। अत्राकारस्य ओत्त्वम्। सोवइ सुवइ स्वपिति। ञिष्वप् शयने। सर्वत्र लवरामिति वलोपः। अकारस्य उकारः। पो व इति पस्य वः। पूर्ववद् अन्यत्। एइ एति। इण् गतौ। अत्रेकारस्य एत्वम्। देइ ददाति। डुदाञ् दाने। अकारस्य एत्वम्। णेइ नयति। णीञ् प्रापणे इति इकारस्य एत्वम्। रोवइ रुवइ रोदिति। रुदिर् अश्रुविमोचने इति उकारस्य वा ओत्त्वम्। णासइ नश्यति। णश अदर्शने अस्यात्त्वम्। शषोः स इति शस्य सः।

अथादेशाः— स्मरते भरसुमरौ इति यदुक्तं तद् विकल्प्यते। तेन पक्षे सर इत्येव भवति। अन्ते अरः इति ऋकारस्य अरादेशः। अधो मनयामिति मस्य लोपः। बुड्डखुप्पौ मस्जेरित्यपि विकल्प्यते। तिप्प्रत्यये मज्जेइ मज्जति। उपरि लोप इत्यादिना सलोपः। शेषादेशादिना जस्य द्वित्वम्। तक्षे रंपवच्छौ इत्यपि विकल्प्यते। तेन तच्छइ तक्ष्णोति।

अक्षादिषु छ इति क्षस्य छः । तस्य शेषादेशादिना द्वित्वे वर्गे युजः पूर्व इति चः । शकेस्तरवअतीराः इत्यादौ शकादीनां द्वित्वमिति पाक्षिकं भवतीति । सक्कइ शक्नोति । घूर्णेर्घोलघुम्मौ क्षियो झिज्ज इत्यादयो द्रष्टव्याः ।

क्वचिदन्यदेव– ठाझागाश्च भविष्यद्वर्तमानविध्याद्येकवचन इत्यत्र उक्तेभ्यः प्रत्ययेभ्यः, अन्यत्रापि ढाझागा इत्यादेशाः प्रवर्तन्ते । तेन ठाऊण स्थित्वा । झाऊण ध्यात्वा । गाऊण गात्वा । ढाउं स्थातुम् । झाउं ध्यातुम् । गाउं गातुम् । ठाअव्वं स्थातव्यम् । झाअव्वं ध्यातव्यम् । गाअव्वं गातव्यम् । पूर्वत्रापि सूत्रादन्यत्र यत् प्रतिपादितं किमपि तद् बहुलग्रहणादेवेति मन्तव्यम् ।।८०।।

॥ इति श्रीवसन्तराजविरचितायां प्राकृतसञ्जीवन्यां
धातुविधिः सप्तमः परिच्छेदः ॥

सुबोधिनी

अटश्च आदेशाश्चेति द्वन्द्वः । अट इति प्रत्याहारः । धातूनामट आदेशाश्च बहुलं ज्ञेयाः । बहुलग्रहणात् क्वचित्प्रवृत्तिरिति अभिप्रैति । अटस्तावत्– धुवइ धावइ । सुवइ सोवइ स्वपिति । एइ एति । देइ ददाति । णेइ नयति । रोवइ रुवइ रोदिति । णासइ नश्यति ।

अथादेशाः– सरइ स्मरति । मज्जइ मज्जति । तच्छइ तक्ष्णोति । सक्कइ शक्नोति । इत्यादयोऽन्येऽपि विकल्पिता द्रष्टव्याः ।

क्वचिदन्यदेव– ठाऊण स्थित्वा । झाऊण ध्यात्वा । गाऊण गात्वा । टाउं स्थातुम् । गाउं गातुम् । झाउं ध्यातुम् । ठाअव्वं झाअव्वं गाअव्वं स्थातव्यं ध्यातव्यं गातव्यम् इत्यादौ क्तप्रत्ययादन्यत्रापि ठाझागा । एवमन्यदपि लक्ष्यानुसारेण बहुलग्रहणादूह्यम् ।।८०।।

वृत्तौ प्राकृतसूत्राणां सदानन्दस्य निर्मितौ ।
परिच्छेदः सुबोधिन्यां धातुविध्याख्यसप्तमः ॥

॥ अष्टमः परिच्छेदः ॥

❀❀❀

अथ निपातविधिरुच्यते

(४१३) निपाताः ॥१॥

सञ्जीवनी

अधिकारोऽयम्। इत ऊर्ध्वं यदनुक्रमिष्यामस्ते शब्दा निपातसंज्ञका अव्ययनामानो भवन्तीति अधिकृतं वेदिष्व्यम्। आ परिच्छेदपरिसमाप्तेरयमधिकारः।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥

इति विशेषः प्रातिपदिकेभ्यो निपातानाम् ॥१॥

सुबोधिनी

अतः परं ये विधास्यन्ते, ते शब्दा निपातसंज्ञाः स्यु। अव्ययनामानो भवन्तीत्यधिकृतं वेदितव्यम् ॥१॥

(४१४) कीस किमर्थे ॥२॥

सञ्जीवनी

कीस इत्ययं निपातः। किमो योऽर्थस्तत्र वर्तते। कीस तुए मह कहिअं, किं त्वया मम कथितम्? अत्र कीसशब्दः किमोऽर्थं वक्ति ॥२॥

सुबोधिनी

किम्शब्दस्यार्थे कीस इति निपातः स्यात्। कीस तए मह कहिअं, किं त्वया मम कथितम्? ॥२॥

(४१५) हुं दानपृच्छानिवारणेषु ॥३॥

सञ्जीवनी

दाने पृच्छायां निवारणे हुमिति निपातो वर्तते। हुं देअर गेण्हसु, हुं देवर गृहाण।

अत्र हुंशब्दो दानार्थं द्योतयति। हुं भण हुं भण इत्यत्र पृच्छां द्योतयति। हुं होसु तुण्हिक्को हुं भव तूष्णीकः। अत्र प्रतिषेधार्थं द्योतयति। **असतोऽपि निपाताः क्वचिद् वाचकाः क्वचिद् द्योतका इति यथादर्शनमवगन्तव्यम्॥३॥**

सुबोधिनी

दाने प्रश्ने निवारणे चार्थे हुं इति निपातः स्यात्। हुं देअर गेण्ह, हे देवर गृहाणेत्यत्र हुंशब्दो दानं द्योतयति। हुं होसु तुण्हिक्को भव तूष्णीकः। अत्र निवारणम्। निपाताः क्वचिद् द्योतकाः क्वचिद्वाचका इति यथादर्शनमवगन्तव्यम्॥३॥

(४१६) च्चिअ च्चेअ अवधारणे॥४॥

सञ्जीवनी

इत्येतौ निपातावर्थाववधारणार्थे वर्तेते। एसो च्चिअ स राआ। एष एव स राजा इति निश्चयः। स च्चेअ इअं णअरी। सैवेयं नगरी। अन्या न भवतीत्येवं प्रायो निश्चयः। सेवादिषु वेति चस्य द्वित्वमवधारणार्थस्य वाचकत्वात्॥४॥

सुबोधिनी

अस्मिन्नर्थे च्चिअ च्चेअ निपातौ भवतः। सच्चिअ सच्चेअ सैव॥४॥

(४१७) ओ सूचनापश्चात्तापविकल्पेषु॥५॥

सञ्जीवनी

सूचना साभिप्रायमुद्देशकथनम्। पश्चात्तापोऽनुशयः। विकल्पः पाक्षिको विधिः। एषु त्रिष्वर्थेषु ओ इति निपातो वर्तते। ओ अविणअ तत्तिल्ला। तत्तिण्णा इति वात्र पाठः। अविनययत्नवती। अत्र ओशब्दः पूर्वकृतस्वकीयाकरणीयासूचकत्वं द्योतयति। ओ अणुणेमि, अथ अनुनयामि। अत्र विकल्पार्थ ओशब्दः॥५॥

सुबोधिनी

सूचना साभिप्रायमुपकथनम्, पश्चात्तापोऽनुशयः, विकल्पः पाक्षिको विधिः, एष्वर्थेषु ओ निपातः स्यात्। ओ अविणअ जतणिल्ला अविनययत्नवती। अत्र ओशब्दः स्वीयाकरणीयसूचकत्वं द्योतयति। ओ ण पसण्ण म्हि न प्रसन्नास्मि। अत्र ओशब्दः किमित्यहं न प्रसन्ना इति पश्चात्तापं द्योतयति। ओ अणुणेमि, अथ अनुनयामि। अत्र विकल्पार्थ ओशब्दः॥५॥

(४१८) इरकिरकिला अनिश्चयाख्यानेषु ॥६॥

सञ्जीवनी

इरकिरकिलनिपाताः अनिश्चय आख्याने असम्यगर्थप्रतिपादने वर्तन्ते। इह इर दिट्ठो दइओ, इह किल दृष्टो दयितः। अत्र इरशब्दः स्थानदर्शनादेव निश्चितार्थं वक्ति। एण्ह किरालिंगिओ, एतस्मिन् किलालिङ्गितः। अत्रापि स्थानस्थस्य आलिङ्गनस्य किरशब्दोऽसम्यगर्थतां कथयति। ण किल रमिओ, न किल रमितः। अत्र किलशब्दो रमिताप्रतिषेधस्य अपरिस्फुरतां कथयति ॥६॥

सुबोधिनी

अनिश्चयेऽसम्यगर्थप्रतिपादने इरादयो निपाताः स्युः। इह हर दिट्ठो दइओ। अत्र किरशब्दः स्थानदर्शनादेव निश्चितार्थं वक्ति। एत्थ किरालिंगिओ, अत्र किलालिङ्गितः। अत्र किरशब्दः स्थानस्थालिङ्गनस्यासम्यगर्थतां द्योतयति। ण किर रमिओ, न किल रमितः। अत्र किलशब्दो रमितार्थप्रतिषेधस्यापरिस्फुरतां कथयति ॥६॥

(४१९) हु क्खु निश्चयवितर्कसम्भावनासु ॥७॥

सञ्जीवनी

निश्चयो नियमः। वितर्को विमर्शः। अध्यवसायः सम्भावनेत्यस्यार्थः। एषु त्रिषु अर्थेषु हु क्खु निपातौ वर्तेते। अज्ज हु दीसइ दइआ, अद्य खलु दृश्यते दयिता। अत्र हुशब्दो निश्चयं कथयति। अज्ज क्खु एसा मं पलोएइ, अद्य खलु एषा मां प्रलोकयति। ण हु दिट्ठो तइ अज्जावि, न खलु दृष्टस्त्वया अद्यापि। अत्र हुशब्दो दर्शनवितर्कं द्योतयति। पेच्छ क्खु दारम्मि सो कदावि थिओ होइ, प्रेक्षस्व खलु द्वारे स कदापि स्थितो भविष्यति। अत्र क्खुशब्दो द्वारदेशस्थितिविमर्शोत्पत्तिद्योतकः। अच्छउ ताव हु णइए, आस्तां तावत् खलु नद्याः। अत्र हुशब्दो नदीपारगमनातिक्रमसम्भावनां द्योतयति। खणा क्खु वच्चामि जलनिहिणो पारं, अत्र क्खुशब्दः सागरपारतीरप्राप्त्यध्यवसायद्योतनार्थः ॥७॥

सुबोधिनी

निश्चयादिष्वर्थेषु हु क्खु इति निपातौ स्तः। अज्ज हु दीसइ दइआ, अज्ज क्खु दीसइ दइआ, अद्य खलु दृश्यते दयिता। अर्थनियश्चयार्थः। ण हु दिट्ठो तइ अज्जवि, न खलु दृष्टस्त्वयाद्यापि। पेच्छसु क्खु दारम्मि स्स ठिओ होज्ज, प्रेक्षस्व खलु द्वारे स्थितो भविष्यति। अत्र वितर्कः। अच्छउ ताव हु णइए, आस्तां तावत्

खलु नद्याः। अत्र नदीपारगमनातिक्रमाध्यवसायरूपां संभावनां यथायथं हुक्खुशब्दौ प्रकाशयतः ॥७॥

(४२०) इजेराः पादपूरणे ॥८॥

सञ्जीवनी

इ जे र इत्येते निपाताः पादपूरणे वर्तन्ते। न्यूनपादपूरणमेव एषां प्रयोजनमित्यर्थः। एस इ तहा पअट्टो, एष तथा प्रवृत्तः। अत्र इकारः पादमध्यस्थानप्रदेशपूरणार्थः। अन्यथा वृत्तभंगः स्यात्। लंभइ जे पेखिउं, लभ्यते प्रेक्षितुम्। अत्र जेकारः पादपूरणाय। ण र तए वि, त्वयापि। अत्र रेफः पूरणार्थः ॥८॥

सुबोधिनी

इजेरा पादपूरणमात्रार्थनिपाताः स्युः। एस इ तहा पअट्टो, एष तथा प्रवृत्तः। अत्र इ। लंभइ जे पेक्खिउं, लभ्यते प्रेक्षितुम्। अत्र जेशब्दः ॥८॥

वृत्तौ प्राकृतसूत्राणां सदानन्दस्य निर्मितौ।
परिच्छेदः सुबोधिन्यां निपातविधिरष्टमः॥
॥ श्रीसंवत् १७८९ समये आषाढशुक्लाष्टम्यां सोमे रघुनाथेन लिखितेयम्॥

(४२१) आनन्तर्ये णवरि ॥९॥

सञ्जीवनी

अनन्तरस्य भावः आनन्तर्यम्। णवरि इत्ययं निपात आनन्तर्येऽर्थे वर्तते। णवरि छिण्णं सीसं रणे रिउणो, अनन्तरं छिन्नं शीर्षं रणे रिपोः। अत्र णवरिशब्देन शीर्षच्छेदनस्य आनन्तर्यमुद्योतितम्। केचित्तु "णवरि केवलानन्तर्ययोः" इत्येकं सूत्रं पठन्ति, तन्मते निपातद्वयमपि उभयनिवृत्तौ पर्यवस्यति ॥९॥

(४२२) उ क्षेपविस्मयसूचनासु ॥१०॥

सञ्जीवनी

क्षेपः तिरस्कारः, विस्मय आश्चर्यम्, सूचना अभिप्रायपैशुन्यम्। एषु त्रिष्वर्थेषु उ इति निपातो वर्तते। उ अम्ह ण तेण कज्जं, नास्माकं तेन कार्य्यम्। प्रयोजनेऽपि प्रयोजनं नास्तीति अधिक्षेपः। तं उकारो द्योतयति। उ सो एस इह कुदो आअदो, स एष कस्माद् आगतः इत्यादि यदाश्चर्यं तत् उ इत्यनेन द्योत्यते। सहि उ विलक्खो व्व सखि विलक्ष इव, अत्र वैलक्ष्यजननकारणाभिप्रायद्योतनार्थम् उशब्दः ॥१०॥

(४२३) किणो प्रश्ने ॥११॥

सञ्जीवनी

किणो इति निपातः प्रश्नेऽर्थे वर्तते। सुअह किणो कहसि मं, सुभग किं कथयसि माम्। अत्र किणो इति प्रश्नार्थवाचकः। कीस किमर्थे किणो प्रश्ने इत्यनयोः अर्थाभेदेऽर्थभेदो न कर्तव्यः। तथा चोक्तम्– 'सम्भवत्येकवाच्यत्वे वाक्ये भेदस्य नेष्यते' ॥११॥

(४२४) अब्बो दुःखसूचनासम्भाषणेषु ॥१२॥

सञ्जीवनी

दुःखे सूचनायां सम्भाषणे चार्थे अब्बो इति निपातो वर्तते। अब्बो मह पियविरहो, मम प्रियविरह इत्यत्र अब्बो विरहक्षतदुःखावेदकः। सहि एस निष्ठुरो अब्बो, सखि एष निष्ठुरः। अत्र अब्बोशब्दः सख्या सह यः संभाषस्तदर्थद्योतनद्वारेण प्रयुक्तः। अब्बो इति निपात आश्चर्यदर्शने क्वापि दृश्यते। अब्बो वल्लह किमिणम्, आश्चर्यं वल्लभ किमिदम्? अत्राश्चर्यद्योतनार्थोऽयम् अब्बोशब्दनिपातः ॥१२॥

(४२५) अलाहि निवारणे ॥१३॥

सञ्जीवनी

अलाहि इति त्र्यक्षरो निपातो निवारणे प्रतिषेधेऽर्थे वर्तते। अलाहि तुम्हे अम्ह णामेण, अलं तव अस्मदीयनाम्ना। अन्यः कश्चिन्नामग्रहणाद् अलाहि इत्यनेन प्रतिषिध्यते ॥१३॥

(४२६) अइ रणे संभाषणे ॥१४॥

सञ्जीवनी

अइ रणे इत्येतौ संभाषणे निरूपणेऽर्थे वर्तते। अइ पिअअम छणं दिअहो, अयि प्रियतम क्षणं दिवसः। अत्र क्षणमर्थं संभावयन् अइशब्दः संभाषितः। अज्ज रणे नाह गम्मइ घराउ, अद्य गम्यते नाथ गृहात्। अत्र रणेशब्दः गमनस्य सम्भाषणं निरूपयति ॥१४॥

(४२७) वेच्च आमन्त्रणे ॥१५॥

सञ्जीवनी

आह्वानम् आमन्त्रणम्। वेच्च इत्ययं द्व्यक्षरो निपात आमन्त्रणेऽर्थे वर्तते। वेच्च देअर जाणसु, हे देवर जानीहि। वेच्चशब्द आमन्त्रणार्थं द्योतयति। देश्यां पुनरयमनेकार्थो दृश्यते। यथा– 'वेच्चवेव्विलिऔ स्यातां वारणे तूरणे तथा' ॥१५॥

(४२८) धू कुत्सायाम् ॥१६॥

सञ्जीवनी

धू इति निपातः कुत्सायामर्थे वर्तते। कुत्सा निन्दा। धू तुह सवत्तिचारिअं, धिक् तव सपत्नीचरितम्। अत्र धूशब्दात् सपत्नीचरितस्य निन्दा प्रतीयते ॥१६॥

(४२९) रे अरे हरे संभाषणरतिकलहक्षेपेषु ॥१७॥

सञ्जीवनी

संभाषणं संकथनम्। रतिकलहो निधुवनकेलिः, क्षेपः तिरस्कारः, एष्वर्थेषु यथासंख्यं रे अरे हरे त्रयो निपाता वर्तन्ते। णिसुअं जं रे जंपसि, निश्रुतं यद् रे जल्पसि। अत्र रेशब्दः संभाषणद्योतनकरः। देहि अरे णिवसणं देहि अरे निवसनम्। अत्र अरेशब्दः प्रार्थनाभिप्रायरतिकलहद्योतकतामावहति। हरे घट्ठो, अहो घृष्टः अत्र हरेशब्दो घृष्टत्वलक्षणमधिक्षेपं समुन्मीलयति ॥१७॥

(४३०) पिव मिव विव व इवार्थे ॥१८॥

सञ्जीवनी

पिव मिव विव व इत्येते चत्वारः शब्दा निपाता इवार्थे उपमानोत्प्रेक्षादौ वर्तन्ते। रंभापिव रूपेण, रंभेव रूपेण। हरिणीमिव तरलपेच्छिएण, हरिणीव तरलप्रेक्षितेन। हंसीविव गमणेण, हंसीव गमनेन। सीअव्व सईत्तणेण तुमं, सीतेव सतीत्वेन त्वम्। सेवादिषु वेति वस्य द्वित्वम्।

एवमादयोऽन्ये निपाता भवन्ति। तथा च—

अनारम्भे च क्षेपे च पश्चात्तापविषादयोः।
निश्चये च बुधैः प्रोक्तो निपातो हन्त इत्ययम् ॥
हन्त वाच्यविभूषायां हे इत्यामन्त्रणे भवेत्।
आशब्दोऽपि भवत्यर्थे नाम इत्येवमर्थकः ॥
हज्जे हतो हले इत्यादयः संबोधने मताः।
इवार्थे ण इति क्वापि हा खेदानुपतापयोः ॥
अलं अलं विषादार्थो अप्यर्थोऽपि इ इत्ययम्।
...............पूशब्दः प्रोक्तः चेतरथा समः ॥

एवं चवादयोऽर्थानातिक्रमेण अव्ययत्वेनैव अवगन्तव्याः।

च वा इहे अहो हंहो णमे आहो हही सिहो।
अविमो मुत्तु अहहो इत्याद्यास्तु चवादयः॥१८॥

(४३१) शेषाः संस्कृतात् ॥१९॥

सञ्जीवनी

संस्कृतात्। उक्तेभ्योऽन्ये शेषाः। सुप्तिङ्तद्धितमासप्रत्याहारकारकलिङ्-संख्यादयोऽत्र नोक्तास्ते संस्कृतात् समीक्ष्यावगन्तव्याः। उक्तं च– **"प्राकृतं संस्कृतयोनिः"** इति। प्रकृतेः संस्कृताद् आगतं प्राकृतम्। संस्कृतं तु शाकटायन-चन्द्रपाणिनिशर्ववर्माचार्यप्रणीतं शाब्दिकलोकप्रसिद्धम्। क्वचिच्चोक्तलक्षणमपि बाधित्वा एकदेशसंस्कृतायामुपपाद्य व्याक्रियते। वच्चन्ते पियम्पि भणिअ, व्रजति प्रिये भणितम्। व्रज गतौ इत्यस्मात् न्तमाणावित्यादिना शतुः न्त इत्यादेशे कृते ङेरेम्मीति ङेरेत्वे कृते क्वचिदपि लोप इत्यकारलोपे 'वच्चन्ते पियम्मि' इति सिद्ध्यति। एवं 'वच्चइ पियम्मि' इत्यपि सिद्ध्यति। तथा शिरस इत्यस्य तृतीयैकवचने परे अन्त्यस्य हल इति सलोपः। टामोर्णः इति टाप्रत्ययस्य णः। ए सुप्यङिङसोरिति एत्वम्। एवं शिरेण इत्येवं प्राप्नोति। संस्कृतमनु सिरसेत्यस्य तृतीया। सिद्धस्याङ्गीकृतत्वात् शषोः स इति शस्य सत्वे कृते सिरसा इत्यपि भवति। तथा भगवत्त इत्यस्य आल्लिलादिना मत्वर्थे वत्त प्रत्ययः। ततः पूर्ववत् टाप्रत्ययस्य णत्वम्, अकारस्य च एत्वम्। एवं कृते भअवत्तेण इत्येतत् स्यात्। संस्कृतसमीक्षया तु भगवता। तृतीया सिद्धस्याङ्गीकृतत्वाद् कगचादिना गवयोर्लोपः। ऋत्वादिषु तो द इति तस्य दः। दकृते भअअदा इति रूपं निष्पाद्यते। तथा किम्परस्य सप्तम्येकवचनस्य आहे इआ काले इति आहे इआ इत्यादेशौ। किमः क इति कः। एवं कृते काहे कइआ इत्येतावेव सिद्ध्यतः। संस्कृतसमीक्षया पुनः कदा इत्यस्याङ्गीकारात् कगचादिना दलोपे कआ इत्यपि स्यात्। इत्यादयो महाकविप्रयुज्यमानप्रयोगानुसारेण अवगन्तव्याः ॥१९॥

॥ इति वसन्तराजविरचितायां प्राकृतसञ्जीवनीवृत्तौ
निपातविधिरष्टमः परिच्छेदः समाप्तः॥

●

भामहरचितमनोरमया

कात्यायनरचितप्राकृतमञ्जर्या च

संवलितः

प्राकृतप्रकाशः

परिशिष्टभागः

[१]

●

प्राकृतप्रकाशः

॥ अथ प्रथमः परिच्छेदः ॥

आदेरतः ॥१॥

मनोरमा

जयति मद-मुदित-मधुकर-मधुर-रुताकलन-कूणितापाङ्गः।
करविहितगण्ड-कण्डू-विनोदसुखितो गणाधिपतिः॥
वररुचिरचित-प्राकृतलक्षणसूत्राणि लक्ष्यमार्गेण।
बुद्ध्वा चकार वृत्तिं संक्षिप्तां भामहः स्पष्टाम्॥

आदेरिति। अधिकारोऽयम्। यदित ऊर्ध्वमनुक्रमिष्याम आदेरतः स्थाने तद् भविष्यतीति वेदितव्यम्। आदेरित्येतदापरिच्छेदसमाप्तेः। अत इति च आ अकार-विधानात्। अत इति तकारग्रहणं सवर्णनिवृत्त्यर्थम्॥१॥

प्राकृतमञ्जरी

इदमन्धतमो भित्त्वा यज्ज्योतिर्भासते परम्।
नमो भगवते तस्मै सूर्याय परमात्मने॥१॥
उदेतु भगवान् भानुरुदयाद्रेरिवात्मनः।
येन वाचो यथार्था नः स्फुरन्ति सगुणाः स्वयम्॥२॥
प्रसीदन्तु च वाचस्ता यासां माधुर्यमुच्छ्रितम्।
प्राकृतच्छद्मना चक्रे कात्यायनो महामुनिः॥३॥
व्याकर्त्तुं प्राकृतत्वेन गिरः परिणतिं गताः।
कोऽन्यः शक्तो भवेत् तस्य कवेः कात्यायनादृते॥४॥
अहो तत् प्राकृतं चारु प्रियावक्त्रेन्दुसुन्दरम्।
सूक्तयो यत्र राजन्ते सुधानिष्यन्दनिर्भराः॥५॥

वन्दे वररुचिं तं च यत्प्रज्ञामञ्जरीमधुः।
अद्याप्यास्वादयन्त्येव हृद्यं विद्वन्मधुव्रताः ॥६॥
कात्यायनप्रणीतेऽस्मिन् प्राकृताब्धौ तितीर्षया।
अप्रज्ञाप्रोततन्त्राय नमो मह्यं निमज्जते ॥७॥
यावत् प्राकृतसूत्राणि, व्याख्यास्यामो वयं पुनः।
न विद्यादर्पकण्डुत्या केवलं तद्विवित्सया ॥८॥
तत्प्रसन्नाशयाः सन्तो दद्युः श्रवणगोचराम्।
इमां वररुचिप्रज्ञावल्याः प्राकृतमञ्जरीम् ॥९॥
विव्रियन्तेऽत्र सूत्रार्था गम्यन्ते रूपसिद्धयः।
पठ्यन्ते च गणास्ते ते तत्र तत्र यथायथम् ॥१०॥
आदेरित्यधिकारोऽयमापरिच्छेदपूरणात् ।
अत इत्यपि तस्मात् प्रागात इत्यपि यो विधिः॥
एकस्मिन्नेव शब्दे स्यादेक एवादनेकशः।
आदेरिति तदादेः स्यान्न पदादेरिति स्मृतिः ॥११॥

आ समृद्ध्यादिषु वा ॥२॥

मनोरमा

समृद्धि इत्येवमादिषु शब्देषु आदेरकारस्य आकारो भवति वा। समिद्धी, सामिद्धी। पअडं, पाअडं। अहिजाई, आहिजाई। मणंसिणी, माणंसिणी। पड़िवआ, पाड़िवआ। सरिच्छं, सारिच्छं। पड़िप्फद्धी, पाड़िप्फद्धी। पड़िसिद्धी, पाड़िसिद्धी। पसुत्तं, पासुत्तं। पसिद्धी, पासिद्धी। अस्सो, आसो। समृद्धि। प्रकट। अभिजाति। मनस्विनी। प्रतिपत्। सदृक्ष। प्रतिस्पर्द्धिन्। प्रतिसिद्धि। प्रसुप्त। प्रसिद्धि। अश्व। आकृतिगणोऽयम् ॥२॥

प्राकृतमञ्जरी

अनेकेषामकाराणामकारस्यादिभाविनः ।
समृद्ध्यादिषु शब्देषु स्यादाकारो विकल्पतः॥
समृद्धिरिति सामिद्धी समिद्धी वा भवेत् पुनः।
सदृक्षमिति सारिच्छं सरिच्छं वा निगद्यते॥

प्रसुप्त इति पासुत्तो पसुत्तो वाभिधीयते।
शेषेष्वपि विमृश्यन्तामेवं रूपविमर्ययाः॥
समृद्धिश्च सदृक्षश्च प्रसुप्तः प्रकटस्तथा।
प्रसिद्धिरभिजातिश्च प्रकृतिश्च मनस्विनी॥
प्रतिस्पर्द्धीति विज्ञेयः समृद्ध्यादिरयं गणः।
लक्ष्येऽन्यत्रापि यल्लक्ष्यं तदप्यन्तर्भवं पदम्॥२॥

इदीषत्-पक्व-स्वप्न-वेतस-व्यजन-मृदङ्गाङ्गारेषु ॥३॥

मनोरमा

ईषदादिशब्देषु आदेरतः स्थाने इकारादेशो भवति। वेति निवृत्तम्। इसि। पिक्कं। सिविणो। वेड़िसो। विअणो। मुइंगो। इङ्गालो॥३॥

प्राकृतमञ्जरी

ईषत् पक्वं तथा स्वप्नो वेतसो व्यजनं पुनः।
मृदङ्गश्च तथाङ्गार एषु शब्देषु सप्तसु॥
अत इद्वा भवेदीषदीसि वा पुनरीस वा।
पक्वं पिक्कं च पक्कं च तथान्येष्वपि दृश्यताम्॥
इत्त्वमीषत्पदे कैश्चिदीकारस्यापि चेष्यते।
इसि चुम्बिअमित्यादि रूपं तेन हि सिध्यति॥३॥

लोपोऽरण्ये॥४॥

मनोरमा

अरण्यशब्दे आदेरतो लोपो भवति।रण्णं॥४॥

प्राकृतमञ्जरी

अरण्यमिति शब्देऽस्मिन्नकारस्यादिवर्त्तिनः।
अविकल्पेन लोपः स्यात्ततो 'रण्णं' भवेदिदम्॥ ४॥

ए शय्यादिषु ॥५॥

मनोरमा

शय्या इत्येवमादिषु शब्देषु आदेरत एकारो भवति । सेज्जा । सुन्देरं । तेरह । उक्केरो । अच्छेरं । पेरन्तं । वेल्लो । शय्या । सौन्दर्य्य । त्रयोदश । उत्कर । आश्चर्य्य । पर्य्यन्त । वल्लि ॥५॥

प्राकृतमञ्जरी

शय्यादिषु भवेदेत्वं शय्या सेज्जा निगद्यते ।
आश्चर्यं विदुरच्छेरं त्रयोदश च तेरह ॥
शय्या त्रयोदशाश्चर्यपर्यन्तोत्करवल्लयः ।
सौन्दर्यश्चेति शय्यादिगणः शेषस्तु पूर्ववत् ॥५॥

ओ बदरे देन ॥६॥

मनोरमा

बदरशब्दे दकारेण सह आदेरत ओत्वं भवति ।वोरं ॥६॥

प्राकृतमञ्जरी

आदेर्बदरशब्देऽस्मिन्नत ओत्वं विधीयते ।
दकारेण सहैवातो बदरं वोरमुच्यते ॥६॥

लवणनवमल्लिकयोर्वेन ॥७॥

मनोरमा

लवणनवमल्लिकयोरादेरतो वकारेण सह ओकारो भवति । लोणं । णोमल्लिआ ॥७॥

प्राकृतमञ्जरी

ओकारो वेन लवण-नवमल्लिकयोरतः ।
लोणं णोमल्लिएति स्याल्लवणं नवमल्लिका ॥७॥

मयूरमयूखयोर्व्वा वा ॥८॥

मनोरमा

मयूरमयूखयोर्यूशब्देन सह आदेरत ओत्वं वा भवति। मोरो, मऊरो। मोहो, मऊहो ॥८॥

प्राकृतमञ्जरी

यूकारेण सहौत्वं स्याद् वा मयूरमयूखयोः।
मोरो मऊरो मोहो वा मऊहो वा मताविमौ ॥८॥

चतुर्थी चतुर्दश्योस्तुना ॥९॥

मनोरमा

एतयोस्तुना सह आदेरत ओत्वं भवति वा। चोत्थी, चउत्थी। चोद्दही, चउद्दही ॥९॥

प्राकृतमञ्जरी

वा चतुर्थी चतुर्दश्योरत ओत्वं तुना सह।
भवेच्चोत्थो चउत्थी च चोद्दही वा चउद्दही ॥९॥

अदातो यथादिषु ॥१०॥

मनोरमा

अत इति निवृत्तम्, स्थान्यन्तरनिर्देशात्। यथा इत्येवमादिषु आदेरातः स्थाने अकारादेशो वा भवति। जह, जहा। तह, तहा। पत्थरो, पत्थारो। पउअं, पाउअं। तलवेण्टअं, तालवेण्टअं। उक्खअं, उक्खाअं। चमरं, चामरं। पहरो, पहारो। चडु, चाडु। दवग्गी, दावग्गी। खइअं, खाइअं। सण्ठविअं, सण्ठाविअं। हलिओ, हालिओ। यथा। तथा। प्रस्तार। प्राकृत। तालवृन्तक। उत्खात। चामर। प्रहार। चाटु। दावाग्नि। खादित। संस्थापित। हालिक ॥१०॥

प्राकृतमञ्जरी

यथादिषु भवेदादेराकारस्य विकल्पतः।
अत्त्वं जह जहा वा स्याच्चमरं वाथ चामरं॥
यथा चामर-दावाग्नि-प्रहारोत्खात-हालिकाः।
तालवृन्तं तथा चाटु यथादिः स्यादयं गणः॥१०॥

इत् सदादिषु ॥११॥

मनोरमा

सदा इत्येवमादिषु आत इकारो भवति वा । सइ, सआ । तइ तआ । जइ, जआ । सदा । तदा । यदा ॥११॥

प्राकृतमञ्जरी

अव्ययत्वात् सदेत्येतत् सप्तम्यन्तं पदं भवेत् ।
आतस्तत्र त्विकारो वा स्यात् सदा सइ वा सआ ॥११॥

इत एत् पिण्डसमेषु ॥१२॥

मनोरमा

पिण्ड इत्येवं समेषु इकारस्य एकारादेशो भवति वा । पेण्डं, पिण्डं । णेद्दा, णिद्दा । सेन्दूरं, सिन्दूरं । धम्मिल्लं, धम्मेल्लं । चेन्धं, चिन्धं । वेण्हू, विण्हू , पेट्टं, पिट्टं । पिण्ड । निद्रा । सिन्दूर । धम्मिल्ल । चिह्न । विष्णु । पिष्ट । समग्रहणं संयोगपरस्य उपलक्षणार्थम् ॥१२॥

प्राकृतमञ्जरी

एत्वं पिण्डसमेष्वादेरिकारस्य विकल्पतः ।
भवेत् पिण्डं विदुः पेण्डं पिष्टं पेट्टं प्रवक्षते ॥
पिण्डं पिष्टं सिन्दूरञ्च धम्मिल्लो विष्णुरीदृशः ।
द्रष्टव्याः समशब्दार्थाः संयुक्तोत्तरका ध्रुवम् ॥१२॥

अत् पथिहरिद्रापृथिवीषु ॥१३॥

मनोरमा

पथ्यादिषु शब्देषु इकारस्य अकारादेशो भवति । पहो । हलद्दा । पुहवी ॥१३॥

प्राकृतमञ्जरी

अत्त्वं पथिहरिद्रायां पृथिव्याञ्च भवेदितः ।
पन्थाः पहो हरिद्रापि हलद्दा पुहवी परा ॥१३॥

इतेस्तः पदादेः ॥१४॥

मनोरमा

पदादेरिति शब्दस्य यस्तकारस्तस्मात् परस्य इकारस्य अकारो भवति। इअ उअइ अणहवअणं। इअ विअसन्तीउ चिरं। इति पश्यत अन्यथावचनम्। इति विकसन्त्यः चिरम्। पदादेरिह न भवति। पिओत्ति, प्रिय इति ॥१४॥

प्राकृतमञ्जरी

आदेरित्यत्र वाक्यादेरिति शब्दस्य यस्तु तः।
इतस्तद्वर्तिनः प्रोक्तमत्त्वमित्युच्यतामिअ ॥१४॥

उदिक्षुवृश्चिकयोः ॥१५॥

मनोरमा

इक्षुवृश्चिकयोरितः स्थाने उत्त्वं भवति। उच्छू। विच्छुओ ॥१५॥

प्राकृतमञ्जरी

इतस्तावदुकारः स्यादिक्षुवृश्चिकशब्दयोः।
इक्षुरुच्छू भवत्यत्र वृश्चिकश्चापि विच्छुओ॥ १५॥

औ च द्विधा कृञः ॥१६॥

मनोरमा

कृञ्-धातुप्रयोगे द्विधाशब्दस्य आदेरिकारस्य ओकारो भवति। चकारादुत्त्वं च। द्विधाकृतम्। दोहाइअं, दुहाइअं। द्विधाक्रियते। दोहाइज्जइ, दुहाइज्जइ ॥१६॥

प्राकृतमञ्जरी

कृञोऽधस्ताद् द्विधाशब्दे य इकारः प्रयुज्यते।
तस्य स्यादोत्त्वमुत्त्वं च चकारेणेति दृश्यते॥
द्विधाक्रियत इत्यत्र दोहाइज्जइ जायते।
दुहाइज्जइ वापि स्यादेवं रूपान्तरेष्वपि॥१६॥

ईत् सिंहजिह्वयोश्च ॥१७॥

मनोरमा

एतयोरादेरिकारस्य ईकारो भवति। सीहो। जीहा। चकारोऽनुक्तसमुच्चयार्थः। तेन वीसत्थो, वीसम्भो इत्येवमादिषु ईत्त्वं भवति ॥१७॥

प्राकृतमञ्जरी

ईकारः स्यादिकारस्य शब्दयोः सिंहजिह्वयोः।
सिंहो निगद्यते सीहो जिह्वा जीहा निगद्यते ॥१७॥

इवे लोपः ॥१७क॥

प्राकृतमञ्जरी

इवशब्दे त्विकारस्य लोपो नित्यं भविष्यति।
यथा राआव रुद्धोव कहं वेत्यादि सिध्यति ॥१७क॥

इदीतः पानीयादिषु ॥१८॥

मनोरमा

पानीय इत्येवमादिषु आदेरीकारस्य इकारो भवति। पाणिअं। आलिअं। वलिअं। तआणिं। करिसो। दुइअं। तइअं। गहिरं। पानीय। अलीक। व्यलीक। तदानीम्। करीष। द्वितीय। तृतीय। गभीर ॥१८॥

प्राकृतमञ्जरी

पानीयादिष्विकारः स्यादीकारस्यादिवर्त्तिनः।
पानीयं पाणिअं विद्यादलीकमलिअं तथा।
पानीय-व्रीडितालीक-द्वितृतीयकरीषकाः।
गभीरश्च तदानीञ्च पानीयादिरयं गणः ॥१८॥

एन्नीडापीडकीदृशेदृशेषु ॥१९॥

मनोरमा

नीडादिषु ईकारस्य एकारो भवति। णेड्डं। आमेलो। केरिसो। एरिसो ॥१९॥

प्राकृतमञ्जरी

नीडापीडेदृशेष्वीतः　　कीदृशेष्वेत्त्वमिष्यते।
तद्यथा णेढमामेलो एरिसो केरिसो क्रमात्॥१९॥

उत ओत्तण्डरूपेषु ॥२०॥

मनोरमा

तुण्ड इत्येवं रूपेषु आदेरुकारस्य ओकारो भवति। तोण्डं। मोत्ता। पोक्खरो। पोत्थओ। लोद्धओ। कोट्टिमं। तुण्ड। मुक्ता। पुष्कर। पुस्तक। लुब्धक। कुट्टिम। रूपग्रहणं संयोगपरोपलक्षणार्थम् ॥२०॥

प्राकृतमञ्जरी

तुण्डरूपेषु　वै　शब्देष्वादेरोत्वमुतो　भवेत्।
तुण्डं तोण्डं विदुः प्राज्ञा लुब्धकं　चापि लोद्धअं॥
तुण्डलुब्धकमुण्डाश्च　कुट्टिमश्चापि　पुष्करम्।
ज्ञातव्या　रूपशब्देन बुधैः संयुक्तपूर्वकाः॥२०॥

उलूखले ल्वा वा ॥२१॥

मनोरमा

उलूखलशब्दे लूशब्देन सह उकारस्य ओकारो भवति वा। ओक्खलम्। उलूहलम् ॥२१॥

प्राकृतमञ्जरी

लूकारेण सह स्याद् वा पुनरोत्त्वमुलूखले।
ओहलं तदु विदुः सन्तः पक्षे विदुरुलूहलम्॥२१॥

अन्मुकुटादिषु ॥२२॥

मनोरमा

मुकुट इत्येवमादिषु आदेरुकारस्य स्थाने अकारो भवति। मउढं। मउलं। गरुअं। गरुई। जहिट्ठिलो। सोअमल्लं। अवरि। मुकुट। मुकुल। गुरु। गुर्वी। युधिष्ठिर। सौकुमार्य्य। उपरि ॥२२॥

प्राकृतमञ्जरी

आदेरुतो भवेदत्त्वं पदेषु मुकुटादिषु।
मुकुटं मउडं विद्यान्मुकुलं मउलं तथा।
मुकुटं मुकुलं गुर्वी सुकुमारी युधिष्ठिरः।
अगुरुपरि शब्दस्य मुकुटादिरयं गणः॥२२॥

इत् पुरुषे रोः॥२३॥

मनोरमा

पुरुषशब्दे यो रेफस्तस्य उकारस्य इकारो भवति। पुरिसो ॥२३॥

प्राकृतमञ्जरी

योऽसौ पुरुषशब्देऽस्मिन् रेफस्तत्र स्थितस्य तु।
उकारस्य भवेदित्त्वं पुरुषः पुरिसो भवेत्॥
चोद्यते ननु सूत्रेऽस्मिन्नधिकारो विरुध्यते।
अतीतमपि यत् सूत्रमितेस्त इति तत्र च॥
स्यादेतत् परिहर्त्तव्यं यत् सूत्रे त्वत्र चोच्यते।
"एकवारमनुग्राह्यं स्खलितं क्षम्यतामिति॥"
इतेस्त इति यच्चोद्यं तत्राभासो न बाध्यते।
अन्यच्चाहत्य निर्द्देशो द्वयोर्नेहास्ति दूषणम्॥
एकस्मिन्नेव शब्दे स्यादिति यद्विवृतं मुखे।
प्रायो वृत्त्या तदेतावान्नेव बाधविधिर्भरः॥२३॥

उदूतो मधूके॥२४॥

मनोरमा

मधूकशब्दस्य ऊकारस्य उकारो भवति। महुअं ॥२४॥

प्राकृतमञ्जरी

योऽसौ मधूकशब्देऽस्मिन्नूकारः सम्प्रतिष्ठितः।
उकारो विहितस्तस्य मधूको महुओ मतः॥२४॥

अद् दूकूले वा लस्य द्वित्वम् ॥२५॥

मनोरमा

दुकूलशब्दे ऊकारस्य अकारो भवति वा। तत्संयोगेन लकारस्य द्वित्वम्। दुअल्लं। दुऊलं ॥२५॥

प्राकृतमञ्जरी

अत्त्वमूतो दुकूले वा स्यात्तदा लस्य च द्विता।
दुकूलं तु दुअल्लं वा दुऊलं वा निगद्यते ॥२५॥

एन्नूपुरे ॥२६॥

मनोरमा

नूपुरशब्दे ऊकारस्य एकारो भवति। णेउरं ॥२६॥

प्राकृतमञ्जरी

ऊतो नूपुरशब्देऽस्मिन्नेकारस्तु विधीयते।
आदेशत्वेन तेनेह नूपुरो णेउरो मतः ॥२६॥

ऋतोऽत् ॥२७॥

मनोरमा

आदेर्ऋकारस्य अकारो भवति। तणं। घणा। मअं। कअं। वद्धो। वसहो। तृण। घृणा। मृत। कृत। वृद्ध। वृषभ ॥२७॥

प्राकृतमञ्जरी

ऋकारस्य त्वकारः स्यादुत्सर्गेण पदे पदे।
वृद्धं बद्धं मृदु मउ कृष्णः कण्हो मृड़ो मड़ो ॥२७॥

इदृश्यादिषु ॥२८॥

मनोरमा

ऋषिप्रभृतिशब्देषु आदेर्ऋकारस्य इकारो भवति। इसी। विसी। गिट्ठी। दिट्ठी। सिट्ठी। सिंगारो। मिअङ्को। भिङ्गो। भिङ्गारो। हिअअं। विइण्हो। विंहिअं। किसरो। किच्चा। विच्छुओ। सिआलो। किई। किसी। किवा। ऋषि। वृषी। गृष्टि। दृष्टि।

सृष्टि । शृङ्गार । मृगाङ्क । भृङ्ग । भृङ्गार । हृदय । वितृष्ण । वृंहित । कृशर । कृत्या । वृश्चिक । शृगाल । कृति । कृषि । कृपा ।।२८।।

प्राकृतमञ्जरी

ऋष्यादिषु पदेष्वित्त्वमृकारस्य विधीयते।
तस्मादृषिरिसी वाच्यो दृष्टिर्दिट्ठी कृशः किसो ।।
ऋषिर्दृष्टिः कृशो घृष्टिः कृपा शृङ्गारवृश्चिकाः।
मृदङ्गो हृदयं भृङ्गः शृगालकृतिसृष्टयः ।।
विसृष्टश्च मृगस्तद्वद् भृत्यश्च कृसरस्तथा।
आकृतिः प्रकृतिश्चैव स्यादृष्यादिरयं गणः ।।२८।।

उदृत्यादिषु ।।२९।।

मनोरमा

ऋतु इत्येवमादिषु आदेर्ऋत उकारो भवति । उदू । मुणालो । मुहवी । वुन्दावणं । पाउसो । पउत्ती । विउढं । संबुदं । णिव्वुढं । वुत्तन्तो । परहुओ । माउओ । जामाउओ । ऋतु । मृणाल । पृथिवी । वृन्दावन । प्रावृष् । प्रवृत्ति । विवृत । संवृत । निर्वृत । वृत्तान्त । परभृत । मातृक । जमातृक । इत्येवमादयः ।।२९।।

प्राकृतमञ्जरी

ऋत्वादिषु पदेषु स्यादृकाराणामुकारता।
भवेदृतुरुदू वृन्तं वुंटं प्रावृट् च पावुसो ।।
ऋतुर्वृन्दावनं वृन्तं वृत्तान्तो विवृतं धृतम् ।
मृणाल-पृथिवी-प्रावृट्-तालवृन्त-प्रवृत्तयः ।।
वृत्तिः परिवृतश्चेति स्यादृत्वादिरयं गणः।
अत्र स्युः किल केषाञ्चिद् भ्रातृ-जामातृ-मातरः ।।२९।।

अयुक्तस्य रिः ।।३०।।

मनोरमा

वर्णान्तरेणायुक्तस्य आदेर्ऋकारस्य रिकारो भवति । रिणं । रिद्धो । रिच्छी । ऋण । ऋद्ध । ऋक्ष ।।३०।।

प्राकृतमञ्जरी

अयुक्तस्य हला रित्वमृकारस्य विधीयते।
ऋक्षमाहुर्बुधा रिच्छं ऋद्धं रिद्धं ऋणं रिणं॥३०॥

क्वचिद् युक्तस्यापि ॥३१॥

मनोरमा

वर्णान्तरेण युक्तस्यापि क्वचिद् ऋकारस्य रिकारो भवति। एरिसो। सरिसो। तारिसो। ईदृश। सदृश। तादृश ॥३१॥

प्राकृतमञ्जरी

युक्तस्यापि क्वचिद्रित्वं स्यादृकारस्य तद्यथा।
कीदृशं केरिसं विद्यादीदृशं पुनरेरिसं॥
सदृशो यादृशस्तद्वदेतादृश इतीदृशौ।
मादृशास्मादृशी चैवं युष्मादृशभवादृशौ॥
त्वादृशोऽन्यादृशस्तद्वत् कीदृशेदृशतादृशाः।
प्रायशः क्वचिदित्युक्तं तथा लक्ष्येषु दृश्यताम्॥३१॥

वृक्षे वेन रुर्वा ॥३२॥

मनोरमा

वृक्षशब्दे वकारेण सह ऋकारस्य स्थाने रुकारो भवति वा। रुक्खो। वच्छो। व्यवस्थितविभाषाज्ञापनात् छत्वपक्षे न भवति, खत्वपक्षे तु नित्यमेव भवति ॥३२॥

प्राकृतमञ्जरी

वृक्षशब्दे वकारेण सह रुत्वमृतः स्मृतम्।
विकल्पेन विदुर्वृक्षं रुक्खं वा वच्छमेव वा॥३२॥

लृतः क्लृप्त इलिः ॥३३॥

मनोरमा

क्लृप्तशब्दे लृकारस्य इलि इत्ययमादेशो भवति। किलित्तं। तदेवमादेशान्तराविधानात् प्राकृते ऋकारलृकारौ न भवतः ॥३३॥

प्राकृतमञ्जरी

केवलस्याप्रयुक्तत्वाद् लृतः क्लृप्ते स्थितस्य तु।
इत्यादेशो भवेत् क्लृप्तं किलित्तिं कथ्यते बुधैः॥३३॥

एत इद् वेदनादेवरयोः॥३४॥

मनोरमा

वेदनादेवरयोरेकारस्य इकारो भवति। विवेणा। दिदीरो। वाग्रहणाद् अनुवृत्तेः क्वचिद् वेअणा, देअरो इत्यपि॥३४॥

प्राकृतमञ्जरी

एत इदु वेदनाशब्दे देवरे च विधीयते।
वेदना विअणा तद्वद् देवरो दिअरो मतः॥
वेअणा देअरो चेति लक्ष्ये भवति चेदिह।
वेन रुर्वेत्यतो वेति स्यान्मण्डूकप्लुतिक्रमात्॥३४॥

ऐत एत्॥३५॥

मनोरमा

आदेरैकारस्य एकारो भवति। सेलो। सेच्चं। एरावणो। केलासो। तेल्लोक्कं। शैल। शैत्य। ऐरावत। कैलाश। त्रैलोक्य॥३५॥

प्राकृतमञ्जरी

ऐकारस्य भवेदेत्त्वमुत्सर्गेण पदे पदे।
शैलो निगद्यते सेलो शैवलं सेअलं मतम्॥३५॥

दैत्यादिष्वइ॥३६॥

मनोरमा

दैत्यादिषु शब्देषु ऐकारस्य अइ इत्ययमादेशो भवति। दइच्चो। चइत्तो। भइरवो। सइरं। वइरं। वइदेशो। वइदेहो। कइअवो। वइसाहो। वइसिओ। वइसंपाअणो। दैत्य। चैत्र। भैरव। स्वैर। वैर। वैदेश। वैदेह। कैतव। वैशाख। वैशिक। वैशम्पायन इत्यादयः॥३६॥

प्राकृतमञ्जरी

दैत्यादिषु पदेषु स्यादइरित्यक्षरद्वयम्।
दैत्यास्तेन दइच्चो स्यात् स्वैरं च सइरं मतम्॥
दैत्यः स्वैरं चैत्यं कैटभवैदेहकौ च वैशाखः।
वैशिक-भैरव-वैशम्पायन-वैदेशिकाश्च दैत्यादिः॥३६॥

दैवे वा॥३७॥

मनोरमा

दैवशब्दे ऐकारस्य अइ आदेशो वा भवति।दइवं, देव्वं अनादेशपक्षे।नीडादित्वाद् द्वित्वम् ॥३७॥

प्राकृतमञ्जरी

दैवशब्दे य ऐकारस्तस्य स्यादेद्विकल्पतः।
दैवं निगद्यते देव्वं पक्षे दइवमुच्यते॥३७॥

इत् सैन्धवे॥३८॥

मनोरमा

सैन्धवशब्दे ऐकारस्य इकारो भवति। सिन्धवं॥३८॥

प्राकृतमञ्जरी

सैन्धवे योऽयमैकारस्तस्येकारो विधीयते।
ततः सैन्धवमित्येतत् सन्तः शंसन्ति सिन्धवं॥३८॥

ईद्धैर्ये॥३९॥

मनोरमा

धैर्यशब्दे ऐकारस्य ईकारो भवति। धीरं॥३९॥

प्राकृतमञ्जरी

धैर्यशब्दे य ऐकार ईत्त्वं यस्य विधीयते।
धैर्यशब्दे ततो प्राज्ञा धीरमित्यनुशासते॥३९॥

ओतोऽद्वा प्रकोष्ठे कस्य वः ॥४०॥

मनोरमा

प्रकोष्ठशब्दे ओकारस्य अकारो भवति वा। तत्संयोगेन च ककारस्य वत्वम्। पवट्ठो, पओट्ठो ॥४०॥

प्राकृतमञ्जरी

अत्त्वमोतः प्रकोष्ठे तत्सन्नियोगेन कस्य च।
वत्वं वा स्यात् पवट्ठं वा पओट्ठं वा निगद्यते ॥४०॥

औत ओत् ॥४१॥

मनोरमा

औकारस्यादेरोकारो भवति। कोमुई। जोव्वणं। कोत्थुहो। कोसम्बी। कौमुदी। यौवन। कौस्तुभ। कौशाम्बी ॥४१॥

प्राकृतमञ्जरी

औकारस्य भवेदोत्त्वमुत्सर्गेण पदे पदे।
कौमुदी कोमुई तद्वत् कौस्तुभश्चापि कोत्थुहो ॥४१॥

पौरादिष्वउ ॥४२॥

मनोरमा

पौर इत्येवमादिषु शब्देषु औकारस्य अउ इत्ययमादेशो भवति। पउरो। कउरओ। पउरुसो। पौर। कौरव। पौरुष। आकृतिगणोऽयम्। कौशले विकल्पः। कोसलो। कउसलो। कौशल ॥४२॥

प्राकृतमञ्जरी

पौराकृतिषु शब्देषु औकारस्य भवेदउः।
पौरः स्यात् पउरो तद्वद् ज्ञेयमाकृतिजे गणे॥
पौरश्च पौरवश्चैव पौरुषं कौरवस्तथा।
रौद्रश्चेति विचेतव्यः पौराकृतिगणो बुधैः ॥४२॥

आच्च गौरवे ॥ ४३ ॥

मनोरमा

गौरवशब्दे औकारस्य आकारो भवति । चकाराद् अउत्वं च । गारवं, गउरवं ॥ ४३ ॥

प्राकृतमञ्जरी

औकारस्य भवेदात्त्वं गौरवे चादउस्तथा।
तेन स्याद् गारवमिति ज्ञेयं गउरवं तथा ॥ ४३ ॥

उत् सौन्दर्य्यादिषु ॥ ४४ ॥

मनोरमा

सौन्दर्य्य इत्येवमादिषु औकारस्य उकारो भवति । सुन्देरं । मुञ्ञाअणो । सुण्डो । कुक्खेअओ । दुव्वारिओ । सौन्दर्य्य । मोञ्ञायन । शौण्ड । कौक्षेयक । दौवारिक ॥ ४४ ॥

प्राकृतमञ्जरी

औकारस्य भवेदुत्त्वं सौन्दर्य्यादिषु तद्यथा।
सौन्दर्य्यमपि सुन्देरं शौण्डः सुण्डो निगद्यते ॥
सौन्दर्य्य-शौण्ड-कौक्षेयास्तथा मौञ्ञायनोऽपि वा।
तथा दौवारिकश्चेति सौन्दर्य्यादिरयं गणः ॥ ४४ ॥

॥ इति वररुचिकृते प्राकृतप्रकाशे अज्विधिर्नाम प्रथमः परिच्छेदः ॥

चेन्धं, तइ, सइ, वोरं, माणंसिणो, पाड़िवआ, पासुत्तं, इति, सुन्देरं, पेरन्तं, धीरं, लोणं, चोत्थी, पहो, पुहवी, उक्खअं, दवग्गी, मोरो, उच्छू, दोहाइज्जइ, दुइअं, णेड्डं, पोत्थओ, महुअं, मउलं, गरुअं, मिअङ्को, तणं, घणा, णेउरं, किई, किवा, मुणालं, रिच्छो, तारिसो, दिअरो, तेल्लोकं, देव्वं, कोमुई, कोसम्बी, गारवं, सेन्दूरं, सुण्डो ।

अश्वः, सदृक्षः, प्रसिद्धिः, मृदङ्गः, पक्वः, त्रयोदश, आश्चर्यम्, मयूखः, पन्थाः, दवाग्निः, सदा, चिह्नम्, पृथिवी, द्विधाक्रियते, प्रिय इति, सिंहः, गभीरम्, गुरुकः, मुक्ता, मधूकम्, नूपुरम्, कृत्या, पुरुषसृष्टिः, ऋषिहृदयम्, त्रैलोक्यनाथकृतम्, वैदेही देवरेण सह अरण्यं गता ॥ ४४ ॥

●

॥ अथ द्वितीयः परिच्छेदः ॥

❀❀❀

अयुक्तस्यानादौ ॥१॥

मनोरमा

अधिकारोऽयम्। इत उत्तरं यद्वक्ष्यामस्तदयुक्तस्य व्यञ्जनस्यानादौ वर्त्तमानस्य कार्य्यं भवतीत्येवं वेदितव्यम्। वक्ष्यति कादीनां लोपः। मउड़ं। अयुक्तस्येति किम्। अग्घो। अक्को। अनादाविति किम्। कमलं। अयुक्तस्येति आ परच्छिेदसमाप्तेः, अनादाबिति च आ जकारविधानात् ॥१॥

प्राकृतमञ्जरी

अधिकारस्त्वयुक्तस्येत्यापरिच्छेदपूरणात् ।
अनादाविति चादेर्यो ज इत्यस्माद्विधेः पुरा ॥
अयुक्तस्य हलान्येन स्वेन वा विधिरुत्तरः।
अनादौ वर्त्तमानस्य पदेष्वित्यवगम्यताम् ॥१॥

क-ग-च-ज-त-द-प-य-वां प्रायो लोपः ॥२॥

मनोरमा

कादीनां नवानां वर्णानामयुक्तानामनादौ वर्त्तमानानां प्रायो लोपो भवति। कस्य तावत्– मउलो। णउलं। गस्य– माअरो। णअरं। चस्य– वअणं। सूई। जस्य– गओ। रअदं। तस्य– कअं। विआणं। दस्य– गआ। मओ। पस्य– कई। विउलं। सूउरिसो। सुपुरुष इति यद्यपि उत्तरपदस्य पुरुषशब्दस्यादिस्तथापि लोपो भवति इत्यनेन ज्ञापयति वृत्तिकारः, यथा उत्तरपदादिरनादिरिवेति। यस्य– वाउणा। णअणं। वस्य– जीअं। दिअहो।

मुकुल। नकुल। सागर। नगर। वचन। सूची। गज। रजत। कृत। वितान। गदा। मद। कपि। विपुल। सुपुरुष। वायुना। नयन। जीव। दिवस।

प्रायोग्रहणाद् यत्र श्रुतिसुखमस्ति, तत्र न भवत्येव। सुकुसुमं। **पिअगमणं।** सचावं। अवजलं। अतुलं। आदरो। अपारो। अजसो। सबहूमाणं। **सुकुसुम।**

प्रियागमन । सचाप । अपजल । अतुल । आदर । अपार । अयशः । सबहुमान । अयुक्तस्यैव । सक्को । मग्गो । शक्र । मार्ग । अनादावित्येव । काला । गन्धो । काल । गन्ध ॥२॥

प्राकृतमञ्जरी

कगचानां जकारस्य तदपानां यवोरपि।
नवानाञ्च हलामुक्तः प्रायो लोपः पदे पदे॥
बहुलं प्राय इत्युक्तं प्रायः कात्यायनेन वै।
यथा चिह्नादौ चो लोपे न प्रतिज्ञा विरुध्यताम्॥
कस्य लोपे भवेत् काकः काओ गस्य नगो णओ।
चस्य काचो भवेत् काओ जस्यापि न भुजो भुओ॥
तस्य भूतं भवेद् भूअं दस्य तद्वत् पदं पअं।
पस्य पापं विदुः पाअं यस्य लोपे स्वयं सअं॥
वस्य सेवा भवेत् सेआ प्रायो लोपनिदर्शनम्।
प्राय इत्यस्य शब्दस्य बहुलार्थत्वविभ्रमात्॥
श्रुतिस्वारस्यवैरस्ये लोपालोपनियामके ।
अंसुजलं सतरंगं पलअजलं वणगओ च बहुलत्वात्।
अकृतप्रायो लोपाः श्रुतिवैरस्यात् किलेष्यन्ते ॥२॥

यमुनायां मस्य च ॥३॥

मनोरमा

यमुनाशब्दे मकारस्य लोपो भवति । जउणा ॥३॥

प्राकृतमञ्जरी

यमुनायां मकारस्य लोपः सोऽयं विधीयते।
पूर्वसूत्राधिकारेण यमुना जउणा मता॥३॥

स्फटिक-निकष-चिकुरेषु कस्य हः[1] ॥४॥

मनोरमा

अनादाविति वर्त्तते । एषु ककारस्य हकारो भवति । लोपापवादः । फलिहो । णिहसो । चिहुरो ॥४१॥

---

१. स्फटिक-निकष-चिकुर-शीकरेषु कस्य हः ।

प्राकृतमञ्जरी

स्फटिके निकषे तद्वच्चिकुरे शीकरेऽपि च।
हत्वं विधीयते कस्य क एव प्रकृतौ यतः॥
स्फटिकं फलिहं प्राहुर्निकषं णिहसं तथा।
चिकुरं चिहुरं भूयः शीकरश्चापि सीहरं॥४॥

शीकरे भः[1] ॥५॥

मनोरमा

शीकरशब्दे ककारस्य भकारो भवति। सीभरो ॥५॥

चन्द्रिकायां मः ॥६॥

मनोरमा

चन्द्रिकाशब्दे ककारस्य मकारो भवति। चन्दिमा ॥६॥

प्राकृतमञ्जरी

चन्द्रिकायां ककारस्य मकारादेश उच्यते।
तेनेह चन्द्रिकाशब्दे रूपं सिध्यति चन्दिमा॥६॥

ऋत्वादिषु तो दः ॥७॥

मनोरमा

ऋतु इत्येवमादिषु शब्देषु तकारस्य दकारो भवति। उदू। रअदं। आअदो। णिव्वुदी। आउदी। संवुदो। सुइदी। आइदी। इदो। संजदो। विउदं। संजादो। संपदि। पड़िवद्दी। ऋतु। आगत। निर्वृति। आवृति। संवृति। सुकृति। आकृति। हत। संयत। विवृत। संयात। संप्रति। प्रतिपत्ति ॥७॥

प्राकृतमञ्जरी

ऋत्वादिषु पदेषु स्यात्तकारस्य दकारता।
भवेद् ऋतुरुदू रत्नं रदणं च हतं हदं॥
ऋतुसंयतरजतागतहतास्सुदुस्सुद्भ्य उत्तरश्च कृतम्।
संव्यादिभ्यश्च कृतं प्रतिपत्तीरत्नमृत्वादिः॥७॥

---

१. सूत्रस्यास्य प्राकृतमञ्जरीटीका नोपलभ्यते।

प्रति-वेतस-पताकासु डः ॥८॥

मनोरमा

एषु शब्देषु तकारस्य डकारो भवति। लोपापवादः । पडिसरो। वेडिसो। पडाआ ॥८॥

प्राकृतमञ्जरी

प्रतिवेतसयोस्तस्य पताकायाञ्च डो भवेत्।
पडिक्छन्दो वेडिसो च पडाआ चेति तत्त्रयम्॥८॥

वसतिभरतयोर्हः॥९॥

मनोरमा

एतयोस्तकारस्य हकारो भवति। वसही। भरहो ॥९॥

प्राकृतमञ्जरी

हत्वं वसतिशब्दे स्याद् भरते तस्य तद् यथा।
वसतिं वसहिं विद्याद् भरतं भरहं तथा ॥९॥

गर्भिते णः॥१०॥

मनोरमा

गर्भितशब्दे तकारस्य णकारो भवति। गब्भिणं ॥१०॥

प्राकृतमञ्जरी

शब्दे गर्भितमित्यस्मिन् णकारादेश इष्यते।
तकारस्य ततो रूपं गर्भितस्य तु गब्भिणं॥१०॥

ऐरावते च[1] ॥११॥

मनोरमा

ऐरावतशब्दे तकारस्य णकारो भवति। एरावणो ॥११॥

प्रदीप्त-कदम्ब-दोहदेषु दो लः॥१२॥

मनोरमा

एषु शब्देषु दकारस्य लकारो भवति। पलित्तं। कलम्बो। दोहलो ॥१२॥

---

१. सूत्रस्यास्य प्राकृतमञ्जरीटीका नोपलभ्यते।

प्राकृतमञ्जरी

तस्य लत्वं प्रदीप्ते स्यात् कदम्बे दोहदेऽपि च।
तत्क्रमेण पलित्तं च कलम्बं दोहलं विदुः॥१२॥

गद्गदे रः॥१३॥

मनोरमा

गद्गदशब्दे दकारस्य रेफादेशो भवति। गग्गरो॥१३॥

प्राकृतमञ्जरी

शब्दे गद्गद इत्यस्मिन् यो दकारोऽस्ति तस्य तु।
विधीयते हि रेफत्वं गद्गदो गग्गरो भवेत्॥१३॥

संख्यायाञ्च॥१४॥

मनोरमा

संख्यावाचिनि शब्दे यो दकारस्तस्य रेफादेशो भवति। एआरह। बारह। तेरह। अयुक्तस्येत्येव। चउद्दह। एकादश। द्वादश। त्रयोदश। चतुर्दश॥१४॥

प्राकृतमञ्जरी

संख्यायां सत्सु शब्देषु स्याद् दकारस्य रेफता।
अष्टादशाद्वारह स्यात् तथा द्वादश बारह॥१४॥

पो वः॥१५॥

मनोरमा

पकारस्यायुक्तस्यानादिवर्तिनो वकारादेशो भवति। सावो। सवहो। उलवो। उवसग्गो। शाप। शपथ। उलप। उपसर्ग। प्रायोग्रहणाद् यत्र लोपो न भवति, तत्रायं विधिः॥१५॥

प्राकृतमञ्जरी

पकारस्य वकारः स्याच्छब्दे शब्दे विधानतः।
कपालं तद् कवालं स्यात् कोपः कोवो यथा तथा॥

ननु चोद्यते किं न्वेतत् प्रायो लोपविधौ पुनः।
पकारः पठितस्तेषां मध्यतः स्थानिनामिति।
उच्यते बहुलत्वेन पस्य वत्वं न दूषणम्।
प्रायोलोपश्च दृश्येत वापी वाई कपिः कई॥१५॥

आपीडे मः॥१६॥

मनोरमा

आपीडशब्दे पकारस्य मकारो भवति। आमेलो॥१६॥

प्राकृतमञ्जरी

आपीडे वर्तमानस्य पूर्वसूत्रापवादतः।
पस्य स्यान्मत्वमापीडमामेलं वाग्विदो विदुः॥१६॥

उत्तरीयानीययोर्ज्जो वा॥१७॥

मनोरमा

उत्तरीयशब्दे अनीयप्रत्ययान्ते च यस्य ज्जो भवति वा। उत्तरीअं, उत्तरिज्जं। रमणीअं, रमणिज्जं। भरणीअं, भरणिज्जं। उत्तरीय। रमणीय। भरणीय॥१७॥

प्राकृतमञ्जरी

उत्तरीयपदे यस्य जकारः स्याद् द्विरुक्तिमान्।
अनीयप्रत्यये चैवं विकल्पेन विधीयते॥
उत्तरीयं विदुः प्राज्ञा उत्तरिज्जं यथा तथा।
करणीयमिति प्राहुः करणिज्जं पुरेव वा॥१७॥

छायायां हः॥१८॥

मनोरमा

छायाशब्दे यकारस्य हकारो भवति। छाहा॥१८॥

कबन्धे बो यः॥१९॥

मनोरमा

कबन्धशब्दे बकारस्य यकारादेशो भवति। कयन्धो॥१९॥

प्राकृतमञ्जरी

कबन्धे वर्त्तमानस्य हलो यत्वमिहेष्यते।
अधिकाराद् बकारस्य कयन्धं तं विदुर्बुधाः॥१९॥

टो डः॥२०॥

मनोरमा

टस्यानादिवर्त्तिनो डकारो भवति। णडो। विडवो। नट। विटप॥२०॥

प्राकृतमञ्जरी

टकारस्य डकारः स्यात् सामान्येन पदे पदे।
खेटः खेडो कटुः कडू कूटः कूडो कटः कडो॥२०॥

सटा-शकट-कैटभेषु ढः॥२१॥

मनोरमा

एतेषु टकारस्य ढकारादेशो भवति। सढा। सअढो। केढवो॥२१॥

प्राकृतमञ्जरी

टस्य ढत्वं सटायां स्याच्छकटे कैटभेऽपि च।
सढा च सअढो चैव तथा कइढवो मतः॥२१॥

स्फटिके लः॥२२॥

मनोरमा

स्फटिकशब्दे टकारस्य लकारो भवति। फलिहो॥२२॥

प्राकृतमञ्जरी

स्फटिके टस्य लस्तस्मात् स्फटिको फलिहो मतः॥२२॥

डस्य च॥२३॥

मनोरमा

डकारस्यायुक्तस्यानादिभूतस्य लकारो भवति। दालिमं। तलाअं। वलही। दाडिम्ब। तडाग। बडभी। प्राय इत्येवम्॥२३॥

प्राकृतमञ्जरी

डकारस्य लकारः स्याद् वेति वक्तव्यमत्र तु।
दाडिमी दालिमी पक्षे दाडिमी तद्वदिष्यताम् ॥२३॥

ठो ढः ॥२४॥

मनोरमा

ठकारस्य अयुक्तस्यानादिभूतस्य ढकारो भवति। मढं। जढरो। कढोरं। मठ। जठर। कठोर ॥२४॥

प्राकृतमञ्जरी

ठकारस्य ढकारः स्यादुत्सर्गेण पदे पदे।
पीठी पीढी मता माठी माढी तद्वन्मठो मढो ॥२४॥

अंकोठे ल्लः ॥२५॥

मनोरमा

अङ्कोठशब्दे ठकारस्य ल्लकारो भवति। अंकोल्लो ॥२५॥

प्राकृतमञ्जरी

इतरेतरसंश्लिष्टलकारद्वितयं भवेत्।
ठस्यां कोठे तढं कोठमंकोल्लं तद्विदो विदुः॥२५॥

फो भः ॥२६॥

मनोरमा

फकारस्यायुक्तस्यानादिभूतस्य भकारो भवति। सिभा। सेभालिआ। सभरी। सभलं। शिफा। शेफालिका। सफरी। सफल ॥२६॥

प्राकृतमञ्जरी

फकारस्य भकारत्वं प्रायेणात्र पदे पदे।
शेफाली तेन सेभाली रेफो रेभो कफः कभो ॥२६॥

यथादिषु हः ॥२६ क॥

प्राकृतमञ्जरी

यथादिषु थकारस्य हत्वमुक्तं यथा जहा।
आदिशब्देन बोद्धव्या अन्यथेतरथादयः॥
यथादिषु ह इत्यस्मिन् थस्येति परिशिष्यते।
न सम्भवति केषाञ्चित् पक्षे सूत्रमिदं कृतम्॥
एष्यति प्रबले सूत्रे पुनरुक्तिप्रसङ्गतः।
नैतत् साधु किमर्थोऽयं सूत्रभेदस्तदेति चेत्॥
हत्वस्य नियमार्थोऽयं बाहुल्यार्थं परत्र च॥२६ क॥

खघथधभां हः ॥२७॥

मनोरमा

खादीनां पञ्चानामयुक्तानामनादौ वर्तमानानां हकारो भवति। खस्य तावत्– मुहं। मेहला। घस्य– मेहो जहणा। थस्य– गाहा। सवहो। धस्य– राहा। बहिरो। भस्य– सहा। रासहो।

मुख। मेखला। मेघ। जघन। गाथा। शपथ। राधा। बधिर। सभा। राषभ। प्राय इत्येव।

पखलो। पलंघणो। अधीरो। अधणो। उवलद्धभावो। प्रखर। प्रलङ्घन। अधीर। अधन। उपब्धलभाव॥२७॥

प्राकृतमञ्जरी

खघथानां धकारस्य भकारस्यापि हो भवेत्।
मेखला विघसो नाथो विधिः शोभनमीदृशम्॥
मेहला विहसो णाहो विही सोहणमुच्यते॥
पखलो पलअघणो पाथेअं धणसभा क्रमेण पुनः।
पञ्चस्वेषु न हत्वं प्रायोवृत्तिप्रसङ्गेन॥२७॥

प्रथम-शिथिल-निषधेषु ढः ॥२८॥

मनोरमा

एतेषु थधयोर्ढकारो भवति। पढमो। सिढिलो। णिमढो॥२८॥

प्राकृतमञ्जरी

प्रथमे शिथिले चैव निषधेऽपि च ढो भवेत्।
थधयोः पढमं तेन सिढिलो णिसढो क्रमात् ॥२८॥

कैटभे भो वः ॥२९॥

मनोरमा

कैटभशब्दे भकारस्य वकारो भवति । केढवो ॥२९॥

प्राकृतमञ्जरी

कैटभे तु भकारस्य वकारादेश इष्यते।
ततः कैटभ इत्येष वाच्यः कइढवो बुधैः ॥२९॥

हरिद्रादीनां रो लः ॥३०॥

मनोरमा

हरिद्रा इत्येवमादीनां रेफस्य लकारो भवति । हलद्दा । चलणो । मुहलो । जहिट्ठिलो । सोमालो । कलुणं । अंगुली । इंगालो । चिलादी । फलिहा । फलिहो । हरिद्रा । चरण । मुखर । युधिष्ठिर । सुकुमार । करुण । अङ्गुरी । अङ्गार । किरात । परिखा । परिघ । इत्येवमादायः ॥३०॥

प्राकृतमञ्जरी

हरिद्रादिपदानां यो रेफस्तस्य लकारता।
हरिद्रा तु हलद्दा स्यात् करुणा कलुणा मता॥
हरिद्रा-करुणाङ्गार-सुकुमार-युधिष्ठिराः ।
कारणं चरणं चैव परिघः परिखा तथा ॥३०॥

आदेर्यो जः ॥३१॥

मनोरमा

अनादेरिति निवृत्तम् । आदिभूतस्य यकारस्य जकारो भवति । जट्ठो । जसो । जक्खो । यष्टि । यशः । यक्ष ॥३१॥

प्राकृतमञ्जरी

अनादाविति मुक्तं तदादेरिति पदे-पदे।
अधिकारोऽयमा "नो णः सर्वत्र" इत्यमुतः पुरा॥
पदस्यादेर्यकारस्य जकारत्वं विधीयते।
यज्ञो जणो भवेद् भूयो यात्रा जत्ता यमो जमो॥३१॥

यष्ट्यां लः॥३२॥

मनोरमा

यष्टिशब्दे यकारस्य लकारो भवति। लट्ठी॥३२॥

प्राकृतमञ्जरी

यष्टिशब्दे भवेदादेर्यकारस्य लकारता।
यष्टिस्तेन भवेल्लट्ठी पूर्वसूत्रापवादतः॥३२॥

किराते चः॥३३॥

मनोरमा

किरातशब्द आदेर्वर्णस्य चकारो भवति। चिलादो॥३३॥

प्राकृतमञ्जरी

आदेः किरातशब्दस्य ककारस्य चकारता।
विधीयते किरातश्च चिलाओ कथ्यते बुधैः॥३३॥

कुब्जे खः॥३४॥

मनोरमा

कुब्जशब्दे आदेर्वर्णस्य खकारो भवति। खुज्जो॥३४॥

प्राकृतमञ्जरी

विधीयते कुब्जशब्दे ककारस्य खकारता।
अनेन विधिना सन्तः कुब्जं खुब्जं प्रचक्षते॥३४॥

दोला-दण्ड-दशनेषु डः॥३५॥

मनोरमा

एषु आदेर्वर्णस्य डकारो भवति। डोला। डण्डो। डसणो॥३५॥

प्राकृतमञ्जरी

दोलायां दण्डशब्दे च दशने च डकारता।
आदेः स्यात् क्रमशो डोला डण्डो च डसणो मतः॥३५॥

परुष-परिघ-परिखासु फः॥३६॥

मनोरमा

एतेषु आदेर्वर्णस्य फकारो भवति। फरुसो। फलिहो। फलिहा॥३६॥

प्राकृतमञ्जरी

परुषे परिघे चैव परिखायां च फो भवेत्।
फरुसो फलिहो तद्वत् फलिहा च त्रयः क्रमात्॥३७॥

पनसेऽपि॥३७॥

मनोरमा

पनसेऽपि आदेः पकारस्य फकारो भवति। फणसो॥३७॥

बिसिन्यां भः॥३८॥

मनोरमा

बिसिनीशब्दे आदेर्वर्णस्य भकारो भवति। भिसिनी। स्त्रीलिङ्गनिर्देशादिह न भवति। विसं॥३८॥

प्राकृतमञ्जरी

अमुष्मिन् बिसिनीशब्दे बकारस्यादिवर्त्तिनः।
विधीयते भकारत्वं बिसिनी भिसिनी मता॥३८॥

लोहले णः[1]॥३९॥

मनोरमा

लोहलशब्दे आदेर्लकारस्य णकारो भवति। णोहलो॥३९॥

मन्मथे वः॥४०॥

मनोरमा

मन्मथशब्दे मकारस्य वकारो भवति। वन्महो॥४०॥

---

१. सूत्रस्यास्य प्राकृतमञ्जरीटीका नोपलभ्यते।

प्राकृतमञ्जरी

शब्दे मन्मथ इत्यस्मिन् वकारादेश इष्यते।
मकारस्यादिभूतस्य मन्मथो वन्महो मतः॥४०॥

षट्शावकसप्तपर्णानां छः॥४१॥

मनोरमा

एषामादेर्वर्णस्य छकारो भवति। छट्ठी। छम्मुहो। छावओ। छत्तिवणो। षष्ठी। षण्मुख। शावक। सप्तपर्ण॥४१॥

प्राकृतमञ्जरी

षट्शब्दे शतशब्दे च सप्तपर्णपदेऽपि च।
स्याच्छत्वं छप्पओ छाओ छत्तिवणो मतः क्रमात्॥४१॥

नो णः सर्वत्र॥४२॥

मनोरमा

आदेरिति निवृत्तम्। सर्वत्र नकारस्य णकारो भवति। णई। कणअं। वअणं। माणुसो। नदी। कनक। वचन। मानुष॥४२॥

प्राकृतमञ्जरी

निवृत्तादिरयुक्तस्येत्यधिकारस्ततः परम्।
सर्वत्र नस्य णत्वं स्यात् पानं पाणं नदी णई॥४२॥

शषोः सः॥४३॥

मनोरमा

सर्वत्र शकारषकारयोः सकारो भवति। शस्य तावत्– सद्दो। णिसा। अंकुसो। षस्य– सण्डो। वसहो। कसाअं। शब्द। निशा। अङ्कुश। षण्ड। वृषभ। कषाय॥४३॥

प्राकृतमञ्जरी

शषयोर्विहितं सत्वं सर्वत्रापि शिवं सिवं।
पलाशश्च पलासो स्यात् षष्ठी सट्ठी मूषा मूसा॥४३॥

दशादिषु हः ॥४४॥

मनोरमा

दश इत्येवमादिषु शकारस्य हकारो भवति। दह। एआरह। बारह। तेरह। चउद्दह। पणरह। सोलह। सत्तरह। अट्ठारह। दश। एकादश। द्वादश। त्रयोदश। चतुर्दश। पञ्चदश। षोडश। सप्तदश। अष्टादश॥४४॥

प्राकृतमञ्जरी

दशादिषु स्मृतं हत्वं शस्येत्यर्थाद् विशिष्यते।
शषयोः प्रकृतित्वेन दशशब्दो भवेद् दह॥
अयं षड्भ्यो लुगित्यत्र कृतलोपविधिर्भवेत्।
अत्राष्टादशपर्यन्ता दशाद्याः स्युर्दहादयः॥४४॥

संज्ञायां वा ॥४५॥

मनोरमा

संज्ञायां गम्यमानायां वा दशशब्दे शस्य हत्वं भवति। दहमुहो, दसमुहो। दहबलो, दसबलो। दहरहो, दसरहो। दशमुख। दशबल। दशरथ॥४५॥

प्राकृतमञ्जरी

संज्ञायां गम्यमानायां हत्वं वा स्याद् दशादिषु।
दशास्यस्तु दहस्सो वा दसस्सो वा भवेदिह॥४५॥

दिवसे सस्य ॥४६॥

मनोरमा

दिवसशब्दे सकारस्य हकारः स्यात्। दिअहो॥४६॥

प्राकृतमञ्जरी

हत्वं दिवसशब्दे वा सकारस्य विधीयते।
दिवसो दिअहो वाच्यः पक्षे स्याद् दिअसो पुनः॥४६॥

स्नुषायां ण्हः ॥४७॥

मनोरमा

स्नुषाशब्दे षकारस्य ण्हाकारो भवति। सोण्हा॥४७॥

प्राकृतमञ्जरी

स्नुषाशब्दे त्वयुक्तस्य षकारस्य विकल्पतः।
ण्हत्वमुक्तं स्नुषा सोण्हा भवेत् पक्षे ण्हुसा मता॥
युक्तादेशो हि युक्तस्येत्याहुः केचिदसाधु तत्।
ह्न-न्न-ष्णेत्यादिसम्प्राप्ते ण्हत्वे युक्तस्य को विधिः॥
अयुक्तस्येत्यगत्यैतत् कथमन्ते स्खलेत् कविः।
उत्तीर्य दुस्तरं सिन्धुं को नु पारे निमज्जति॥४७॥

॥ इति वररुचिकृते प्राकृतप्रकाशे अयुक्तवर्णविधिर्नाम द्वितीयः परिच्छेदः॥

परिघः, स्फटिकः, परिखा, स्नुषा, वृषभशावकः, सप्तवर्णशाखा एतस्मिन् हेमकूटशिखरे, चतुर्दशदिवसकालः, सम्प्रति वसन्तऋतुरागतः, वायुना कम्पमाना वेतसलता पृथिव्याः (पुहवीए) पताका इव प्रतिभाति (भाइ), पनसवृक्षस्य विटपे कपिकुलं निशायापनं करोति (करोइ)।

अमिअं खु दे वअणं (विक्र)। सहि! हेमकूडसिहरे लदाविडपे लग्गं वेज-अन्तिअं मोआवेहित्ति मए भणिदा (विक्र)। ईरिसं जीअलो अस्स परिहवं अणु भविदुं– (उत्तर)।

॥ अथ तृतीयः परिच्छेदः ॥

संयुक्तवर्णप्रकरणम्

क्क = त्क, प्क, क्य, क्र, र्क, क्ल, ल्क, क्व ।

क्ख = त्ख, प्ख, ख्य, क्ष, क्ष्य, ष्क, स्क, ष्ख, स्ख, ख ।

ग्ग = ङ्ग, द्ग, ग्न, ग्य, ग्र, र्ग, ल्ग, ग्म ।

ग्घ = ड्घ, द्घ, घ्न, घ्र, र्घ , र्घ्य ।

ङ्ख = ङ्क्ष, ङ्ख्य ।

च्च = च्य, त्य, ट्र, र्च ।

च्छ = ख्य, र्छ, छ्र, क्ष, त्क्ष, त्स, त्स्य, प्स, श्च ।

ज्ज = ञ, ज्ञ, र्ज, ज्र, ज्व, द्य, र्य, य्य ।

ज्झ = ध्य, ह्य ।

ञ्ञ = ज्ञ, न्य, ण्य ।

ट्ठ = ष्ट, ष्ठ, स्त, स्थ ।

ड्ड = र्त, र्द ।

ड्ढ = ढ्य, ड्ढ, र्ध ।

ण्ट = न्त ।

ण्ड = न्द ।

ण्ण = ग्न, ज्ञ, म्न, न्न, ण्य, न्य, र्ण, ण्व, न्व ।

ण्ह = क्ष्ण, श्न, ष्ण, स्न, ह्ण, ह्न ।

त्त = क्त, प्त, त्न, त्म, त्र, त्व, र्त ।

त्थ = क्थ, प्थ, त्र, र्थ, स्त, स्थ ।

द्द = ग्द, ब्द, द्म, द्र, र्द, द्व ।

द्ध = ग्ध, ब्ध, र्ध, ध्व ।

न्ध = ह्न (चिन्धं) ।

प्प = क्प, त्प, प्य, प्र, प्ल, ल्प, क्म, त्म ।

प्फ = क्फ, त्फ, ष्फ, ःफ, स्फ, ष्प, स्प्र ।

ब्ब = ग्ब, ड्ब, द्ब, बं, ब्र, ब्य ।

ब्भ = ग्भ, ड्भ, द्भ, भ्य, र्भ, भ्र, ह्व ।

म्म = ङ्म, ण्म, न्म, म्य, र्म, ल्म ।

म्ह = ष्म, क्ष्म, स्म, ह्म ।

रिस, रिह = र्श, र्ष, र्ह ।

ल्ल = ल्य, र्ल, ल्व, र्य ।

ल्ह = ह्ल ।

व्व = द्व, व्य, व्र, र्व ।

स = र्श, श्र, श्व, स्व ।

स्स = श्म, श्य, ष्य, ष्म, स्य, श्र, श, श्व, र्ष, ष्य, स्र, स्व ।

उपरि लोपः क-ग-ड-त-द-प-ष-साम् ॥१॥

मनोरमा

कादीनामध्यनामुपरि स्थितानां लोपो भवति । कस्य तावत्– भत्तं, सित्थअं । गस्य– मुद्धो, सिणिद्धो । डस्य– खग्गो, सज्जो । तस्य– उप्पलं, उप्पाओ । दस्य– मुग्गो, मुग्गरो । पस्य– सुत्तो, पज्जत्तो । षस्य– गोट्ठी, णिट्ठुरो । सस्य– खलिअं, णेहो ।

भक्त । सिक्थक । मुग्ध । स्निग्ध । खड्ग । षड्ज । उत्पल । उत्पात । मुद्ग । मुद्गर । सुप्त । पर्य्याप्त । गोष्ठी । निष्ठुर । स्खलित । स्नेह ॥१॥

प्राकृतमञ्जरी

कगडानां तकारस्य दपषाणां च सस्य च ।
पदेषूपरिलोपः स्यादध्यानामन्ययोगिनाम् ॥
उपरीत्यत्र संयुक्तेषूपरिस्थो हलुच्यते ।
तस्येत्युपरिलोपोऽयं सद्भिः समभिगम्यते ॥
उपरीत्यव्ययत्वेन षष्ठ्यन्तं स्यादिदं पदम् ।
तदिहोपरि लोपोऽयं लक्ष्यो लक्ष्येषु तद्यथा ॥
युक्तं जुत्तं कलोपोऽयं मुग्धं मुद्धमिदं गलुक् ।
षड्गः सग्गो डलोपोऽयं तलुगुत्पलमुप्पलं ॥

मुद्गो मुग्गो दलोपोऽयं सुप्तं सुत्तमयं पलुक्।
पृष्ठं पिट्ठं षलोपोऽयं स्तम्बं तम्बमयं सलुक्॥१॥

अधो मनयाम्॥२॥

मनोरमा

मकार-नकार-यकाराणां युक्तस्याधःस्थितानां लोपो भवति। मस्य तावत्– तिग्गं, रस्सी, जुग्गं, वग्गी। नस्य– णग्गो। यस्य– सोम्मो, जोग्गो। तिग्म। रश्मि। युग्म। वाग्मिन्। नग्न। सौम्य। योग्य॥ २॥

प्राकृतमञ्जरी

अधःस्थितो हलुक्तोऽस्मिन्नधःशब्दे न पूर्ववत्।
मनयानामधःस्थानां संयुक्तेषु लुगुच्यते॥
तिग्मं तिग्गं मलोपोऽयं लग्नं लग्गमयं नलुक्।
आज्यमज्जं यलोपोऽयमधोलोप इतीदृशः॥
ननु चोपरि लोपेऽस्मिन् लुप्यते हलधःस्थितः।
उपरिस्थस्त्वधोलोपे कुतस्तदिति चोद्यते॥
उपपन्नमिवापाते हेत्वाभासवशादिदम्।
निरूपिते तु निस्सारं शास्त्रं शौद्धोदनेरिव॥
उपरीत्यपचारेण युक्तेषूक्तः पुरोगमः।
तत् प्राथम्यं तयोर्गम्यं प्रत्युताध इतीहतु।
पौरोगम्यं च शब्दानां पूर्वमुच्चारणं ननु।
अनुगत्वं च यत्तेषां पूर्वमुच्चारणं विना॥
पूर्वमुच्चार्यमाणस्य पश्चादपि लुकाविमौ।
तस्मादुपरिलोपोऽयमधोलोपश्च युज्यते॥
अनयोर्युगपत्प्राप्तौ को लुक् प्रभवतीति चेत्।
अतो लोपस्तथादृष्ट्या युग्मं जुग्गं तदा भवेत्॥२॥

सर्वत्र लवराम् ॥३॥

मनोरमा

लकार-वकार-रेफाणां युक्तस्य उपर्यधःस्थितानां लोपो भवति । लस्य तावत्– उक्का, वक्कलं, विक्कवो । वस्य– लोद्धओ, पिक्कं । रस्य– अक्को, सक्को, उल्का । वल्कल । विल्कव । लुब्धक । पक्व । अर्क । शक्र ॥३॥

प्राकृतमञ्जरी

सर्वत्र लवराणां स्यादेष युक्तेषु लुग्विधिः ।
एषामुपरि चाधश्च सतां शब्देषु तद्यथा ॥
प्लवः कल्पः पवो कप्पो पक्कं . पिक्कं स्वयं सअं ।
भ्रमस्तीर्थं भमो तित्थं लवराणां लुकः क्रमात् ॥
अन्योन्योपगमे तेषां लुप्येतोत्तर उत्तरः ।
पल्वलं पल्ललं व्रीहिर्मतो वीही यथा भवेत् ॥
अतः सर्वत्र लोपोऽयं लवयोः किन्तु भिद्यते ।
अधोलोपो यथा कल्लं कव्वं स्यात् कल्यकाव्ययोः ॥
अत एव ह्यधोलोपः प्राबल्यं महदश्नुते ।
अधःलोपविधावेवं प्रमथ्यापि विजृम्भते ॥
सर्वत्रेति च न ग्लानिरधोलोपविधेर्बलात् ।
व्याप्तिप्रदर्शनार्थाय सर्वशब्दोऽयमत्र हि ॥
तथा च दृश्यते लोके सर्वशुक्ला सरस्वती ।
इत्युक्ते सति तारादि कार्ष्ण्यं तस्या न बाधते ॥३॥

द्रे रो वा ॥४॥

मनोरमा

द्रशब्दे रेफस्य वा लोपो भवति । दोहो, द्रोहः । चंदो, चंद्रः । रुद्दो, रुद्रः । द्रोह । चन्द्र । रुद्र ॥४॥

प्राकृतमञ्जरी

द्रशब्दस्य तु रेफस्य विभाषालोप इष्यते ।
चन्द्रस्तेन भवेच्चन्दो पक्षे चन्द्रो निगद्यते ॥४॥

सर्वज्ञतुल्येषु ञः ॥५॥

मनोरमा

सर्वज्ञतुल्येषु शब्देषु ञकारस्य लोपो भवति। सव्वज्जो, सर्व्वज्ञः। जानातेर्यत्र एवं रूपस्तत्र ञलोपः॥५॥

प्राकृतमञ्जरी

सर्वज्ञसदृशेष्वस्य ञकारस्य लुगुच्यते।
सर्व्वज्ञस्तेन सव्वज्जो सादृश्यं ज्ञत्वमन्ततः॥५॥

श्मश्रुश्मशानयोरादेः॥६॥

मनोरमा

श्मश्रुश्मशानयोः शब्दयोरादेर्वर्णस्य लोपो भवति। मंसू। मसाणं। श्मश्रु। श्मशान॥६॥

प्राकृतमञ्जरी

श्मश्रुश्मशानयोरादेर्लोपो वर्णस्य कथ्यते।
श्मश्रुर्मंसू श्मशानं च मसाणं वाग्विदो विदुः॥६॥

मध्याह्ने हस्य॥७॥

मनोरमा

मध्याह्नशब्दे हकारस्य लोपो भवति। मज्झणो॥७॥

प्राकृतमञ्जरी

मध्याह्न इति शब्दे यो हकार इह दृश्यते।
लोपः स्यात्तस्य मध्याह्नो मज्झणो कथ्यते बुधैः॥७॥

ह्न-ह्ल-ह्मां नलमां स्थितिरूर्ध्वम्॥८॥

मनोरमा

ह्न ह्ल ह्म इत्येतेष्वधःस्थितानां नकार-लकार-मकाराणां स्थितिरूर्ध्वमुपरिष्टाद्भवति। ह्नस्य–पुव्वण्हो, अवरण्हो। ह्लस्य– कल्हारं, अल्हादो। ह्मस्य– बम्हणो। पूर्वाह्न। अपराह्न। कह्लार। आह्लाद। ब्राह्मण॥८॥

प्राकृतमञ्जरी

ह्रस्य ह्लस्यापि च ह्रस्य सम्बद्धानामिह स्थितिः।
नलमानां भवेदूर्ध्वमुपरीत्यवगम्यताम्।
वह्निर्वण्हीति कह्लारं कल्हारमभिधीयते ॥८॥

युक्तस्य ॥९॥

मनोरमा

अधिकारोऽयम्। आ परिच्छेदसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्यामो युक्तस्येत्येवं वेदितव्यम्। वक्ष्यति– अस्थिनि अट्ठी। युक्तग्रहणं हलोऽन्त्यस्य मा भूत् ॥९॥

प्राकृतमञ्जरी

युक्तस्येत्यधिकारोऽयमापरिच्छेदपूरणात् ।
यदितोऽनुक्रमाद् वक्ष्यत्यूर्ध्वं युक्तस्य तद् भवेत् ॥९॥

ष्टस्य ठः ॥१०॥

मनोरमा

ष्ट इत्यस्य ठकारो भवति। लट्ठी, दिट्ठी। यष्टि, दृष्टि ॥१०॥

प्राकृतमञ्जरी

षयुक्तस्य टकारस्य ठकारः स्यात् पदे पदे।
यष्टिर्निगद्यते लट्ठी विष्टरं विट्ठरं विदुः ॥१०॥

अस्थिनि ॥११॥

मनोरमा

अस्थिशब्दे युक्तस्य ठकारो भवति। अट्ठी ॥११॥

प्राकृतमञ्जरी

अस्थीति यः स्थितः शब्दस्तस्य युक्तस्य ठो भवेत्।
अतिदेशेन तेनास्थि सद्भिरट्ठी निगद्यते ॥११॥

स्तस्य थः ॥१२॥

मनोरमा

स्तशब्दस्य थकारो भवति । उपरिलोपापवादः । हत्थो । समत्थो । थुई । थवओ । कोत्थुवो । हस्त । समस्त । स्तुति । स्तवक । कौस्तुभ ॥१२॥

प्राकृतमञ्जरी

सयुक्तस्य तकारस्य थत्वमुक्तं पदे पदे।
हस्ती हत्थी मतः स्वस्ति सत्थि स्याद् वस्तु वत्थु च ॥१२॥

न स्तम्बे ॥१३॥

मनोरमा

स्तम्बशब्दे स्तकारस्य थकारो न भवति । तम्बो ॥१३॥

प्राकृतमञ्जरी

स्तम्बशब्दे स्त इत्यस्य थादेशः प्रतिषिध्यते।
तत्र तूपरिलोपेन स्तम्बं तम्बं विदुर्बुधाः ॥१३॥

स्तम्भे खः ॥१४॥

मनोरमा

स्तम्भशब्दे स्तकारस्य खकारो भवति । खम्भो ॥१४॥

प्राकृतमञ्जरी

स्तम्भशब्दे स्त इत्यस्य खकारादेश इष्यते।
थकारस्यापवादेन स्तम्भं खम्भं प्रचक्षते ॥१४॥

स्थाणावहरे ॥१५॥

मनोरमा

स्थाणुशब्दे युक्तस्य खकारो भवति । अहरे । हराभिधेये न भवति । खाणू । अहर इति किम् ? थाणू । हर ॥१५॥

प्राकृतमञ्जरी

स्थाणुशब्दे तु युक्तस्य खः स्याद् वाच्ये त्वनीश्वरे।
स्थाणुः खाणू हरे वाच्ये स्थाणुं थाणुं प्रचक्षते॥१५॥

स्फोटके च॥१६॥

मनोरमा

स्फोटके च युक्तस्य खकारो भवति। खोडओ॥१६॥

प्राकृतमञ्जरी

स्फोटके चापि युक्तस्य खकारत्वं विधीयते।
अतः स्फोटक इत्येष विदग्धैः खोडओ मतः॥१६॥

र्यशय्याभिमन्युषु जः॥१७॥

मनोरमा

र्य इत्यस्य शय्याभिमन्युशब्दयोश्च युक्तस्य जकारो भवति। कज्जं। सेज्जा। अहिमज्जू। कार्य्यं। शय्या। अभिमन्यु॥१७॥

प्राकृतमञ्जरी

रेफयुक्तयकारस्य जकारादेश इष्यते।
शय्याशब्देऽभिमन्यौ च युक्तयोरथ तद्यथा॥
यस्य रेफयुजस्तावत् कार्य्यं कज्जं विदुर्बुधाः।
शय्या सेज्जाऽभिन्युः स्यादहिमज्जू विधेरतः॥१७॥

तूर्य्य-धैर्य्य-सौन्दर्याश्चर्य्य-पर्य्यन्तेषु रः॥१८॥

मनोरमा

एतेषु शब्देषु र्यस्य रेफो भवति। तूरं। धीरं। सुन्देरं। अच्छेरं। पेरन्तं॥१८॥

प्राकृतमञ्जरी

रेफयुक्तस्य यस्येह तूर्य्ये रेफो विधीयते।
धैर्य्ये सौन्दर्य आश्चर्य्ये पर्य्यन्तेऽपि च तद्यथा॥
तूरं धीरं च सुन्देरं तद्वदच्छेरमेव च।
पेरन्तो वेति विज्ञेयो स्तूर्य्याद्याः पञ्च सूरिभिः॥१८॥

सूर्य्ये वा ॥१९॥

मनोरमा

सूर्य्यशब्दे र्यकारस्य रकारो वा भवति। सूरो। सुज्जो ॥१९॥

प्राकृतमञ्जरी

सूर्य्यशब्दे विकल्पेन र्यस्य रेफत्वमुच्यते।
सूर्य्यस्तेन भवेत् सूरो पक्षे सुज्जो निगद्यते ॥१९॥

चौर्य्यसमेषु रिअं ॥२०॥

मनोरमा

चौर्य्यसमेषु शब्देषु र्यस्य रिअं भवति। चोरिअं। सोरिअं। वीरिअं। चौर्य्य। शौर्य्य। वीर्य्य। समग्रहणाद् आकृतिगणोऽयम् ॥२०॥

प्राकृतमञ्जरी

रिअमित्ययमादेशः स्याच्चौर्य्यसदृशेष्विह।
चौर्यं चोरिअमौकाराद्युत्तरः सदृशः स्मृतः ॥२०॥

पर्य्यस्त-पर्य्याण-सौकुमार्य्येषु लः ॥२१॥

मनोरमा

एषु र्यस्य लकारो भवति। पल्लत्थं। पल्लाणं। सोअमल्लं ॥२१॥

प्राकृतमञ्जरी

लत्वं पर्य्यस्त-पर्य्याण-सौकुमार्य्येषु कथ्यते।
पल्लत्थमपि पल्लाणं सोअमल्लं त्रयः क्रमात् ॥२१॥

र्तस्य टः ॥२२॥

मनोरमा

र्त इत्यस्य स्थाने टकारो भवति। केवट्टओ। णट्टओ। णट्टई। कैवर्त्तक। नर्त्तक। नर्त्तकी ॥२२॥

प्राकृतमञ्जरी

विहिता रेफयुक्तस्य तकारस्य टकारता।
कैवर्त्तस्तेन केवट्टो नर्त्तकश्चापि णट्टओ ॥२२॥

पत्तने ॥२३॥

मनोरमा

पत्तनशब्दे युक्तस्य टकारो भवति। पट्टणं ॥३२॥

प्राकृतमञ्जरी

पत्तने चापि युक्तस्य वकारस्य टकारता।
तत उक्तं पत्तनं हि पट्टणं वाग्विदो विदुः॥२३॥

न धूर्त्तादिषु ॥२४॥

मनोरमा

धूर्त्त इत्येवमादिषु र्तस्य टकारो न भवति। धुत्तो। कित्तो। वत्तमाणं। वत्ता। आवत्तो। संवत्तओ। णिवत्तओ। वत्तिआ। अत्तो। कत्तरी। मुत्ती।

धूर्त्त। कीर्त्ति। वर्त्तमान। । वार्त्ता। आवर्त्त। संवर्त्तक। वर्त्तिका। आर्त्त। कर्त्तरी। मूर्त्ति ॥२४॥

प्राकृतमञ्जरी

धूर्त्तादिषु र्त्त इत्यस्य टादेशः प्रतिषिध्यते।
धूर्त्तो निगद्यते धुत्तो कर्त्तरी चापि कत्तरी॥
धूर्त्तः कीर्त्तिश्च संवर्त्तो मूर्त्तिवार्त्तिकपूर्त्तयः।
वार्त्तानर्त्तौ वर्त्तकश्च कर्त्तरीवर्त्तिकार्त्तयः॥
कर्त्तनं कार्त्तिकेयश्च हर्त्ता कर्त्ता च कीर्त्तनम्।
मार्तण्डो वर्त्तनं चेति धूर्त्तादिः स्यादयं गणः॥२४॥

गर्त्ते डः ॥२५॥

मनोरमा

गर्त्तशब्दे र्तस्य डकारो भवति। गड्डो ॥२५॥

प्राकृतमञ्जरी

गर्त्तशब्दे र्त्त इत्यस्य पूर्वसूत्रापवादतः।
विधीयते डकारत्वं गर्त्तं गडडं विदुर्बुधाः ॥२५॥

गर्दभ-संमर्द-वितर्दि-विच्छर्दिषु र्दस्य ॥२६॥

मनोरमा

एतेषु र्दस्य डकारो भवति। गडडहो। संमडडो। विअडडो। विच्छडडी ॥२६॥

प्राकृतमञ्जरी

गर्दभे च संमर्दे च वितर्दौ च डकारता।
विच्छर्देऽपि सरेफस्य दकारस्य विधीयते॥
गडडहो चैव संमडडो विअडडो च तथा पुनः।
विच्छडडी चेति विज्ञेयाश्चत्वारो गर्दभादयः ॥२६॥

त्यथ्यद्यानां चछजाः ॥२७॥

मनोरमा

त्य थ्य द्य इत्येतेषां च छ ज इत्येते यथासंख्यं भवन्ति। त्यस्य – णिच्चं, पच्चच्छं। थ्यस्य – रच्छा, मिच्छा, पच्छं। द्यस्य – विज्जा, वेज्जं। नित्य। प्रत्यक्ष। रथ्या। मिथ्या। पथ्य। विद्या। वेद्य ॥२७॥

प्राकृतमञ्जरी

त्यथ्यद्यानां तु युक्तानां चछजा विहिताः क्रमात्।
सत्यं सच्चं मतं रथ्या रच्छा विद्युच्च विज्जुला ॥२७॥

ध्यह्योर्झः ॥२८॥

मनोरमा

ध्य ह्य इत्येतयोः स्थाने झकारो भवति। ध्यकारस्य – मज्झं, अज्झाओ। ह्यस्य – वज्झओ, गुज्झओ। मध्य। अध्याय। वाह्यक। गुह्यक ॥२८॥

प्राकृतमञ्जरी

ध्यह्ययोरुच्यते झत्वं सामान्येन पदे पदे।
मध्यमो मज्झमो तद्वत् सह्यं सज्झं निगद्यते ॥२८॥

ष्कस्कक्षां खः ॥२९॥

मनोरमा

ष्कस्कक्षाणां खकारो भवति। ष्कस्य – मुक्खं, पोक्खरो। स्कस्य – खन्धो। क्षस्य – खदो, जक्खो। मुष्क। पुष्कर। स्कन्द। स्कन्ध। क्षत। यक्ष ॥२९॥

प्राकृतमञ्जरी

ष्कस्कक्षाणां हि युक्तानां खकारादेश उच्यते।
भास्करो भक्खरो निष्कं णिक्खं रक्षति रक्खइ ॥२९॥

अक्ष्यादिषु छः ॥३०॥

मनोरमा

अक्ष्यादिषु क्षकारस्य छकारो भवति। अच्छी। लच्छी। छुणो। छीरं। छुद्धो। उच्छित्तो। सरिच्छं। उच्छू। उच्छा। छारं। रिच्छो। मच्छिआ। छुअं। छुरं। छेत्तं। वच्छो। दच्छो। कुच्छी।

अक्षि। लक्ष्मी। क्षुण। क्षीर। क्षुब्ध। उत्क्षिप्त। सदृक्ष। इक्ष। उक्षन्। क्षार। ऋक्ष। मक्षिका। क्षुत। क्षुर। क्षेत्र। वक्षस्। दक्ष। कुक्षि। इत्येवमादयः ॥३०॥

प्राकृतमञ्जरी

अक्ष्यादिषु पदेषु स्यात् क्षस्य छत्वं यथा किल।
अक्षि वक्तव्यमच्छीति क्षेत्रं छेत्रं क्षमा छमा ॥
अक्षि-क्षेत्राक्षर-क्षीर-क्षिप्रेक्षु-क्षुत्-क्षमा-क्षुराः ।
ऋक्ष-क्षार-सदृक्षाश्च लक्ष्मीः कुक्षिश्च मक्षिका ॥
पक्षः क्षुणो मृगाक्षी च स्यादक्ष्यादिरयं गणः।
क्षमाशब्दस्तितिक्षायां सन्नक्ष्यादिषु वर्त्तते ॥३०॥

क्ष्मा-वृक्ष-क्षणेषु वा ॥३१॥

मनोरमा

एतेषु क्षकारस्य छकारो भवति वा। छमा। खमा। वच्छो। रुक्खो। छणं। खणं। वृक्षशब्दे ऋकारस्य अकारे कृते (वुच्छो – मृच्छकटिके), क्षणशब्दे च उत्सवाभिधायिनि छत्वमिष्यते ॥३१॥

प्राकृतमञ्जरी

क्षमा-वृक्ष-क्षण-शब्देषु विभाषा छत्वमुच्यते।
क्ष्मा छमा वा खमा वा स्याद् वच्छो रुक्खो छणो खणो॥
सह रुत्वेन न छत्वं वृक्षे भूयः क्षणेऽपि च।
वाच्ये कालांशके चैव विभाषा तु व्यवस्थया॥३१॥

ष्म-पक्ष्म-विस्मयेषु म्हः॥३२॥

मनोरमा

ष्म इत्येतस्य पक्ष्म-विस्मयशब्दयोश्च युक्तस्य 'म्ह'कारो भवति। ष्मस्य – गिम्हो, उम्हा, पम्हो, विम्हओ। ग्रीष्म। उष्मा। पक्ष्मन्। विस्मय॥३२॥

प्राकृतमञ्जरी

ष्म इत्यस्य च युक्तस्य पक्ष्मविस्मययोरपि।
संयुक्तो हो भवेत् तेन गिम्हो पम्हो च विम्हओ॥३२॥

ह्न-स्न-ष्ण-क्ष्ण-श्नां ण्हः॥३३॥

मनोरमा

ह्नादीनां ण्ह इत्ययमादेशो भवति। ह्नस्य – वण्ही, जण्हू। स्नस्य – ण्हाणं, पण्हुदं। ष्णस्य – विण्हू, कण्हो। क्ष्णस्य – सण्हं, तिण्हं। श्नस्य – पण्हो, सिण्हो, वह्नि, जह्नु। स्नान। प्रस्नु। विष्णु। कृष्ण। श्लक्ष्ण। तीक्ष्ण। प्रश्न। शिश्न॥३३॥

प्राकृतमञ्जरी

ह्नस्नष्णानां क्ष्ण इत्यस्य श्न इत्यस्य विधीयते।
सणकारहकारत्वं पञ्चानामिह तद् यथा॥
निह्नवः स्नपनं विष्णुरभीक्ष्णं शिश्न इत्यपि।
णिण्हवो ण्हवणं वेण्हू अहिण्हं सिण्हमेव च॥३३॥

चिह्ने न्धः॥३४॥

मनोरमा

चिह्नशब्दे युक्तस्य न्ध इत्ययमादेशो भवति चिन्धं॥३४॥

प्राकृतमञ्जरी

चिह्नशब्दे तु युक्तस्य न्ध इत्यादेश उच्यते।
प्रायोलोपादिहादेश्च चिह्नं चिन्धं प्रचक्षते ॥३४॥

ष्पस्य फः ॥३५॥

मनोरमा

ष्पकारस्य फकारादेशो भवति। पुप्फं । सप्फं। णिप्फाओ। पुष्प। शष्प। निष्पाप ॥३५॥

प्राकृतमञ्जरी

ष्प इत्यस्य फकारः स्यात् सामान्येन पदे पदे।
पुष्पितं पुप्फिअं विद्याद् गीष्पतिं चापि गिप्फइं ॥३५॥

स्पस्य सर्वत्र स्थितस्य ॥३६॥

मनोरमा

स्प इत्येतस्य सर्वत्र स्थितस्य फ इत्ययमादेशो भवति। फंसो। फन्दणं। स्पर्श। स्पन्दन ॥३६॥

प्राकृतमञ्जरी

स-युक्तस्य पकारस्य फकारत्वं विधीयते ।
स्पर्शस्पृष्टौ फंसो फट्ठो आस्पदं विदुरप्फअं॥
ष्पस्पोः फ इति वक्तव्ये तन्त्रेणैवात्र शासने।
कृतो योगविभागोऽयं योगभेदेन युक्तयोः ॥३६॥

सि च[1] ॥३७॥

मनोरमा

स्पस्य क्वचित् सि इत्ययमादेशो भवति। पाडिसिद्धी। प्रतिस्पर्द्धिन् ॥३७॥

वाष्पेऽश्रुणि हः ॥३८॥

मनोरमा

वाष्पशब्दे ष्प इत्येतस्य हकारो भवति अश्रुणि वाच्ये। वाहो। अश्रुणि किम् ? वप्फो। वाष्प। उष्मन् ॥३८॥

---

१. सूत्रस्यास्य प्राकृतमञ्जरीटीका नोपलभ्यते।

प्राकृतमञ्जरी

वाष्पे युक्तस्य हत्वं स्याद् गम्यमानेऽश्रुणि स्फुटम्।
वाष्पो वाहो तथा वप्फो वाष्पस्योष्मार्थता यदि॥३८॥

कार्षापणे॥३९॥

मनोरमा

कार्षापणशब्दे युक्तस्य हकारो भवति। काहावणो॥३९॥

प्राकृतमञ्जरी

कार्षापणपदे चापि युक्तस्यात्र विधीयते।
हत्वं कार्षापणं तेन काहावणमुदाहृतम्॥३९॥

श्चत्सप्सां छः ॥४०॥

मनोरमा

एतेषां छकारो भवति। श्चस्य – पच्छिमं। अच्छेरं। त्सस्य – वच्छो। वच्छरो। प्सस्य – लिच्छा। जुगुच्छा। पश्चिम। आश्चर्य्य। वत्स। वत्सर। लिप्सा। जुगुप्सा॥४०॥

प्राकृतमञ्जरी

श्चत्सप्सानां त्रयाणां च छकारादेश इष्यते।
पश्चात् कुत्साऽप्सराश्चेति पच्छा कुच्छाऽच्छरा क्रमात्॥४०॥

वृश्चिके ञ्छः॥४१॥

मनोरमा

वृश्चिकशब्दे युक्तस्य ञ्छकारादेशो भवति। विञ्छुओ॥४१॥

प्राकृतमञ्जरी

चकारसहितं छत्वमुक्तं युक्तस्य वृश्चिके।
ततो वृश्चिकमिच्छन्ति विञ्छुअं शब्दकोविदाः ॥४१॥

नोत्सुकोत्सवयोः॥४२॥

मनोरमा

एतयोः त्स इत्यस्य छकारो न भवति। श्चत्सप्सां छ इति प्राप्ते प्रतिषिध्यते। उस्सुओ, ऊसुओ; उस्सओ, ऊसओ॥४२॥

प्राकृतमञ्जरी

न त्सस्य भवति छत्वमुत्सुकोत्सवयोः क्वचित्।
उत्सुकश्चोत्सवश्च स्यादुस्सुओ पुनरुस्सओ ॥४२॥

न्मो मः ॥४३॥

मनोरमा

न्मकारस्य मकारो भवति। अधोलोपे प्राप्ते प्रतिषेधविधिः। जम्मो। वम्महो। जन्म। मन्मथ ॥४३॥

प्राकृतमञ्जरी

मकारः केवलोऽत्र स्यान्मकारस्य नकारिणः।
यन्मयो जम्मओ वाच्यो मन्मथो वम्महो तथा ॥४३॥

म्नज्ञपञ्चाशत्पञ्चदशेषु णः ॥४४॥

मनोरमा

म्न ज्ञ इत्येतयोः पञ्चाशत्-पञ्चदशयोश्च युक्तस्य णकारो भवति। म्नस्य– पज्जुणो। ज्ञस्य– जणो, विणाणं। पणासा, पणरहो। प्रद्युम्न। यज्ञ। विज्ञान। पञ्चाशत्। पञ्चदश ॥४४॥

प्राकृतमञ्जरी

म्नज्ञयोर्विहितं णत्वं सूत्रेऽस्मिन् खलु युक्तयोः।
पञ्चाशत्-पञ्चदशयोरपि युक्तस्य तद्यथा ॥
निम्नं ज्ञानं च पञ्चाशदथ पञ्चदशे त्वमी।
णिणं णाणं च पणासा तथा पणरहो क्रमात् ॥४४॥

तालवृन्ते ण्टः ॥४५॥

मनोरमा

तालवृन्ते युक्तस्य ण्टो भवति। तालवेण्टअं ॥४५॥

प्राकृतमञ्जरी

तालवृन्ते न्त इत्यस्य ण्ट इत्यादेश उच्यते।
तेनेह तालवृन्तं तु तालवेण्टं प्रचक्षते ॥४५॥

भिन्दिपाले ण्डः ॥४६॥

मनोरमा

भिन्दिपालशब्दे युक्तस्य ण्ड इत्ययमादेशो भवति। भिण्डिवालो ॥४६॥

प्राकृतमञ्जरी

भिन्दिपालपदे चापि ण्डो युक्तस्य विधीयते।
भिन्दिपालं विदुस्तस्माद् भिण्डिवालं विचक्षणाः॥४६॥

विह्वले भहौ वा॥४७॥

मनोरमा

विह्वलशब्दे युक्तस्य भकारो हकारो वा भवति। वेब्भलो। वीहलो ॥४७॥

प्राकृतमञ्जरी

भत्वं विह्वलशब्देऽस्मिन् विकल्पेन विधीयते।
विह्वलं तेन वेब्भलं पक्षे वीहलमुच्यते॥४७॥

आत्मनि पः॥४८॥

मनोरमा

आत्मनि युक्तस्य पकारो भवति। अप्पा ॥४८॥

प्राकृतमञ्जरी

'आत्मन्'शब्दे तु युक्तस्य पत्वमुक्तं विकल्पतः।
अप्पा पक्षे भवेदत्ता तत्राधोलोपलक्षणात्॥४८॥

क्मस्य॥४९॥

मनोरमा

क्म इत्येतस्य पकारो भवति। रुप्पं। रुप्पिणी। योगविभागो नित्यार्थः। रुक्म। रुक्मिणी ॥४९॥

प्राकृतमञ्जरी

क-युक्तस्य मकारस्य पत्वं स्यादविकल्पतः।
रुक्मं रुप्पं विजानीयाद्रुक्मिणी चापि रुप्पिणी॥४९॥

॥ द्वित्वविधिः ॥

शेषादेशयोर्द्वित्वमनादौ ॥५०॥

मनोरमा

युक्तस्य यौ शेषादेशभूतौ तयोरनादौ वर्त्तमानयोर्द्वित्वं भवति। शेषस्य तावत्– भुत्तं। मग्गो। आदेशस्य– लट्ठी, दिट्ठी, हत्थो। अनादाविति किम्? खलिअं। खम्भो। थवओ। भुक्त। मार्ग। यष्टि। दृष्टि। हस्त। स्खलित। स्तम्भ। स्तवक ॥५०॥

प्राकृतमञ्जरी

उपर्यादिषु लोपेषु शेषो युक्तस्य यो भवेत्।
आदेशश्च तयोर्नित्यमनादौ वर्त्तिनोः स्मृतम्॥
शेषस्य द्वित्वमग्निः स्यादग्गी शाम्यति सम्मइ।
आदेशस्य पुनः पुष्पं पुप्फं स्याद् वस्तु वत्थु च॥५०॥

वर्गेषु युजः पूर्वः ॥५१॥

मनोरमा

युक्तस्य यौ शेषादेशौ अनादिभूतौ तयोर्द्वित्वेऽपि विहिते अध ऊर्ध्वेन यो वर्गेषु वर्णो द्वितीयश्चतुर्थो वा विहितस्तस्य पूर्वप्रथमस्तृतीयो वा भवति। वर्गेषु युग्मस्य द्वितीयस्य प्रथमश्चतुर्थस्य तृतीयो द्वित्वेन विधीयते। अयुग्मयोः प्रथमतृतीयपञ्चमरूपयोः शेषादेशयोस्तु तावेव भवतः। शेषस्य– वक्खाणं। अग्घो। मुच्छा। णिज्झरो। लुद्धो। णिब्भरो। आदेशस्य– दिट्ठी। लट्ठी। वच्छो। विप्फरिसो। नित्थारो। जक्खा। लच्छो। अट्ठी। पुप्फं। व्याख्यान। अर्घ्य। मूर्च्छा। निर्झर। लुब्ध। निर्भर। दृष्टि। यष्टि। वत्स। विस्पर्श। निस्तार। यक्ष। लक्ष्मी। अस्थि। पुष्प ॥५१॥

प्राकृतमञ्जरी

अत्र द्वित्वे कृते कादौ वर्गे स्याच्चेद्युगक्षरम्।
युजस्तस्य तु पूर्वं स्याद् नैरन्तर्येण यद् भवेत्॥
द्वयापेक्षमिह द्वित्वं तत् पूर्वोत्तरसंगतौ।
प्रथमं च तृतीयं च पूर्वे स्यातां युजोः क्रमात्॥

पूर्वापेक्षा तु पूर्वस्य पूर्व एवायुजो भवेत् ।
तृतीयं च तृतीयस्य पञ्चमं पञ्चमस्य च ॥
द्वितीयस्य भवेत् पूर्वमादिवर्णं युजः पुनः ।
चतुर्थस्य तृतीयं स्याद् द्वित्वे भवति तद्यथा ॥
मुख्यं मुक्खमिति द्वित्वे कः पूर्वः खस्य वै युजः ।
अर्घ्यमग्घं घस्य पूर्वो गः शेषे द्वित्वमीदृशम् ॥
पथ्यं पच्छमिति द्वित्वे च पूर्वश्छस्य वै युजः ।
मध्यं मज्झं झस्य जः प्रागादेशे द्वित्वमीदृशम् ॥५१॥

नीडादिषु ॥५२॥

मनोरमा

नीड इत्येवमादिषु अनादौ वर्त्तमानस्य च द्वित्वं भवति । णेड्डं । एन्नीडा पीडेत्यादिना एत्त्वम् । सोत्तं । पेम्मं । वाहित्तं । उज्जुओ । जणओ । जोव्वणं । नीड । स्रोतः । प्रेमन् । व्याहृत । ऋजु । जनक । यौवन ॥५२॥

प्राकृतमञ्जरी

नीडादिषु भवेद् द्वित्वमनादौ वर्त्तिनः पुनः ।
नीडमत्र भवेत् णेड्डं यौवनञ्चापि जोव्वणं ॥
नीडं च व्याहृतं प्रेम स्रोतो जानु च यौवनम् ।
नीडादिः स्याद् गणः सोऽयमनादौ वर्त्तिनो द्विता ॥
नैरन्तर्यं विलङ्घ्येह किमर्थं द्वित्वशासने ।
मध्ये वर्गे युजः पूर्व इति सूत्रान्तरं कृतम् ॥
अभीष्टद्वित्वशास्त्रस्य स्वरूपोत्पादनं यतः ।
स्याद्वर्गे युज इत्यस्य मध्यपादे तदर्थता ॥
युक्तस्येत्यधिकारेऽस्मिन् नीडादिः पठ्यते यतः ।
इह युक्तस्य च द्वित्वं तत्प्रसङ्गेन युज्यते ॥५२॥

आम्रताम्रयोर्बः ॥५३॥

मनोरमा

आम्रताम्रयोर्द्वित्वेन बकारो भवति । अम्बं । तम्बं ॥५३॥

प्राकृतमञ्जरी

मयुक्तः स्याद् बकारस्तु युक्तयोराम्रताम्रयोः।
आम्रमम्बं विदुस्ताम्रं तम्बमिच्छन्ति सूरयः॥५३॥

न रहोः॥५४॥

मनोरमा

रेफहकारयोर्द्वित्वं न भवति। धीरं। तूरं। जीहा। वाहो। धैर्य्य। तूर्य्य। जिह्वा। वाष्प॥५४॥

प्राकृतमञ्जरी

न शेषादेशयोर्द्वित्वमुक्तं तु रहयोर्भवेत्।
धैर्यं धीरं मतं वाष्पो वाहो वाच्यो विचक्षणैः॥५४॥

आङो ज्ञस्य॥५५॥

मनोरमा

आङ उत्तरस्य ज्ञ इत्येतस्यादेशस्य द्वित्वं न भवति। आणा। आणत्ती। आज्ञा। आज्ञप्ति। आङ इति किम्? सण्णा। संज्ञा॥५५॥

प्राकृतमञ्जरी

ज्ञस्यादेशस्य न द्वित्वमाङ उत्तरवर्त्तिनः।
युक्तस्य स्यात् तदाज्ञप्तिराणत्ती परिकीर्त्तिता॥५५॥

न बिन्दुपरे[1]॥५६॥

मनोरमा

अनुस्वारपरे द्वित्वं न भवति। संकन्तो। संझा। संक्रान्त। सन्ध्या॥५६॥

समासे वा॥५७॥

मनोरमा

समासे शेषादेशयोर्वा द्वित्वं भवति। णइग्गामो। णईगामो। कुसुमप्पअरो। कुसुमपअरो। देवत्थुई। देवथुई। आणालक्खम्भो। आणाक्खम्भो। नदीग्राम। कुसुमप्रकर। देवस्तुति। आलानस्तम्भ॥५७॥

---

१. सूत्रस्यास्य प्राकृतमञ्जरीटीका नोपलभ्यते।

प्राकृतमञ्जरी

समासे स्याद् विकल्पेन द्वित्वं तत्पुरुषादिके।
गिरिग्रामो गिरिग्गामो गिरिगामो मतोऽथवा ॥५७॥

सेवादिषु च ॥५८॥

मनोरमा

सेवादिषु च अनादौ स्थितस्य वा द्वित्वं भवति। सेव्वा, सेवा। एक्कं, एअं। णक्खो, णहो। देव्वं, दइवं। असिव्वं, असिवं। तेल्लोक्कं, तेलोअं। निहित्तो, णिहितो। तुण्हिक्को, तुण्हिओ। कण्णिआरो! कणिआरो। दिग्घं, दीहं। रत्ती, राई। दुक्खितो, दूहिओ। अस्सो, आसो। इस्सरो, ईसरो। विम्मासो, बीमासो। णिम्मासो, णीमासो। रस्सी, रासी। मित्तो, मिओ। पुस्सो, पुसो, पूसो। सेवा। एक। नख। दैव। अशिव। त्रैलोक्य। निहित। तूष्णीक। कर्णिकार। दीर्घ। रात्रि। दुःखित। ईश्वर। विश्वास। निश्वास। रश्मि। मित्र। पुष्य। उभयत्र विभाषेयं सेवादीनामप्राप्ते दीर्घादीनाञ्च प्राप्ते ॥५८॥

प्राकृतमञ्जरी

सेवादिष्वेषु शब्देषु विभाषा द्वित्वमुच्यते।
सेवा सेव्वा तथा सेआ नखो णक्खो णहो तथा॥
सेवा-दीर्घेक-तूष्णीक-त्रैलोक्य-निहितेश्वरः ।
नखं पुखं तथैवेव कर्णिकारश्च रात्रयः॥
मन्ये विश्वास-निश्वास-वराका रश्मिपुष्यकौ।
विश्व-विश्रम्भ-निस्पन्दाः सेवादिः स्यादयं गणः॥
युक्तस्येत्यधिकारेऽस्मिन् सेवादिष्विति शासनम्।
अयुक्ताक्षरसंबाधान्न युक्तमिति शङ्क्यते॥
रात्रिदीर्घादयः शब्दा युक्ताक्षरसमन्विताः।
सेवादिष्वपि सन्त्येव तेनादोषोऽत्र शासने॥
इवशब्दे भवेद् द्वित्वमिलोपात् परतो यतः।
अनादाविति निर्देशो न विरुध्येत शासनात् ॥५८॥

विप्रकर्षः ॥५९॥

मनोरमा

अधिकारोऽयम्। आपरिच्छेदसमाप्तेर्युक्तस्य विप्रकर्षो भवति ॥५९॥

प्राकृतमञ्जरी

आरभ्यतेऽधिकारोऽयमापरिच्छेदपूरणात् ।
विकर्ष इति युक्तस्य पृथक्कारः स उच्यते ॥५९॥

क्लिष्ट-श्लिष्ट-रत्न-क्रिया-शार्ङ्गेषु तत्स्वरवत् पूर्वस्य ॥६०॥

मनोरमा

क्लिष्टादिषु युक्तस्य विप्रकर्षो भवति। विप्रकृष्टस्य च यः पूर्वो वर्णो निरर्थस्तस्य तत्स्वरता भवति। तेनैव पूर्वेण स्वरेण पूर्वो वर्णः सार्थो भवतीत्यर्थः। किलिट्ठं। सिलिट्ठं। रअणं। किरिआ। सारंगो ॥६०॥

प्राकृतमञ्जरी

क्लिष्ट-श्लिष्ट-क्रियारत्न-शार्ङ्गेषु स्यात् पृथक् क्रिया।
विकृष्टयोश्च पूर्वस्य स्वरो युक्तस्य यो भवेत् ॥
केवलस्य हलः स्थानं न शक्यं मध्यतो यतः।
यः पूर्वः स्यात् स्वरोऽभीष्टस्तत्र तस्येति तत् स्वरः॥
किलिट्ठं च सिलिट्ठं च विकर्षः कलयोः शलोः।
किरिआ करयोरत्र रदणं तनयोरिह ॥
शार्ङ्गं सारंग इत्येष विकर्षः किन्तु तत्र हि।
गकारो बिन्दुमानेकः स रेफेण विकृष्यते ॥६०॥

कृष्णे वा ॥६१॥

मनोरमा

कृष्णशब्दे युक्तस्य वा विप्रकर्षो भवति। पूर्वस्य च तत्स्वरता। व्यवस्थित-विभाषेयम्। तेन वर्णे नित्यं विप्रकर्षः, विष्णौ तु न भवत्येव। कसणो। कण्हो ॥६१॥

प्राकृतमञ्जरी

कृष्णशब्दे विकर्षो वा यदि स्यात् पूर्ववद् भवेत्।
तत्स्वरः कथ्यते कृष्णः कण्हो वा कसणो इति ॥६१॥

असंज्ञायां वा ॥६१क॥

असंज्ञायां विकर्षस्य विभाषेत्थं व्यवस्थिता।
लक्ष्येषु लक्ष्यते तद्धि यत् कण्हो कसणं तथा॥६१क॥

इः श्री- ह्री-क्रीत-क्लान्त-क्लेश-म्लान-स्वप्न-हर्ष-स्पर्शार्ह-गर्वेषु ॥६२॥

मनोरमा

एषु युक्तस्य विप्रकर्षो भवति, पूर्वस्य इकारस्तत्स्वरता च भवति। सिरी। हिरी। किरीतो। किलंतो। किलेसो। मिलाणो। सिविणो। हरिसो। फरिसो। अरिहो। गरिहो ॥६२॥

प्राकृतमञ्जरी

श्रीह्रीक्लान्तेष्वपि क्लेशम्लानशब्देष्विदुच्यते।
पूर्वस्य च विकृष्टस्य स्पर्शे हर्षे च तद्यथा॥
श्रीः सिरी सरयोरत्र ह्रीर्हिरी हरयोरिह।
किलन्तो च किलेसो च कलयोरुभयोरपि॥
मिलाणं मलयोरत्र सिविणो पनयोरिह।
फरिसो रसयोरत्र हरिसो रषयोरिह ॥६२॥

अः क्ष्मा-श्लाघयोः ॥६३॥

मनोरमा

क्ष्मा श्लाघा इत्येतयोर्युक्तस्य विप्रकर्षो भवति। पूर्वस्य च अकारस्तत् स्वरता च भवति। खमा। सलाहा ॥६३॥

प्राकृतमञ्जरी

क्ष्माश्लाघयोर्विकृष्टस्य पूर्वस्याकार इष्यते।
क्ष्मा स्याच्छमाऽत्र क्षमयोः सलाहा शलयोरिह ॥६३॥

स्नेहे वा ॥६४॥

मनोरमा

स्नेहशब्दे युक्तस्य वा विप्रकर्षो भवति। पूर्वस्य अकारस्तत्स्वरता च। सणेहो, णेहो ॥६४॥

प्राकृतमञ्जरी

स्नेहशब्दे विकर्षात्वे स्यातां पूर्वविकल्पतः।
पूर्वस्य तु सणेहो वा णेहो सनयोरिह ॥६४॥

उः पद्म-तन्वी-समेषु ॥६५॥

मनोरमा

पद्मशब्दे तन्वी इत्येवं समेषु च युक्तस्य विप्रकर्षो भवति। पूर्वस्य च उकारस्तत्स्वरता च भवति। पउमं। तणुई। लहुई। पद्म। तन्वी। लघ्वी ॥६५॥

प्राकृतमञ्जरी

पद्मतन्वीसमेषु स्यादुत्पूर्वस्य विकृष्टयोः।
पद्मं पदुममित्याहुर्विकृष्येते दमाविह ॥
तणुई नवयोरत्र गुरुई रवयोरिह।
ईकारान्तेषु शब्देषु ङ्यन्तत्वं समता मता ॥६५॥

ज्यायामीत् ॥६६॥

मनोरमा

ज्याशब्दे युक्तस्य विप्रकर्षो भवति, पूर्वस्य च ईकारस्तत्स्वरता च ।जीआ ॥६६॥

प्राकृतमञ्जरी

ईकारो विहितो ज्यायां पूर्वस्य तु विकृष्टयोः।
ज्या जीआ जययोरत्र विकर्षो युक्तयोर्द्वयोः ॥६६॥

॥ इति वररुचिकृते प्राकृतप्रकाशे संयुक्तवर्णविधिर्नाम तृतीयः परिच्छेदः॥

सज्जो रंहो भट्टिणो विजअप्पट्ठाणं अवेक्खइ। एस उण णअरादो देईणं आणत्तिहरओ करहओ आअदो। अदो एव्व क्खु णिब्बन्धो, सिणिद्ध जणसंविहत्तं हि दुक्खं मज्झवेअणं होइ। पिअंवदे जइवि गन्धव्वेण विहिणा णिव्वुत्तकल्लाणा सउन्दला अनरूव भत्तु गामिणी संवुत्त त्ति णिव्वुअं मे हिअअं तहवि एत्तिअं चिन्तणीअं। सउन्दलाए सोहग्गदेवदा अच्चणीआ। पब्भट्ट मे अग्गहत्यादो पुप्फभाअणं। अविण्णाद-तवप्पहावस्स दुहिदुजणस्स भअदा पक्को अवराहो मरिसिदव्वो – (शकु)।

उस्ससिदमेत्तसम्भाविदजीविदा अज्ज विसण्णं एसा न परिवज्जइ – (= वक्र)।

●

॥ अथ चतुर्थः परिच्छेदः ॥

❀❀❀

सन्धावचामज्लोपविशेषा बहुलम् ॥१॥

मनोरमा

अचामिति प्रत्याहारग्रहणम्। अजिति च। सन्धौ वर्त्तमानानामचां स्थाने अज्विशेषा लोपविशेषाश्च बहुलं भवन्ति।

अज्विशेषास्तावत्– जउणअडं, जउणाडं। णइमोत्तो, णईसोत्तो। बहुमुहं, बहूमुहं। कण्णउरं, कण्णऊरं। सिरवेअणा, सिरोवेअणा। पीआपीअं, पिआपिअं। सीआसीअं, सिआसिअं। सवोमुओ, सवोमूओ। सरोरुहं, सररुहं।

लोपविशेषाः– राउलं, राअउलं। तुहद्धं। तुह अद्धं। महद्धं, मह अद्धं। पावडणं, पाअड़णं। कुम्हारो, कुम्हआरो। पवणुद्धअं, पवणोद्धअं ॥१॥

'संयोगपरे पूर्वस्याचो लोपः।' क्वचिन्नित्यं क्वचिदन्यदेव, बहुलग्रहणात्। तेनान्यदपि लाक्षणिककार्यं भवति।

प्राकृतमञ्जरी

अतीते तु परिच्छेदे युक्तानां शासनं हलाम्।
वृत्तमत्र पुनः सन्धिविधेयोऽचां हलामपि॥
सन्धावचां स्युरग्लोपविशेषा बहुलं पदे।
अग्लोप इत्यकां लोपो विशेषाश्चान्यथागमाः॥
प्रवृत्तिश्चाप्रवृत्तिश्च विभाषा चान्यदेव वा।
क्वापि क्वापि चतुर्धा स्याद् बहुलार्थस्य विभ्रमात्॥
अज् वा हल् वा भवेद्येषां प्रतियोगी पदेष्वचाम्।
तेषां विधीयते सन्धिरत्र सन्धावचामिति।
क्रियमाणे पुनः सन्धावचां लोपो भवत्यकाम्।
विशेषाश्चोभयोर्वा स्युरेकस्यैवाथवा मता॥

यथाग्लोपो नवैश्वर्यं णवेसज्जमितीह तु।
अकारो लुप्यते ह्यस्मिन्नैत एत्त्वं यथाविधि॥
कात्तिकियपदे पुनः कत्तिएओ इति स्थितिः।
न लोपोऽस्मिन्निकारस्य सत्यक्त्वेऽपि परिस्फुटे॥
सोऽयमित्यत्र सोअं वा पक्षे भवति सोअअं॥
अकोऽप्यस्मिन्नकारस्य विभाषालोप इष्यते॥
राज्यं रज्जं भवेदस्मिन्नत्त्वमस्य प्रसज्यते।
दीर्घस्य ह्रस्वता नित्या संयुक्तोत्तरता यदि॥
चतुर्णां बहुलार्थानां गतयो दर्शिताः क्रमात्।
अन्यैरेभिश्चतुर्भिश्च यैरग्लोपः प्रदर्शितः॥
अग्विशेषा वशिष्ठर्षिर्वसिट्ठेसीति सिध्यति।
ऋकाराकारयोरेत्त्वं विशेष उभयोरकोः॥
महेन्द्रश्च महिन्दो स्यादकः पूर्वस्य केवलम्।
एकारस्य विशेषोऽयमग्विशेषा इतीदृशाः॥
परतोऽसति संयोगे पूर्वस्य ह्रस्वता क्वचित्।
नदीजलं णइजलं तद्भवेद् वा णईजलं॥
ह्रस्वस्यापि क्वचिद् दीर्घो रश्मी रासी निगद्यते।
अश्वमासं विदुर्द्वित्वं सेवादित्वाद्यथा नहि।
नमस्कारो णमक्कारो णमोक्कारो मतोऽथवा।
शिरोरोगः सिरोरोओ सिररोओ तथैव हि॥
यमुनातटमिच्छन्ति जउणाडं विचक्षणाः।
जऊणअडमित्यत्र परपक्षे च दीर्घलुक्॥
कुम्भकारश्च कुम्भारो कुम्भआरो मतोऽथवा।
पादपीठं च पापीढं पाअपीढमथापि वा॥
अथ राजकुलं वाच्यं राउलं तद्वदेव या।
एवं चन्द्रकला चैव चन्दला पूर्ववच्च सा॥
कर्णपूरश्च कणोरो कणओरो मतोऽथवा।
सहारो सहकारश्च सहआरो तथैव हि॥

अन्यत्वेन विशेषोऽयं बाहुल्यात् सिध्यतीति चेत्।
नैतद्युक्तं वसिट्ठेसी न खल्वन्यत्वमश्नुते॥
विशेषान्यत्वयोर्भेदादवस्थायां न च स्मृतः।
एतावता विशेषत्वं ननु तावन्निरस्यते॥
बाहुल्यादन्यकार्यस्य महत् कार्यं विजृम्भितम्।
श्रद्धातव्येषु लक्ष्येषु लक्षणीयं विचक्षणैः॥१॥

उदुम्बरे दोर्लोपः॥२॥

मनोरमा

उदुम्बरशब्दे दुकारस्य लोपो भवति। उम्बरं॥२॥

प्राकृतमञ्जरी

अत्र लोपप्रसङ्गेन संगते स्यादुदुम्बरे।
दुकारस्य ततो लोपस्तदुदुम्बरमुम्बरं॥२॥

कालायसे यस्य वा॥३॥

मनोरमा

कालायसशब्दस्थितस्य यकारस्य वा लोपो भवति। कालासं, कालाअसं॥३॥

प्राकृतमञ्जरी

कालायसे यकारस्य विभाषालोप उच्यते।
कालायसं तु कालासं पक्षे कालाअसं मतम्॥३॥

भाजने जस्य॥४॥

मनोरमा

भाजनशब्दे जकारस्य लोपो भवति वा। भाणं, भाअणं॥४॥

प्राकृतमञ्जरी

भाजनेऽपि जकारस्य विभाषालोप इष्यते।
तेन भाजनशब्दः स्याद् भाणं भाअणमेव वा॥४॥

यावदादिषु वस्य ॥५॥

मनोरमा

यावदादिषु शब्देषु वकारस्य वा लोपो भवति । जा, जाव । ता, ताव । पाराओ, पारावओ । अणुत्तन्तो, अणुवत्तन्तो । जीअं, जीविअं । एअं, एव्वं । एअ, एव्व । कुअलअं, कुवलअं ।

यावत् । तावत् । पारावत । अनुवर्त्तमान । जीवित । एवम् । एव । कुवलय । इत्येवमादयः ॥५॥

प्राकृतमञ्जरी

यावदादिषु शब्देषु लुग् वकारस्य वा भवेत् ।
यावज्जा जाव ता ताव तावदेषु विमृष्यताम् ॥
यावदावर्त्तमानं च तावत् प्रावरकस्तथा ।
अवटश्चक्रवाकश्च तदा देवकुलं पुनः ॥
एवमेवेति विज्ञेयो यावदादिरयं गणः ।
एवमेवेत्यमुष्मिंस्तु वस्य पूर्वस्य लुग् भवेत् ॥५॥

अन्त्यस्य हलः ॥६॥

मनोरमा

वेति निवृत्तम् । शब्दानां योऽन्त्यहल्, तस्य लोपो भवति । जसो । णहं । सरो । कम्मो । जाव । ताव । यशस् । नभस् । सरस् । कर्म्मन् । यावत् । तावत् ॥६॥

प्राकृतमञ्जरी

पदान्तस्य हलो लोपः शब्दे शब्दे विधीयते ।
अत्र वेत्यधिकारश्च निवृत्तस्तद्द् यथा पुनः ।
सरस्तेजः सरो तेओ पश्चात् पच्छा मरुन्मरू ।
चन्द्रमाश्चन्दमो तद्वदिन्द्रजित् पुनरिन्दई ॥६॥

स्त्रियामात् ॥७॥

मनोरमा

स्त्रियां वर्त्तमानस्य हल आकारो भवति । सरिआ । पडिवआ । वाआ । सरित् । प्रतिपत् । वाक् ॥७॥

प्राकृतमञ्जरी

अत्रान्त्यहल इत्येषा पञ्चमी तत उत्तरः।
स्त्रियां विहित आकारो वाग् वाचा दिग्दिसा भवेत् ॥७॥

रोरा[1] ॥८॥

मनोरमा

स्त्रियामन्त्यस्य हलो रेफस्य रा इत्ययमादेशो भवति। धुरा। गिरा। धुर्। गिर् ॥८॥

न विद्युति ॥९॥

मनोरमा

विद्युच्छब्दे अन्त्यहल आकारो न भवति। विज्जू ॥९॥

प्राकृतमञ्जरी

विद्युच्छब्दे निषिद्धं तदात्वमन्त्यहलः परम्।
लोप एव ततस्तत्र विद्युद् विज्जू निगद्यते ॥९॥

शरदो दः ॥१०॥

मनोरमा

शरच्छब्दस्य अन्त्यहलो दो भवति। सरदो ॥१०॥

प्राकृतमञ्जरी

शरत्सम्बन्धिनोऽन्त्यस्य हलो नात्वं न चापि लुक्।
तदादेशो दकारः स्याच्छरत्तु सरदो भवेत् ॥१०॥

दिक् प्रावृषोः सः ॥११॥

मनोरमा

दिक्-शब्दस्य प्रावृट्-शब्दस्य चान्त्यहलः सो भवति। दिसा। पाउसो ॥११॥

प्राकृतमञ्जरी

भूयते नात्वलोपाभ्यां प्रावृट्-सम्बन्धिनो हलः।
अन्त्यस्य स्यात् सकारस्तु प्रावृड् भवति पाउसो ॥११॥

---

१. सूत्रस्यास्य प्राकृतमञ्जरीटीका नोपलभ्यते।

मो बिन्दुः ॥१२॥

मनोरमा

अन्त्यस्य हलो मकारस्य बिन्दुर्भवति। अच्छं। वच्छं। भद्दं। अग्गिं। दट्ठं। **वणं**। धणं। अक्षि। वृक्षम्। भद्रम्। अग्निम्। वनम्। धनम् ॥१२॥

प्राकृतमञ्जरी

बिन्दुरन्त्यहलो मस्य सामान्येन विधीयते।
भुवनं भुवणं तद्वद् भद्रं भद्दं पदं पअं ॥१२॥

अचि मश्च ॥१३॥

मनोरमा

अचि परतो मो भवति वा। फलमवहरइ, फलं अवहरइ ॥१३॥

प्राकृतमञ्जरी

परतोऽचि मकारः स्याद् बिन्दुश्च न समुच्चयः।
किमेतत् स्यात् किमेदं च किं एदं च निगद्यते॥
अचि वेत्येव वक्तव्ये मश्चेति किमिहोच्यते।
लोपोऽन्त्यहल इत्येष मा भूदिति विशिष्यते ॥१३॥

नञोर्हलि ॥१४॥

मनोरमा

नकारञकारयोर्हलि परतो बिन्दुर्भवति मकारस्य। नस्य – अंसो। अम्सो। **कंसो**। कम्सो। ञस्य – वंचणीअं। वम्चणीअं। विंझो। विम्झो ॥१४॥

प्राकृतमञ्जरी

परतो हलि वै बिन्दुः स्यान्नकारङकारयोः।
मन्दं निगद्यते मंदं पङ्क्तिः पंती निगद्यते ॥१४॥

वक्रादिषु ॥१५॥

मनोरमा

वक्रादिषु शब्देषु बिन्दुरागमो भवति। वंकं। तंसं। हंसं। अंसू। गंठी। मंथं। **मणंसिणी। दंसणं**। फंसो। पडिंसूदं। अंसो। अहिमुंको। वक्र। त्यस्र। ह्रस्व। अश्रु।

श्मश्रु। सृष्टि। मस्त। मनस्विनी। दर्शन। स्पर्श। वर्ण। प्रतिश्रुत। अश्व। अभिमुक्त। इत्यादयः॥१५॥

प्राकृतमञ्जरी

वक्रादिषु पदेष्वेव बिन्दुर्भवति तद्यथा।
वक्रं वंकं तथा त्यस्रं तंसं श्मश्रु तु मंसु च॥
वक्रं त्यस्रं च शुल्कं च श्मश्रु चाश्रु प्रतिश्रुतम्।
गृष्टिः स्पर्शश्च पूर्वश्च शुश्रूषा च मनस्विनी॥
दर्शनं चाभिमुक्तं च वक्रादिः स्यादयं गणः।
तत्र संयोगतः पूर्वं स्याद् बिन्दुरवगम्यताम्॥१५॥

मांसादिषु वा॥१६॥

मनोरमा

मांसादिषु शब्देषु वा बिन्दुः प्रयोक्तव्यः। मंसं मासं। कहं कह। णूणं णूण। तहिं तहि। असुं असु। तदयमपठितो मांसादिर्गणः। यत्र क्वचिद् वृत्तभङ्गभयात्तन्यमानः क्रियमाणश्च बिन्दुर्भवति सो मांसादिषु द्रष्टव्यः॥१६॥

प्राकृतमञ्जरी

मांसादिषु तु शब्देषु विभाषाबिन्दुरुच्यते।
मांसं मासं च मंसं च कथं चापि कहं कह॥
मांसं च मांसलं नूनं तदानीं सम्मुखं कथम्।
चमरं चेति निर्दिष्टो मांसादिः स्यादयं गणः॥१६॥

ययि तद्वर्गान्त्यः॥१७॥

मनोरमा

ययि परतो बिन्दुस्तद्वर्गान्त्यो वा भवति। सङ्का। सङ्खो। अङ्को। अङ्गं। सञ्चरइ। सढो। सन्तरइ। सम्पत्ती। ययीति किम्? अंसो। वाऽधिकारात्। पंकं। बिंदू। संका। संखो। शङ्का। शङ्ख। अङ्ग। सञ्चरति। शण्ढः। सन्तरति। सम्पत्ति। अंश। पङ्क। बिन्दु। शङ्का। शङ्ख॥१७॥

प्राकृतमञ्जरी

तद्वर्गान्त्यो भवेद् बिन्दोरादेशः परतो हलि ।
वर्गे ह्येत्यवगन्तव्यं वर्गान्तपदसंग्रहात् ॥
नङो हलीति मो बिन्दुरचि मश्चेति शासनात् ।
तवर्गं च कवर्गं च पवर्गं च विना भवेत् ॥
सङ्कोचेनामुनादेशः स्यात् चवर्गटवर्गयोः ।
अन्येष्वपि च सामान्यात् तद्वर्गान्तो भवेन्न वा ॥
अअञ्चन्दो इदण्ठाणं अअञ्ञक्खो इअणई ।
एष्टव्यः पाक्षिको बिन्दुरअं चन्दो इअं णइ ॥१७॥

नसान्तप्रावृट्शरदः पुंसि ॥१८॥

मनोरमा

नकारान्ताः सकारान्ताश्च प्रावृट्शरदौ च पुंसि प्रयोक्तव्याः। नान्ताः– कम्मो । जम्मो । वम्मो । सान्ताः– जसो । तमो । पाउसो । सरदो । कर्म्मन् । जन्मन् । वर्म्मन् । यशस् । तमस् । सरस् । प्रावृष् । शरद् ॥१८॥

प्राकृतमञ्जरी

नान्तः सान्तश्च पुंसि स्यात् शब्दः प्रावृट् तथा शरत् ।
कम्मो वम्मो सरो तेओ पाउसो सरदो क्रमात् ॥१८॥

न शिरोनभसी ॥१९॥

मनोरमा

शिरस् नभस् इत्येतौ शब्दौ न पुंसि प्रयोक्तव्यौ । सिरं । णहं ॥१९॥

प्राकृतमञ्जरी

न शिरोनभसी पुंसि वर्त्तेते वा उभे पदे ।
तयोरन्त्यहलो लोपाद्रूपमाहुः सिरं णहं ॥१९॥

पृष्ठाक्षिप्रश्नाः स्त्रियां वा ॥२०॥

मनोरमा

एते स्त्रियां वा प्रयोक्तव्याः। पुट्ठी। पुट्ठं। पण्हा। पण्हो। अच्छी। अच्छं। पृष्ठ। प्रश्न। अक्षि ॥२०॥

प्राकृतमञ्जरी

स्युः स्त्रियां वेह पृष्ठाक्षिप्रश्नाः पट्ठी मता तथा।

पट्ठं अच्छि तथाच्छी वा पण्हा पण्होऽथवा त्रयः ॥२०॥

ओदवापयोः ॥२१॥

मनोरमा

अव अप इत्येतयोरुपसर्गयोर्वा ओत्त्वं भवति। ओहासो। अवहासो। ओसारिअं। अवसारिअं। अवहास। अपसारित ॥२१॥

प्राकृतमञ्जरी

भवेदवापयोरोत्त्वमुभयोरुपसर्गयोः।

स्यादवच्छिन्नमोच्छिणं तथापकृतमोकअं॥

अथ त्ववापयोरोत्त्वं लक्ष्ये यदि न दृश्यते।

स्त्रियां वेत्यमुतः सूत्राद् वाधिकारोऽपि दृश्यते॥२१॥

तल्-त्वयोर्दात्तणौ ॥२२॥

मनोरमा

तल् त्व इत्येतयोः स्थाने दा त्तण इत्येतावादेशौ भवतः। पीणदा। मूढ़दा। पीणत्तणं। मूढ़त्तणं ॥२२॥

प्राकृतमञ्जरी

तल्-त्वयोर्दात्तणादेशौ भावप्रत्यययोः स्मृतौ।

पीणता पीणदा तद्वत् खरत्वं च खरत्तणं॥२२॥

क्त्व ऊणः ॥ २३ ॥

मनोरमा

क्त्वाप्रत्ययस्य ऊण इत्ययमादेशो भवति। घेऊण। सोऊण। काऊण। दाऊण। गृहीत्वा। श्रुत्वा। कृत्वा। दत्त्वा ॥ २३ ॥

प्राकृतमञ्जरी

क्त्वाप्रत्ययस्य शब्देषु तूणादेशोऽयमिष्यते।
गृहीत्वेत्यत्र घेत्तूण कृत्वा कत्तूण दृश्यते ॥ २३ ॥

तृन इरश्शीले ॥ २४ ॥

मनोरमा

शीले यस्तृनूप्रत्ययो विहितस्तस्य इर इत्यादेशो भवति। भ्रमणशीलो भमिरो। हसनशीलो हसिरो ॥ २४ ॥

प्राकृतमञ्जरी

विहितस्य तृनः शीले इरादेशो विधीयते।
गन्ता स्याद्‌ गमिरो तद्वद्‌ वदिता वदिरो भवेत्‌ ॥ २४ ॥

आल्विल्लोल्लालवन्तेन्ता मतुपः ॥ २५ ॥

मनोरमा

आलु, इल्ल, उल्ल, आल, वन्त, इन्त इत्येत आदेशा मतुपः स्थाने भवन्ति। आलुस्तावत्– ईसालू। णिद्दालू। इल्लः। विआरिल्लो। मालइल्लो। उल्लः। विआरुल्लो। आलः। धणालो। सद्दालो। वन्तः। धनवन्तो। जोव्वणवन्तो। इन्तः। रोसाइन्तो। पाणाइन्तो। यथादर्शनमेते प्रयोक्तव्याः, न सर्वे सर्वत्र।

ईर्ष्यावत्। निद्रावत्। विकारवत्। मालावत्। धनवत्। शब्दवत्। यौवनवत्। रोषवत्। प्राणवत्।

[क्वचिन्मा मतुपोऽन्त्यस्य मन्तो वा दृश्यते क्वचित्।

हणुमा। हणुमन्तो।

इल्लोल्लावपरे प्रायः शैषिकेषु प्रयुञ्जते ॥

पौरस्त्वं पुरोभवं पुरिल्लं। आत्मीयमप्पुल्लं।

परिमाणे किमादिभ्यो भवन्ति केद्दहादयः।

केद्दहं, केत्तिअं। जेत्तिअं। तेद्दहं, तेत्तिअं। एद्दहं, एत्तिअं।

कृत्वसो हुत्तमित्यन्ये देशीशब्दः स इष्यते॥

सअहुत्तं सहस्सहुत्तं। शतकृत्वः। सहस्रकृत्वः।

जातौ वा स्वार्थे कः। जातौ वा स्वार्थे ककारः प्रयोक्तव्यः॥२५॥

प्राकृतमञ्जरी

आल्विअल्लावुभावुल्ल इल्लवन्तौ तथापि च।
मतुपः स्युः षडादेशा इन्तः षष्ठश्च तद्यथा॥
णिद्दालू अरिअल्लो च विद्यारुल्लो तथा पुनः।
धणिल्लो पुणवन्तो व माणइन्तो मताः क्रमात्॥२५॥]

स्वार्थे को वा ॥२५क॥

प्राकृतमञ्जरी

क– प्रत्ययः प्रयोक्तव्यः स्वार्थे वा प्रकृतेः परः।
पद्मं पदुमअं वाच्यं पक्षे पदुममेव वा॥२५क॥

विद्युत्-पीताभ्यां लः॥२६॥

मनोरमा

विद्युत्-पीताभ्यां परतः स्वार्थे लप्रत्ययो वा भवति। विज्जू, विज्जुली। पीअं, पीअलं॥२६॥

प्राकृतमञ्जरी

स्वार्थे ल-प्रत्ययो विद्युत्-पीताभ्यां परतो भवेत्।
विज्जुला वाऽथवा विज्जू च पीअलं पीअमेव वा॥
पीतशब्दात्तु केषाञ्चित् पक्षे वत्वं किलेष्यते।
पीताद्वश्चेति वक्तव्यं तत् पीतं यत्तु पीअवं॥२६॥

वृन्दे बो रः॥२७॥

मनोरमा

वृन्दशब्दे बकारात् परं स्वार्थे रेफो वा प्रयोक्तव्यः। ब्रन्दं। बंद्दं॥२७॥

पाठान्तरम् –

बृन्दे दोरः ॥ २७ क ॥

प्राकृतमञ्जरी

वृन्दशब्दे दकारस्य परतो रेफ उच्यते।
स्वार्थे वा बृन्दशब्दः स्याद्र बन्दरं बंदमेव च ॥ २७ क ॥

करेण्वां रणोः स्थितिपरिवृत्तिः ॥ २८ ॥

मनोरमा

करेणुशब्दे रेफ-णकारयोः स्थितिपरिवृत्तिर्भवति । कणेरू । पुंसि न भवति । करेणू ॥२८॥

प्राकृतमञ्जरी

स्थितिः स्थानं मतं तस्याः शब्दे विपरिवर्त्तनम्।
परिवृत्तिर्मता सेयमधिकारो द्वयोरिह ॥
करेण्वां रणयोः स्थानपरिवृत्तिर्विधीयते।
तयोर्हल्मात्रयोरेव यद्विधानं रणोरिह ॥
करेणुस्तु कणेरू स्यात् स्त्रियामेवेति गम्यताम्।
करेण्वामिति निर्देशात् करेणू वारणो यदि ॥ २८ ॥

आलाने लनोः ॥ २९ ॥

मनोरमा

आलानशब्दे लनोः स्थितिपरिवृत्तिर्भवति । आणलखम्भो । आलानस्तम्भः ॥ २९ ॥

प्राकृतमञ्जरी

आलाने लनयोः स्थानपरिवर्त्तनमुच्यते।
आलानं प्राहुराणालं ततः प्राकृतकोविदाः ॥ २९ ॥

बृहस्पतौ बहोर्भऔ ॥ ३० ॥

मनोरमा

बृहस्पतिशब्दे बकारहकारयोर्यथासंख्यं भकार-अकारौ भवतः । भअप्फई ॥ ३० ॥

प्राकृतमञ्जरी

बहोर्हल्मात्रयोरुक्तो भआदेशो बृहस्पतौ।
बृहस्पतिमुशन्तीत्थं प्राकृतज्ञा भअप्फई॥३०॥

मलिने लिनोरिलौ वा॥३१॥

मनोरमा

मलिनशब्दे लिनोरिलौ वा भवतः। मइलं, मलिणं॥३१॥

प्राकृतमञ्जरी

मलिने स्यादिलादेशो विभाषालिनयोर्द्वयोः।
मलिनं मइलं विद्यात् पक्षे मलिणमेव वा॥३१॥

गृहे घरोऽपतौ॥३२॥

मनोरमा

गृहशब्दे घर इत्ययमादेशो भवति। पतिशब्दे परतो न भवति। घरं भवने। अपताविति किम्? गहवई॥३२॥

प्राकृतमञ्जरी

गृहस्य स्याद् घरादेशः परतस्त्वपतौ घरं।
पतिशब्दे परस्थे तु रूपं गहपई भवेत्॥३२॥

दाढादयो बहुलम्॥३३॥

मनोरमा

दाढा इत्येवमादयः शब्दा बहुलं निपात्यन्ते दंष्ट्रादिषु। दंष्ट्रा। दाढा। इदानीम्। एण्हिं। दुहिता। धीआ। धूदा। चातुर्य्यम्। चातुलिअं। मण्डूकः। मण्डुरो। गृहे निहितम्। घरे णिहितं। उत्पलम्। कन्दोट्टो। गोदावरी। गोला। ललाटम्। णिडालं। भूः। भूमआ। वैदुर्य्यम्। बेलुरिअं। उभयपार्श्वम्। अवहोवासं। चुतः। महिंदो। माअंदो। आदिशब्दोऽयं प्रकारे। तेन सर्व एव देशसंकेतप्रवृत्त-भाषाशब्दाः परिगृहीताः॥३३॥

प्राकृतमञ्जरी

दाढादयो निपात्यन्ते बहुलं प्राकृते पुनः।
दंष्ट्रादौ शब्दसन्दोहे सति लक्ष्येषु तद्यथा॥
दंष्ट्रा दाढा मता शक्तिः सित्ती भूर्भुमआ भवेत्।
गोदावरी स्मृता गोला दूआ च दुहिता मता॥
ललाटं च णिडालं स्यादुक्तं कन्दोट्टमुत्पलम्।
णिहेलं कथ्यते नीलं दोग्घट्टो वारणः स्मृतः॥
उभयं त्ववहं विद्यादिदानीमेण्हिमुच्यते।
वैदुर्यमपि शब्दज्ञैरुक्तं वेरुलिअं बुधैः॥
एषामपरिमेयत्वाद् दाढादीनां पदं प्रति।
न शक्या गणना वीचीर्गणयेत् को नु सागरे॥
विद्युद्भस्मादयः शब्दा प्रयोज्या नेह लक्षणात्।
तेषामर्थानुसारेण पदान्तरमुदाहरेत्॥
याः सर्वलोकसामान्याः संस्कृतानन्विता गिरः।
अट्ट-भट्ट-प्रभृतयस्ताश्चाप्यत्रैव दर्शयेत्॥
संस्कृतप्रकृतित्वेन ये न सिध्यन्ति केवलम्।
तेषां लक्ष्येषु शब्दानां दाढादित्वं विमृश्यताम्॥ ३३॥

॥ इति वररुचिकृते प्राकृतप्रकाशे संकीर्णविधिर्नाम चतुर्थः परिच्छेदः॥

"मो बिन्दुः", "मांसादिषु वा", "वक्रादिषु", "दाढादयो बहुलम्", "यावदादिषु वस्य", "अन्त्यस्य हलः", "न विद्युति"।

॥ अथ पञ्चमः परिच्छेदः ॥

❀❀❀

अत ओत् सोः ॥१॥

मनोरमा

अकारान्ताच्छब्दात् परस्य सोः स्थाने ओत्त्वं भवति। वच्छो। वसहो। पुरिसो। वृक्षः। वृषभः। पुरुषः ॥१॥

प्राकृतमञ्जरी

अकारस्य पदान्तस्य सति सौ परतः स्थिते।
भवत्योकार आदेशः कामः कामो कुशः कुसो ॥१॥

जश्शसोर्लोपः ॥२॥

मनोरमा

अत इत्यनुवर्त्तते। अकारान्तस्यानन्तरं यौ जश्शसौ तयोर्लोपो भवति। वच्छा सोहन्ति, वृक्षाः शोभन्ते। जश्शसुङस्यांसु दीर्घ इति दीर्घे कृते पश्चाल्लोपो जसः। वच्छे णिअच्छह, वृक्षान् नियच्छत। ए च सुपीति एत्वे कृते शसो लोपः ॥२॥

प्राकृतमञ्जरी

स्यात् पञ्चम्यत इत्यत्र जस्शसोः परयोस्ततः।
भवेल्लोपः पसीदन्तु देवा देवे णमस्सह ॥२॥

अतोऽमः ॥३॥

मनोरमा

अकारान्तस्यानन्तरं योऽम् द्वितीयैकवचनं तदकारस्य लोपो भवति। वच्छं ऐक्खइ। मो बिन्दुरिति बिन्दुः। वृक्षं प्रेक्षते ॥३॥

प्राकृतमञ्जरी

अमोऽकारस्य लोपः स्यादत उत्तरवर्त्तिनः।
वच्छं पेच्छेह वन्देह सूरं चन्दं णिअच्छह ॥३॥

टामोर्णः ॥४॥

मनोरमा

अतोऽनन्तरं टामोस्तृतीयैकवचन-षष्ठीबहुवचनयोर्णकारो भवति। **वच्छेण।** वच्छाण। ए च सुपीत्येत्वम्। जश्शसङस्यांसु दीर्घ इति दीर्घः ॥४॥

प्राकृतमञ्जरी

अतोऽनन्तरयोष्टामोर्णकारत्वं विधीयते।
हरेण मअणो दड्ढो आइच्चाण गणो अअं॥४॥

भिसो हिं ॥५॥

मनोरमा

अतोऽनन्तरं भिसो हिं भवति। वच्छेहिं। ए च सुपीत्येत्वम् ॥५॥

प्राकृतमञ्जरी

अतोऽनन्तरभूतस्य भिसो हित्वं विधीयते।
सुरेहि सोहिओ सग्गो गन्तब्बो सुकएहि जो॥५॥

ङसेरा-दो-दु-हयः ॥६॥

मनोरमा

अतोऽनन्तरं ङसेः पञ्चम्येकवचनस्य स्थाने आ दो दु हि इत्येत आदेशा भवन्ति। वच्छा। वच्छादो। वच्छादु। वच्छाहि। जश्शसङस्यांसु दीर्घः ॥६॥

प्राकृतमञ्जरी

ङसेश्चत्वार आदेशाः स्युरा दो दु हिरित्यमी।
आदो रुक्खा पलासादो असोआदु दुमाहि च॥६॥

भ्यसो हिन्तो सुन्तो ॥७॥

मनोरमा

अतोऽनन्तरस्य भ्यसो हिन्तो सुन्तो इत्येतावादेशौ भवतः। वच्छाहिन्तो। **वच्छासुन्तो।** ए च सुपीति चकारेण दीर्घत्वम् ॥७॥

प्राकृतमञ्जरी

हिन्तो भवति सुन्तो च भ्यसोऽतोऽनन्तरस्य तु।
आधोरणा गआहिन्तो मेहासुन्तो गआ पआ॥७॥

स्मो ङसः॥८॥

मनोरमा

अतोऽनन्तरस्य ङसः स्थाने स्म इत्यादेशो भवति। वच्छस्म॥८॥

प्राकृतमञ्जरी

परस्यातः सकारः स्याद् द्विरुक्तिविकटो ङसः।
देवदत्तस्म डित्थस्म डिवित्थस्म अ मन्दिरं॥८॥

ङेरे म्मि॥९॥

मनोरमा

अतोऽनन्तरस्य ङेः ए म्मि इत्येतावादेशौ भवतः। वच्छे। क्वचित् ङसिङ्योर्लोपः। वच्छम्मि॥९॥

प्राकृतमञ्जरी

ए स्याद् ङेरुत्तरस्यातो मिकारश्च द्विरुक्तिमान्।
णराअणे मिआ लोआ च्छप्पआ प्दुमम्मिव॥९॥

सुपः सुः॥१०॥

मनोरमा

अतोऽनन्तरस्य सुपः सु इत्यादेशो भवति। वच्छेसु। ए च सुपीत्येत्वम्॥१०॥

प्राकृतमञ्जरी

सुपोऽतोऽनन्तरस्थस्य सुकारादेश उच्यते।
सुअणेसु गुणा होन्ति रसिएसु रसा विअ॥१०॥

जश्शस्ङस्यांसु दीर्घः॥११॥

मनोरमा

जसादिषु परतोऽतो दीर्घो भवति। वच्छा सोहन्ति। जश्शसोर्लोप इति जसो लोपः। वच्छादो आगदो। वच्छादु। वच्छाहि। ङसेरादोदुहयः। वच्छाण। टामोर्णः॥११॥

प्राकृतमञ्जरी

परतो जसि दीर्घः स्याद् ङसावामि च तद्यथा ।
वच्छा सोहन्ति वच्छादु णेइ वच्छाण पत्तअं ॥११॥

ए च सुप्यङिङसोः ॥१२॥

मनोरमा

अतोऽकारस्य एत्वं भवति सुपि परतः ङिङसौ वर्जयित्वा । चकाराद् दीर्घश्च । वच्छे पेक्खह । जश्शसोर्लोपः । वच्छेण । टामोर्णः । वच्छेहिं । वच्छेसु । चकाराद्दीर्घश्चेति । वच्छाहिंतो । वच्छासुंतो । भ्यसो हिन्तो सुन्तो । अङिङसोरिति किम् ? वच्छम्मि । वच्छस्स ॥१२॥

प्राकृतमञ्जरी

अत्रैकवचनाज्जातो सुप्येत्वं परतो भवेत् ।
चकारादथ दीर्घश्च यत्रातो नेतरो विधिः॥
धम्मे रमेइ अत्थेण कामेण अ ण वंचिओ ।
मोक्खेसु जे पवट्टन्ति तिवग्गो तेहि वंचिओ ॥
रुक्खा हीणगुणा होन्ति जणासुन्तो अ कत्थतां ।
विमोहो विसआसुन्तो रमासुन्तो वि जो जणो ।
णमो तस्स करेम्मि त्ति वृत्तिः स्यादेत्वदीर्घयोः॥१२॥

क्वचिद् ङसिङ्योर्लोपः ॥१३॥

मनोरमा

अतो ङसि ङि इत्येतयोः परतः क्वचिल्लोपो भवति । वच्छा आगदो । ङसेरादोदुहयः । वच्छे ठिअं । ङेरेम्मीत्येत्वम् ॥१३॥

प्राकृतमञ्जरी

अकारस्य क्वचिल्लोपो ङसिङ्योः परतो भवेत् ।
अतो णइजलं मेहा चन्दे लसइ लच्छणं॥१३॥

'वच्छ'- शब्दः (संस्कृत वृक्ष)

	एकवचन	बहुवचन
कर्तृ	वच्छो	वच्छा
कर्म	वच्छं	वच्छे, वच्छा
करण	वच्छेण	वच्छेहिं, वच्छेहि
अपादान	वच्छादो, वच्छादु, वच्छाहि, वच्छा	वच्छाहिन्तो, वञ्छासुन्तो, वच्छेहिन्तो, वच्छेसुन्तो
सम्प्रदान, सम्बन्ध	वच्छस्स	वच्छाण, वच्छाणं
अधिकरण	वच्छे, वच्छम्मि	वच्छेसु, वच्छेसुं
सम्बोधन	वच्छ	वच्छा

इदुतोः शसो णो ॥१४॥

मनोरमा

इदुदन्तयोः शसो णो भवति। अग्गिणो पेक्खह। वाउणो पेक्ख ॥१४॥

प्राकृतमञ्जरी

उत्तरस्य शसो णत्वमिदुतोः स्यात् पदान्तयोः।
अग्गिणो परिजालेसु मुण लोएसु वाउणो ॥१४॥

ङसो वा ॥१५॥

मनोरमा

इदुदन्तयोर्ङसो वा णो भवति। अग्गिणो अग्गिस्स। वाउणो वाउस्स। अग्नेः। वायोः ॥१५॥

प्राकृतमञ्जरी

इदुतोरुत्तरस्थस्य सो वा णो विधीयते।
अग्गिणो अग्गओ जाला वाउणो वाअओ बलम् ॥१५॥

जशश्च ओ यूत्वम्॥१६॥

मनोरमा

इदुदन्तयोर्जस ओकारादेशो भवति। इदुतोश्च ई-ऊत्त्वं वा। चकाराण्णो च। अग्गीओ। वाऊओ। अग्गिणो। वाउणो। अग्नीन्। वायून्॥१६॥

जसश्च वा ओत्त्वम्॥१६क॥

प्राकृतमञ्जरी

इदुतोर्जस ओत्त्वं वा चकारेण ङसोऽपि वा।
इदुतोरप्यकारः स्यात् तदा णो न भवेद् यथा॥
अग्गओ अग्गिणो होन्ति वाअओ वाउणोऽथवा।
पक्षे चादन्तवद्भावादग्गी वाऊ च वा जसि॥१६॥

टा णा॥१७॥

मनोरमा

इदुदन्तयोष्टाविभक्तेर्णा इत्यादेशो भवति। अग्गिणा। वाउणा॥१७॥

प्राकृतमञ्जरी

टा इत्येतस्य णाभावः स्यात् परस्येदुतोः पुनः।
अग्गिणा वाउणा जाओ वण्हिणा विण्हुणा तथा॥१७॥

सुभिस्सुप्सु दीर्घः॥१८॥

मनोरमा

इदुदन्तयोः सु भिस् सुप् इत्येतेषु दीर्घो भवति। सु - अग्गी। वाऊ। भिस्– अग्गीहिं। वाऊहिं। सुप्– अग्गीसु। वाऊसु॥१८॥

प्राकृतमञ्जरी

सुभिस्सुप्स्विदुतोर्दीर्घः परतः स्यात् कई गुरू।
सुजसोः परतो दीर्घ इदुतोरयमीदृशः।
अग्गीहि सह वाऊहि कारिदाओ तथा भिसि।
मदो हत्थीसु चारुसु भाइ दीर्घस्तथा सुपि॥१८॥

अग्गिशब्दः (सं० अग्नि)

	एकवचन	बहुवचन
कर्त्तृ	अग्गी	अग्गीओ, अग्गिणो (अग्गओ)
कर्म	अग्गि	अग्गिणो, अग्गी
करण	अग्गिणा	अग्गीहिं, अग्गीहि
अपादान	अग्गीदो, अग्गीदु, अग्गीहि	अग्गीहिन्तो, अग्गीसुन्तो
सम्प्रदान, सम्बन्ध	अग्गिस्स, अग्गिणो (अग्गओ)	अग्गीणं, अग्गीण
अधिकरण	अग्गिम्मि	अग्गीसु, अग्गीसं
सम्बोधन	अग्गि	अग्गीओ, अग्गिणो

वाउशब्दः (सं० वायु)

	एकवचन	बहुवचन
कर्त्तृ	वाऊ	वाऊओ, वाउणो (वाअओ)
कर्म	वाउं	वाउणो, वाऊ
करण	वाउणा	वाऊहिं, वाऊहि
अपादान	वाऊदो, वाऊदु, वाऊहि,	वाऊहिन्तो, वाऊसुन्तो
सम्प्रदान, सम्बन्ध	वाउणो, वाउस्स (वाअओ)	वाउणं, वाऊण
अधिकरण	वाउम्मि	वाऊसु, वाऊसुं
सम्बोधन	वाउ	वाऊओ, वाउणो

स्त्रियां शस उदोतौ[1] ॥१९॥

मनोरमा

स्त्रियां वर्त्तमानस्य शस उत् ओत् इत्येतौ आदेशौ भवतः। मालाउ, मालाओ। णईउ, णईओ। वहूओ, वहूउ ॥१९॥

१. सूत्रस्यास्य प्राकृतमञ्जरीटीका नोपलभ्यते।

जसो वा ॥२०॥

मनोरमा

जसः स्त्रियामुत् ओत् इत्येतौ आदेशौ वा भवतः। पक्षे अदन्तवत्। मालाउ, मालाओ, माला ॥२०॥

प्राकृतमञ्जरी

उत्त्वमोत्त्वं च जायेते द्वावादेशौ जसः स्त्रियाम्।
सर्वेषामपि शब्दानामथवा स्याददन्तता॥
होन्ति मालाउ मालाओ पक्षे माला णइउ च।
णईओ च णई वा स्याद् वधूशब्दोऽपि तद्विधः॥२०॥

अमि ह्रस्वः॥२१॥

मनोरमा

अमि परतः स्त्रियां ह्रस्वो भवति। मालं। णइं। वहुं ॥२१॥

प्राकृतमञ्जरी

परतोऽमि स्त्रियां ह्रस्व उच्यते तद्यथा पुनः।
मालं गुम्फेसु पेच्छेसु णारिं कण्डुं विमुञ्चसु॥२१॥

टाङस्ङीनामिदेददातः॥२२॥

मनोरमा

टा ङस् ङि इत्येतेषां स्त्रियां इत् एत् अत् आत् इत्येते आदेशा भवन्ति। टा –णईइ। णईअ। णईआ। णईए अअं। ङस् –णईइ। णईए। णईअ। णईआ धणं। ङि– णईइ। णईए। णईअ। णईअ। णईआ ठिअं ॥२२॥

टाङसिङस्ङीनामिदुददादेतः ॥२२क॥

प्राकृतमञ्जरी

स्त्रियां टाङसिङस्ङीनां चतुर्णामविशेषतः।
उक्ता इदुददादेतः पञ्चादेशा इमे यथा॥

णईइ पूरिओ सिन्धू णईउ च णईअ च।
णईआ च णईए च वध्वामप्येवमेव हि॥२२क॥

नातोऽदातौ ॥२३॥

मनोरमा

आत आकारान्तस्य स्त्रीलिङ्गस्यानन्तरं टाङ्सुङीनाम् अत् आत् इत्येतावादेशौ न भवतः। पूर्वेण प्राप्तो निषिध्यते। मालाइ, माणाए। कअं। धणं। ठिअं ॥२३॥

प्राकृतमञ्जरी

आतः परावदातौ न भवतोऽन्ये त्रयः स्मृताः।
केसा मालाइ मालाउ मालाए वासिआ तुह॥२३॥

आदीतौ बहुलम् ॥२४॥

मनोरमा

स्त्रियामाकारान्तादातः स्थाने आत् ईत् इत्येतौ आदेशौ बहुलं प्रयोक्तव्यौ। सहमाणा। सहमाणी। हलद्दा। हलद्दी। सुप्पणहा। सुप्पणही। छाहा। छाही। सहमाना। हरिद्रा। सूर्पणखा। छाया ॥२४॥

प्राकृतमञ्जरी

आकारस्तद्वदीकारः स्त्रियां स्तो बहुलं ततः।
हसमाणा हसमाणी सामला सामली भवेत्॥२४॥

न नपुंसके[1] ॥२५॥

मनोरमा

प्रथमैकवचने नपुंसके न दीर्घत्वं भवति। सौ दीर्घः पूर्वस्येत्यनेन इदुदन्तयोः प्राप्तं पूर्वस्य दीर्घत्वं न नपुंसक इत्यनेन बाध्यते। दहिं। महुं। हविं। दधि। मधु। हविः ॥२५॥

इज्जश्शसोर्दीर्घश्च ॥२६॥

मनोरमा

नपुंसके वर्त्तमानयोर्जश्शसोः स्थाने इदादेशो भवति। पूर्वस्य च दीर्घः। वणाइ। दहीइ। महूइ। वनानि। दधीनि। मधूनि ॥२६॥

---

१. सूत्रस्यास्य प्राकृतमञ्जरीटीका नोपलभ्यते।

प्राकृतमञ्जरी

जशशसोर्मत इत्त्वं तत्सन्नियोगाद् नपुंसके।
तयोश्च परतो दीर्घः प्राग्वृत्तस्य भवत्यचः॥
वणाइ च दहीइ च महूइ च तथा पुनः।
परतो जशशसोरित्त्वं यत्र स्याद् बहुलं हि तत्॥२६॥

नामन्त्रणे सावोत्त्वदीर्घबिन्दवः॥२७॥

मनोरमा

आमन्त्रणे गम्यमाने सौ परत ओत्त्वदीर्घबिन्दवो न भवन्ति। अत ओत् सोरित्योत्त्वं प्राप्तम्। सुभिस्सुप्सु दीर्घ इति दीर्घः। सोर्बिन्दुर्नपुंसके इति बिन्दुः प्राप्तः। हे वच्छ। हे अग्गि। हे वण। हे वाउ। हे दहि। हे महु॥२७॥

प्राकृतमञ्जरी

स्फुरत्यामन्त्रणे न स्यादोत्त्वं सौ परतस्त्रिषु।
दीर्घबिन्दू च हे काम हे विलासिणि हे महु॥२७॥

स्त्रियामात एत्॥२८॥

मनोरमा

स्त्रियामातः स्थाने एत्त्वं भवति सौ परत आमन्त्रणे। हे माले। अन्त्यस्य हल इति सोर्लोपः॥२८॥

प्राकृतमञ्जरी

आमन्त्रणे भवत्येत्त्वमातः सौ परतः स्त्रियाम्।
हे माले महिले मुद्दे जाए बाले सिले तथा॥२८॥

ईदूतोर्ह्रस्वः॥२९॥

मनोरमा

स्त्रियामीदूतोर्ह्रस्वो भवति सौ परत आमन्त्रणे। हे णइ। हे वहु॥२९॥

प्राकृतमञ्जरी

ईदूतोः स्यात् स्त्रियां ह्रस्वः स्फुरत्यामन्त्रणे यथा।
हे णारि महि चाउंडि हे कण्डु वहु वीरसु॥२९॥

सोर्बिन्दुर्नपुंसके॥३०॥

मनोरमा

नपुंसके वर्त्तमानस्य सोर्बिन्दुर्भवति। वणं। दहिं। महुं॥३०॥

प्राकृतमञ्जरी

नपुंसके भवेद् यः सुस्तस्य बिन्दुर्विधीयते।
कुण्हं सुण्हं मुहं छत्तं णेत्तं वित्तं धणं वणं॥३०॥

ऋत आरः सुपि॥३१॥

मनोरमा

ऋकारान्तस्य सुपि परत आर इत्यादेशो भवति। भत्तारो सोहइ। भत्तारं पेक्खसु। भत्तारेण कअं॥३१॥

प्राकृतमञ्जरी

ऋतस्तावत् पदान्त्यस्य भवेदारः परे सुपि।
पुंसि प्रायेण भत्तारो कत्तारो तद् भविष्यति॥३१॥

मातुरात्॥३२॥

मनोरमा

मातृसम्बन्धिन ऋकारस्य आकारो भवति। माआ सोहइ। माअं पेक्खसु। माआए कअं॥३२॥

प्राकृतमञ्जरी

सम्बन्धार्था हि सा षष्ठी मातुरित्यत्र या भवेत्।
तत्सम्बन्धिन आत्त्वं स्यान्माआ मालादिवत् परम्॥३२॥

उर्जश्शसुटाङस्सुप्सु वा ॥ ३ ३ ॥

मनोरमा

जस्-शस्-टा-ङस्-सुप्सु परतः ऋकारस्य उकारादेशो भवति वा। जस् – भत्तुणो, भत्तारा। शस् – भत्तुणो, भत्तारे। टा – भत्तुणा, भत्तारेण। ङस् – भत्तणो, भत्तारस्स। सुप् – भत्तूसु, भत्तारेसु। आरादिः पूर्ववत् ॥३३॥

प्राकृतमञ्जरी

ऋत उत्त्वं भवेज्जश्शसुटाङसु परतो न वा।
भत्तुणो होन्ति भत्तू वा भत्तारा वा जसि क्रमात् ॥
भत्तुणो एहि भत्तू वा भत्तारो वा शसि स्मृताः।
भत्तुणा सहिदा बाला भत्तारेण तथैव हि ॥
भत्तुणो ङसि भत्तुस्स भत्तारस्स च वा भवेत्।
इष्यते भर्त्तुरित्त्वं वा तथा भवति भट्टिणो ॥ ३ ३ ॥

पितृ-भ्रातृ-जामातृणामरः ॥ ३ ४ ॥

मनोरमा

पित्रादीनां सुपि परतो ऋतोऽरो भवति। आरापवादः। पिअरं, विअरेण। भाअरं, भाअरेण। जामाअरं, जामाअरेण ॥३४॥

प्राकृतमञ्जरी

अरादेशः पितृ-भ्रातृ-जामातृणामृतो भवेत्।
पिअरो भाअरो तद्वदपि जामाअरो तथा ॥ ३४॥

आ च सौ ॥ ३ ५ ॥

मनोरमा

पित्रादीनामाकारो भवति सौ परे। चकारादरश्च। पिआ, पिअरो। भाआ, भाअरो। जामाआ, जामाअरो ॥३५॥

प्राकृतमञ्जरी

आत्त्वं सौ परतस्तेषां चकारात्तु भवेदरः।
पिआ च पिअरो भाआ भाअरो तादृशः परः ॥ ३ ५ ॥

राज्ञश्च ॥३६॥

मनोरमा

राजन्-शब्दस्य आ इत्यादेशो भवति सौ परतः। राआ ॥३६॥

प्राकृतमञ्जरी

परतः सौ भवत्यात्वं राज्ञोऽन्त्यस्य हलो लुकि।
सामर्थ्यात् स्यादकारस्य राजा राआ निगद्यते॥३६॥

आमन्त्रणे वा बिन्दुः॥३७॥

मनोरमा

राजन्-शब्दस्य आमन्त्रणे वा बिन्दुर्भवति। हे राअं। हे राअ ॥३७॥

प्राकृतमञ्जरी

आमन्त्रणे भवेद् राज्ञो बिन्दुः सौ परतो न वा।
दे राअं परिपालेसु महिं दे राअ वा भवेत्॥३७॥

जश्शस्ङसां णो॥३८॥

मनोरमा

राज्ञ उत्तरेषां जस् शस् ङस् इत्येतेषां णो इत्यादेशो भवति। राआणो पेक्खन्ति। राआणो तेक्खसु। राइणो पेक्खन्ति। राआणो पेक्खसु। राइणो धणं। रणो धणं ॥३८॥

प्राकृतमञ्जरी

राज्ञो जसुशसुङसां णोत्वं विकल्पेन विधीयते।
राआ वा होन्ति राआणो जसः कार्यं क्रमादिदम्॥
राआणे सेवए सेल्ला राआणो वा तथा शसि।
राइणो केरअं रज्जं रणो राअस्स वा ङसि॥३८॥

शस एत्[1] ॥३९॥

मनोरमा

राज्ञः परस्य शस् ए इत्यादेशो भवति वा। राए पेक्खसु। राआणो पेक्खसु ॥३९॥

---

१. सूत्रस्यास्य प्राकृतमञ्जरीटीका नोपलभ्यते।

आमोणं ॥ ४० ॥

मनोरमा

राज्ञ उत्तरस्य आमः षष्ठीबहुवचनस्य णं इत्यादेशो भवति । राआणं ॥४०॥

प्राकृतमञ्जरी

आमो विधीयते णत्वं राजन्-शब्दे तु नित्यवत् ।
राज्ञां भवति राआणं इत्याहुः शब्दकोविदाः ॥ ४० ॥

टाणा ॥ ४१ ॥

मनोरमा

राज्ञ उत्तरं तृतीयैकवचने णा इत्यादेशो भवति । राइणा ॥४१ ॥

प्राकृतमञ्जरी

राजनुशब्दस्य णाभावः टा इत्येतस्य कथ्यते ।
राज्ञा रक्षितमित्यर्थे रणा वा राइणाऽथवा ॥ ४१ ॥

ङसश्च द्वित्वं वाऽन्त्यलोपश्च ॥ ४२ ॥

मनोरमा

राज्ञ उत्तरस्य ङसादेशस्य टादेशस्य च वा विकल्पेन द्वित्वं भवति , अन्त्यस्य च लोपः । रणो । राइणो धणं । राइणा । रणा कअं ॥४२॥

प्राकृतमञ्जरी

ङसो द्वित्वं नलोपश्च चकारादोत्त्वमुच्यते ।
भवेद्राज्यमिदं रणो राणो वा जज्जमेव हि ॥ ४२ ॥

इदद्वित्वे ॥ ४३ ॥

मनोरमा

वेति निवृत्तम् । ङसादेशस्य टादेशस्य च अकृते द्वित्वे राज्ञ इत्त्वं भवति । राइणो । राइणा । कृते द्वित्वे तु इत्वं न भवत्येव । रणा । रण्णो ॥४३॥

प्राकृतमञ्जरी

द्वित्वाभावे भवेदित्त्वं जातु परं टाङसोः पुनः।
राइणा रक्खिआ भूमी राइणो केरआ मही॥४३॥

आ णोणमोरङसि॥४४॥

मनोरमा

णो-नमयोः परयोः राज्ञो जकारस्य आकारादेशो भवति। अङसि षष्ठ्येकवचने न भवति। राआणो पेक्खन्ति। राआणो पेक्खसु। राआण धणं। शेषमदन्तवत्। राज्जं। राएहिं। राआ। राआदो। राआदु। राआहि। राआहिन्तो। राआसुन्तो। राअम्मि। राए। राएसु। राएसुं ॥४४॥

प्राकृतमञ्जरी

परतो णोणयोरात्वमङस्यत्र विधीयते।
राआणो होन्ति राआणं रणो वा राइणो ङसि॥४४॥

आत्मनोऽप्पाणो वा॥४५॥

मनोरमा

आत्मन्शब्दस्य अप्पाण इत्यादेशो भवति वा। अप्पा। अप्पाणो ॥४५॥

प्राकृतमञ्जरी

आत्मनस्तु विकल्पेन अप्पणादेश उच्यते।
अप्पाणो पुनरत्ता वा स्यादप्पा वा यथाविधि॥४५॥

इत्त्व-द्वित्ववर्जं राजवदनादेशे॥४६॥

मनोरमा

आत्मनोऽनादेशे राजवत् कार्यं भवति। इत्त्व-द्वित्वे वर्जयित्वा। अप्पा, अप्पाणो। अप्पणा, अप्पणो। आत्मा। आत्मानः। आत्मना। आत्मनः ॥४६॥

प्राकृतमञ्जरी

अनादेशे भवेदित्त्वद्वित्ववर्जं च राजवत्।
अत्ता मोऽयं भवत्यप्पा स्यादादेशे तु वृक्षवत्॥४६॥

ब्रह्माद्या आत्मवत् ॥ ४७॥

मनोरमा

ब्रह्माद्याः शब्दा लक्ष्यानुसारेण आत्मवत् साधवो भवन्ति । बम्हा, बम्हाणो । जुवा, जुवाणो । अद्धा, अद्धाणो । ब्रह्मन् । युवन् । अध्वन् । एवमादयो लक्ष्यानुसारेण अनुगन्तव्याः ॥ ४७॥

प्राकृतमञ्जरी

ब्रह्मादयोऽपि शब्दाः स्युरात्मवद्रूपलक्षणे ।
ब्रह्मा बम्हा भवत्यूष्मा उम्हा तद्वद् युवा जुवा ॥ ४७॥

॥ इति वररुचिकृते प्राकृतप्रकाशे लिङ्गविभक्त्यादेशो नाम पञ्चमः परिच्छेदः ॥

वच्छा, वच्छे, अग्गिणो, वाउणो, अग्गोहि, वाऊहि, मालाइ, माला, णईहि, णईअ, णइए, मुत्तुणो, भत्तारे, राअं, अप्पाणो, अप्पाणे, जुवाणो, बम्हाणो ।

वच्छेहि, वच्छाहि; वच्छाण, वच्छेण; वाऊहिं, वाऊहि; वाऊ, वाउ; णईहिं, णईहि; वणं, वण; भाअराहि, भाअरेहि; अप्पणो, अप्पाणो; अप्पणा, अप्पाणा; अप्पाणेण, अप्पाणाण ।

(क) अत्ताए अज्जआ सआसं सन्देसेण पेसिदम्हि । ता जाव पविसिअ अज्जआ सआसं गच्छामि । एसा अज्जआ, हिअएण किंपि आलिहन्तो चिट्ठइ । ता जाव उवसप्पामि ।

(ख) तदो तेण दुट्ठहत्थिणा कलचलणरदणेहिं फुल्लणलिणिं विअ णअरिं उज्जइणिं अवगाहमाणेण, समासादिदो परिव्वाजओ तच्च परिब्भट्टदण्डकुण्डिआभाअणं सीअरेहिं, सिञ्चिअ, दन्तन्तरे क्खित्तं पेक्खिअ, पुणोवि उग्धट्ठं जणेण "हा ! परिववाजफो वावादीअदि त्ति" ।

अलं सम्भ्रमेण, शृणोतु तावदार्य्या ! ततो विच्छिन्नविसंष्ठुलशृङ्खलाकलापं दन्तान्तरपरिगृहीतं परिव्राजकमुद्वहन्तं तं प्रेक्ष्य कर्णपूरकेण मया, नहि नहि, आर्य्याया अन्नोपपुष्टेन दासेन, वामचरणेन द्यूतखेलकमुद्घुष्य उद्घुष्य, त्वरितमापणात् लौहदण्डं गृहीत्वा, आकारितः स दुष्टहस्ती ।

आहत्य सरोषं तं हस्तिनं विन्ध्यशैलशिखराभम् ।
मोचितो मया स दन्तान्तरसंस्थितः परिव्राजकः ॥

●

॥ अथ षष्ठः परिच्छेदः ॥

❀❀❀

सर्वादिर्जस एत्वम् ॥ १ ॥

मनोरमा

सर्वादिरुत्तरस्य जस एत्वं भवति । सव्वे । जे । ते । के । कदरे । सर्वे । ये । ते । कतरे ॥ १ ॥

प्राकृतमञ्जरी

सर्वादेः सर्वनाम्नः स्याज्जस एत्वं परस्य तु ।
सव्वे एक्के परे अणे के जे ते इअरे इमे ॥ १ ॥

ङेः स्सिं म्मि त्थाः ॥ २ ॥

मनोरमा

ङेः सप्तम्येकवचनस्य सर्वादिपरस्थितस्य स्थाने स्सिं म्मि त्थ इत्येत आदेशा भवन्ति । सव्वस्सिं, सव्वम्मि, सव्वत्थ । इअरस्सिं, इअरम्मि, इअरत्थ । सर्वस्मिन् । इतरस्मिन् ॥ २ ॥

प्राकृतमञ्जरी

उक्ता द्विभूताः स्सिंम्मित्थाः सर्वादेरुत्तरस्य ङेः ।
सव्वस्सिं पुनरणम्मि परत्थ च तथा तथा ॥ २ ॥

इदमेतत्कियत्तद्भ्यष्टा इणा वा ॥ ३ ॥

मनोरमा

इदम् एतद् किम् यद् तद् इत्येतेभ्यः टा इत्यतः स्थाने इणा इत्ययमादेशो वा भवति । इमिणा । एदिणा । किणा । जिणा । तिणा । पक्षे – इमेण । पदेण । केण । जेण । तेण ॥ ३ ॥

प्राकृतमञ्जरी

इणा स्यादिदमेतत् किं यत्तद्भ्यष्टः परस्य वा।
इमिणा एदिणा तद्वत् किणा भूयो जिणा तिणा॥
इमेण पुनरेदेण केण जेण च तेण च।
इत्येवं वा प्रयोक्तव्याः पञ्च स्युरिदमादयः॥३॥

आम एसिं॥४॥

मनोरमा

इदमादिभ्य उत्तरस्य आम एसिं इत्ययमादेशो भवति वा। इमेसिं, इमाण। एदेसिं, एदाण। केसिं, काण। जेसिं, जाण। तेसिं, ताण॥४॥

प्राकृतमञ्जरी

स्यादेसिमिदमादिभ्य आमः स्थाने विकल्पतः।
इमेसिं तद्वदन्येषु पक्षे स्याद् वृक्षशब्दवत्॥४॥

किंयत्तद्भ्यो ङस आसः॥५॥

मनोरमा

किं यत् तत् इत्येतेभ्य उत्तरस्य ङस आस इत्ययमादेशो भवति वा। कास, कस्स। जास, जस्स। तास, तस्स॥५॥

प्राकृतमञ्जरी

आस इत्ययमादेशः किंयत्तद्भ्यो ङसो भवेत्।
विभाषा कास वा कस्स जास तास तथापरौ॥५॥

ईद्भ्यः स्सा से॥६॥

मनोरमा

ईकारान्तेभ्यः किमादिभ्य उत्तरस्य ङसः स्सा से इत्येतावादेशौ वा भवतः। किस्सा, कीसे। कीआ। कीअ। कीए। कीइ। जिस्सा। जीसे। जीआ। जीअ। जीए। जीइ। तिस्सा। तीसे। तीअ। तीआ। तीए। तीइ॥६॥

प्राकृतमञ्जरी

ईतः स्सा से किमादिभ्यो ङसो वा भवति स्त्रियाम्।
किस्सा कीसेऽथवा तद्वत् पञ्च स्युरिदमादयः॥६॥

ङेर्हिं॥७॥

मनोरमा

किमादिभ्य उत्तरस्य ङेः हिं इत्ययमादेशो भवति वा। कहिं। कस्सिं। कम्मि। कत्थ। जहिं। जस्सिं। जम्मि। जत्थ। तहिं। तस्सिं। तम्मि। तत्थ॥७॥

प्राकृतमञ्जरी

हिं वा ङेः स्यात् किमादिभ्य उत्तरस्य कहिं जहिं।
तहिं पक्षे भवेत् कत्थ जम्मि तस्सिं तथा मतम्॥७॥

आहे इआ काले॥८॥

मनोरमा

किंयत्तद्भ्यो ङेः काले आहे इआ इत्यादेशौ वा भवतः। काहे। जाहे। ताहे। कइआ। जइआ। तइआ। कहिं इत्यादयोऽपि। कदा। यदा। तदा॥८॥

प्राकृतमञ्जरी

आहे इआ इतीमौ द्वौ काले वाच्ये मतौ च ङेः।
किमादिभ्यश्चकारेण ङेस्सिंम्मित्थास्तथैव च॥
काहे जाहे तथा ताहे कइआ जइआ पुनः।
तइआ कम्मि जस्सिं च तथा तद्वत् कहिं जहिं॥८॥

त्तो दो ङसेः॥९॥

मनोरमा

किंयत्तद्भ्यो ङसेः त्तो दो इत्यादेशौ भवतः। कत्तो, कदो, जत्तो, जदो। तत्तो। तदो। कस्मात्। यस्मात्। तस्मात्॥९॥

प्राकृतमञ्जरी

किमादिभ्य इह त्तो दो ङसेः स्यातामुभावपि।
कत्तो कदो जदो जत्तो तदो तत्तो भवेत् पुनः॥९॥

तद ओश्च ॥१०॥

मनोरमा

तद उत्तरस्य ङस ओकारादेशो भवति वा। तो, तत्तो, तदो ॥१०॥

प्राकृतमञ्जरी

तद ओत्त्वं ङसे ब्रूयात्तदः स्वेनाप्यचा सह।
तो तत्तो कइमं अग्गे इति लक्ष्ये प्रसिध्यति॥१०॥

ङसा से॥११॥

मनोरमा

वेति वर्त्तते। तदो। ङसा सह से इत्ययमादेशो भवति वा। पक्षे यथाप्राप्तम्। से। तास्। तस्स ॥११॥

प्राकृतमञ्जरी

तच्छब्दस्य ङसा सार्द्धं से-भाव इह वा भवेत्।
से धणं तास वा तस्स तथा लक्ष्येषु दृश्यताम्॥११॥

आमा सिं॥१२॥

मनोरमा

तद आमा सह सिं इत्यादेशो भवति वा। सिं। ताण। तेषाम्। तासाम् ॥१२॥

प्राकृतमञ्जरी

आमा सह सिमादेशस्तच्छब्दस्य विकल्पतः।
सिं वच्छाणं फलं पोप्फं पक्षे ताणमितीह वा॥१२॥

किमः कः॥१३॥

मनोरमा

किंशब्दस्य सुपि परतः क इत्ययमादेशो भवति। को। के। केण। केहिं ॥१३॥

प्राकृतमञ्जरी

परतः सुपि कादेशः किंशब्दस्य प्रयुज्यते।
स्वादीनां प्रकृतित्वेन को के कं कस्स कम्मि च॥१३॥

इदम इमः ॥१४॥

मनोरमा

सुपि परत इदम इम इत्यादेशो भवति । इमो । इमे । इमं । इमेण । इमेहिं ॥१४॥

प्राकृतमञ्जरी

इदमः परतः स्वादाविमादेशः प्रकीर्त्तितः।
इमो इमे इमेण च नेयमेवं परत्र च॥१४॥

स्सस्सिमोरद् वा ॥१५॥

मनोरमा

स्सस्सिमोः परत इदमोऽदादेशो वा भवति । अस्स, इमस्स । अस्सिं, इमस्सिं ॥१५॥

प्राकृतमञ्जरी

इदमः स्सस्सिमोरत्त्वं परतस्तु विकल्पतः।
अस्स रज्जं णओ अस्सिं इमस्सिमस्सिमेव वा॥१५॥

ङेर्देन हः ॥१६॥

मनोरमा

इदमो दकारेण सह ङेः स्थाने हकारादेशो भवति वा । इह । पक्षे इमस्सिं । इमम्मि ॥१६॥

प्राकृतमञ्जरी

इदमो ङेर्दकारेण सह हत्वं भवेन्न वा।
इह पक्षे भवेदस्सिं इमस्सिं वापि जायते॥१६॥

नत्थः ॥१७॥

मनोरमा

इदमः परस्य ङेः त्थ इत्ययमादेशो न भवति । ङेः स्सिं म्मित्था इति प्राप्ते प्रतिषिध्यते । इह । अस्सिं । इमस्सिं । इमम्मि ॥१७॥

प्राकृतमञ्जरी

ङेः सिंसम्मित्था इति प्राप्ते त्थादेशो नेदमो भवेत्।
इह ठाइ च अस्सिं वा इमस्सिं भवति त्रिधा॥१७॥

नपुंसके स्वमोरिदमिणमिणमो॥१८॥

मनोरमा

नपुंसकलिङ्गे इदमः स्वमोः परतः सविभक्तिकस्य – इदं इणं इणमो इत्येत आदेशा भवन्ति। इदं, इणं, इणमो धणं॥१८॥

प्राकृतमञ्जरी

परतः स्वमोरादेशा इदमः स्युर्नपुंसके।
इदं पुनरिणं चात्र तृतीय इणमो मतः॥
इदं धणं इदं कुण्डं इणमो वणमण्डलं।
प्रायोलोपापवादार्थमिदमित्यार्थिको विधिः॥१८॥

एतदः सावोत्वं वा॥१९॥

मनोरमा

एतच्छब्दस्य सौ परतः ओत्वं वा भवति। नित्ये प्राप्ते विकल्प्यते। एस। एसो। एषः॥१९॥

प्राकृतमञ्जरी

एतदः परतः सौ वा भवत्योत्वं तु तद्यथा।
एस गच्छइ राएसी एसो कुणइ साहसं॥१९॥

त्तो ङसेः॥२०॥

मनोरमा

एतदः परस्य ङसेः त्तो इत्यादेशो भवति वा। एत्तो। एदादो। एदादु। एदाहि। एतस्मात्॥२०॥

प्राकृतमञ्जरी

त्तो इत्येष द्विरुक्तः स्यादेतदो वा ङसेः पुनः।
एत्तो वा पुनरेआदो एआदु च तथा पुनः॥२०॥

त्तोत्थयोस्तलोपः ॥ २१ ॥

मनोरमा

एतदस्तकारस्य त्तोत्थयोः परतो लोपो भवति। एत्तो। एत्थ। एतस्मात्। एतस्मिन् ॥२१॥

प्राकृतमञ्जरी

त्तोत्थयोः परतो लोपस्तकारस्यैतदो भवेत्।
एत्तो एइ महाराओ इत्थ ठाअइ मण्डवे॥२१॥

तदेतदोः सः सावनपुंसके ॥ २२ ॥

मनोरमा

तच्छब्दस्य एतच्छब्दस्य च यस्तकारः, तस्य सकारादेशो भवति अनपुंसके सौ परतः। सो पुरिसो। सा महिला। एस। एसो। एसा। साविति किम्? पदे। ते। एदं। तं। अनपुंसक इति किम्? तं एदं धणं ॥२२॥

प्राकृतमञ्जरी

तदेतदोस्तकारस्य सादेशस्त्वनपुंसके ।
परतः सौ तु सो एसो तं एदं स्यान्नपुंसके॥२२॥

अदसो दो मुः ॥ २३ ॥

मनोरमा

अदसो दकारस्य सुपि परतो मु इत्यादेशो भवति। अमू पुरिसो। अमूओ पुरिसा। अमूओ महिलाओ। अमुं वणं। अमूइं वणाइं ॥२३॥

प्राकृतमञ्जरी

अदसस्तु दकारस्य मुत्वं स्यात् परतः सुपि।
अविशेषेण सर्वेषु लिङ्गेष्वपि च दृश्यताम्॥
अमू चन्दो अमू जोण्हा अमुं कुमुअमुज्जलं।
वायुशब्द-वधूशब्द-मधुशब्दा इव त्रिषु॥२३॥

हश्च सौ ॥२४॥

मनोरमा

अदसो दकारस्य सौ परतो हकारादेशो भवति। अह पुरिसो। अह महिला। अह वणं। हादेशोऽयमोत्त्वात्त्वबिन्दून् त्रिष्वपि लिङ्गेषु परत्वाद् बाधते ॥२४॥

प्राकृतमञ्जरी

दकारस्यादसो हत्वं परतः सौ भवेत् त्रिषु।
ओत्त्वादि बहुलं न स्यादह सेलोणईवणं॥२४॥

पदस्य ॥२५॥

मनोरमा

अधिकारोऽयम्। आशब्दविधानात्। यदित ऊर्ध्वमनुक्रमिष्यामः पदस्य तद् भवतीति वेदितव्यम्। तच्च तत्रैवोदाहरिष्यामः ॥२५॥

प्राकृतमञ्जरी

पदस्येत्यधिकारोऽयं द्विशब्दस्य विधेरधः।
वेदितव्यं पदस्येति यदितोऽनुक्रमिष्यते॥२५॥

युष्मदस्तं तुमं ॥२६॥

मनोरमा

सावित्येव। युष्मदः पदस्य सौ परतस्तं तुमं इत्येतौ आदेशौ भवतः। तं आगदो। तुमं आगदो ॥२६॥

प्राकृतमञ्जरी

स्यातां युष्मत्पदस्य द्वावादेशौ परतश्च सौ।
तं तुमं चेति तं होसि तुमं सोहसि चन्दमो॥२६॥

तुं चामि[1] ॥२७॥

मनोरमा

युष्मदः पदस्य अमि परतः तुं इत्यादेशो भवति। पक्षे तुमं च। तुं पेक्खामि। तुमं पेक्खामि ॥२७॥

---

१. सूत्रस्यास्य प्राकृतमञ्जरीटीका नोपलभ्यते।

तुज्झे तुम्हे जसि ॥२८॥

मनोरमा

युष्मदः पदस्य जसि परतः तुज्झे तुम्हे इत्यादेशौ भवतः। तुज्झे आगदा। तुम्हे आगदा ॥२८॥

प्राकृतमञ्जरी

तुज्झे तुम्हे इतीमौ द्वावादेशौ परतो जसि।
युष्मत्पदस्य तेन स्यात्तुज्झे तुम्हे णिअच्छहं॥२८॥

वो च शसि ॥२९॥

मनोरमा

शसि युष्मदः पदस्य वो इत्यादेशो भवति। चकारात् तुज्झे तुम्हे च। वो पेक्खामि। तुज्झे तुम्हे पेक्खामि ॥२९॥

प्राकृतमञ्जरी

परतः शसि वोभावः स्याच्चकारेण वो शसि।
आदेशौ तौ च वो एमि तुज्झे तुम्हे णमाम्महं॥२९॥

टाङ्योस्तइ तए तुमए तुमे ॥३०॥

मनोरमा

युष्मदुत्तरयोः टा ङि इत्येतयोः पदस्य तइ तए, तुमए तुमे इत्येत आदेशा भवन्ति। टा – तई, तए, तुमए, तुमे कअं। ङि – तइ, तए, तुमए, तुमे ठिअं ॥३०॥

प्राकृतमञ्जरी

युष्मदोः परतष्टाङ्योः सतोस्तइतए तुए।
तुमए चेति चत्वार आदेशाः स्युर्द्वयोरपि॥
तइ दिणं तए दिणं तुए च तुमए णअं।
तइ रज्जं तए चित्तं तुए च तुमए ठिअं॥३०॥

ङसि तुव-तुमो-तुह-तुज्झ-तुम्ह-तुम्माः ॥३१॥

मनोरमा

युष्मदः पदस्य एते आदेशा ङसि भवन्ति। तुमो। तुव। तुह। तुज्झ। तुम्ह। तुम्म एदं ॥३१॥

प्राकृतमञ्जरी

तुव-तुज्झ-तुमो-तुब्भ-तुह-तुम्हाः षडप्यमी।
ङसि युष्मत्पदस्य स्युस्तुव जाआ तथा परे॥३१॥

आङि च ते दे॥३२॥

मनोरमा

आङि तृतीयैकवचने युष्मदः पदस्य ते दे इत्येतावादेशौ भवतः। ते कअं। चकाराद् ङसि च। ते धणं। दे धणं॥३२॥

प्राकृतमञ्जरी

ते दे स्यातां तृतीयैकवचने चाद् ङसि स्मृतौ।
आङि ते दे कअं चित्तं ङसि ते दे वणं इणं॥३२॥

तुमाइ च॥३३॥

मनोरमा

आङि युष्मदः पदस्य तुमाइ इत्यादेशो भवति। तुमाइ कअं। योगविभागान्न ङसि॥३३॥

प्राकृतमञ्जरी

तुमाइ स्यात्तृतीयैकवचने सति युष्मदः।
त्वया घटितमित्यत्र, तुमाइ घड़िअं विदुः॥३३॥

तुज्झेहिं तुम्हेहिं तुम्मेहिं भिसि॥३४॥

मनोरमा

भिसि परतो युष्मदः पदस्य तुज्झेहिं तुम्हेहिं तुम्मेहिं इत्येत आदेशा भवन्ति। तुज्झेहिं, तुम्हेहिं, तुम्मेहिं कअं॥३४॥

प्राकृतमञ्जरी

तुज्झेहि भिसि तुम्हेहीत्यपि द्वौ युष्मदः स्मृतौ।
तुज्झेहि लिहिअं चित्तं तुम्हेहि कहिअं इणं॥३४॥

ङसौ तत्तो तइत्तो तुमादो तुमादु तुमाहि ॥ ३५॥

मनोरमा

ङसौ परतो युष्मदः पदस्य तत्तो तइत्तो तुमादो तुमादु तुमाहि इति पञ्च आदेशा भवन्ति। तत्तो आगदो। तइत्तो। तुमादो। तुमादु। तुमाहि आगदो। त्वदागतः ॥३५॥

प्राकृतमञ्जरी

ङसौ तत्तो तइत्तो च तुमादो च तुमादु च।
तुमाहीत्यपि पञ्च स्युरादेशा युष्मदः क्रमात्॥
तत्तो तइत्तो इत्यन्यदेवं रूपं निरूप्यताम्।
ग्रन्थबाहुल्यशङ्कातः सर्वेषां नोपदिष्यते॥ ३५॥

तुम्हाहिन्तो तुम्हासुन्तो भ्यसि ॥ ३६॥

मनोरमा

भ्यसि युष्मदः पदस्य तुम्हाहिन्तो तुम्हासुन्तो इत्येतावादेशौ भवतः ॥३६॥

प्राकृतमञ्जरी

तुम्हाहिन्तो भवेत् तद्वत् तुम्हासुन्तो अपि भ्यसि।
तुम्हाहिन्तो धणं लद्धं तुम्हासुन्तो विणिग्गओ॥ ३६॥

वो मे तुज्झाणं तुम्हाणमामि ॥ ३७॥

मनोरमा

आमि परतो युष्मदः पदस्य वो मे तुज्झाणं तुम्हाणं इति चत्वार आदेशा भवन्ति। वो धणं। मे धणं। तुज्झाणं धणं। तुम्हाणं धणं ॥३७॥

प्राकृतमञ्जरी

वो मे तुज्झाणं तुम्हाणमामि तु स्याच्चतुष्टयम्।
वो वा धणं मे धणं वा तुज्झाणं तुम्हाणं धणं॥ ३७॥

ङौ तुमम्मि तुमस्सिं ॥ ३८॥

मनोरमा

ङौ तुमम्मि तुमस्सिं इत्येतावादेशौ युष्मदः पदस्य भवतः। पूर्वोक्ताश्च तइ-प्रभृतयश्चत्वार आदेशा भवन्ति ॥३८॥

प्राकृतमञ्जरी

ङौ तुमस्सिं तुमम्मीति द्वावादेशौ च युष्मदः।
तुमस्सिं णिहिआ लच्छी तुमम्मि णिहिओ जओ॥३८॥

तुज्झेसु तुम्हेसु सुपि॥३९॥

मनोरमा

सुपि परतो युष्मदः पदस्य तुज्झेसु तुम्हेसु इत्यादेशौ भवतः। तुज्झेसु। तुम्हेसु ठिअं॥३९॥

प्राकृतमञ्जरी

युष्मत्पदस्य तुम्हेसु तुज्झेसु परतः सुपि।
तुम्हेसु संठिअं कज्जं तुज्झेसु ठिअमित्यपि॥३९॥

अस्मदोहमहमहअं सौ॥४०॥

मनोरमा

अस्मदः पदस्य सौ परतः हं अहं अहअं इत्येत आदेशा भवन्ति। हं, अहं, अहअं करेमि॥४०॥

प्राकृतमञ्जरी

हं अहं अहअं चेति त्रयोऽप्यस्मत्पदस्य सौ।
परतः स्युरिहादेशा हं अहं अहअं वणे॥४०॥

अहम्मिरमि च॥४१॥

मनोरमा

अमि परतोऽस्मदः पदस्य अहम्मि इत्यादेशो भवति। चकारात् सौ च। अहम्मि पेक्ख। अहम्मि करेमि॥४१॥

प्राकृतमञ्जरी

अमि सत्यस्मदोमि स्याच्चकारात् परतश्च सौ।
मि पेच्छेसु पिए ता मि होमि तज्झ पसाअओ॥४१॥

मं ममं ॥४२॥

मनोरमा

अमीति वर्त्तते। अस्मदः पदस्य अमि परतः मं ममं इत्यादेशौ भवतः। मं ममं पेक्ख ॥४२॥

प्राकृतमञ्जरी

आदेशौ मं ममं चेति तत्रापि परतः स्मृतौ।
अस्मत्पदस्य मं पेच्छ ममं पेच्छसु वल्लहे॥४२॥

अम्हे जश्शसोः॥४३॥

मनोरमा

अस्मदः पदस्य जश्शसोः परतः अम्हे इत्ययमादेशो भवति। अम्हे आगदा। अम्हे पेक्ख ॥४३॥

प्राकृतमञ्जरी

अम्हे इत्ययमादेशो जश्शसोः परयोर्भवेत्।
अस्मत्पदस्य तेन स्यादम्हे पेच्छाम पेच्छसु॥४३॥

णो शसि[1] ॥४४॥

मनोरमा

शसि परतोऽस्मदः पदस्य णो इत्ययमादेशो भवति। णो पेक्ख ॥४४॥

आङि मे ममाइ॥४५॥

मनोरमा

अस्मदः पदस्य आङि परतो मे ममाइ इत्यादेशौ भवतः। मे कअं। ममाइ कअं ॥४५॥

प्राकृतमञ्जरी

अस्मत्पदस्य सत्याङि भवेन्मे च ममाइ च।
मे किं विमणिअं कव्वं ममाइ लिहिअं च तं॥४५॥

---

१. एतत्सूत्रस्य प्राकृतमञ्जरीटीका नोपलभ्यते।

ङौ च मइ मए ॥४६॥

मनोरमा

अस्मदः पदस्य ङौ परतो मइ मए इत्यादेशौ भवतः। चकारात्तृतीयैकवचने च। मइ मए ठिअं। कअं वा ॥४६॥

प्राकृतमञ्जरी

ङौ चकाराच्च सत्याङि स्यातां मइ मए इति।
ऊढ़ो मइ मए कामो माणो मइ मए ठिओ॥४६॥

अम्हेहिं भिसि ॥४७॥

मनोरमा

भिसि परतोऽस्मदः पदस्य अम्हेहिं इत्यादेशो भवति। अम्हेहिं कअं ॥४७॥

प्राकृतमञ्जरी

आदेशो विहितः सोऽयमम्हेहीत्यस्मदो भिसि।
अम्हेहि रक्खिओ धम्मो कासारेहि रसो विअ॥४७॥

मत्तो मइत्तो ममादो ममादु ममाहि ङसौ ॥४८॥

मनोरमा

ङसौ परतोऽस्मदः पदस्य मत्तो मइत्तो ममादो ममादु ममाहि इत्येत आदेशा भवन्ति। मत्तो मइत्तो ममादो ममादु ममाहि आगदो ॥४८॥

प्राकृतमञ्जरी

ङसौ मत्तो मइत्तो च ममादो च ममादु च।
ममाहि चेति पञ्च स्युर्गओ मत्तो तथापरे॥४८॥

अम्हाहिन्तो अम्हासुन्तो भ्यसि ॥४९॥

मनोरमा

भ्यसि परतोऽस्मदः पदस्य अम्हाहिन्तो अम्हासुन्तो इत्येतावादेशौ भवतः। अम्हाहिन्तो अम्हासुन्तो आगदो ॥४९॥

प्राकृतमञ्जरी

अम्हाहिन्तो भवेत्तद्वदम्हासुन्तो अपि भ्यसि।
अम्हाहिन्तो गआ दोसा अम्हासुन्तो गओ गदो॥४९॥

मे मम मह मज्झ ङसि॥५०॥

मनोरमा

ङसि परतोऽस्मदः पदस्य मे मम मह मज्झ इत्येत आदेशा भवन्ति। मे। मम। मह। मज्झ धणं॥५०॥

प्राकृतमञ्जरी

अस्मत्पदस्य निर्दिष्टा आदेशा ङसि मे मम।
मह मज्झेति चत्वारो मे धणं त्ववरे तथा॥५०॥

मज्झ णो अम्ह अम्हाणमम्हे आमि॥५१॥

मनोरमा

आमि परतोऽस्मदः पदस्य मज्झ णो अम्ह अम्हाणं अम्हे इत्येत आदेशा भवन्ति। मज्झ णो अम्ह अम्हाणं अम्हे धणं॥५१॥

प्राकृतमञ्जरी

आमि णो अम्ह अम्हाणमम्हे इत्यस्मदः स्मृताः।
आदेशा इह चत्वारो णो धणं तादृशाः परे॥५१॥

ङौ ममम्मि ममस्सिं॥५२॥

मनोरमा

ङौ परतोऽस्मदः पदस्य ममम्मि ममस्सिं इत्येतावादेशौ भवतः। पूर्वोक्तौ मइ मए इत्येतौ च। ममम्मि ममस्सिं ठिअं॥५२॥

प्राकृतमञ्जरी

ङौ ममस्सिं ममम्मीति द्वावादेशाविहास्मदः।
ममस्सिं णिहिअं दुक्खं ममम्मि पडिअं सुहं॥५२॥

अम्हेसु सुपि ॥ ५३ ॥

मनोरमा

सुपि परतोऽस्मदः पदस्य अम्हेसु इत्यादेशो भवति। अम्हेसु ठिअं ॥५३॥

प्राकृतमञ्जरी

आदेशोऽस्मत्पदस्य स्यादम्हेसु परतः सुपि।
अम्हेसु लग्गए दिट्ठी पुप्फेसु भमरिव्वसे ॥ ५३ ॥

द्वेर्दो ॥ ५४ ॥

मनोरमा

पदस्येति निवृत्तम्। सुपीति वर्त्तते। द्विशब्दस्य सुपि परतो दो इत्यादेशो भवति दोहिं। दोसु ॥५४॥

प्राकृतमञ्जरी

पदस्येति निवृत्तं तद् द्वेर्दोत्वं स्यात् सुबुद्गमे।
दो जणा दोहि णिप्फण्णं ठिअं दोसु तथा परे ॥ ५४ ॥

त्रेस्तिः ॥ ५५ ॥

मनोरमा

त्रिशब्दस्य सुपि परतः ति इत्यादेशो भवति। तीहि। तीसु ॥५५॥

प्राकृतमञ्जरी

स्वाद्युत्पत्तौ त्रिशब्दस्य तिरादेशो विधीयते।
तिगुणा तीहि णिक्कन्तं तीसुन्तो तीसु राअइ ॥ ५५ ॥

तिण्णि जश्शस्भ्याम् ॥ ५६ ॥

मनोरमा

त्रिशब्दस्य जश्शस्भ्यां सह तिण्णि इत्यादेशो भवति। तिण्णि आगदा तिण्णि पेक्ख ॥५६॥

प्राकृतमञ्जरी

तिण्णिरित्ययमादेशस्त्रेर्जश्शस्भ्यां सह स्मृतः।
तिण्णि सोहन्ति राआणो तिण्णि पेच्छसु वल्लहे ॥ ५६ ॥

द्वेर्दुवे दोणि वा ॥५७॥

मनोरमा

द्विशब्दस्य जश्शस्भ्यां सह दुवे दोणि इत्येतावादेशौ भवतः। दुवे कुणन्ति, दोणि कुणन्ति। पक्षे दो कुणन्ति। द्वौ कुरुतः। दुवे पेक्ख, दोणि पेक्ख। पक्षे दो पेक्ख। द्वौ प्रेक्षस्व ॥५७॥

प्राकृतमञ्जरी

द्वेरुक्तः सह जश्शस्भ्यां दुवे दोणीत्युभावपि।
दुवे दोणि गुणादो वा दुवे दोणि पिअच्छसु ॥५७॥

चतुरश्चत्तारो चत्तारि ॥५८॥

मनोरमा

चतुःशब्दस्य जश्शस्भ्यां सह चत्तारो चत्तारि इत्यादेशौ भवतः। चत्तारो, चत्तारि पुरिसा। चत्तारो, चत्तारि पुरिसे ॥५८॥

प्राकृतमञ्जरी

चतुश्शब्दस्य चत्तारो चत्तारीति द्वयं भवेत्।
जश्शस्भ्यां सह चत्तारो होन्ति चत्तारि पेच्छसु ॥५८॥

एषामामो ण्हं ॥५९॥

मनोरमा

एषां हि त्रिचतुःशब्दानामामः स्थाने ण्हं इत्यादेशो भवति। दोण्हं, तिण्हं, चतुण्हं धणं ॥५९॥

प्राकृतमञ्जरी

द्वेस्त्रेश्च चतुरश्चेति त्रयाणामविशेषतः।
आमो ण्हादेश उक्तस्तद्दोण्हं तिण्हं चउण्हं च ॥५९॥

शेषोऽदन्तवत् ॥६०॥

मनोरमा

शेषः सुब्विधिरदन्तवद् भवति। अकारान्ताद्भिसो हिं इत्यादेश उक्त इकारान्तादपि भवति। अग्गीहिं। मालाहिं। वाऊहिं। दोहिं। तीहिं। चऊहिं ॥६०॥

प्राकृतमञ्जरी

यस्मात् सुपोऽनदन्तत्वान्नोक्तः शब्दादसौ पुनः।
अदन्तवद् भवेत् पूर्वविधानस्याविरोधतः॥
अग्गी अग्गीहि अग्गीदो वाऊसु च कइम्मि च।
मालाहिं च वहूहिं च द्रष्टव्यं धीमताखिलम्॥६०॥

न ङिङस्योरेदातौ॥६१॥

मनोरमा

इकारोकारान्तानां ङिङस्योरदन्तवद् एकाराकारौ न भवतः। अग्गिम्मि। वाउम्मि। अग्गीदो। वाऊदो। न तु अग्गिआ॥६१॥

प्राकृतमञ्जरी

अदन्तत्वेऽनदन्तानामादेतौ न ङसौ न ङौ।
ङसावग्गीदु वाऊदो ङौ कविम्मि महुम्मि च॥६१॥

ए भ्यसि॥६२॥

मनोरमा

नेत्यनुवर्त्तते। इकारोकारान्तानामदन्तवद्भ्यसि एकारो न भवति। अग्गीहिन्तो। अग्गीसुन्तो। न तु अग्गिए हिन्तो॥६२॥

प्राकृतमञ्जरी

भ्यस्येत्त्वमनदन्तानां न भवेद् नाप्यदन्तता।
अग्गीहिन्तो अग्गीसुन्तो वहूहिन्तो तथा परे॥६२॥

द्विवचनस्य बहुवचनम्॥६३॥

मनोरमा

प्राकृते द्विवचनस्य बहुवचनं भवति। वच्छा चिट्ठन्ति, वृक्षौ तिष्ठतः॥६३॥

प्राकृतमञ्जरी

भवेद् द्वित्वे बहुत्वं च सर्वशब्दप्रवृत्तिषु।
दोहि वाहूहि वेढन्ति दम्पईहा परोप्फरं॥६३॥

चतुर्थ्याः षष्ठी ॥६४॥

मनोरमा

प्राकृते चतुर्थ्याः स्थाने षष्ठी भवति। वम्हणस्स देहि, बम्हणाण देहि, ब्राह्मणाय देहि, ब्राह्मणेभ्यो देहि ॥६४॥

प्राकृतमञ्जरी

चतुर्थ्याः सर्वशब्देषु षष्ठ्यादेशः प्रयुज्यते।
सोत्थि गोबम्हणाणं च णमो हरिहराण च॥६४॥

॥ इति वररुचिकृते प्राकृतप्रकाशे सर्वनामविधिर्नाम षष्ठः परिच्छेदः॥

॥ अथ सप्तमः परिच्छेदः ॥

❀❀❀

ततिपोरिदेतौ ॥ १ ॥

मनोरमा

त तिप् इत्येतयोः स्थाने इत्, एत् इत्येतावादेशौ भवतः । पढइ, पढए । सहइ, सहए । पठति, पठते । सहति, सहते ॥ १ ॥

प्राकृतमञ्जरी

ततिपोरित्त्वमेत्त्वं च प्रत्येकं भवतस्तिङोः ।
सहइ सहए द्वेधा तथा भासइ भासए ॥ १ ॥

थास्सिपोः सि से ॥ २ ॥

मनोरमा

थास् सिप् इत्येतयोरेकैकस्य स्थाने सि से इत्येतावादेशौ भवतः । पढसि, पढसे । सहसि, सहसे ॥ २ ॥

प्राकृतमञ्जरी

सिपस्थासश्च निर्दिष्टौ द्वावादेशौ तथा सि से ।
पढसे पढसीत्येव तथा वड्ढसि वड्ढसे ॥ २ ॥

इट्-मिपोर्मिः ॥ ३ ॥

मनोरमा

इट् मिप् इत्येतयोः स्थाने मिर्भवति । पढामि । हसामि ॥ ३ ॥

प्राकृतमञ्जरी

इट्-मिपोरुभयोरेको मिकारादेश उच्यते ।
तुवरामि चिराआमि पवड्ढामि पढामि च ॥ ३ ॥

न्तिहेत्था मोमुमा बहुषु ॥४॥

मनोरमा

बहुषु वर्त्तमानानां तिङां स्थाने न्ति ह इत्था मो मु म इत्येत आदेशा भवन्ति। प्रथमपुरुषषस्य – रमन्ति। मध्यमपुरुषस्य – रमह, पढ़ित्था। उत्तमपुरुषस्य – पढ़ामो। पढ़ामु। पढ़ाम ॥४॥

प्राकृतमञ्जरी

बहुषु न्ति ह इत्था मो मु म इत्येते क्रमात् त्रिषु।
प्रथमे त्वेक एव द्वौ मध्यमेऽथोत्तमे त्रयः॥
प्रथमे होन्ति वड्ढन्ति मध्यमे होह वड्ढथ।
उत्तमे सुणिमो होमु तुवराम वसाम च॥४॥

अत ए से ॥५॥

मनोरमा

नित्यार्थं वचनं यतो विशेषणम्। ततिपोः सिप्थासोः ए से इत्येतावादेशौ अत एव परौ भवतः, नान्यस्मात्। ततिपोः– रमए, पढए। सिप्थासोः– रमसे, पढसे। अत इति किम्? होइ ॥५॥

प्राकृतमञ्जरी

ततिपोरपि सिप्थासोरेत्वं सेत्वं च ये मते।
अतोऽन्तरमेवैतौ निषिध्येते ततोऽन्यतः॥
पढ़य हसए पक्षे पढ़ेइ च हसेइ च।
णेइ होइ तथा देइ प्रतिषेधफलं त्विदम्॥५॥

अस्तेर्लोपः ॥६॥

मनोरमा

अस्तेर्धातोः थास्सिपोरादेशयोः परतो लोपो भवति। सुत्तो सि। पुरिसो सि। सुप्ताऽसि। पुरुषोऽसि ॥६॥

प्राकृतमञ्जरी

सिपूथासोरनुवृत्त्या सिप्यस्तेर्लोपो विधीयते।
तत् परस्मैपदित्वेन सन्तो सि पुरिसो सि च॥६॥

मिमोमुमानामधो हश्च॥७॥

मनोरमा

मि-मो-मु-मानामस्तेः परेषामधो हकारः प्रयोक्तव्यः। अस्तेश्च लोपः। गओम्हि। गअम्हो। गअम्हु। गअम्ह। गतोऽस्मि। गताः स्मः॥७॥

प्राकृतमञ्जरी

अधो मिमोमुमानां हः स्यादस्तेर्लुक् च पूर्ववत्।
आगओम्हि णिसिद्धम्हो णिसिद्धम्हु गअम्ह च॥७॥

यक ईअ इज्जौ॥८॥

मनोरमा

यकः स्थाने ईअ इज्ज इत्येतावादेशौ भवतः। पढ़ीअइ, पढ़िज्जई। सहीअइ, सहिज्जइ। पठ्यते। सह्यते॥८॥

प्राकृतमञ्जरी

ईअ इज्ज इतीमौ द्वौ प्रत्ययस्य यकः स्मृतौ।
हसीअइ गणिज्जइ सहीअसि गणिज्जसि॥८॥

नान्त्यद्वित्वे॥९॥

मनोरमा

धातोरन्त्यद्वित्वे सति यक ईअ इज्ज इत्यादेशौ न भवतः। हस्सइ। गम्मइ। हस्यते। गम्यते। गमादीनां विकल्पेन द्वित्वविधानाद् द्वित्वविधान उक्तावादेशौ न भवतः, द्वित्वाविधाने तु भवत एव। गमीअइ। गमिज्जइ॥९॥

प्राकृतमञ्जरी

यदान्त्यस्य भवेद् द्वित्वं धातोर्नमौ तदा स्मृतौ।
प्रतिषेधफलं त्वेतद् यथा हस्सइ गम्मइ॥९॥

न्तमाणौ शतृशानचोः ॥१०॥

मनोरमा

शतृ शानच् इत्येतयोरेकैकस्य स्थाने न्त माण इत्येतावादेशौ भवतः। पढ़न्तो, पढ़माणो। हसन्तो, हसमाणो ॥१०॥

प्राकृतमञ्जरी

शतुश्च शानचश्चैव न्तमाणो भवतो द्वयोः।
वट्टन्तो हसमाणो च तुवरन्तमिति त्रिषु॥१०॥

ई च स्त्रियाम् ॥११॥

मनोरमा

स्त्रियां वर्त्तमानयोः शतृशानचोरीकारादेशो भवति। पक्षे न्तमाणौ च। हसई, हसन्ती, हसमाणा। वेवई, वेवन्ती, वेवमाणा। हसन्ती। वेपमाना ॥११॥

प्राकृतमञ्जरी

स्त्रियामी च न्तमाणौ च भवन्ति शतृशानचोः।
वसई च रमन्ती च णच्चमाणा च रोहई॥११॥

धातोर्भविष्यति हिः॥१२॥

मनोरमा

भविष्यति काले धातोः परो हिशब्दः प्रयोक्तव्यः। होहिइ। हसिहिइ। होहिन्ति। हसिहिन्ति। भविष्यति। हसिष्यति। भविष्यन्ति। हसिष्यन्ति ॥१२॥

प्राकृतमञ्जरी

धातोः परो हिकारः स्यात् काले वाच्ये भविष्यति।
सन्तो होहिइ होहिन्ति तथा होहिसि होहिमि॥१२॥

उत्तमे स्सा हा च॥१३॥

मनोरमा

भविष्यत्युत्तमे स्सा हा इत्येतावादेशौ प्रयोक्तव्यौ। चकाराद् हिश्च। होस्सामि, होहामि, होहिमि। होस्सामो, होहामो, होहिमो। होस्सामु, होहामु। होहिमु, इत्येवमादयः। भविष्यामि। भविष्यामः ॥१३॥

प्राकृतमञ्जरी

भविष्यत्युत्तमे स्सा हा मतौ हिश्च चकारतः।
ततो होस्सामि होहामो तथा होहिमि होहिमु॥१३॥

मिना स्सं वा॥१४॥

मनोरमा

भविष्यत्युत्तमे मिना सह धातोः परः स्सं शब्दः प्रयोक्तव्यो वा। होस्सं। पक्षे होस्मामि। होहामि। होहिमि। भविष्यामि॥१४॥

प्राकृतमञ्जरी

भविष्यत्युत्तमे गम्ये स्सं मतं वा मिना सह।
होहिस्सं होहिमीत्येतदिच्छातः कथ्यते बुधैः॥१४॥

मोमुमैर्हिस्सा हित्था॥१५॥

मनोरमा

भविष्यति काले उत्तमे बहुवचनादेशस्य मोमुम इत्येतैः सह हिस्सा हित्था इत्यादेशौ वा भवतः। होहिस्सा। होहित्था। हसिहिस्सा। हसिहित्था। भविष्यामः। हसिष्यामः। पक्षे। होहिमो। होस्सामो। होहामो। हसिहिमो। हसिस्सामो। हसिहामो। एवं मुमयोरपि॥१५॥

प्राकृतमञ्जरी

मोमुमैस्सह हिस्सा च हित्था च भवतो न वा।
होहिस्सा वाऽथ होहित्था होहिमो वाऽथ होहिमु॥१५॥

कृदाश्रु-वचि-गमि-रुदि-दृशि-विदि-रूपाणां काहं दाहं सोच्छं वोच्छं गच्छं रोच्छं दच्छं वोच्छं॥१६॥

मनोरमा

भविष्यति काले उत्तमैकवचने कृञादीनां स्थाने यथासंख्यं काहं प्रभृतय आदेशा भवन्ति। काहं, करिष्यामि। दाहं, दास्यामि। सोच्छं, श्रोष्यामि। वोच्छं, वक्ष्यामि। गच्छं, गमिष्यामि। रोच्छं, रुदिष्यामि। दच्छं, द्रक्ष्यामि। वोच्छं, वेत्स्यामि॥१६॥

(कृ-दा-श्रु-वचि-गमि-रुचि-दृशि-रूपाणां काहं दाहं सोच्छं वोच्छं गच्छं रोच्छं दच्छमः ॥ १६ ॥)

प्राकृतमञ्जरी

कृदाश्रूणां वचेश्चैव गमेस्तद्वद्रुदेर्दृशः ।
सप्तानां समरूपाणामप्येकस्मिन् भविष्यति ॥
काहं दाहं तथा सोच्छं वोच्छं गच्छं तथैव च ।
रोच्छं दच्छं च रूपेण मोच्छं भोच्छं च कीर्त्तिताः ॥
करिष्यामीति काहं स्यात् तथोह्यन्तां परेऽपि च ।
मोक्ष्यामीति सरूपत्वं रूपशब्देन कथ्यते ॥
भविष्यत्युत्तमे ह्येते तत्राप्येकत्व एव च ॥ १६ ॥

श्रुवादीनां त्रिष्वप्यनुस्वारवर्जं हिलोपश्च ॥ १७ ॥

मनोरमा

श्रु इत्येवमादीनां प्रथममध्यमोत्तमेषु त्रिष्वपि पुरुषेषु भविष्यति काले सोच्छं इत्यादय आदेशा भवन्ति । अनुस्वारं विहाय । हिलोपश्च वा । सोच्छिइ । सोच्छिहिइ । श्रोष्यति । सोच्छिन्ति । सोच्छिहिन्ति । श्रोष्यन्ति । सोच्छिसि । सोच्छिहिसि । श्रोष्यसि । सोच्छित्था । सोच्छिहित्था । श्रोष्यथ । सोच्छिमि । सोच्छिहिमि । श्रोष्यामि । सोच्छिमो । सोच्छिहिमो । सोच्छिमु । सोच्छिहिमु । सोच्छिमि । सोच्छिहिमि । श्रोष्यामि । सोच्छिमो । सोच्छिहिमो । सोच्छिमु । सोच्छिहिमु । सोच्छिम । सोच्छिहिम । सोच्छिस्सामो । सोच्छिस्सामु । सोच्छिस्साम । सोच्छिहामो । सोच्छिहामु । सोच्छिहाम । श्रोष्यामः । एवं वोच्छादिरपि ॥ १७ ॥

प्राकृतमञ्जरी

श्रुवादीनां पुरादेशास्त्रिषु स्युः पुरुषेषु वा ।
वर्जयित्वाऽप्यनुस्वारं हिलोपश्च तथा भवेत् ॥
सोच्छइ स्यात् तथान्येषु ततः सोच्छहिसीति वा ।
एवं सोच्छेमि तद्वत् ते स्युरेकत्वबहुत्वयोः ।
उदाहार्यं तथा सोच्छिहिन्ति सोच्छिन्ति दृश्यताम् ॥ १७ ॥

उ सु मु विध्यादिष्वेकवचने ॥१८॥

मनोरमा

विध्यादिष्वेकस्मिन्नुत्पन्नस्य प्रत्ययस्य यथासंख्यम् उ सु मु इत्येत आदेशा भवन्ति। हसउ। हससु। हसमु। हसतु। हस। हसानि ॥१८॥

प्राकृतमञ्जरी

उः सुर्मुश्च त्रयः प्रोक्ता एकस्मिन् वचने त्रिषु।
विध्यादिषु तथार्थेषु होउ होसु च होमु च॥१८॥

न्तु ह मो बहुषु ॥१९॥

मनोरमा

विध्यादिषु बहुषु उत्पन्नस्य प्रत्ययस्य यथासंख्यं न्तु ह मो इत्येत आदेशा भवन्ति। हसन्तु। हसह। हसामो। हसन्तु। हसथ। हसाम ॥१९॥

प्राकृतमञ्जरी

बहुत्वे सति तेष्वेव न्तु ह मो इत्यमी स्मृताः।
वट्टन्तु पडिवालेह वसामो णिअमन्दिरे ॥१९॥

वर्तमानभविष्यदनद्यतनयोर्ज्ज ज्जा वा॥२०॥

मनोरमा

वर्त्तमाने भविष्यदनद्यतने विध्यादिषु चोत्पन्नस्य प्रत्ययस्य ज्ज ज्जा इत्येतावादेशौ वा भवतः। पक्षे यथाप्राप्तम्। वर्त्तमाने तावत्–होज्ज, होज्जा। हसेज्ज, हसेज्जा। पक्षे–होइ, हसइ। भविष्यदनद्यतने– होज्ज, होज्जा। पक्षे – होहिइ इत्यादयः। विध्यादिष्वेवम् ॥२०॥

प्राकृतमञ्जरी

वर्त्तमाने मतौ ज्ज ज्जा कालेऽनद्यतनेऽपि च।
भविष्यल्लक्षणे नो वा विध्यादिषु चकारतः॥
होइ होज्ज तथा होज्जा होहिईत्वत्र चेद्दृशौ।
विध्यादिष्वपि चैकस्मिन् प्रथमे दृश्यते ध्रुवम्॥२०॥

मध्ये च[1] ॥२१॥

मनोरमा

वर्त्तमानभविष्यदनद्यतनयोर्विध्यादिषु च धातुप्रत्यययोर्मध्ये ज्ज ज्जा इत्येतावादेशौ वा भवतः। वर्त्तमाने– होज्जइ, होज्जाइ। पक्षे यथाप्राप्तम्। विध्यादिषु- होज्जउ। होज्जाउ। इत्येवमन्यत्रापि ॥२१॥

नानेकाचः ॥२२॥

मनोरमा

वर्त्तमानभविष्यदनद्यतनयोर्विध्यादिषु चानेकाचो धातोः प्रत्यये परे मध्ये ज्ज ज्जा इत्येतौ न भवतः, किन्तु अन्त एव भवतः। हसइ। तुवरइ। अन्ते यथा हसेज्ज, हसेज्जा। एवमन्येऽप्युदाहर्त्तव्याः ॥२२॥

प्राकृतमञ्जरी

अनेकाचश्च धातोर्न ज्ज ज्जा स्यातामिहोत्तरौ।
हसेइ तं हसिहिइ हसेउ च तथा तथा॥२२॥

ईअ भूते ॥२३॥

भूते काले धातोः प्रत्ययस्य ईअ इत्ययमादेशो भवति। हूवीअ। हसीअ। अभवत्। अहसत् ॥२३॥

प्राकृतमञ्जरी

ईअ इत्ययमादेशो भूतार्थे च विधीयते।
हूवीअ परिवालीअ पुढविं जेट्ठपण्डवो॥२३॥

एकाचो हीअ ॥२४॥

मनोरमा

भूते काले एकाचो धातोः प्रत्ययस्य हीअ इत्यादेशो भवति। होहीअ। अभूत् ॥२४॥

प्राकृतमञ्जरी

हीअ स्यात् पुनरेकाचो होहीअ च तथा परे।
एकस्मिन् प्रथमे पुंसि दृश्यतेऽन्यत्र चेद्भवेत्॥२४॥

---

१. सूत्रस्यास्य प्राकृतमञ्जरीटीका नोपलभ्यते।

अस्तेरासिः ॥ २५॥

मनोरमा

अस्तेर्भूते काले एकस्मिन्नर्थे आसि इति निपात्यते। आसि राआ; आसि वहू। आसीद् राजा। आसीद् वधूः ॥२५॥

प्राकृतमञ्जरी

अस्तेर्धातोर्भवेद् भूते काले लक्ष्येषु दृश्यताम्।
आसी इत्ययमादेश आसी राआ जहुट्ठिलो ॥ २५॥

णिच एदादेरत आत् ॥ २६॥

मनोरमा

णिच्प्रत्ययस्य एकारादेशो भवति। धातोरादेरकारस्य च आत्त्वं भवति। कारेइ। हासेइ। पाढ़ेइ। कारयति। हासयति। पाठयति ॥२६॥

प्राकृतमञ्जरी

णिच एत्वं भवेदादेरात्त्वं चात्र विधीयते।
कारेइ परिहासेइ सन्तारेइ तथा तथा॥
अत आ मिपि वेत्यस्मादतोऽधिक्रियतामिति।
सिंहावलोकनन्यायाद् न स्यादात्त्वं तथा हलाम्॥ २६॥

आवे च ॥ २७॥

मनोरमा

णिच आवे इत्यादेशो भवति। चकारत् पूर्वोक्तं च। करावेइ। हसावेइ। पढ़ावेइ। कारावेइ। हासावेइ। पाढ़ावेइ ॥२७॥

प्राकृतमञ्जरी

आवे चेत्ययमादेश एत्त्वमात्त्वं च पूर्ववत्।
सहावेइ च हासेइ तथान्येषु च दृश्यताम्॥ २७॥

आविः क्त-कर्म-भावेषु वा ॥ २८॥

मनोरमा

णिच आविरादेशो भवति वा क्तप्रत्यये परतो भावकर्मणोश्च। कराविअं। हसाविअं। पढ़ाविअं। कारिअं। हासिअं। पाढ़िअं। भावकर्मणोश्च– कराविज्जइ। हसाविज्जइ। पढ़ाविज्जई। कारिज्जइ। हासिज्जइ। पाढ़िज्जइ। कारित। हासित। पाठित। कार्यते। हास्यते। पाठ्यते ॥२८॥

प्राकृतमञ्जरी

आवि क्ते परतो भावकर्मप्रत्यययोर्मिथः।
हासाविअं क्ते परतो हासिअं वा निगद्यते॥
पढ़ाविज्जइ विज्जामे काराविज्जइ साहसं।
अथवा वर्त्ततां भूयो हसिज्जइ तथा तथा॥२८॥

नैदावे ॥ २९॥

मनोरमा

क्त-भाव-कर्मसु णिचूप्रत्ययस्य एत् आवे इत्येतावादेशौ न भवतः। कारिअं। करारिअं। कारिज्जइ। कराविज्जइ ॥२९॥

प्राकृतमञ्जरी

क्ते भावकर्मणोश्चैव न त्वेदावे प्रकीर्त्तिते।
पाढ़िअं हासिअं पश्चात् कराविअमितीह वा॥
पढ़ावीअइ कव्वं मे वड्ढाविज्जइ मे फलं।
पक्षे वड्ढिज्जइ फलं वड्ढिज्जाइअ मे धणं॥
कारिज्जन्ति तथा पश्चात् करिज्जइ कराविअं।
पढ़ाविज्जइ तद्वत् स्यात् पाढ़िअज्ज पढ़ाविअं॥२९॥

अत आ मिपि वा ॥ ३०॥

मनोरमा

अकारान्ताद्धातोर्मिपि परत आकारादेशो भवति वा। हसामि। हसमि ॥३०॥

प्राकृतमञ्जरी

आत्त्वं धातोरतोऽन्त्यस्य परतो मिपि कथ्यते।
विकल्पेन ततो वेदं पढामि पढमीति वा॥३०॥

इच्च बहुषु॥३१॥

मनोरमा

मिपो बहुषु परतोऽत इकारादेशो वा भवति। चकारादाकारश्च। हसामो। हसिमो। हसिमु। हसामु॥३१॥

प्राकृतमञ्जरी

उत्तमे स्याद् बहुष्वित्त्वं चकारादात्त्वमप्यतः।
हसिमो वा हसामो वा गदिमो वा गदामु वा॥३१॥

क्ते॥३२॥

मनोरमा

क्तप्रत्यये परतोऽत इर्भवति। हसिअं। पढिअं। हसित। पठित॥३२॥

प्राकृतमञ्जरी

क्तप्रत्यये तु परतो धात्वन्त्यस्येत्त्वमस्त्यतः।
हसिअं पढिअं तद्वत् पाढिअं कारिअं तथा॥३२॥

ए च क्त्वातुमुन्तव्यभविष्यत्सु॥३३॥

मनोरमा

क्त्वा तुमुन् तव्य इत्येतेषु भविष्यति काले च अत एत्वं भवति। चकारादिश्च। हसेऊण। हसिऊण। हसेउं। हसिउं। हसेअव्वं। हसिअव्वं। हसेहिइ। हसिहिइ॥३३॥

प्राकृतमञ्जरी

परतः क्त्वातुमुन्तव्यभविष्यत्स्वेत्वमुच्यते।
चकारादित्वमप्यस्य धातोरन्त्यस्य जायते॥
हसिऊण हसेऊण हसेउं हसिउं तथा।
हसिअव्वं हसेअव्वं हसेहिन्ति हसिन्ति च॥३३॥

लादेशे वा ॥ ३४॥

मनोरमा

लकारादेशे परतोऽत एत्वं भवति वा । हसेइ । हसइ । पढ़ेइ । पढ़इ । हसेन्ति । हसन्ति । हसेउ । हसउ ॥३४॥

प्राकृतमञ्जरी

लादेशे परतो धातोरत एत्वं भवेद् न वा।
पढ़ेइ तद्वत् पेच्छेइ पक्षे पढ़इ पेच्छइ॥
हसेअन्तो हसन्तो वा हसेमाणी तथैव वा।
भुवेन्तं च भुवन्तं च त्रिषु चैवं विमृश्यताम्॥३४॥

॥ इति वररुचिकृते प्राकृतप्रकाशे तिङ्विधिर्नाम सप्तमः परिच्छेदः॥

॥ अथाष्टमः परिच्छेदः॥

❀❀❀

भुवो हो हुवौ ॥१॥

मनोरमा

भू सत्तायाम् । एतस्य धातोर्हो हुव इत्येतावादेशौ भवतः । होइ, हुवइ । होन्ति, हुवन्ति ॥१॥

प्राकृतमञ्जरी

भुवो हो हुव इत्येतौ धातोरादेशतां गतौ।
होइ होन्ति हुवन्तीह होन्तं हुवइ होहिइ॥१॥

क्ते हुः ॥२॥

मनोरमा

भुवः क्तप्रत्यये परे हु इत्यादेशो भवति । हुअं ॥२॥

प्राकृतमञ्जरी

क्तप्रत्यये तु परतो हु इत्यादेश इष्यते।
हो-हुव-प्रतिषेधेन भूतं भूअं विदुर्बुधाः॥२॥

प्रादेर्भवः॥३॥

मनोरमा

प्रादेरुत्तरस्य भूधातोर्भव इत्यादेशो भवति । पभवइ । उब्भवइ । संभवइ । परिभवइ ॥३॥

प्राकृतमञ्जरी

भवादेशो भुवो धातोः प्रादेरुत्तरवर्तिनः।
राआ पभवए रज्जे ण संभवइ बम्हणो॥३॥

त्वरस्तुवरः ॥ ४॥

मनोरमा

ञित्वरा सम्भ्रमे। अस्य धातोस्तुवर इत्ययमादेशो भवति। तुवरइ ॥४॥

प्राकृतमञ्जरी

त्वरधातोर्भ्रमार्थस्य तुवरादेश उच्यते।
किणो तुवरसे गन्तुं तुवरेइ च ते जणो॥४॥

[1]क्ते तुरः॥५॥

मनोरमा

क्ते परे तुर इत्यादेशो भवति। तुरिअं॥५॥

घूर्णेर्घोलः॥६॥

मनोरमा

घुण घूर्ण भ्रमणे। अस्य धातोर्घोल इत्ययमादेशो भवति। घोलइ॥६॥

प्राकृतमञ्जरी

घूर्ण भ्रमण इत्यस्य घोलादेशं प्रचक्षते।
ततो घोलइ घोलन्ति घोलिऊण च घोलिउं॥६॥

नुदो णोल्लः॥७॥

मनोरमा

नुद प्रेरणे। अस्य धातोः णोल्ल इत्ययमादेशो भवति। णोल्लइ। पणोल्लइ॥७॥

प्राकृतमञ्जरी

नुद प्रेरण इत्यस्य णोल्लादेशो विधीयते।
ततो णोल्लइ णोल्लन्ति स्याण्णोल्लिहिइ णोल्लिउं॥७॥

दूङो दूमः॥८॥

मनोरमा

दूङ् परितापे। अस्य धातोर्दूमादेशो भवति। दूमइ॥८॥

---

१. अस्य सूत्रस्य प्राकृतमञ्जरीटीका नोपलभ्यते।

प्राकृतमञ्जरी

दूङो धातोः प्रयोक्तव्यो दूमादेशस्ततो भवेत्।
दूमेइ चापि दूमन्ति स्याद् दूमिहिइ दूमिउं॥८॥

पटेः फलः॥९॥

मनोरमा

अट पट गतौ। अस्य धातोः फल इत्ययमादेशो भवति। फलिअं हिअअं॥९॥

प्राकृतमञ्जरी

धातोः पटयतेरस्य फालादेशो विधीयते।
फालेउं परिफालेन्ति तथा फालेइ फालिअं॥९॥

[1]पदेः पालः॥१०॥

मनोरमा

पद गतौ। अस्य धातोः पाल इत्ययमादेशो भवति। पालेइ॥२०॥

वृषकृषमृषहृषामृतोऽरिः॥११॥

मनोरमा

वृषादीनामृतः स्थान अरि इत्ययमादेशो भवति। वरिसइ। करिसइ। मरिसइ। हरिसइ॥११॥

प्राकृतमञ्जरी

वृषादीनामृकारस्य रीत्यादेशः प्रयुज्यते।
ततः सस्से वरिसइ दीणो मरिसइ च्छुहं॥११॥

ऋतोऽरः॥१२॥

मनोरमा

ऋकारान्तस्य धातोः ऋतः स्थाने अर इत्ययमादेशो भवति। मृ, मरइ। सृ, सरइ। वृ, वरइ॥१२॥

प्राकृतमञ्जरी

अरादेशः स्मृतो धातोर्ऋकारस्यान्त्यवर्तिनः।
सरए मरए तद्वद् भरेइ च हरेइ च॥१२॥

---

१. अस्य सूत्रस्य प्राकृतमञ्जरीटीका नोपलभ्यते।

कृञः कुणो वा ॥१३॥

मनोरमा

डुकृञ् करणे। अस्य धातोः प्रयोगे कुणो वा भवति। कुणइ, करइ ॥१३॥

प्राकृतमञ्जरी

कृञो भवेत् कुणादेशः कुणेइ कुणए तथा।
अरादेशश्च वक्तव्यः करेइ करए तथा ॥१३॥

जृभो जम्भाअः ॥१४॥

मनोरमा

जृभजृभी गात्रविनामे। अस्य धातोर्जम्भाअ इत्ययमादेशो भवति। जम्भाअइ ॥१४॥

प्राकृतमञ्जरी

जृभि गात्रविनामेऽस्य जम्भाअ आदेश उच्यते।
जम्भाअइ महासीहो जम्भाअन्ति पओहरा ॥१४॥

ग्रहेर्गेण्हः ॥१५॥

मनोरमा

ग्रह उपादाने। अस्य धातोर्गेण्ह इत्ययमादेशो भवति। गेण्हइ ॥१५॥

प्राकृतमञ्जरी

गेण्ह इत्ययमादेशो गृह्णातेरभिधीयते।
ततो गेण्हइ गेण्हन्ति गेण्हिसे पुनर्गेण्हिमो ॥१५॥

घेत् क्त्वातुमुन्तव्येषु ॥१६॥

मनोरमा

ग्रहेर्घेत् इत्ययमादेशो भवति क्त्वातुमुन्तव्येषु परतः। घेत्तूण। घेत्तुं। घेत्तव्वं ॥१६॥

प्राकृतमञ्जरी

परतः क्त्वा-तुमुन्-तव्य-प्रत्ययेषु भवेद् ग्रहे।
घेशब्दस्तेन घेत्तूण घेत्तुं घेत्तव्वमेव च ॥१६॥

कृञः का भूतभविष्यतोश्च ॥१७॥

मनोरमा

भूतभविष्यतोः कालयोः कृञः का इत्ययमादेशो भवति। चकारात् क्त्वा-तुमुन्-तव्येषु च परतः। काहीअ। काहिइ। काऊण। काउं। काअव्वं ॥१७॥

प्राकृतमञ्जरी

कृञो भवति कादेशो धातोर्भूतभविष्यतोः।
परतः क्त्वा-तुमुन्-तव्य-प्रत्ययेषु च तद्यथा ॥
भूते भवति काहीअ भविष्यति च काहिइ।
काऊण सुकअं कादुं काअव्वं देव्ववन्दणम् ॥१७॥

स्मरतेर्भरसुमरौ ॥१८॥

मनोरमा

स्मृ चिन्तायाम्। अस्य धातोर्भरसुमरौ भवतः। भरइ। सुमरइ ॥१८॥

प्राकृतमञ्जरी

भरः सुमर इत्येतौ धातोस्तु स्मरतेः स्मृतौ।
भरेइ सुमरावेइ भरामि सुमरामि च ॥१८॥

भियो भावीहौ ॥१९॥

मनोरमा

ञिभी भये। अस्य धातोः भावीहौ भवतः। भाइ। वीहइ ॥१९॥

प्राकृतमञ्जरी

भियो धातोस्तु भावीहावादेशौ विहिताविह।
भाइ वीहइ वीहन्ति विभाइ च विभेइ च ॥१९॥

जिघ्रतेः पा-पाऔ[१] ॥२०॥

मनोरमा

घ्रा गन्धग्रहणे।अस्य धातोः पा पाअ इत्येतावादेशौ भवतः।पाइ।पाअइ ॥२०॥

म्लै वावाऔ ॥२१॥

मनोरमा

म्लै गात्रविनामे। अस्य धातोर्वा-वाऔ भवतः। वाइ। वाअइ ॥२१॥

---

१. अस्य सूत्रस्य प्राकृतमञ्जरीटीका नोपलभ्यते।

प्राकृतमञ्जरी

म्लै हर्षक्षय इत्यस्य मतौ वा वाअ इत्युभौ।
वाइ वाअइ वाहिन्ति वाअहिन्ति च वाहिइ ॥२१॥

तृपस्थिम्पः ॥२२॥

मनोरमा

तृप तिम्प तृप्तौ। अस्य धातोः स्थिम्प इत्ययमादेशो भवति। थिम्पइ ॥२२॥

प्राकृतमञ्जरी

आदेशः कथ्यते धातोस्तृप्यते स्थिम्प इत्ययम्।
थिम्पेइए थिम्पअन्ति थिम्पिहिन्ति च थिम्पिअ ॥२२॥

ज्ञो जाणमुणौ ॥२३॥

मनोरमा

ज्ञा अवबोधने। अस्य धातोर्जाणमुणौ भवतः। जाणइ। मुणइ ॥२३॥

प्राकृतमञ्जरी

आदेशाविह जानातेर्धातोर्जाणमुणावुभौ।
जाणाइ मुणए तद्वद् जाणाहिन्ति मुणन्ति च ॥२३॥

जल्पेर्लोमः ॥२४॥

मनोरमा

जल्प व्यक्तायां वाचि। अस्य धातोर्लकारस्य मकारादेशो भवति। जम्पइ ॥२४॥

प्राकृतमञ्जरी

जल्पधातोर्लकारस्य मकारादेश उच्यते।
जम्पए किं ति जम्पामि जम्पिहिन्ति च जम्पिसि ॥२४॥

ष्ठा-ध्या-गानां ठाअ-झाअ-गाआः ॥२५॥

मनोरमा

ष्ठा गतिनिवृत्तौ, ध्यै चिन्तायाम्, कै गै रै शब्दे। एतेषां ठाअ झाअ गाअ इत्येत आदेशा भवन्ति। ठाअन्ति। झाअन्ति। गाअन्ति ॥२५॥

प्राकृतमञ्जरी

तिष्ठतेर्ध्यायतेर्धातोर्गायतेश्च यथाक्रमम्।
आदेशा विहिताष्ठाअ झाअ गाअ इति त्रयः॥
ठाअए इह ठाअन्ति झाअए झाअहिन्ति च।
गाआमि गाइमो चेति त्रयाणां रूपनिर्णयः॥२५॥

ठा-झा-गाश्च वर्त्तमानभविष्यद्विध्याद्येकवचनेषु॥२६॥

मनोरमा

ष्ठाध्यागानां ठा झा गा इत्येत आदेशा भवन्ति, वर्त्तमानभविष्यद्विध्याद्येकवचनेषु परतः। चकारात् पूर्वोक्ताश्च। ठाइ। ठाअइ। ठाहिइ। ठाअहिइ। ठाउ। ठाअउ। झाइ। झाअइ। झाहिइ। झाअहिइ। झाउ। झाअउ। गाइ। गाअइ। गाहिइ। गाअहिइ। गाउ। गाअउ॥२६॥

प्राकृतमञ्जरी

ठा-झा-गा विहितास्तेषां पूर्वोक्ताश्च चकारतः।
विध्यादावेकवचने भविष्यद्वर्त्तमानयोः॥
ठाइ ठाहिइ ठाएउ झाइ झाअइ झाहिइ।
गाइ गाअइ गाहिइ ठाउ झाउ च गाउ च॥२६॥

खादिधाव्वोः खाधौ॥२७॥

मनोरमा

खादृ भक्षणे। धावु जवे। एतयोर्धातोः खा धा इत्येतावादेशौ भवतः। वर्तमानभविष्यद्विध्याद्येकवचनेषु परतः। खाइ। खाहिइ। खाउ। धाइ। धाहिइ। धाउ॥२७॥

प्राकृतमञ्जरी

स्यात् खादृ भक्षणे धावु गतिशुद्ध्योरिति द्वयोः।
खा च धा च यथापूर्वं विषयस्य व्यवस्थितिः॥
खाहिन्ति अहि खाहिन्ति धाइ खाइ च खाहिइ।
खाउ धाउ च खाअव्वं खासु धासु च खामु च॥२७॥

ग्रसेर्विसः ॥ २८॥

मनोरमा

ग्रस ग्लसु अदने। अस्य धातोर्विस इत्ययमादेशो भवति। विसइ ॥२८॥

प्राकृतमञ्जरी

विस इत्ययमादेशो ग्रसेर्धातोर्विधीयते।
विसेइ विसिउं तद्वद्विसन्ति च बका झसं॥ २८॥

चिञश्चिणः ॥ २९॥

मनोरमा

चिञ् चयने। अस्य धातोश्चिण इत्ययमादेशो भवति। चिणइ ॥२९॥

प्राकृतमञ्जरी

चिण इत्ययमादेशश्चिनोतेरभिधीयते ।
चिणोइ चिणुए तद्वच्चिणन्ति च चिणामि च॥ २९॥

क्रीञः किणः ॥ ३०॥

मनोरमा

डुक्रीञ् द्रव्यविनिमये। अस्य धातोः किण इत्ययमादेशो भवति। किणइ ॥ ३०॥

प्राकृतमञ्जरी

किण इत्ययमादेशः क्रीणातेरिह कथ्यते।
किणाए किणसे तद्वत् किणामि च किणन्ति च॥ ३०॥

वेः के च॥ ३१॥

मनोरमा

वेरुत्तरस्य क्रीञः के इत्ययमादेशो भवति। चकारात् किणादेशश्च। विक्केइ। विक्किणइ ॥३१॥

प्राकृतमञ्जरी

वेरुत्तरस्य तस्यैव के शब्दादेश उच्यते।
चकारात् किण विक्केइ तथा विक्किणए पुणः॥ ३१॥

उद्ध्म उद्धुमा ॥ ३२ ॥

मनोरमा

ध्मा शब्दाग्निसंयोगयोः ।अस्य धातोरुत्पूर्वस्य उद्धुमा भवति । उद्धुमाइ ॥ ३२ ॥

प्राकृतमञ्जरी

ध्माधातोरुत्तरस्योत उद्धुमादेश उच्यते।
उद्धुमाइ पुनस्तद्वदुद्धुमाए च दृश्यते ॥ ३२ ॥

श्रदो धो दहः ॥ ३३ ॥

मनोरमा

श्रच्छब्दादुत्तरस्य डुधाञ् धारणपोषणयोरस्य धातोर्दहादेशो भवति । सद्दहइ । सद्दहिअं ॥ ३३ ॥

प्राकृतमञ्जरी

अत्पूर्वस्य दधातेश्च दहादेशो विधीयते।
न सद्दहेइ को देवा तथा सद्दहए पुनः ॥ ३३ ॥

अवाद् गाहेर्वाहः ॥ ३४ ॥

मनोरमा

गाहू विलोडने। अस्य धातोरवादुत्तरस्य वाहादेशो भवति। ओवाहइ। अववाहइ ॥ ३४ ॥

प्राकृतमञ्जरी

गाहू विलोडने धातोरवादुत्तरवर्तिनः।
वाहादेशो भवेत् तस्मादोवाहइ घणाघणो ॥ ३४ ॥

कासेर्वासः ॥ ३५ ॥

मनोरमा

अवादित्यनुवर्त्तते। कासृ शब्दे कुत्सायाम् । अस्य धातोरवादुत्तरस्य वासो भवति । ओवासइ । अववासइ ॥ ३५ ॥

प्राकृतमञ्जरी

वासादेशो भवेत् कासेरवादुत्तरवर्तिनः।
ओवासअइ आआसं ओवासो ण हु वो णहो ॥
देसु मे दर ओवासं ओवासो ण जसस्स दे ॥ ३५ ॥

निरो माङो माणः ॥ ३६ ॥

मनोरमा

माङ् माने। अस्य धातोर्निर उत्तरस्य मानादेशो भवति। णिम्माणइ ॥ ३६ ॥

प्राकृतमञ्जरी

धातोर्माङ्मान इत्यस्य निर उत्तरवर्तिनः।
माणादेशो भवेत् तस्य णिम्माणइ विही जणं ॥ ३६ ॥

क्षियो झिज्जः ॥ ३७ ॥

मनोरमा

क्षि क्षये। अस्य धातोर्झिज्ज इत्यादेशो भवति। झिज्जइ ॥ ३७ ॥

प्राकृतमञ्जरी

क्षियो धातोर्मतो झिज्जस्तणू झीणावि झिज्जइ।
झिज्जन्ति हन्त झिज्जन्तं झिज्जमाणं च झिज्जिमो ॥ ३७ ॥

भिदिच्छिदोरन्त्यस्य न्दः ॥ ३८ ॥

मनोरमा

भिदिर् छिदिर् एतयोरन्त्यस्य न्दो भवति। भिन्दइ। छिन्दइ ॥ ३८ ॥

प्राकृतमञ्जरी

नकारयुग्दकारः स्यादन्त्यस्य तु भिदिच्छिदोः।
भिन्दन्ति परिभिन्दन्ति भिन्दिमो छिन्दिमो तथा ॥ ३८ ॥

क्वथेर्ढः ॥ ३९ ॥

मनोरमा

क्वथ निष्पाके। अस्य धातोरन्त्यस्य ढो भवति। कढइ ॥ ३९ ॥

प्राकृतमञ्जरी

क्वथ निष्पाक इत्यस्य ढकारोऽन्त्यस्य कथ्यते।
कढामि कढिअं तद्वत् कढिज्जन्ति कढिन्ति च ॥ ३९ ॥

वेष्टेश्च ॥ ४० ॥

मनोरमा

वेष्ट वेष्टने। अस्य धातोरन्त्यस्य ढो भवति। वेढइ। योगविभाग उत्तरार्थः ॥४०॥

प्राकृतमञ्जरी

वेष्टतेश्च भवेद्धातोरन्त्यस्य च ढकारता।
वेढेण वेढिणी तद्वद्वेढणं परिवेढिउं ॥४०॥

उत्समोर्ल्लः ॥ ४१ ॥

मनोरमा

उत्संभ्यामुत्तरस्य वेष्टतेरन्त्यस्य ल्लो भवति। उव्वेल्लइ, संवेल्लइ ॥४१॥

प्राकृतमञ्जरी

उत्समोरुत्तरस्थस्य वेष्टेरन्त्यस्य ल्लः स्मृतः।
उव्वेल्लइ लआ तद्वदही संवेल्लइ तरुं ॥४१॥

रुदेर्वः ॥ ४२ ॥

मनोरमा

रुदिर् रोदने । अस्य धातोरन्त्यस्य वो भवति। रुवइ ॥४२॥

प्राकृतमञ्जरी

रुदोऽन्त्यस्य भवेद्वत्वं रुवेइ रुविउं पुनः।
द्वित्वं च दृश्यते तद्वदेत्थमारुव्वसीति च ॥४२॥

उदो विजेः ॥ ४३ ॥

मनोरमा

उत्पूर्वस्य विजेरन्त्यस्य वो भवति। उव्विवइ ॥४३॥

प्राकृतमञ्जरी

विजेरुदुत्तरस्थस्य वत्वमन्त्यस्य कथ्यते।
उव्वेवइ पुनस्तद्वदुव्वेवन्ति जणावणे ॥४३॥

वृधेर्ढः ॥४४॥

मनोरमा

वृधु वर्धने। अस्य धातोरन्त्यस्य ढो भवति। वड्ढइ ॥४४॥

प्राकृतमञ्जरी

अन्त्यस्य वर्द्धतेर्धातोर्ढकारादेश उच्यते।
वड्ढए चैव वड्ढन्ति वड्ढिहिन्ति च वड्ढिउं ॥४४॥

हन्तेर्म्मः ॥४५॥

मनोरमा

हन्तेरन्त्यस्य म्मो भवति। हम्मइ ॥४५॥

प्राकृतमञ्जरी

धातोरन्त्यस्य हन्तेश्च मकारत्वं विधीयते।
हम्मसे तथा हम्मन्ति हम्मिहिन्ति च हम्मिउं ॥४५॥

रुषादीनां दीर्घता ॥४६॥

मनोरमा

रुषादीनां दीर्घता भवति। रूसइ। तूसइ। सूसइ। रुष्यति। तुष्यति। शुष्यति ॥४६॥

प्राकृतमञ्जरी

रुष रोषे तुष तुष्टौ शुष शोषण इत्यपि।
रुष्यतेस्तुष्यतेश्चापि शुष्यतेश्च तथा तथा॥
अचो दीर्घो भवेत्तेन रूपं रूसइ तूसइ ॥४६॥

च्चो व्रजनृत्योः ॥४७॥

मनोरमा

व्रजनृती। अनयोरन्त्यस्य च्चो भवति। वच्चइ। णच्चइ ॥४७॥

प्राकृतमञ्जरी

अन्त्यस्य व्रजनृत्योश्च चकारादेश उच्यते।
वचइ णचइ तद्वद्वचिहिन्ति न णच्चिमो॥४७॥

युधिबुध्योर्झः॥४८॥

मनोरमा

युध सम्प्रहारे, बुध अवगमने। अनयोरन्त्यस्य झो भवति। जुज्झइ। बुज्झइ॥४८॥

प्राकृतमञ्जरी

युध्यतेर्बुध्यतेश्चैव झत्वमन्त्यस्य कथ्यते।
जुज्झए बुज्झए तद्वज्जुज्झिहिन्ति च बुज्झिमो॥४८॥

रुधेर्न्धम्भौ॥४९॥

मनोरमा

रुधिर्। अस्य धातोरन्त्यस्य न्धम्भौ भवतः। रुन्धइ। रुम्भइ॥४९॥

प्राकृतमञ्जरी

रुणद्धेः पुनरन्त्यस्य धभौ बिन्दुयुतौ मतौ।
रुन्धए रुम्भए तद्वद्रुन्धिहिन्ति च रुन्धिभो॥४९॥

मृदो लः॥५०॥

मनोरमा

मृद क्षालने। अस्य धातोरन्त्यस्य लो भवति। मलइ॥५०॥

प्राकृतमञ्जरी

मृद्गातेः पुनरन्त्यस्य लकारादेश इष्यते।
मलन्ति मलए तद्वद् मलिहिन्ति मलेमि च॥५०॥

शदृ-पत्योर्डः॥५१॥

मनोरमा

शदॢ शातने। पद पतने। अनयोरन्त्यस्य डो भवति। सडइ। पडइ॥५१॥

प्राकृतमञ्जरी

अन्त्यस्य शदि-पत्योश्च डकारत्वं विधीयते।
सडए पडए सद्वत्तडिहिन्ति पडन्ति च ॥ ५१॥

[1]शकादीनां द्वित्वम् ॥ ५२॥

मनोरमा

शकृ शक्तौ। इत्येवमादीनां धातूनामन्त्यस्य द्वित्वं भवति। सक्कइ। लग्गइ। शक्नोति। लगति ॥५२॥

[2]स्फुटिचल्योर्वा ॥ ५३॥

मनोरमा

स्फुट विकसने। चल कम्पने। अनयोरन्त्यस्य वा द्वित्वं भवति। फुट्टइ। फुडइ। चल्लइ। चलइ ॥५३॥

प्रादेर्मीलः ॥ ५४॥

मनोरमा

प्रादेरुत्तरस्य मीलोऽन्त्यस्य द्वित्वं भवति वा। पमिल्लइ। पमीलइ ॥५४॥

प्राकृतमञ्जरी

भवेद् वा मीलतेर्द्वित्वं प्रादेरुत्तरवर्तिनः।
संमीलए पमीलन्ति संमिल्लइ पमिल्लिमो ॥ ५४॥

भुजादीनां क्त्वातुमुनूतव्येषु परतो लोपः ॥ ५५॥

मनोरमा

भुज इत्येवमादीनां क्त्वातुमुनूतव्येषु परतोऽन्त्यस्य लोपो भवति। भोत्तूण, भोत्तुं, भोत्तव्वं। विदः – वेत्तूण, वेत्तुं, वेत्तव्वं। रुदः – रोत्तूण, रोत्तुं, रोत्तव्वं ॥५५॥

प्राकृतमञ्जरी

परतः क्त्वा-तुमुन्-तव्यप्रत्ययेषु भुजेर्विदः।
रुदेश्चाप्येवमादीनां लोपोऽन्त्यस्य विधीयते ॥
भोत्तूण भोत्तुं भोत्तव्वं वोत्तुं वोत्तूण तत् पुनः।
वोत्तव्वमिह रोत्तव्वं रोत्तं रोत्तूण तादृशः ॥ ५५॥

१-२. अनयोः सूत्रयोः प्राकृतमञ्जरीटीका नोपलभ्यते।

श्रु-हु-जि-लू-ध्वानां णोऽन्त्ये ह्रस्वः॥५६॥

मनोरमा

श्रु श्रवणे । हु दानादाने । जि जये । लूञ् छेदने । धूञ् कम्पने । इत्येतेषामन्त्ये णः प्रयोक्तव्यः। दीर्घस्य च ह्रस्वो भवति। सुणइ। हुणइ। जिणइ। लुणइ। धुणइ ॥५६॥

प्राकृतमञ्जरी

अन्त्यस्य श्रुहुजीनां णो लूञो धूञश्च कथ्यते।
दीर्घस्य च भवेद् ह्रस्वो यथासम्भवमत्र वै॥
सुणिमो हुणिमो तद्वज्जिणन्ति च लुणन्ति च।
लुणसे धुणसे चैव धुणोमि च जिणिमो च॥५६॥

भावकर्मणोर्व्वश्च॥५७॥

मनोरमा

एषां भावकर्मणोरन्त्ये व्वशब्दः प्रयोक्तव्यः। चकाराद् णश्च। सुव्वइ। सुणिज्जइ। हुव्वइ। हुणिज्जइ। जिव्वइ। जिणिज्जइ। लुव्वइ। लुणिज्जइ। धुव्वइ। धुणिज्जइ॥५७॥

प्राकृतमञ्जरी

तेषां व्वश्च यगर्थे स्याच्चकाराण्णश्च कथ्यते।
सुव्वन्ति च सुणिज्जन्ति हुव्वए च हुणिज्जए॥५७॥

गमादीनां द्वित्वं वा॥५८॥

मनोरमा

गमादीनां धातूनां द्वित्वं वा भवति भावकर्म्मणोः। गम्मइ, गमिज्जइ। रम्मइ, रमिज्जइ। हस्सइ, हसिज्जइ। गम्यते। हस्यते। रम्यते॥५८॥

प्राकृतमञ्जरी

गमादीनां द्विता वा स्याद् यगर्थेऽन्त्यस्य तद्यथा।
गम्मए रम्मए तद्वत् गमए रमए तथा॥
गमीअइ गमिज्जन्ति रमिज्जामि रमीअइ।
आदिशब्देन तद् गम्यं यदाकृतिगणो भवेत्॥५८॥

[1]लिहेर्लिज्झः ॥५९॥

मनोरमा

लिह आस्वादने। अस्य धातोर्लिज्झ आदेशो भवति भावकर्मणोः। लिज्झइ ॥५९॥

ह्रक्रोर्हीरकीरौ ॥६०॥

मनोरमा

हृञ् हरणे। डुकृञ् करणे। अनयोर्हीरकीरौ भवतो भावकर्मणोः। हीरइ, कीरइ ॥६०॥

प्राकृतमञ्जरी

हृञः कृञो हीरकीरौ यगर्थे परिकल्पितौ।
हीरए कीरए तद्वत्तथा हीरइ कीरइ ॥६०॥

ग्रहेर्दीर्घो वा[2] ॥६१॥

मनोरमा

ग्रहेर्धातोर्दीर्घो वा भवति भावकर्मणोः। गाहिज्जइ। गहिज्जइ ॥६१॥

क्तेन दिणादयः ॥६२॥

मनोरमा

दिण इत्येवमादयः क्तप्रत्ययेन निपात्यन्ते। डुदाञ् दाने—दिणं। रुदिर्—रुणं। त्रसी—हित्थं। दह—दड्ढं। रञ्जि—रत्तं ॥६२॥

प्राकृतमञ्जरी

क्तप्रत्ययेन सहिता दिणाद्याः स्युर्निपातिताः।
दत्तं दिणं तथा दड्ढं दक्कं रुणं च रोदने॥
कइत्तं क्रियातः सिद्धं दड्ढं भस्मीकृतं भवेत्।
रत्तं रग्गं च तद्वत् स्यादादिराकृतितां व्रजेत् ॥६२॥

खिदेर्विसूरः ॥६३॥

मनोरमा

खिद दैन्ये। अस्य धातोर्विसूरो भवति। विसूरइ। विरहेण विसूरइ बाला ॥६३॥

१-२. अनयोः सूत्रयोः प्राकृतमञ्जरीटीका नोपलभ्यते।

प्राकृतमञ्जरी

खिद्यतेरस्य धातोस्तु विसूरादेश उच्यते।
विसूरइ विसूरन्ति विसूरह विसूरिम ॥ ६३॥

क्रुधेर्जूरः ॥ ६४॥

मनोरमा

क्रुध कोपे। अस्य जूरो भवति। जूरइ ॥६४॥

प्राकृतमञ्जरी

क्रुध्यतेरस्य धातोस्तु जूरादेशो विधीयते।
जूरिमो परिजूरन्ति जूरिहिन्ति च जूरइ ॥ ६४॥

[1]चर्चेश्चम्पः ॥ ६५॥

मनोरमा

चर्च अध्ययने। अस्य धातोश्चम्प आदेशो भवति। चम्पइ ॥६५॥

त्रसेर्वुज्जः ॥ ६६॥

मनोरमा

त्रसी उद्वेगे। अस्य धातोर्वुज्ज आदेशो भवति। वुज्जइ ॥६६॥

प्राकृतमञ्जरी

त्रसेरिह च धातोस्तु वुज्जादेशः प्रयुज्यते।
वुज्जन्ति वुज्जिमो तद्वद् वुज्जन्तो वुज्जिहिन्ति च ॥ ६६॥

मृजेर्लुभसुपौ ॥ ६७॥

मनोरमा

मृजू शुद्धौ। अस्य धातोर्लुभसुपौ इत्यादेशौ भवतः। लुभइ। सुपइ ॥६७॥

प्राकृतमञ्जरी

मृजेर्लुहपुसौ प्रोक्तावादेशत्वेन तद्यथा।
लुहन्ति पुसए तद्वल्लुहिहिन्ति पुसामि च ॥ ६७॥

---

१. सूत्रस्यास्य प्राकृतमञ्जरीटीका नोपलभ्यते।

वुड्डखुप्पौ मस्जेः ॥ ६८॥

मनोरमा

टुमस्ज शुद्धौ। अस्य धातोर्वुड्डखुप्पौ भवतः। वुड्डइ। खुप्पइ ॥६८॥

प्राकृतमञ्जरी

वुड्डखुप्पौ विधीयेते आदेशत्वेन मस्जतेः।
वुड्डामि खुप्पसे तद्वद्वुड्डिहिन्ति च खुप्पइ ॥ ६८॥

[१]दृशेः पुलअ-णिअक्क-अवक्खाः ॥ ६९ ॥

मनोरमा

दृशिर् प्रेक्षणे। अस्य पुलअ-णिअक्क-अवक्खा भवन्ति। पुलअइ। णिअक्कइ। अवक्खइ ॥६९॥

शकेस्तरवअतीराः ॥७०॥

मनोरमा

शक्लृ शक्तौ। अस्य धातोस्तर वअ तीर इत्येत आदेशा भवन्ति। तरइ। वअइ। तीरइ ॥७०॥

प्राकृतमञ्जरी

शकेस्तरवऔ तीर इत्यादेशास्त्रयः स्मृताः।
तरए वअए तद्वत्तीरामि च तथा तथा ॥७०॥

शेषाणामदन्तता ॥ ७१ ॥

मनोरमा

शेषाणां लुप्तानुबन्धानां धातूनामदन्तता भवति। भमइ। चुम्बइ ॥७१॥

प्राकृतमञ्जरी

शेषाणामप्यदन्तत्वं धातूनामिह कथ्यते।
हसए अप्पए तद्वद्भमए मलए तथा ॥७१॥

॥ इति महामुनिवररुचिकृते प्राकृतप्रकाशे धात्वादेशो नामाष्टमः परिच्छेदः ॥

---

१. सूत्रस्यैतस्य प्राकृतमञ्जरीटीका नोपलभ्यते।

॥धात्वादेशविधौ प्रकीर्णकम्॥

दुह-लिह-वहां दुब्भ-लिब्भ-वब्भाः॥१॥

दुह-लिह-वहां स्थाने यथाक्रमं दुब्भ लिब्भ वब्भ इति आदेशा भवन्ति। दुब्भइ। लिब्भइ। वब्भइ॥१॥

ज्ञो णज्जणप्पौ वा॥२॥

जानातेर्णज्ज-णप्पौ वा भवतः। पक्षे जाणमुणौ। णज्जइ। णप्पइ। जाणइ। मुणइ॥२॥

ग्रहेर्वा घेप्पः॥३॥

ग्रहधातोः स्थाने घेप्पादेशो वा भवति। घेप्पइ॥३॥

चर्वेर्वब्भः॥४॥

चर्व भक्षणे। अस्य वब्भो भवति। वब्भइ॥४॥

हेर्हिमः॥५॥

हि तापे। अस्य धातोर्हिमादेशो भवति। हिमइ॥५॥

खिदेर्जूरविसूरौ॥६॥

खिद दैन्ये। अस्य जूरविसूरौ भवतः। जूरइ, विसूरइ॥६॥

जयतेर्वा॥७॥

जि इत्यस्य वा णकारो भवति। जिणइ। जिअइ॥७॥

राजेरेहः॥८॥

राज दीप्तौ। अस्य रेहादेशो भवति। रेहइ॥८॥

अदेश्चरखः॥९॥

अद भक्षणे। अस्य चरखादेशो भवति। चरक्खइ॥९॥

इषेर्महः॥१०॥

इष इच्छायाम्। अस्य महादेशो भवति। महइ॥१०॥

व्यधेर्विभः ॥११॥

व्यध ताडने। अस्य विभादेशो भवति। विब्भइ ॥११॥

नोपसर्गस्य ॥१२॥

स्मृ इत्येतस्य सोपसर्गस्य भरसुमरौ न भवतः। विस्सरइ। पस्सरइ। अणुस्सरइ। अहिस्सरइ ॥१२॥

कथेर्हः ॥१३॥

कथ वाक्यप्रबन्धे। अस्य धातोरन्त्यस्य हो भवति। कहइ ॥१३॥

कष्टेष्टः ॥१४॥

कष्ट विपाके। अस्यान्त्यस्य टो भवति। कटइ। कष्टयति ॥१४॥

वचवदोश्च ॥१५॥

एतयोरन्त्यस्य द्वित्वं वा भवति। चकारादोत्त्वं च। वोच्चइ, वोचइ। वोल्लइ, वोलइ। वक्ति। वदति। वददोल इति लत्वम् ॥१५॥

॥ धात्वादेशविधौ प्रकीर्णकं समाप्तम् ॥

●

॥ अथ नवमः परिच्छेदः ॥

❀❀❀

निपाताः ॥ १ ॥

मनोरमा

अधिकारोऽयम् । वक्ष्यमाणा निपातसंज्ञका वेदितव्याः । संस्कृतानुसारेण निपातकार्यं वक्तव्यम् ॥ १ ॥

प्राकृतमञ्जरी

अधिकारोऽयमादिष्ट आपरिच्छेदपूरणात् ।
संस्कृतानां निपातानां कार्याण्यत्र भवन्ति च ॥ १ ॥

हुं दानपृच्छानिर्धारणेषु ॥ २ ॥

मनोरमा

हुं इत्ययं शब्दो दानपृच्छानिर्धारणार्थेषु निपातसंज्ञो भवति । दाने यथा— हुं गेण्ह अप्पणो जीअं । पृच्छायाम्— हुं कहेहि साहुसु सब्भावं । निर्धारणे— हुं हुवसु तुण्हिक्को । हुं गृहाणात्मनो जीवम् । हुं कथय साधुषु सद्भावम् । हुं भव तूष्णीकः ॥ २ ॥

प्राकृतमञ्जरी

हुं पृच्छायां निपातः स्याद् दाने निर्द्धारणे तथा ।
गेणहेसु हं हं कहेसु मामामुञ्चसु हुं सहि ॥ २ ॥

विअ वेअ अवधारणे ॥ ३ ॥

मनोरमा

विअ वेअ इत्येतावववधारणे निपातसंज्ञौ भवतः । एवं विअ । एवं वेअ । एवमेव ॥ ३ ॥

प्राकृतमञ्जरी

विअ वेअ विनिर्दिष्टौ निपातावववधारणे ।
म्हुरं विअ भोत्तव्वं सो वेअ मह वल्लहो ॥ ३ ॥

ओ सूचनापश्चात्तापविकल्पेषु ॥ ४ ॥

मनोरमा

ओ इत्ययं शब्दः सूचनापश्चात्तापविकल्पेषु निपातसंज्ञो भवति । ओ चिरअसि । गाथासु द्रष्टव्यः ॥ ४ ॥

प्राकृतमञ्जरी

ओशब्दः सूचनायां स्यात् पश्चात्तापे विकल्पने।
ओ आगओ ओ णिहओ राआओ पुरिसो इमे॥४॥

इर किर किल अनिश्चिताख्याने॥५॥

मनोरमा

इर किर किल इत्येते शब्दा अनिश्चिताख्याने निपातसंज्ञा भवन्ति। पेक्ख इर तेण हदो। अज्ज किर तेण ववसिओ। अअं किल सिविणओ। प्रेक्षस्व किल तेन हतः। अद्य किल तेन व्यवसितः। अयं किल स्वप्नः॥५॥

प्राकृतमञ्जरी

स्मृता अनिश्चिताख्याने इरश्चैव किरः किलः।
कामी इर घणारम्भे किर संजीवए किल॥५॥

हुं क्खु निश्चयवितर्कसम्भावनेषु॥६॥

मनोरमा

हुं क्खु इत्येतौ निश्चय-वितर्क-सम्भावनेषु निपातसंज्ञकौ भवतः। हुं रक्खसो। गरुओ क्खु भारो। हुं राक्षसः। गुरुः खलु भारः॥६॥

प्राकृतमञ्जरी

हुं निश्चये वितर्के च मतः सम्भावनासु च।
एसा हुं रमणी सा खु कामिणी सा खु पीडए॥६॥

णवरः केवले॥७॥

मनोरमा

णवर इत्ययं शब्दः केवलेऽर्थे निपातसंज्ञो भवति। णवर अणं। केवलमन्नम्॥७॥

प्राकृतमञ्जरी

णवरेति निपातोऽयं केवलार्थे प्रयुज्यते।
एसो णवर कन्दप्पो एसा णवर सा रई॥७॥

आनन्तर्ये णवरि ॥८॥

मनोरमा

णवरि इत्ययं शब्द आनन्तर्ये निपातसंज्ञो भवति। णवरि ॥८॥

प्राकृतमञ्जरी

आनन्तर्ये निपातोऽस्ति योऽसौ णवरि अस्मृतः।
हन्तूण रावणं रामो गओ णवरिअ प्पहं ॥८॥

किणो प्रश्ने ॥९॥

मनोरमा

किणो इत्ययं शब्दः प्रश्ने निपातसंज्ञो भवति। किणो धुव्वसि। किणो हससि। किन्नु धूयसे। किन्नु हससि ॥९॥

प्राकृतमञ्जरी

किणो इति निपातोऽयं प्रश्ने तावत् प्रयुज्यते।
किणो गच्छसि तुण्हिक्को किणो रूसइ वम्महो ॥९॥

अम्मो दुःखसूचनासम्भावनेषु ॥१०॥

मनोरमा

अम्मो इत्ययं शब्दो दुःखसूचनासम्भावनेषु निपातसंज्ञो भवति। दुःखे – अम्मो कज्जलरसरञ्जिएहिं। सूचनायाम् – अम्मो अवरं विअ। सम्भावने – अम्मो णं मिव अत्तुं। अहो कज्जलरसरञ्जिताभ्यामक्षिभ्याम्। अहो अपरमिव। अहो एन-मिवात्तुम् ॥१०॥

प्राकृतमञ्जरी

अव्वो अम्मो मतौ दुःखसूचनाभाषणेषु च।
अव्वो दड्ढो गओ कामो अम्मो साहसिओ प्पिओ ॥१०॥

अलाहि निवारणे ॥११॥

मनोरमा

अलाहि इत्ययं शब्दो निवारणेऽर्थे निपातसंज्ञो भवति। अलाहि कलहलेसेण। अलाहि कलहबन्धेण। अलं कलहलेशेन। अलं कलहबन्धेन ॥११॥

प्राकृतमञ्जरी

अलाहीति निपातोऽयं प्रयोक्तव्यो निवारणे।
अलाहि सहि लेहेण इमिणा तुज्झ का कहा॥११॥

अइ-बले सम्भाषणे॥१२॥

मनोरमा

अइ-बले इत्येतौ शब्दौ सम्भाषणे निपातसंज्ञौ भवतः। अइ मूलं पसूसइ। बले किं कलसि अबले। अपि मूलं प्रशुष्यति। बले किं कलयस्यबले॥१२॥

प्राकृतमञ्जरी

अइशब्दो बले चैव मतौ सम्भाषणे त्विमौ।
अइ वल्लह पेच्छेसु बले किं णिग्घिणोसि मं॥१२॥

णवि वैपरीत्ये[1] ॥१३॥

मनोरमा

णवि इत्ययं शब्दो वैपरीत्ये निपातसंज्ञो भवति। णवि तह पहसइ बाला। विपरीतं तथा प्रहसति बाल॥१३॥

सू कुत्सायाम्[2]॥१४॥

मनोरमा

सूशब्दः कुत्सायां निपातसंज्ञो भवति। सू सिविणो धिक् स्वप्नः॥१४॥

रे अरे हिरे सम्भाषणरतिकलहाक्षेपेषु॥१५॥

मनोरमा

रे अरे हिरे इत्येते शब्दाः सम्भाषणरतिकलहाक्षेपेषु निपातसंज्ञा भवन्ति। यथासंख्यम्। रे मा करेहि। णाओ सि अरे। दिट्ठोसि हिरे। रे मा कुरुष्व। नागोऽसि अरे। दृष्टोऽसि हिरे॥१५॥

प्राकृतमञ्जरी

सम्भाषणे च सम्भोगे कलहाक्षेपयोरपि।
रे अरे च हिरे चेति निपाताः परिकीर्त्तिताः॥
रे गच्छसु अरे कोसि मह मुञ्चसु मं हिरे॥१५॥

१-२. अनयोः प्राकृतमञ्जरीटीका नोपलभ्यते।

म्मिव-मिव-विआ इवार्थे ॥१६॥

मनोरमा

म्मिव मिव विअ इत्येते शब्दा इवार्थे निपातसंज्ञका भवन्ति। गअणं म्मिव, गअणं विअ कसणं। गगनमिव कृष्णम् ॥१६॥

प्राकृतमञ्जरी

म्मिव-मिव-विआश्चैते इवार्थे परिकल्पिताः।
चम्दो म्मिव मुहं चन्दो मिव चन्दो विएति च ॥१६॥

अज्ज आमन्त्रणे[1] ॥१७॥

मनोरमा

अज्ज इत्ययं शब्द आमन्त्रणे निपातसंज्ञो भवति। अज्ज महाणुहाव किं करेसि। अहो महानुभाव किं करोषि ॥१७॥

शेषः संस्कृतात् ॥१८॥

मनोरमा

उक्तादन्यः शेषः। प्रत्ययसमासतद्धितलिङ्गवर्णकादिविधिः शेषः संस्कृतादवगन्तव्यः। इह ग्रन्थविस्तरभयान्न दर्शितः ॥१८॥

प्राकृतमञ्जरी

कृततद्धितसमासादिशेषो गम्येत संस्कृतात्।
उक्तलक्षणवृत्त्यैव तत्सर्वं च निरूप्यताम् ॥१८॥

॥ इति महामुनिवररुचिप्रणीते प्राकृतप्रकाशे निपाताभिधानो नाम नवमः परिच्छेदः॥

●

---

१. सूत्रस्यास्य प्राकृतमञ्जरीटीका नोपलभ्यते।

॥ अथ दशमः परिच्छेदः ॥

❀❀❀

पैशाची ॥ १ ॥

मनोरमा

पिशाचानां भाषा पैशाची । सा च लक्ष्यलक्षणाभ्यां स्फुटीक्रियते ॥ १ ॥

प्रकृतिः शौरसेनी ॥ २ ॥

मनोरमा

अस्याः पैशाच्याः प्रकृतिः शौरसेनी । स्थितायां शौरसेन्यां पैशाचीलक्षणं प्रवर्त्तयितव्यम् ॥ २ ॥

वर्गाणां तृतीयचतुर्थयोरयुजोरनाद्योराद्यौ ॥ ३ ॥

मनोरमा

पैशाच्यां भाषायां वर्णानां तृतीयचतुर्थयोर्वर्णयोरयुक्तयोरनादौ वर्त्तमानयोः स्थाने आद्यौ प्रथम-द्वितीयौ भवतः । गकनं । मेखो । राचा । निच्छरो । वटिसं । दसवतनो । माथवो । गोपिन्तो । केसपो । सरफसं । सलफो ॥ ३ ॥

अयुजोरिति किम् ? संगामो, वग्घो इत्यादि । अनादाविति किम् ? गमनम् इत्यादि ।

गगन । मेघ । राजा । निर्झर । षडिश । दशवदन । माधव । गोविन्द । केशव । सरभस । शलफ । संग्राम । गमन ।

इवस्य पिवः ॥ ४ ॥

मनोरमा

पैशाच्यां भाषायां इवशब्दस्य स्थाने पिव इत्ययमादेशो भवति । कमलं पिवं सुखं ॥ ४ ॥

णो नः ॥५॥

मनोरमा

पैशाच्यां भाषायां णकारस्य स्थाने नकारादेशो भवति। तलुनी, तरुणी ॥५॥

ष्टस्य सटः ॥६॥

मनोरमा

पैशाच्यां भाषायां ष्ट इत्यस्य स्थाने सट इत्ययमादेशो भवति। कसटं मम वट्टइ। कष्टं मम वर्त्तते ॥६॥

स्नस्य सनः ॥७॥

मनोरमा

पैशाच्यां भाषायां स्न इत्यस्य स्थाने सन इत्ययमादेशो भवति। सनानं, सनेह। स्नान। स्नेह ॥७॥

र्य्यस्य रिअः ॥८॥

मनोरमा

पैशाच्यां भाषायां र्य्य इत्यस्य स्थाने रिअ इत्ययमादेशो भवति। भारिआ, भार्य्या ॥८॥

ज्ञस्य ञ्ञः ॥९॥

मनोरमा

पैशाच्यां भाषायां ज्ञ इत्यस्य स्थाने ञ्ञ इत्ययमादेशो भवति। विञ्ञातो। सव्वञ्ञो। विज्ञात। सर्वज्ञ ॥९॥

कन्यायां न्यस्य ॥१०॥

मनोरमा

पैशाच्यां भाषायां कन्याशब्दे न्यस्य स्थाने ञ्ञ इत्ययमादेशो भवति। कञ्ञा ॥१०॥

ज्ज च्च ॥११॥

मनोरमा

पैशाच्यां भाषायां ज्जशब्दस्य शौरसेनीसाधितस्य च्च इत्ययमादेशो भवति। कच्चं। कार्य्यम् ॥११॥

राज्ञो राचि टा-ङसि-ङस्-ङिषु वा ॥१२॥

मनोरमा

पैशाच्यां भाषायां 'राजन्'शब्दस्य टा ङसि ङस् ङि इत्येतेषु परतो राचि इत्ययमादेशो वा भवति। राचिना, रञ्ञा। राचिनो, रञ्ञो। राचिनि, रञ्ञि। एतेषु किम्? राचा। राचानं। रञ्ञो ॥१२॥

क्त्वस्तून ॥१३॥

मनोरमा

पैशाच्यां भाषायां क्त्वाप्रत्ययस्य स्थाने तून इत्ययमादेशो भवति। दातून। कातून। घेत्तून ॥१३॥

हृदयस्य हिअअकं ॥१४॥

मनोरमा

पैशाच्यां भाषायां हृदयशब्दस्य हिअअकं निपात्यते। हिअअकं हरसि मे तलुनि ॥१४॥

॥ इति वररुचिकृते प्राकृतप्रकाशे पैशाचिको नाम दशमः परिच्छेदः॥

॥ अथैकादशः परिच्छेदः॥

❀❀❀

मागधी ॥१॥

मनोरमा

मगधानां भाषा मागधी। लक्ष्यलक्षणाभ्यां स्फुटीक्रियते ॥१॥

प्रकृतिः शौरसेनी ॥२॥

मनोरमा

अस्या मागध्याः प्रकृतिः शौरसेनीति वेदितव्यम् ॥२॥

षसोः शः ॥३॥

मनोरमा

मागध्यां भाषायां षकारसकारयोः शकारो भवति। माशे। विलाशे। माषः। विलासः ॥३॥

जो यः ॥४॥

मनोरमा

मागध्यां जकारस्य यकारो भवति। यायदे। जायते ॥४॥

चवर्गस्य स्पष्टता तथोच्चारणः ॥५॥

मनोरमा

मागध्यां चवर्गो यथा स्पष्टस्तथोच्चारणो भवति। पलिचए। गहिदछले। वियले। णिझले। परिचयः। गहीतछलः। विजलः। निर्झरः ॥५॥

हृदयस्य हडक्कः ॥६॥

मनोरमा

मागध्यां हृदयशब्दस्य स्थाने हडक्को भवति। हडक्के आदले मम। हृदये आदरो मम ॥६॥

र्यजयोर्य्यः ॥७॥

मनोरमा

मागध्यां र्यकार-र्जकारयोः स्थाने य्यो भवति। कय्ये। दुय्यणे। कार्य्यम्। दुर्ज्जनः ॥७॥

क्षस्य स्कः ॥८॥

मनोरमा

मागध्यां क्षस्य स्थाने स्ककारो भवति। लस्कशे। दस्के। राक्षसः। दक्षः ॥८॥

अस्मदः सौ हके हगे अहके ॥९॥

मनोरमा

मागध्याम् अस्मदः स्थाने सौ परतो हके हगे अहके इत्येत आदेशा भवन्ति। हके, हगे, अहके भणामि। अहं भणामि ॥९॥

अत इदेतौ लुक् च ॥१०॥

मनोरमा

सावित्यनुवर्त्तते। मागध्याम् अकारान्ताच्छब्दात् सौ परत इकार-एकारौ भवतः। पक्षे लोपश्च। एशि लाआ। एशे पुलिशे। एष राजा। एष पुरुषः ॥१०॥

क्तान्तादुश्च ॥११॥

मनोरमा

क्त-प्रत्ययान्ताच्छब्दात् सौ परत उकारश्च भवति। चकारादिदेतौ लुक् च। हशिदु। हशिदि। हशिदे। हशिद। हसितः ॥११॥

ङसो हो वा दीर्घश्च ॥१२॥

मनोरमा

मागध्यां भाषायां ङसः षष्ठ्यैकवचनस्य स्थाने हकारादेशो वा भवति। तत्संयोगे च दीर्घत्वम्। पुलिशाह धणे। पुहिशश्श धणे। पुरुषस्य धनम् ॥१२॥

अदीर्घः सम्बुद्धौ ॥१३॥

मनोरमा

अदन्तादित्येव। मागध्याम् अदन्ताच्छब्दादकारो दीर्घो भवति सम्बुद्धौ। पुलिशा आगच्छ। माणुशा आगच्छ। सम्बुद्धाविति किम् ? बम्हणश्श धणे। पुरुष आगच्छ। मानुष आगच्छ। ब्राह्मणस्य धनम् ॥१३॥

चिट्ठसा चिष्टः ॥१४॥

मनोरमा

मागध्यां भाषायां शौरसेनीसाधितस्य चिट्ठस्य स्थाने चिष्ठ इत्ययमादेशो भवति। पुलिशे चिष्ठादि, पुरुषस्तिष्ठति ॥१४॥

कृञ्मृङ्गमां क्तस्य ड्ः ॥१५॥

मनोरमा

डुकृञ् करणे। मृङ् प्राणत्यागे। गम्लृ गतौ। एतेषां क्तप्रत्ययस्य स्थाने डकारो भवति मागध्यां भाषायाम्। कडे । मडे। गडे। कृतः। मृतः। गतः ॥१५॥

क्त्वो दाणिः ॥१६॥

मनोरमा

मागध्यां भाषायां क्त्वाप्रत्ययस्य स्थाने दाणि इत्ययमादेशे भवति। शहिदाणि गडे। करिदाणि आअडे। सोट्वा (सहित्वा) गतः। कृत्वा आगतः ॥१६॥

शृगालस्य शिआला शिआले शिआलका ॥१७॥

मनोरमा

मागध्यां भाषायां शृगालशब्दस्य स्थाने शिआलादय आदेशा भवन्ति। शिआला आअच्छदि। शिआले आअच्छदि। शिआलके आअच्छदि। शृगाल आगच्छति ॥१७॥

॥ इति महामुनिवररुचिकृते प्राकृतप्रकाशे मागध्याख्यो नामैकादशः परिच्छेदः ॥

द्वितीयं परिशिष्टम्

[२]

भाषानुवादः

प्रयोगसिद्धिश्च

* श्रीगणेशाय नमः *

प्राकृत-प्रकाश

प्रथम परिच्छेद

स्वरविधि

[इस परिच्छेद में संस्कृत के स्वरों का प्राकृत में किस प्रकार परिवर्तन होता है – इसका पूरा विवरण दिया गया है। परिच्छेद में पूरी क्रमिक व्यवस्था है। फलतः अकार से आरम्भ कर औकार तक स्वरों के स्थान पर जायमान परिवर्तनों का व्यवस्थित विवरण है। कहने की आवश्यकता नहीं है कि स्वर के स्थान पर परिवर्तन में अन्य स्वर आता है। इसका पूरा विवरण परिच्छेद के अन्त में दिया जायेगा।]

१. आदेरतः॥१॥

इस परिच्छेद के नौवें सूत्र तक जितने परिवर्तन होंगे, वे किसी पद के आदि में ही होने वाले अकार के ही स्थान में होते हैं, अन्य किसी स्वर के स्थान पर नहीं। इस सूत्र के 'आदेः' पद का सम्बन्ध परिच्छेद के प्रत्येक सूत्र के साथ समझना चाहिये। अतएव नौवें सूत्र से आगे के भी परिवर्तन पद के आदि में ही रहने वाले स्वर के स्थान में होते हैं।

२. आ समृद्ध्यादिषु वा॥२॥

समृद्धि आदि शब्दों के आदिम अकार को विकल्प से आकार होता है, अर्थात् यह आवश्यक नियम नहीं है कि आकार हो ही जाय। कभी आकार होता है, कभी नहीं भी होता है। यथा **समृद्धि** – सामिद्धी या समिद्धी (ऋकार के स्थान में इकार आदेश हुआ, सू० २८; दकार का लोप सू० ९३; धकार का द्वित्व सू० १४२; अनन्तर पहले धकार के स्थान में दकार हुआ सू० १४३)।

प्रकटम् = पाअडं, पअडं (रेफलोप सू० ९५; कलोप सू० ४६; ट = ड सू० ६४)।

अभिजातिः = आहिजाई, अहिजाई (भ = ह सू० ७२; तलोप सू० ४६; प्रथमा के एकवचन में इकार = ईकार सू० २०९)।

मनस्विनी = माणंसिणी, मणंसिणी (न = ण सू० ८७; वलोप सू० ९५; अनुस्वार का आगम सू० १७३)।

प्रतिपद् = पाडिवआ, पडिवआ (रेफलोप सू० ९५; त = ड सू० ५२; प = व सू० ५९, दकार = आ सू० १६५)।

सदक्षम् = सारिच्छं, सरिच्छं (ऋ = रि सू० ३१; दलोप सू० ४६; क्ष = छ सू० १२२)।

[1]**प्रतिसिद्धि =** पाडिसिद्धी, पडिसिद्धी (त = ड सू० ५२; ष = स सू० ८८)।

प्रसुप्तम् = पासुत्तं, पसुत्तं (रेफलोप सू० ९५)। **प्रसिद्धिः =** पासिद्धी, पसिद्धी। **अश्वः =** आसो (श = स सू० ८८; वलोप सू० ९५) या अस्सो (सकार का द्वित्व सू० १४२)।

टिप्पणी – यह गण सीमाबद्ध नहीं है। और भी अनेक शब्द जिनका रूप पूर्वोक्त शब्दों के साथ मिलता होगा, इस गण में सम्मिलित कर लिये जा सकते हैं। सदानन्द के अनुसार इस सूत्र से कहीं-कहीं नित्य आकार आदेश हो सकता है, यथा – **श्वश्रूः =** सासू, **वर्षशतम् =** वाससानं; **वर्षारात्रम् =** वासारत्तं; **प्रस्विन्नः =** पासिणो।

३. इदीषत् पक्वस्वप्नवेतसव्यजनमृदङ्गाङ्गारेषु ॥ ३ ॥

ईषत् (थोड़ा), पक्व, स्वप्न, वेतस, व्यजन, मृदङ्ग तथा अङ्गार शब्दों के आदिम अकार के स्थान में इकार आदेश होता है। यथा [2]**ईषत् =** ईसि (ष = स सू० ८८; तलोप सू० १६४, सकार के अकार को इसी सूत्र से रकार हो गया)।

पक्वम् = पिक्कं (वलोप सू० ९५, कद्वित्व सू० १४२)।

स्वप्नः = सिविणो (वलोप सू० ५९; पकार तथा नकार अलग-अलग हो जायँगे। तथा प = पि सू० १५४; प = व सू० ५९)।

वेतसः = वेडिसो (त = ड सू० ५२)। **व्यजनः =** विंजणो (यकारलोप सू० ९४)।

---

१. किसी पुस्तक में 'प्रतिस्पर्धी' पाठ मिलता है; उसके भी पडिसिद्धी और पाडिसिद्धी रूप बनेंगे। स्य = विशेषता यह है कि सू० १२९ से स्य को सि आदेश हो जायगा।

२. कोई-कोई ईषत् शब्द के ईकार को भी ह्रस्व कर 'इसि' रूप मानते हैं; परन्तु हेमचन्द्र की राय में 'ईसि' रूप ही युक्त है। कालिदास ने भी 'ईसि' का ही प्रयोग किया है –

ईसीसि चुम्बिआइं भमरेहिं सुउमारकेसरसितारं।
ओदंसयन्ति दअमाणा पमदाओ सिरीसकुसुमाइं॥

(शकुन्तला, १ अंक)

मृदङ्गः = मुइङ्गो (ऋ=इ सू० २८; दलोप सू० ४६, तथा अवशिष्ट अकार को इकार इसी सूत्र से आदेश हुआ)। [1]अङ्गारः = इङ्गालो।

४. लोपोऽरण्ये ॥४॥

'अरण्य' शब्द के आदिम अकार को लोप होता है। यथा **अरण्यं** = रण्णम्[2] (यलोप सू० ९४; णद्वित्व सू० १४२)।

५. ए शय्यादिषु ॥५॥

शय्या आदि शब्दों के आदि वाले अकार के स्थान में एकार होता है। यथा **शय्या** = सेज्जा (य = ज सू० ७६)।

सौन्दर्यम् = सुन्देरं (औ = उ सू० ४१; अ=ए सू० ५, र्य = र सू० ११०)।

उत्करः = उक्केरो (तलोप सू० ९३, कद्वित्व सू० १४२)।

आश्चर्यम् = अच्छेरं (श्च = छ सू० १३२, र्य = र सू० ११०, आ = अ सू० १५८)।

पर्यन्तम् = परेन्तं (अ = ए सू० ५, र्य =र सू० ११०)।

त्रयोदश = तेरह (रेफलोप सू० ९५ यलोप सू० ४६, ओलोप सू० १५८, द = र सू० ५८; श = ह ८९; तकार के अकार को इसी सूत्र से एकार)। **वल्ली =** वेल्ली।

६. ओ बदरो देन ॥६॥

बदर (बैर का फल) शब्द के दकार के साथ अकार के स्थान में ओकार आदेश होता है। **बदरम् =** बोरं।

७. लवणनवमल्लिकयोर्वेन ॥७॥

लवण तथा नवमल्लिका शब्दों में वकार के साथ आदिम अकार के स्थान में ओकार होता है। यथा **लवणम् =** लोणं; **नवमल्लिका =** णोमल्लिआ (कलोप सू० ४६)।

८. मयूरमयूखयोर्व्वा वा ॥८॥

मयूर तथा मयूख शब्दों में 'यू' के साथ आदिम अकार को विकल्प से ओत्व

---

१. प्राकृत भाषा के शब्द होने पर भी कालान्तर में 'इङ्गाल' का प्रयोग संस्कृत साहित्य में भी होने लगा। श्रीहर्ष ने अपने नैषधचरित महाकाव्य में अंगार के बदले इसी शब्द का प्रयोग किया है–

स्फुरद्धनुर्निस्वनतद्घनाशुगप्रगल्भवृष्टिव्ययितस्य संगरे।
निजस्य तेजःशिखिनः परश्शता वितेनुरिङ्गालमिवायशः परे॥ (१ सर्ग, ९ श्लोक)

२. भोजपुरी में इस शब्द का प्रयोग मिलता है– रनवन। तुलना कीजिए 'रहिले त रन वन, खाईलें मकोय'। (भोजपुरी कहावत)

होता है। यथा **मयूरः** = मोरो, मऊरो (यलोप सू० ४६); **मयूखो** = मोहो, मऊहो (ख = ह सू० ७२)।

९. चतुर्थीचतुर्दश्योस्तुना॥९॥

चतुर्थी तथा चतुर्दशी शब्दों में 'तु' के साथ आदिम अकार के स्थान में ओकार होता है। यथा **चतुर्थी** = चोत्थी, चउत्थी (रेफलोप सू० ९५; थद्वित्व सू० १४२; प्रथम थकार = तकार, सू० १४३); **चतुर्दशी** = चोद्दही, चउद्दही।

१०. अदातो यथादिषु॥१०॥

'यथा' आदि शब्दों में पहले में होने वाले आकार के स्थान में विकल्प से अकार होता है। **यथा** = जह, जहा (थ = ह सू० ७२); **तथा** = तह, तहा।

प्रस्तारः = पत्थरो, पत्थारो (स्त = थ सू० १०४)।

प्राकृतम् = पउअं, पाउअं (ऋ = उ सू० २९; तलोप सू० ४६)।

तालवृन्तकम् = तलवेण्टअं, तालवेण्टअं (न्त = ण्ट सू० १३७)।

उत्खातम् = उक्खअं, उक्खाअं; **चामरम्** = चमरं, चामरं; **प्रहारः** = पहरो, पहारो।

चाटु = चडु, चाडु (ट = ड सू० ६४)।

दावाग्निः = दवग्गी, दावग्गी (नलोप सू० ९४, गद्वित्व सू० १४२)।

खादितम् = खइअं, खाइअं।

संस्थापितम् = सण्टविअं, सण्टाविजं (स्था = ठा सू० ३६१. प = व सू० ५९)।

हालिकः = हलिओ, हालिओ।

११. इत् सदादिषु॥११॥

सदा आदि शब्दों में आकार को विकल्प से इकार होता है। यथा, **सदा** = सइ, सआ; **तदा** = तइ, तआ; **यदा** = जइ, जआ।

१२. इत एत् पिण्डसमेषु॥१२॥

पिण्ड शब्द के समान अन्य शब्दों में भी युक्तवर्ण के पहले होने वाले इकार के स्थान में एकार विकल्प से आदेश होता है। यथा **पिण्डम्** = पेण्डं, पिण्डं।

निद्रा = णेद्दा, णिद्दा (रेफलोप सू० ९५, दकारद्वित्व सू० १४२)।

सिन्दूरम् = सेन्दूरं, सिन्दूरम्।

धम्मिल्लम् (केश) = धम्मेल्लं, धम्मिल्लम्।

चिह्नम् = चेन्धं, चिन्धं (ह्न = न्ध सू० १२६)।

विष्णुः = वेण्हू, विण्हू (ष्ण = ण्ह सू० १२५)।

पिष्टम् (पीसा हुआ) = पेट्ठं, पिट्ठं (ष्ट = ठ सू० १०२)।

१३. अत् पथि-हरिद्रा-पृथिवीषु ॥१३॥

पथिन्, हरिद्रा, पृथिवी शब्दों के आदि इकार को अकार होता है। **पथिन्** (कर्ता) = पहो; **हरिद्रा** = हलद्दा (रेफ = ल सू० ७५); **पृथिवी** = पुहवी (ऋ = उ सू० २९; थ = ह सू० ७२)।

१४. इतेस्तः पदादेः ॥१४॥

पद के आदि में स्थित 'इति' शब्द के तकार के आगे होने वाले इकार को अकार हो जाता है। यथा – **इति पश्यत अन्यथावचनम्** = इअ उअह अण्णहवअणम्। (दस के स्थान पर उअ आदेश होता है)।

इति विकसन्त्यः चिरम् = इअ विअसन्तीउ चिरम्।

यह नियम पदादि में ही होता है, अतएव 'प्रियः इति' के स्थान पर 'पिओत्ति' हुआ, इकार का अकार नहीं हुआ, बल्कि सू० १५९ से सन्धि में इकार का लोप हो गया।

१५. उदिक्षुवृश्चिकयोः ॥१५॥

इक्षु तथा वृश्चिक शब्दों के आदिम इकार को उकार होता है। यथा **इक्षु** = उच्छू (क्ष = छ सू० १२२); **वृश्चिकः** = विच्छुओ। (ऋ = इ सू० २८, श्च = च्छ सू० १३२)।

१६. ओ च द्विधा कृञः ॥१६॥

कृञ् **धातु** के साथ प्रयुक्त होने पर 'द्विधा' शब्द के आदि इकार को ओकार तथा उकार भी होता है। यथा **द्विधाकृतम्** = दोहाइअं, दुहाइअं (वलोप सू० ९५, कलोप सू० ४६, ऋ = इ सू० २८); द्विधाक्रियते = दोहाइज्जइ, दुहाइज्जइ।

१७. ईत्[1] सिंहजिह्वयोश्च ॥१७॥

सिंह तथा जिह्वा शब्द के आदि इकार को दीर्घ ईकार होता है। यथा **सिंहः** = सीहो; **जिह्वा** = जीहा।

---

१. इस सूत्र के आधारभूत नियम पर ध्यान देना आवश्यक है। प्राकृत भाषा का यह मान्य नियम है कि संस्कृत स्वरों के रूप का परिवर्तन होता है, परन्तु स्वरों के गुरुत्व का रक्षण किया जाता है। यदि मूल संस्कृत का स्वर गुरु है, तो प्राकृत में परिवर्तन के समय उस गुरुत्व की रक्षा

सूत्र में चकार से अन्य शब्दों का भी ग्रहण होता है। यथा **विश्वस्तः =** वीसत्थो, **विश्रम्भः** = वीसम्भो।

१७ (क). इवे लोपः[1] ॥ १७ क ॥

इव शब्द के इकार का लोप होता है। यथा राजा इव = राजाव, रुद्धः इव = रुद्धोव; कथमिव = कहं व।

१८. इदीतः पानीयादिषु ॥ १८ ॥

पानीय आदि शब्दों के आदि के दीर्घ ईकार को ह्रस्व इकार होता है। यथा **पानीयम् =** पाणिअं (यलोप सू० ४६); **अलीकम्** = अलिअं; **व्यलीकम्** = वलिअं; **तदानीम्** = तआणिं; **करीषः** = करिसो; **द्वितीयम्** = दुइअं, **तृतीयम्** = तइअं; (ऋ = अ)। गभीरम् = गहिरम्।

१९. एन्नीडापीडकीदृशेदृशेषु ॥ १९ ॥

नीड, आपीड, कीदृश, ईदृश शब्दों में ईकार को एकार होता है। यथा **नीडम्** = नेड्डं (डकार का द्वित्व सू० १४४); **आपीडः =** आमेलो (प = म सू० ६०, ड = ल सू० ६७); **कीदृशः =** केरिसो (ऋ = रि सू० ३१, दलोप सू० ४६); **ईदृशः =** एरिसो।

२०. उत ओत्तुण्डरूपेषु ॥ २० ॥

'तुण्ड' शब्द के समान अन्य शब्दों में भी संयुक्ताक्षर के पहले होने वाले उकार को ओकार होता है। **तुण्डम् =** तोण्डं; **मुक्ता =** मोत्ता; **पुष्करः =** पोक्खरो (ष्क = ख सू० १२१); **पुस्तकः =** पोत्थओ (स्त = थ सू० १०४); **लुब्धकः** – लोद्धओ; **कुट्टिमम् =** कोट्टिमं।

यहाँ रूप शब्द से संयोगपरक शब्दों का ग्रहण किया जाता है।

की जाती है। इसके लिए ह्रस्व स्वर को दीर्घ करना पड़े तो इसे मान्यता दी जाती है। 'जिह्वा' का इस सूत्र से 'जीहा' होता है। संयोगाद्य होने से 'जि' गुरु है, परन्तु 'सर्वत्र लवराम्' सूत्र के द्वारा 'जिह्वा' में वकार का लोप हो जाने पर केवल हकार बच जाता है।

अब 'जि' का इकार कथमपि गुरु नहीं है। अतः इसके मूल गुरुत्व की रक्षा इकार को दीर्घ करने पर ही सिद्ध हो सकती है। फलतः इकार को दीर्घ कर देने पर 'जीहा' बनता है। अनेक सूत्र उसी नियम के पालन के लिए रचे गये हैं।

१. कात्यायन की सम्मतियों में ही यह सूत्र है। अन्यत्र यह उपलब्ध नहीं होता।

२१. उलूखले ल्वा वा ॥२१॥

उलूखल शब्द में 'लू' के साथ उकार के स्थान में विकल्प से ओकार होता है। यथा **उलूखलम् =** ओखलं, उलूहलम्।

२२. अन्मुकुटादिषु ॥२२॥

मुकुटादिक शब्दों के पहले होने वाले उकार के स्थान में अकार होता है। **मुकुटम्** = मउडं (कलोप सू० ४६)। **मुकुलम्** = मउलं; **गुरुकम्** = गरुअं; **गुर्वी** = गरुई; (सू० १५७ से रेफ पृथक् हो जाता है तथा उसमें उकार का आगम होता है)।

युधिष्ठिरः = जहिट्ठिलो (ध = ह सू० ७२, षलोप ९३, ठकारद्वित्व सू० १४२, पूर्व ठ = ड सू० १४३)।

सौकुमार्यम् = सोअमल्लं (औ = ओ सू० ४१, र्य = ल सू० ११३, आ = अ सू० १५९), **उपरि** = अवरि।

२३. इत् पुरुषे रोः[1] ॥२३॥

पुरुष शब्द में रेफ से आगे होने वाले उकार को इकार होता है। **पुरुषः** = पुरिसो।

२४. उदूतो मधूके ॥२४॥

मधूक शब्द के दीर्घ ऊकार को ह्रस्व उकार होता है। यथा **मधूकम्** = महुअं, (ध = ह सू० ५२, कपोल सू० ४६)।

२५. अद्दुकूले वा लस्य द्वित्वम् ॥२५॥

दुकूल शब्द के ऊकार को विकल्प से अकार होता है तथा उसके संयोग से लकार को द्वित्व भी होता है। यथा **दुकूलम्** = दुअल्लं, दुऊलम्।

ऊकार के स्थान में अकार आदेश होने पर ही लकार का द्वित्व होगा, अन्यथा नहीं।

२६. एन्नूपुरे ॥२६॥

नूपुर शब्द के ऊकार को एकार होता है। यथा **नूपुरम्** = नेउरं (पलोप सू० ४६)।

२७. ऋतोऽत् ॥२७॥

किसी पद के आदि में होने वाले ऋकार को अकार होता है। यथा **तृणं** के स्थान में तणं होता है। **घृणा** = घणा, **मृतम्** = मअं, **कृतम्** = कअं, **वृद्धो** = वड्ढो, **वृषभः** = वसहो (भ = ह सू० ७२)।

---

१. यद्यपि प्रथम सूत्र से 'आदेः' पद का अधिकार समस्त परिच्छेद में होता है, तथापि इस सूत्र में तथा १४ वें सूत्र में यह अनुवृत्ति नहीं जाती।

२८. इदृष्यादिषु ॥२८॥

ऋषि आदि शब्दों के आदिम ऋकार को इकार होता है। यथा **ऋषिः** = इसी; **वृषी** = विसी; **गृष्टिः** = गिट्ठी (ष्ट = ठ सू० १०२); **दृष्टिः** = दिट्ठी; **सृष्टिः** = सिट्ठी; **शृङ्गारः** = सिङ्गारो; **मृगाङ्कः** = मिअंको (गलोप सू० ४६, आकार सू० १५९ से ह्रस्व हो गया)। **भृङ्गः** = भिंगो। **भृङ्गारः** = भिङ्गारो (सुराही)। **हृदयम्** = हिअअं (द तथा यलोप सू० ४६)। **वितृष्णः** = विइण्हो (तलोप सू० ४६, ष्ण = ण्ह, सू० १२५)। **बृंहितम्** (बढ़ा हुआ) = विंहिअं। **कृशरः** = किसरो। **कृत्या** = किच्चा (त्य = च सू० ११९)। **वृश्चिकः** = विच्छुओ। **शृगालः** = शिआलो (गलोप सू० ४६)। **कृतिः** = किइ। **कृषिः** = किसी। **कृपा** = किवा (प = व, सू० ५९)।

२९. उदृत्वादिषु ॥२९॥

ऋतु आदि शब्दों के प्रथम ऋकार के स्थान में उकार आदेश होता है। यथा **ऋतुः** = उदू (त = द सू० ५१); **मृणालः** = मुणालो; **पृथिवी** = पुहवी; (इ = अ सू० १३); **प्रावृष्** = पाउसो; **वृन्दावनम्** = वुंदावणं; **प्रवृत्तिः** = पउत्ती; (रेफ लोप सू० ९५); **निवृत्तः** = णिउत्तो (वलोप सू० ४६); **संवृतः** = संबुदं, **निर्वृत्तम्** = णिव्वुदं; **वृत्तान्तः** = वुत्तंतो (आ = अ, सू० १५९) **परभृतः** = परहुओ; **मातृकः** = माउओ; **जामातृकः** = जामाउओ; **भ्रातृकः** = भाउओ; **विवृत्तः** = विउदं।

३०. अयुक्तस्य रिः ॥३०॥

यदि पद का आदिम ऋकार किसी वर्ण के साथ संयुक्त न हो तो उसके स्थान में 'रि' हो जाता है। यथा **ऋणम्** = रिणं; **ऋक्षः** = रिच्छो (क्ष = छ, सू० १२२); **ऋद्धः** = रिद्धो। **ऋक्षः** = रिच्छो।

३१. क्वचिद् युक्तस्यापि ॥३१॥

कहीं-कहीं अन्य वर्णों से युक्त होने पर भी ऋकार को 'रि' होता है। **ईदृशः** = एरिसो (इ = ए सू० १९); **सदृशः** = सरिसो; **तादृशः** = तारिसो।

३२. वृक्षे वेन रुर्वा ॥३२॥

वृक्ष शब्द में वकार के साथ ऋकार को विकल्प से 'रु' होता है। यथा **वृक्षः** = रुक्खो (क्ष = ख सू० १२३); वच्छो (ऋ = अ सू० २७, क्ष = छ सू० १२२)।

इस सूत्र की विभाषा का नाम व्यवस्थित विभाषा है। अतः क्षकार के खत्व होने पर यह नियम नित्य ही लगता है; परन्तु जब क्षकार का छकार होता है, तब यह नियम नहीं लगता।

३३. लृतः क्लृप्त इलिः॥ ३३॥

क्लृप्त शब्द में लृकार को 'इलि' हो जाता है। यथा **क्लृप्तम्** = किलित्तं (पलोप सू० ९३)।

जहाँ-जहाँ संस्कृत-शब्दों में ऋकार या लृकार होगा, वहाँ पूर्व सूत्रों से उसका परिवर्तन हो जायेगा। अतः प्राकृत में इन स्वरवर्णों का अस्तित्व ही नहीं है।

३४. एत इद् वेदनादेवरयोः॥ ३४॥

वेदना तथा देवर शब्दों के एकार को इकार होता है। यथा **वेदना** = विअणा, **देवरः** = दिअर।

सूत्र में ३२ वें सूत्र से मण्डूकप्लुति न्याय से 'वा' पद की अनुवृत्ति आती है। अतः यह नियम वैकल्पिक भी माना जाता है, अतएव वेअणा तथा देअरो रूप भी बनते हैं।

३५. ऐत एत्॥ ३५॥

पद के आदिम ऐकार को एकार होता है। यथा **शैलः** = सेलो, **शैत्यम्** = सेच्चं (त्य = च सू० ११९); **ऐरावणः** = एरावणो, **कैलाशः** = केलासो, **त्रैलोक्यम्** = तेल्लोक्कम् (रेफ लोप सू० ९५, यलोप सू० ९४; लकार तथा ककार का द्वित्व सू० १०२)।

३६. दैत्यादिष्वइ॥ ३६॥

दैत्य आदिक शब्दों में ऐकार के स्थान पर 'अइ' आदेश होता है। यथा **दैत्यः** = दइच्चो (त्य = च सू० ११९); **चैत्रः** = चइत्तो। **भैरवः** = भइरवो, **स्वैरम्** = सइरं (वलोप सू० ९५)। **वैरम्** = वइरं। **वैदेशः** = वइदेशो। **वैदेहः** = वइदेहो। **कैतवः** = कइअवो (तलोप सू० ४६)। **वैशाखः** = वइसाहो (**ख** = ह सू० ७२)। **वैशिकः** = वइसिओ। **वैशम्पायनः** = वइसम्पाअणो (यलोप सू० ४६)।

सदानन्द की सम्मति में इन शब्दों में पहले सूत्र से ऐकार को एकार भी हो सकता है– **चैत्रः** = चेत्तो।

३७. दैवे वा॥ ३७॥

दैव शब्द के ऐकार को विकल्प से 'अइ' आदेश होता है। **दैवम्** = दइवं, देव्वं।

जहाँ 'अइ' आदेश नहीं होगा, वहाँ सू० १४४ से नीडादिगण में पठित होने के कारण व को द्वित्व हो जाता है।

३८. इत् सैन्धवे ॥ ३८॥

सैन्धव के ऐकार को इकार होता है। यथा **सैन्धवम्** = सिन्धवं।

३९. ईद् धैर्ये ॥ ३९॥

धैर्य शब्द के ऐकार को ईकार आदेश होता है। यथा **धैर्यम्** = धीरं।

४०. ओतोऽद् वा प्रकोष्ठे कस्य व ॥ ४०॥

प्रकोष्ठ शब्द के ओकार के स्थान में विकल्प से अकार होता है। उसके संयोग से ककार को वकार भी हो जाता है। यथा **प्रकोष्ठः** = पवट्ठो (षकार लोप सू० ७३, ठकार द्वित्व सू० १४२) पओट्ठो।

४१. औत ओत् ॥ ४१॥

पद के आदि में होने वाले औकार को ओकार होता है। यथा **कौमुदी** = कोमुई (दलोप सू० ४६); **यौवनम्** = जोव्वणं (य= ज सू० ७६, वद्वित्व सू० १४४); **कौस्तुभः** = कोत्थुहो (स्त = थ सू० १०४); कौशाम्बी = कोसम्बी।

४२. पौरादिष्वउ ॥ ४२॥

पौर आदि शब्दों में ओकार को 'अउ' आदेश होता है। **पौरः** = पउरो; **कौरवः** = कउरओ; **पौरुषः** = पउरुसो। यह गण आकृतिगण है। कौशल शब्द में विकल्प से यह आदेश होता है। यथा **कौशलो** = कोसलो, कउसलो।

४३. आच्च गौरवे ॥ ४३॥

गौरव शब्द के औकर के स्थान में आकार तथा 'अउ' ये दोनों आदेश होते हैं। यथा **गौरवम्** = गारवं, गउरवं।

४४. उत् सौन्दर्यादिषु ॥ ४४॥

सौन्दर्यादि शब्दों में औकार को उकार होता है। यथा **सौन्दर्यम्** = सुन्देरं; **मौञ्जायनः** = मुञ्जाअणो; **शौण्डः** = सुण्डो; **कौक्षेयकः** = कुक्खेअओ; **दौवारिकः** = दुव्वारिओ। (वद्वित्व सू० १४४)।

सारांश

(१) प्राकृत भाषा में ऋ ॠ, ॡ, ऐ तथा औ नहीं पाये जाते। ये परिवर्तित होकर
किसी दूसरे स्वर का रूप धारण कर लेते हैं। इनको छोड़कर और जितने स्वर संस्कृत
की वर्णमाला में पाये जाते हैं, उन सबका प्राकृत-भाषा में भी अस्तित्व है।

(२) ऋकार के परिवर्तन –

(क) यदि किसी पद का आरम्भ ऋकार से होता है, तो उस 'ऋ' के स्थान में
'रि' हो जाता है। यथा **रिणम्।** परन्तु कभी-कभी अन्य वर्ण के साथ मिले रहने पर
भी ऋकार के स्थान में 'रि' हो जाया करता है, यथा **ईदृशम्** = एरिसं।

(ख) पद के आदिम ऋकार के स्थान में कहीं अकार, कहीं इकार तथा कहीं
उकार हो जाया करता है। यथा **तृणम्** = तणं; **शृङ्गारः** = सिंगारो; **ऋतुः** = उदू।

(३) 'क्लृप्त' शब्द के लृकार के स्थान में 'इलि' हो जाता है। **किलित्तं।**

(४) संस्कृत-पदों के ऐकार के स्थान में प्राकृत में अधिकतर एकार अथवा 'अइ'
हो जाते हैं, परन्तु कहीं-कहीं पर इ अथवा ई भी हो जाता है। **शैलः** = सेलो। **दैत्यः** =
दइच्चो। **धैर्यम्** = धीरं। **सैन्धवम्** = सिन्धवं।

(५) इसी प्रकार संस्कृत शब्दों के औकार के स्थान पर प्राकृत में अधिकतर
'ओ' होता है, परन्तु कहीं-कहीं 'अउ' या केवल 'उकार' भी हो जाया करता है। यथा
कौमुदी = कोमुई; **पौरः** = पउरो; **सौन्दर्यम्** = सुन्देरं।

ऊपर जितने परिवर्तन बतलाये गये हैं, वे उन्हीं पाँचों स्वरों के स्थान पर होते
हैं, जिनका प्राकृत में अस्तित्व ही नहीं है। इसके अतिरिक्त संस्कृत के अन्य स्वरों के
भी प्राकृत में परिवर्तित होते समय अनेक परिवर्तन दृष्टिगोचर होते हैं। इन्हीं
परिवर्तनों का हाल थोड़े में दिया जाता है।

(६) अकार के स्थान में कहीं आकार, कहीं इकार तथा कहीं एकार आदेश
हुआ करता है। **अश्वः** = आसो। **अङ्गारः** = इंगालो। **शय्या** = सेज्जा।

(७) आकार की जगह कहीं अकार तथा कहीं इकार हो जाता है, **यथा** =
जह। **सदा** = सइ।

(८) इसी प्रकार इकार के स्थान में अ, ई अथवा उ हो जाता करता है, परन्तु जिन शब्दों का अन्तिम भाग संयुक्त अक्षरों से बना हुआ है, उनमें युक्त वर्णों से पहले का इकार अवश्य ही एकार हो जाता है, यथा **हरिद्रा** = हलद्दा; **इक्षु** = उच्चू; **सिंहः** = सीहो; **पिण्डः** = पेण्डं।

(९) दीर्घ ईकार के स्थान में कहीं एकार होता है और कहीं वह ह्रस्व हो जाया करता है। **नीडम्** = नेड्डं; **पानीयम्** = पाणिअं।

(१०) ह्रस्व उकार की जगह कहीं आकार और कहीं इकार हो जाता है, परन्तु संयुक्त अक्षरों में पहले का उकार नियम से ओकार होता है। **मुकुलः** = मउलो (हिन्दी मउर); **पुरुषः** = पुरिसो; **मुक्ता** = मोत्ता (हि० मोती)।

(११) दीर्घ ऊकार कभी ह्रस्व उ, अ अथवा एकार में परिणत होता है। **मधूकम्** = महुअं (हि० महुआ); **दुकूलम्** = दुअल्लं; **नूपुरम्** = णेउरं।

॥ इति प्रथम परिच्छेद ॥

॥ स्वरविधि समाप्त ॥

द्वितीय परिच्छेद

अयुक्त-व्यञ्जनविधि

४५. अयुक्तस्यानादौ ॥१॥

यह अधिकार-सूत्र है। इसके आगे जितने नियम होंगे, वे आदि में स्थित न होने वाले असंयुक्त व्यञ्जन को होते हैं। 'अयुक्त' पद की अनुवृत्ति इस परिच्छेद के अन्त तक रहेगी; परन्तु 'अनादौ' की अनुवृत्ति केवल ७५ वें सूत्र तक होगी। सूत्र में 'अयुक्त' रहने से 'अग्धो' तथा 'अक्को' में संयुक्त अक्षरों का लोप नहीं हो सका। (४६ वें सू०) 'अनादौ' पद रहने से 'कमल' के आदि स्थित ककार को लोप नहीं हुआ।

४६. क ग च ज त द प य वां प्रायो लोपः ॥२॥

किसी अक्षर के साथ युक्त तथा आदि में न रहने वाले क ग च ज त द प य तथा व इन नव अक्षरों का प्रायः लोप होता है।

(१) ककार का लोप – **मुकुलः** = मउलो, **नकुलः** = नउलो।

(२) गलोप – **सागरः** = साअरो; **नगरम्** = णअरं।

(३) चलोप – **वचनम्** = वअणं; **सूची** = सूई।

(४) जलोप – **गजः** = गओ; **रजतम्** = रअदं; (त = द सू०)।

(५) तलोप – **कृतम्** = कअं (ऋ = अ सू० २७); **वितानम्** = विआणं।

(६) दलोप – **गदा** = गआ; **मदः** = मओ।

(७) पलोप – **कपिः** = कई; **विपुलं** = विउलं; **सुपुरुषः** = सुउरिसो (उ = इ सू० २३)।

टिप्पणी – समास के उत्तर पद अन्तिम पद का आदि वर्ण भी पदादि माना जाता है। इस नियम के अनुसार 'सुपुरुष' जैसे समस्त पदों के पदादिभूत पकार का लोप होना उचित नहीं, परन्तु वृत्तिकार भामह यहाँ पकार के लोप से यह सूचित करना चाहते हैं कि उत्तरपद का आदि वर्ण अनादि माना जाना चाहिये।

(८) यलोप – **वायुना** = वाउणा; **नयनम्** = णअणं।

(९) वलोप – **जीवम्** = जीअं; **दिवसः** = दिअहो। (स = ह सू० ९१)।

विशेष – सूत्र में 'प्रायः' ग्रहण करने से यह नियम उन स्थानों में प्रयुक्त नहीं होगा, जहाँ श्रुतिसुखद वर्ण हैं, अर्थात् जहाँ वर्ण के लोप हो जाने पर श्रुतिसुखत्व को हानि पहुँचने की आशंका है, अर्थात् लोप होने पर वह पद सुनने में कर्कश मालूम होने लगे। वहाँ यह सूत्र नहीं लग सकता। यथा –

सुकुसुमम् = सुकुसुमं; **प्रियगमनम्** = पिअगगणं। **सचापम्** = सचावं; **अपजलम्** = अवजलं; **अतुलः** = अतुलो।

इन पदों में श्रुतिसुखद होने के कारण क, ग आदि वर्णों का लोप नहीं हुआ। संयुक्त वर्णों का लोप नहीं होता। यथा – **अर्कः** = अक्को (रेफलोप सू० ९५; कद्वित्व) **मार्गः** = मग्गो।

आदि वर्ण का भी लोप नहीं होता। यथा **कालः** = कालो; **गन्धः** = गन्धो।

४७. यमुनायां मस्य च ॥ ३॥

यमुना शब्द के मकार का लोप होता है। यमुना = जउणा (य = ज)।

४८. स्फटिक-निकष-चिकुरेषु कस्य हः॥४॥

स्फटिक, निकष तथा चिकुर – इन शब्दों के ककार को हकार होता है। यथा – **स्फटिकः** = फलिहो (सलोप सू० ९३, ट = ल सू० ६६); **निकषः** = णिहसो (ण = स सू० ८८); **चिकुरः** = चिहुरो।

सू० ४६ से होने वाले ककार के लोप का यह अपवाद है।

४९. शीकरे भः॥५॥

शीकर शब्द के ककार को 'भ' होता है। **शीकरः** = सीभरो (श = स सू० ८८)।

५०. चन्द्रिकायां मः॥६॥

चन्द्रिका शब्द के ककार को मकार होता है। यथा **चन्द्रिका** = चंदिमा (रेफलोप सू० ९५, न = अनुस्वार, सू० १७०)।

५१. ऋत्वादिषु तो दः॥७॥

ऋतु आदि शब्दों के तकार के स्थान में दकार होता है। **ऋतुः** = उदू (ऋ = उ सू० २९); **रजतम्** = रअदं (जलोप सू० ४६)। **आगतः** = आअदो। **निर्वृत्तिः** = णिव्वुदी (रेफलोप सू० ९५; वद्वित्व, ऋ = उ सू० २९, इ दीर्घ सू० २०९)। **संवृतिः** = संवुदी (ऋ = उ सू० २९)। **सुकृतिः** = सुइदी (कलोप सू० ४६; उ = इ सू० २८)।

आकृतिः = आइदी । **हतः** = हदो । **संयतः** = संजदो । **विवृतम्** = विउदं । **संयातः** = संजादो । **सम्प्रति** = संपदि (म अनुस्वार सू० १००, रेफलोप सू० ९५) । **प्रतिपत्तिः** = पडिवद्दी (त = उ, सू० ५२) ।

५२. प्रतिवेतसपताकासु डः ॥ ८॥

'प्रति' उपसर्ग, वेतस तथा पताका शब्दों के तकार के स्थान में डकार होता है। यथा **प्रतिसरः** = पडिसरो; **प्रतिकूलः** = पडिकूलो; **वेतसः** = वेडिसो (अ = इ सू० ३); **पताका** = पडाआ ।

५३. वसतिभरतयोर्हः ॥ ९॥

वसति और भरत शब्द के तकार को हकार होता है । यथा **वसतिः** = वसही; **भरतः** = भरहो ।

५४. गर्भिते णः ॥१०॥

गर्भित शब्द के तकार के स्थान में णकार होता है। यथा **गर्भितम्** = गब्भिणं (रेफलोप सू० ९५; भद्वित्व सू० १४२, पूर्व भ = ब)।

५५. ऐरावते च ॥ ११॥

ऐरावत शब्द के तकार को णकार होता । यथा **एरावणो** (ऐ = ए सू० ३५)।

५६. प्रदीप्त-कदम्ब-दोहदेषु दो लः ॥ १२॥

इन शब्दों के दकार को लकार होता है । यथा **प्रदीप्तम्** = पलित्तं (रेफलोप सू० ९५; यकारलोप सू० ९३; ई = इ सू० १५९) । **कदम्बम्** = कलम्बं; **दोहदः** = दोहलो ।

५७. गद्गदे रः ॥ १३॥

गद्गद शब्द के दकार के स्थान में रेफ होता है। यथा **गद्गदः** = गग्गरो (दकारलोप सू० ९३; गकारद्वित्व सू० १४२) ।

५८. संख्यायाञ्च ॥ १४॥

संख्यावाची शब्दों के दकार को रेफ होता है । यथा **एकादशः** = एआरह (कलोप सू० ४६; श = ह सू० ८९) **द्वादश** = बारह (दलोप सू० ९३) **त्रयोदश** = तेरह ।

यह नियम असंयुक्त दकार के ही लिये है । **चतुर्दश** = चउद्दह । संयुक्त होने से यहाँ रेफादेश नहीं हो सका ।

५९. पो वः ॥ १५॥

अयुक्त और अनादि स्थित पकार को वकार होता है। यथा **शापः** = सावो; **शपथः** = सवहो (थ = ह सू० ७२); **उलपः** = उलवो; **उपसर्गः** = उवसग्गो ।

